CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकावृत्तिवैयाकरणसिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम्

डॉ. महेशदत्तशर्मा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

THE KĀŚIKĀVṚTTI
AND
THE VAIYĀKARAṆASIDDHĀNTAKAUMUDĪ
A COMPARATIVE STUDY

Dr. MAHESH DUTT SHARMA
M.A., Ph. D.

Centre of Advanced Study in Sanskrit
University of Poona.
POONA-7.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकावृत्तिवैयाकरणसिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम्

डॉ० महेशदत्तशर्मा
एम० ए०, पीएच० डी०

डॉ० महेश दत्त शर्मा
व्याख्याता संस्कृत-विभाग
ने०से० शिवनारायण दास कालेज
बदायूँ (उ० प्र०)

संस्कृत-प्रगताध्ययन-केन्द्रम्,
पुण्यपत्तन-विश्वविद्यालयः,
पुण्यपत्तनम्-७.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशनार्थं भारतसर्वकारेण व्यरीक्रुतस्य धनस्यांशिकरूपेन साहाय्यं प्रदत्तम्

सर्वेऽधिकारा लेखकायत्ताः

जून, १९७४

मूल्यम् : ~~२२-००~~ संशोधितं मूल्यम् 30/-

मुद्रक : निरुपमा प्रिंटर्स, ५३३९ लड्डूघाटी, पहाड़गंज, नई दिल्ली-११००५५

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राक्कथनम्

पुण्यपत्तन-विश्वविद्यालयेन 'पीएच्. डी.' इत्युपाधिकृते स्वीकृतोऽयं मे शोध-प्रबन्धः। एतदर्थं विश्वविद्यालयः सर्वदा मे सम्मानार्हः।

पुण्यपत्तन-विश्वविद्यालय-संस्कृत-प्रगताध्ययन-केन्द्रसंचालकैः परमोदारचेतोभिः डॉ. रा. ना. दाण्डेकरमहोदयैः संशोधनकार्येऽहं प्रचोदितः सविशेषं प्रोत्साहितश्च। तेषां कृपाकटाक्षैरनुगृहीतस्तदेव शरणं मन्यमानः संशोधनप्रबन्धप्रारम्भमकरवम्। अतस्तेषां नाम स्मृत्वा हार्दिकीमधमर्णतां श्रद्धां च प्रकटयामि।

संस्कृतविभागाध्यक्षैरस्माकं गुरुवर्यैः डॉ. शिवरामदत्तात्रयजोशीमहोदयैर्महत्या सूक्ष्मेक्षिकया मम शोधप्रबन्धो न केवलं संशोधितः; परं तद्गतास्त्रुटीर्दूरीकृत्य पुनः पुनर्नव्यसरण्यनुसारेण मार्गदर्शनं कृत्वा महत्साहाय्यं कृतम्। संशोधनकार्येषु निरलसं बद्धपरिकराणां गुरूणामानृण्यं संपादयितुं शब्दाद ऋते न किञ्चन मत्समीपे वर्तते।

अस्मिन् शोधकर्मणि प्रधानाचार्यवर्यैः श्रीवासुदेवमिश्रशास्त्रिमहाभागैः (संस्कृत-महाविद्यालयः, गभाना, अलीगढ़) डॉ. श्रीनिवासमिश्र—प्रो. सोहनलालगौड-महोदयैः (धर्मसमाज-महाविद्यालयः, अलीगढ़) शुभाशिषा, आचार्य वि. प्र. लिमयेमहोदयैः डॉ. ग. वा. पळसुले—सु. ज्ञा. लददूमहाभागैः मुहुर्मुहुः सत्परामर्शेण, डॉ. गो. वि. देवस्थली—चि. ग. काशीकर—व. ग. राहूरकर—के. पां. जोग—पु. द. नवाथे—ग. उ. थिटे—प्र. पां. आपटे—महेन्द्रकुमारवर्म—महाभागैः श्रीउमेशचन्द्रशर्म—विष्णुप्रसादभट्ट—प्रमोदरंजनराय—अनन्तशरणतिवारी—महानुभावैः कुमारीलक्ष्मीमहोदयाभिश्च समये समये सत्प्रेरणया साधुवचनेन वा यत्साहाय्यं कृतं तदर्थं तेषामुपकारान् स्मरामि। डॉ. सिद्धनाथशुक्लमहाभागैः कुमारीआशालालामहोदयाभिश्च जर्मन्भाषातो यत् शोधपत्रद्वयं मदर्थमनूद्य मयि उपकारः कृतस्तत्कृतेऽपि कृतज्ञतां प्रकाशयामि।

भाण्डारकर-प्राच्यविद्या-संशोधन-मन्दिरस्थ-पुस्तकालयस्य विश्वविद्यालयस्य संस्कृतप्रगताध्ययनकेन्द्रस्थ-पुस्तकालयस्य च ग्रन्थपालैः समये समये विविधविषयकान् ग्रन्थान् प्रदाय यद् नितरां साहाय्यं कृतं तदर्थं तेषु धन्यवादान् वितरामि।

यद्यपि संस्कृतभाषामुद्रणकार्यं महत्कष्टं जनयति तथापि श्रीरामकिशनकौशिक-महोदयैर्येन समुचितविधिना प्रबन्धस्यास्य मुद्रणं कृतं तदर्थं ते साधुवादार्हाः सन्ति। प्रबन्धविषये विदुषां सम्मतयः सर्वदा स्वागतार्हाः।

विनीत :
महेशदत्तशर्मा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषय-सूची

प्रकरणानि	विषयाः	पृष्ठाङ्काः
	सङ्केताक्षराणि	क—ङ
	प्रस्तावना	i—x
प्रथमं प्रकरणम्		
	(क) व्याकरणशास्त्रे सूत्रशैली	१
	(ख) पाणिनिपरम्परायाः कालविभागः	४
	(ग) काशिकातः पूर्वं वृत्तिग्रन्थानां स्थितिः	१२
	(घ) काशिकावृत्तेः प्रणेतारौ	१६
	(ङ) काशिकाकृतोर्धर्मः	२७
	(च) काशिकावृत्तेः समयः	३१
	(छ) वैयाकरणसिद्धान्तकौमुदीतः पूर्वं प्रक्रिया-ग्रन्थानां स्थितिः	४५
	(ज) भट्टोजिदीक्षितस्य कालनिर्णयः	५१
द्वितीयं प्रकरणम्		
	(क) काशिकावृत्तेः शैली	६३
	(ख) सिद्धान्तकौमुद्याः शैली	७१
तृतीयं प्रकरणम्		
	अष्टाध्यायीक्रमस्य प्रक्रियाक्रमस्य च विरोध-परिहारः	८१
चतुर्थं प्रकरणम्		
	काशिकायां पाणिनीयेतरव्याकरणपरम्पराणां प्रभावः, सिद्धान्तकौमुद्यां मुनित्रयानुक्तस्या-प्रमाणत्वम्	९१
पञ्चमं प्रकरणम्		
	(क) ग्रन्थद्वयस्य लौकिकोदाहरणानां स्थितिः	११५
	(ख) ग्रन्थद्वयस्य वैदिकोदाहरणानां स्थितिः	१३१

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षष्ठं प्रकरणम्

(क) काशिकावृत्तौ सिद्धान्तकौमुद्यां च गद्यमयवार्त्तिकानां स्थितिः १४१

(ख-१)—काशिकावृत्तौ पद्यमयवार्त्तिकानि कारिकाश्च १५२

(ख-२)—सिद्धान्तकौमुद्यां पद्यमयवार्त्तिकानि कारिकाश्च १६०

(ग) काशिकावृत्तौ सिद्धान्तकौमुद्यामिष्टीनां स्वरूपम् १६५

(घ) काशिकावृत्तौ सिद्धान्तकौमुद्यां च परिभाषाणां स्वरूपम् १६७

सप्तमं प्रकरणम्

सूत्राणां समालोचनम् १७३

अष्टमं प्रकरणम्

सूत्रपाठान्तरसङ्कलनम् १११

नवमं प्रकरणम्

ग्रन्थद्वयस्य वैदिकोदाहरणानां सङ्कलनम् २२७

प्रबन्धे उदाहृतानां ग्रन्थानां शोधपत्राणां च सूची

(क) संस्कृत-मूलग्रन्थाः ३१४

(ख) अर्वाचीनग्रन्थाः शोधपत्राणि च ३२०

शुद्धिपत्रम् ३२७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सङ्केताक्षराणि

(A)

अ. अं.	अथर्ववेदीयबृहत्सर्वानुक्रमणिका
अथ.	अथर्ववेदसंहिता
अनर्घ.	अनर्घराघवम्
अ. भा.	अष्टाध्यायीभाष्यम्
अभि. भा.	अभिनव भारती (अलीगढ़-विश्वविद्यालय-शोधपत्रिका)
अमर:	अमरकोशः, अमरकोषः
आग्निगृ.	आग्निवेश्यगृह्यसूत्रम्
आपधर्म.	आपस्तम्बधर्मसूत्रम्
आपश्रौ., आप. श्रौ.	आपस्तम्बश्रौतसूत्रम्
आश्वगृ.	आश्वलायनगृह्यसूत्रम्
आश्वश्रौ.	आश्वलायनश्रौतसूत्रम्
उत्तर., उ. राम.	उत्तररामचरितम्
उं. सू., उणादि.	उणादिसूत्रम्
ऋ.	ऋग्वेदसंहिता
ऋ. खि.	ऋग्वेदखिलपाठः
ऐ. आ., ऐआ.	ऐतरेयारण्यकम्
ऐ. ब्रा.	ऐतरेयब्राह्मणम्
कपिं. सं.	कपिष्ठलकठसंहिता
काठ. गृ.	काठकगृह्यसूत्रम्
काठ. सं.	काठसंहिता
का. वृ.	काशिकावृत्तिः
काश्रौ.	कात्यायनश्रौतसूत्रम्
किरा.	किरातार्जुनीयम्
कुमार.	कुमारसंभवम्

(क)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग. सू.	गणसूत्रम्
गु. प.	गुरुकुलपत्रिका (गुरुकुल-हरिद्वार-शोधपत्रिका)
गो. गृ.	गोभिलगृह्यसूत्रम्
गो. ब्रा., गोब्रा.	गोपथब्राह्मणम्
चा. व्या.	चान्द्रव्याकरणम्
छा. उप.	छान्दोग्योपनिषद्
जै. महा.	जैनेन्द्रमहावृत्तिः
जै. व्या.	जैनेन्द्रव्याकरणम्
त. बो.	तत्त्वबोधिनी
ताब्रा.	ताण्ड्यब्राह्मणम्
तै. आ.	तैत्तिरीयारण्यकम्
तै. ब्रा.	तैत्तिरीयब्राह्मणम्
तै. सं.	तैत्तिरीयसंहिता
दुर्गा.	दुर्गासप्तशती
दु. वृ.	दुर्घटवृत्तिः
द्र.	द्रष्टव्यम्
नारा. उप.	नारायणोपनिषद्
नैषधीय.	नैषधीयचरितम्
प. म.	पदमञ्जरी
परि. शे.	परिभाषेन्दुशेखरः
पस्प.	पस्पशाह्निकम्
पारगृ.	पारस्करगृह्यसूत्रम्
पृ.	पृष्ठम्
पै. सं.	पैप्पलादसंहिता
प्र. कौ.	प्रक्रियाकौमुदी
प्र. कौ. वि.	प्रक्रियाकौमुदीविमर्शः
प्र. स.	प्रक्रियासर्वस्वम्
प्रा. प्र.	प्राच्य प्रज्ञा (अलीगढ़-विश्वविद्यालय-शोधपत्रिका)
प्रौ. म., प्रौ. मनो.	प्रौढमनोरमा
प्रौ. म. कुच.	प्रौढमनोरमाकुचमर्दनी
फि., फि. सू.	फिट्सूत्रम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बा. म., बा. मनो.	बालमनोरमा
बृदे.	बृहद्देवता
बृह. उप.	बृहदारण्यकोपनिषद्
बौ. धर्म.	बौधायनधर्मसूत्रम्
भट्टि.	भट्टिकाव्यम्
भा. वृ.	भाषावृत्तिः
म. भा.	व्याकरणमहाभाष्यम्
म. भा. दीपिका	महाभाष्यदीपिका
म. भार.	महाभारतम्
मा. धातु.	माधवीयधातुवृत्तिः
माश्रौ.	मानवश्रौतसूत्रम्
मै उप.	मैत्रायण्युपनिषद्
मै. सं.	मैत्रायणीसंहिता
रघु.	रघुवंशम्
राज.	राजतरङ्गिणी
रूपा.	रूपावतारः
लाश्रौ.	लाट्यायनश्रौतसूत्रम्
लघु. कौ.	लघुसिद्धान्तकौमुदी
लघु. शेखर :	लघुशब्देन्दुशेखरः
वं. ब्रा.	वंशब्राह्मणम्
वा.	वार्त्तिकम्
वा. प.	वाक्यपदीयम्
वा. रा. (सुन्दर., युद्ध.)	वाल्मीकिरामायणम् (सुन्दरकाण्डम्, युद्धकाण्डम्)
वा सं.	वाजसनेयिसंहिता
वेणी.	वेणीसंहारम्
व्या. म. भा.	व्याकरणमहाभाष्यम्
व्या. मि.	व्याकरणमिताक्षरा
श. कौ.	शब्दकौस्तुभः
श. ब्रा., शब्रा.	शतपथब्राह्मणम्
शां. आ.	शांखायनारण्यकम्
शां. श्रौ.	शांखायनश्रौतसूत्रम्
शिशु.	शिशुपालवधम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ष. वि. ब्रा., षविब्रा.	षड्विंशब्राह्मणम्
संपा.	संपादकः
सं. व्या. ग. प. आ. पा.	संस्कृत व्याकरण में गणपाठ की परम्परा और आचार्य पाणिनि
सं. व्या. शा. इति.	संस्कृत व्याकरणशास्त्र का इतिहास
स. क.	सरस्वतीकण्ठाभरणम्
सि. कौ.	वैयाकरण सिद्धान्तकौमुदी
सि. कौ. वै. प्र.	सिद्धान्तकौमुदीवैदिकीप्रक्रिया
सू.	सूत्रम्
सूर्य.	सूर्यशतकम्
स्व. सि. च.	स्वरसिद्धान्तचन्द्रिका
हिश्रौ	हिरण्यकेशिश्रौतसूत्रम्

ABORI	Annals of the Bhandarkar Oriental Research Institute.
ASVORI	Annals of the Sri Venkateshvara Oriental Research Institute.
BK	Bhārata—Kaumudī (Studies in Indology in Honour of Dr. Radha Kumud Mookerji).
BORI	Bhandarkar Oriental Research Institute, Poona.
BSOAS	Bulletin of the School of Oriental and African Studies.
CCSM	Critical and Comparative Studies on Mahābhāṣya of Patañjali.
Comm. Vol.	Commemoration Volume.
GSAI	Gioranale della Societa Asiatica Italiana.
IA	Indian Antiquary.
IHQ	Indian Historical Quarterly.
JA	Journal Asiatique,
JAOS	Journal of the American Oriental Studies.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

JBBRAS	Journal of the Bombay Branch of the Royal Asiatic Society.
JGJRI	Journal of the Ganganath Jha Research Institute.
JOR	Journal of the Oriental Research (Madras).
JRAS	Journal of the Royal Asiatic Society of Great Britain and Ireland.
JUPHS	Journal of the United Provinces (Uttar Pradesh) Historical Society.
JUP (HS)	Journal of the University of Poona (Humanities Section).
NIA	New Indian Antiquary.
PAIOC	Proceedings of the All-India Oriental Conference.
SB	Siddha-Bhāratī or the Rosary of Indology (Dr. Siddheshwar Varma Comm. Volume).
VVRI	Vishveshvaranand Vedic Research Institute, Hoshiarpur.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रस्तावना

१.०. पुरा काले नैकानि माहात्म्यसम्पन्नानि शब्दशास्त्राण्यासन् । परं न तानि सर्वात्मना परिपूर्णान्यासन् । अतस्तेषु न्यूनतां त्रुटीश्च परिभावयन् भगवान् पाणिनिरष्टाध्यायीत्यपरनाम्ना प्रसिद्धं स्वतन्त्रं शब्दानुशासनं प्रणिनाय । सत्स्वपि नैकेषु शब्दानुशासनेषु भाषां स्थिरीकर्तुं नियन्त्रयितुं च पाणिनीयशब्दानुशासनाद् ऋते नान्यत् शब्दानुशासनं प्राभवदिति न परोक्षं प्रेक्षावताम् । सर्ववेदपारिषदस्यास्य पाणिनीयाष्टकस्य रचनापद्धतिर्न केनापि शब्दानुशासनेन अद्यावधि अतिशयिता न वाऽतिशेष्यते इत्युक्तिर्न लेशतोऽप्यतिशयोक्तितां भजते ।

१.१ परं पाणिनीये सर्वेषां वेदगतानां भाषागतानां च प्रयोगाणां नासीत् पूर्णत्वेन विचारः । तत्र लोके वेदे च प्रयुक्तानां बहूनां शब्दानामनुशासनं न दृश्यते । अत इदं पाणिनीयशब्दशास्त्रमसम्पूर्णमिव मन्यमानो भगवान् कात्यायन उक्तानुक्तदुरुक्तचिन्तनात्मकं वार्त्तिकं विरचय्य पाणिनीयव्याकरणं सर्वाङ्गपरिपूर्णं कर्तुं प्रयत्नमकार्षीत् । परमेतावतापि नेष्टसिद्धिः । यतोऽचिरेणैव कालेन सूत्राणि वार्त्तिकानि च छात्राणां दुरवबोधानि बभूवुः । अत छात्रानुग्रहाय कुणिप्रभृतिभिराचार्यैः सूत्रार्थविवरणरूपा वृत्तिर्निरमायि । एवंरीत्या कात्यायनीयवार्त्तिकेनोपबृंहितं विवरणादिभिश्च समुद्दीपितं पाणिनीयतन्त्रं सर्वतो लब्धप्रचारं प्रावर्तत । परं वार्त्तिकविवरणादिभिः समन्विते सकलशब्दसङ्ग्राहके पाणिनीयाष्टके सत्यपि वर्षशताभ्यन्तरे वर्षशतद्वयाभ्यन्तरे भाषायां परिवर्तनमपरिहार्यं भवति । परिवर्तनं हि वस्तुनः स्वभावः । अतः कात्यायनादनन्तरमपि भाषा परिवृत्तिं गता । किञ्च पाणिनीयसूत्राणि कात्यायनवार्त्तिकानि च सुकुमारधियां छात्राणां दुरवगाहाण्यभूवन् । तस्माद् नूतनतया अवतीर्णानां शब्दानां साधुत्वज्ञापनार्थं छात्राणां सुखेन सूत्रार्थबोधो भवत्वित्येतदर्थं च आचार्यपतञ्जलिः सूत्राणां वार्त्तिकानां च व्याख्यापरं महाभाष्यमितिनाम्ना प्रथितं ग्रन्थरत्नं प्राणैषीत् । तथाप्युत्तरोत्तरं छात्राः संक्षेपरुचयः पाणिनीयशब्दशास्त्रमतिविपुलं बह्वायाससाध्यं च मन्वानास्तदध्ययनात् पराजयन्त । एवं करालेन कलिकालेन महाभाष्याध्ययनं निरवशेषतां नीतम् । पाणिनीयतन्त्रं च ग्रन्थमात्रावस्थितमभूत् । अतः परमकारुणिकाश्चन्द्राचार्यादयश्छात्रानुग्रहाय मुनित्रयात्पूर्णं साहाय्यं गृहीत्वा सुलभानि व्याकरणानि व्यरचयन्, यान्युत्तरकाले चान्द्र-कातन्त्रादिनाम्ना प्रसिद्धिं जग्मुः । एतदारभ्य शब्दशास्त्रे चान्द्र-कातन्त्र-व्याकरण-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परम्परा प्रचलिताऽभूत् । अतः कालान्तरे वृत्तिभाष्यनामधातुपारायणादिरूपेण विप्रकीर्णं पाणिनीयतन्त्र प्रत्युज्जीवयितुं कृतमानसौ वामनजयादित्यौ पाणिनीयाष्टके काशिकानाम्नीं वृत्तिं प्राणैष्टाम् ।

१.२. यद्यप्यस्यां वृत्तौ इष्ट्युपसंख्यानगणपाठादीनां कातन्त्र-चान्द्रादिवचसां च संनिवेशः कृतस्तथापि पाणिनीयव्याकरणपरम्परां प्रत्युज्जीवयितुमियं काशिकावृत्तिर्न सर्वथा समर्थाऽभूत्, यतोऽस्या व्याख्याशैली प्रौढा पाण्डित्यपूर्णा च सुकुमारधियां छात्राणां रुचये न बभूव । किञ्च अष्टाध्यायीसूत्रक्रमावलम्बिनीं काशिकावृत्तिमधीत्य सूत्रार्थपरिज्ञाने सत्यपि अष्टाध्याय्यां विप्रकीर्णानां तत्तल्लक्ष्योपकारकाणां सूत्राणां कथमेकत्र समन्वयः कर्तव्य इत्येतदधिगन्तुं काशिकावृत्तेरध्ययनं छात्राणां नोपाकरोत् । अतः सर्वप्रथमं पाणिनीयपरम्परायां धर्मकीर्तिना अष्टाध्यायीक्रमेऽसौविध्यमनुभाव्य प्रयं गव्युत्पादनार्थं प्रक्रियापरिज्ञानार्थं च रूपावतारो नामा ग्रन्थः प्रणीतः । रूपावताराध्ययनेन छात्राः प्रयोगसिद्धयर्थं कथमष्टाध्याय्यां विप्रकीर्णानि सूत्राण्येकत्रानेयानि इति सौकर्येण अधिगतवन्तः । तत आरभ्य प्रक्रियापरम्परा प्रचलिताऽभवत् । तदनन्तरमियं प्रक्रियापरम्परा विमलसरस्वतीरामचन्द्रादिभिश्च वैयाकरणैः समुपबृंहिता ।

१.३. परं धर्मकीर्तिप्रणीतरूपावतारे रामचन्द्रप्रणीतप्रक्रियाकौमुद्यां च पाणिनिविरचितानां सूत्राणां पूर्णत्वेन सङ्ग्रहो नास्ति । किञ्च काशिकायां, रूपावतारे, प्रक्रियाकौमुद्यां, प्रसादे च पाणिनिसूत्राणां कात्यायनवार्त्तिकानां च महाभाष्यानभिमतमत एव प्रामादिकं व्याख्यानं क्वचिदुपलभ्यते । तथा चैतेषु ग्रन्थेषु महाभाष्याभिमतं पाणिनेः सूत्राणां स्वरूपमपि परिवृत्तिमापन्नं दृश्यते । महाभाष्याभिमतसूत्रार्थपरिज्ञानाय भाष्याभिमतसूत्रस्वरूपरक्षणाय च भट्टोजिदीक्षितः प्रक्रियाक्रमसमर्थिकां वैयाकरणसिद्धान्तकौमुदीतिनाम्नीमन्वर्थिकां वृत्तिं पाणिनीयाष्टके व्यरचयत् । अस्यां हि सर्वाण्येव दुर्ग्रहाणि पाणीनीयसूत्राणि सरलया भाषया व्याख्यातानि । अस्याः सकाशाच्च छात्रा अनायासेनैव शब्दशास्त्रार्णवस्य पारं गन्तुं प्राभवन् ।

१.४. परं काशिकावृत्त्यन्तरं वैयाकरणसिद्धान्तकौमुदीप्रणयनपर्यन्तं भूयान् कालो व्यतीतः । साम्प्रतं भारते च द्विविधा परम्परा दृश्यते । अद्यापि नैके विद्वांसः काशिकावृत्तेरक्षुण्णं माहात्म्यमुररीकुर्वन्ति । परं केषुचित् प्रदेशेषु काशिकाध्ययनं विलयं प्राप्तं वर्तते । एषु प्रदेशेषु पाणिनीयव्याकरणस्य माहात्म्यमधिगन्तॄणां छात्राणां कृते सिद्धान्तकौमुद्या एव महत्त्वमतितरां प्रकाशते । एतत्सर्वं पर्यालोच्य काशिकावृत्ति-वैयाकरणसिद्धान्तकौमुद्योर्गुणावगुणपरीक्षणाय तयोरभिमतव्याख्यानस्य साधुत्वासाधुत्व-परिज्ञानाय च तयोस्तुलनात्मकाध्ययनकर्मणि व्यापृतोऽभूवम् ।

प्रबन्धचर्चितानां विषयाणां निरूपणम्

२.०. महाभाष्यं विहाय अष्टाध्यायीव्याख्यापरेषु ग्रन्थेषु काशिकावृत्ति-सिद्धान्तकौमुद्यौ द्वावपि ग्रन्थौ अनितरसाधारणं स्थानं भजतः । द्वावपि ग्रन्थौ पटितृभिः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पाठयितृभिश्च मूर्धाभिषिक्तत्वेन गण्येते । तत्र च काशिकावृत्तिरष्टाध्यायीक्रममालम्बते, सिद्धान्तकौमुदी च प्रक्रियाक्रममनुसरति । अस्य ग्रन्थद्वयस्य तुलनात्मकमध्ययनं न तावत्परिसमाप्तं भविष्यति यावदस्माभिर्ग्रन्थद्वयस्य पार्श्वभूमिर्न ज्ञायते । अतस्तत्परिज्ञानार्थं ग्रन्थद्वयप्रणयनात्पूर्वमध्ययनाध्यापनयोः कीदृशी स्थितिः, तत्पूर्ववर्तिनां ग्रन्थानां कीदृशः कियांश्च ग्रन्थद्वये प्रभावः, पूर्वग्रन्थेभ्यः किं वैशिष्ट्यमस्य ग्रन्थद्वयस्य, कीदृक् साफल्यमाप्तमनेन ग्रन्थद्वयेनेत्येवमादिको विचारः प्रस्तूयते । अस्मिन्प्रबन्धे मयाऽनुसृतो विषयविभाग इत्थंरूपेण वर्तते ।

२.१. प्रथमे प्रकरणे— व्याकरणशास्त्रे सूत्रशैल्या विकासः, पाणिनीयपरम्परायाः कालविभागः, काशिकातः पूर्ववर्तिनां वृत्तिग्रन्थानां स्थितिः, काशिकावृत्तेः प्रणयनकालः, इयं वृत्तिरेककर्तृका, द्विकर्तृका, आहोस्विद् द्वे स्वतन्त्रे वृत्ती भिन्नकर्तृके, काशिकाकृतोर्धर्मः, सिद्धान्तकौमुदीतः पूर्वं रूपावतारादिप्रक्रियाग्रन्थानां स्थितिः, भट्टोजिदीक्षितस्य कालनिर्णय इत्यादीनां नैकेषां विषयाणामूहापोहः कृतः । स्थाने स्थाने मैक्समूलर— बोथलिङ्क —कैपलर—किलहॉर्न—कीथ —विण्टरनिट्ज—महाभागप्रभृतीनां पाश्चात्यविदुषां तथैव आइ. एस. पावटे—एस. के. वेलवलकर—के. पी. त्रिवेदि-के. बी. पाठक -पी. वी. काणे —सी. वे .राजा—एम. कृष्णमाचारिअर—के. ए. एस. ऐयर—एस. पी. चतुर्वेदि —नीलकण्ठशास्त्रि—महालिङ्गशास्त्रि—पी. के. गोडे—युधिष्ठिरमीमांसकमहाभागप्रभृत्यनेकभारतीयविदुषां मतानि साधकबाधकयुक्तिपुरस्सरं परामृष्टानि । एमेवैतिहामिकपार्श्वभूमेः परिज्ञानाय अस्मिन्नेव प्रकरणे अष्टाध्यायीत आरभ्य सिद्धान्तकौमुदीपर्यन्तं पाणिनीयशास्त्रस्य कथमुत्तरोत्तरं स्फनीतिभावः सञ्जातः सोऽपि प्रदर्शितः ।

२.२. द्वितीयस्मिन् प्रकरणे—काशिकावृत्तिसिद्धान्तकौमुद्योर्विषयप्रतिपादनपद्धतिर्निरूपिता । तत्र सर्वप्रथमं महाभाष्यकाशिकावृत्त्योः शैल्याः विचारः । महाभाष्यकाशिकावृत्त्योरुभयत्रापि सरलः सुबोधो वाग्विन्यासः । परमापाततः सुगमस्य महाभाष्यस्य गूढाशयपरिज्ञाने यथा पाठकः परिभ्रान्तो भवति न तथा काशिकाया अर्थपरिज्ञाने । महाभाष्ये व्याकरणशास्त्रस्थक्लिष्टानां सिद्धान्तानां शिष्याणां परिचयो भवत्वित्येतदर्थं प्रश्नोपप्रश्नशङ्कासमाधानादिरूपाः दीर्घाः संवादाः प्रस्तुताः । एषु संवादेषु शिष्यः शङ्कामुपस्थापयति, आचार्यशिष्यस्तां क्वचिदेकदेश्युक्त्या समाधत्ते, आचार्यश्च सिद्धान्तमाधत्ते । स्थाने स्थाने भूयो भूयः शङ्का उपस्थाप्यन्ते समाधानानि च विधीयन्ते । अन्ते च आचार्यस्तेषां समेषां प्रश्नानां समाधानं करोति । नेयं पद्धतिः काशिकायाम्; तत्र केवलानि सिद्धान्तवचनान्येव प्राय उपलभ्यन्ते ।

२.२.१. महाभाष्ये सर्वाणि पाणिनिसूत्राणि न व्याख्यातानि । परं काशिकायां यथाक्रमं सर्वेषां सूत्राणां व्याख्यानम् । काशिकायाश्च सूत्रपाठो महाभाष्यापेक्षया बहुत्र भिन्नः । काशिकायां बहूनां सूत्राणां योगविभागः कृतो येषां योगविभागो महाभाष्ये न परिदृश्यते । यथा महाभाष्ये 'अपरे, अन्ये, केचित्, अत्यल्पमिदमुच्यते'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति विलिख्य पुनस्तत्तद्विषयाणां विस्तरः कृतस्तथैव क्वचित् क्वचित् काशिकाकार्यामपि दृष्टिपथमायाति। अस्यां वृत्तौ आपिशल-सौनागादीनामपि कानिचिद् नवीनानि मतान्तराण्युपलभ्यन्ते येषामितः पूर्वं कुत्रापि दर्शनं न भवति। स्थाने स्थानेऽत्र कातन्त्र-चान्द्रयोः प्रभावः। "मणीवादीनां प्रतिषेधो वक्तव्यः; कमलादिभ्यो खण्डच्' इत्यादीनां नैकेषां नूतनवार्त्तिकानामत्र निर्मितिः। अस्यां वृत्तौ महाभाष्यवद् न कस्यापि सूत्रस्य परित्यागः प्रत्याख्यानं वा कृतम्। सूत्रस्वरूपविषयेऽस्यां वृत्तौ तस्मिन् काले उपलब्धानि मतान्तराण्यपि निर्दिष्टानि। वृत्तौ हि प्रतिसूत्रमनुवृत्तिः, वृत्तिः, उदाहरणानि, प्रत्युदाहरणानि च शङ्कासमाधानपुरस्सरं सरलया भाषया निरूपितानि। अत्र सूत्राणां प्रतिपदं व्याख्यानं प्राचीनवृत्तिग्रन्थानामाधारेण महाभाष्यसहकारेण वा कातन्त्र-चान्द्रादिसाहाय्येन वा कृतं दृश्यते। वृत्तौ हि भूयसामुदाहरणानां सङ्ग्रहो दृश्यते। अत एव ऐतिहासिकदृष्ट्या गणपाठादिदृष्ट्या चातिमहत्त्वपूर्णोऽयं ग्रन्थः।

२.२.२. एतदग्रेऽस्मिन्नेव प्रकरणे सिद्धान्तकौमुद्या विषयप्रतिपादनपद्धतिर्निरूपिता। सिद्धान्तकौमुदीतः पूर्ववर्तिनां प्रक्रियाग्रन्थानां पुरतो बहवः प्रश्ना आसन्— कथं केन विधिना वा व्याकरणशास्त्रे प्रकरणरचना कर्तव्या, कथं चाल्पेन परिश्रमेण विशालशब्दसमुदायस्य छात्राणां ज्ञानं भवेत्, कानि सूत्राणि ग्राह्याणि, कानि च पुनः परित्यजनीयानि, केन क्रमेण सूत्राणि ग्राह्याणि। परमियं विप्रतिपत्तिः सिद्धान्तकौमुद्या दूरीकृता। तत्र ग्रन्थकृता पूर्ववर्तिनां दोषान् विभाव्य तेषां निराकरणे महान् यत्न आस्थितः। पूर्वार्धम् उत्तरार्धं चेतिरूपेण ग्रन्थोऽयं ग्रन्थकारेण द्विधा विभक्तः। तत्र पूर्वार्धे संज्ञा-सन्धि-स्वादि-स्त्रीप्रत्यय-कारक-समास-तद्धितादयः। उत्तरार्धे भ्वाद्यादयो दशगणाः, ण्यन्तादयस्तिङन्तप्रक्रिया, सोणादयः कृत्प्रत्ययाः, वैदिकप्रक्रिया, सफिटसूत्रा स्वरप्रक्रिया, लिङ्गानुशासनम्, गणपाठाश्च समाविष्टाः। यानि सूत्राणि लोकवेदोभयसाधारणानि तेषां सङ्ग्रहो ग्रन्थकारेण तेषु तेषु प्रकरणेषु कृतः, न स्वर-वैदिक-प्रक्रियायाम्। न हि विद्यते तत्र महाभाष्य-रूपावतार-प्रक्रियाकौदीवत् कस्यापि सूत्रस्य परित्यागः। यथा "कारके" (१।४।२३), "अव्ययीभावः" (२।१।५), "तत्पुरुषः" (२।१।२२) इत्यादीनां नैकेषामधिकारसूत्राणां प्रक्रियाकौमुद्यां परित्यागः, न तथा सिद्धान्तकौमुद्याम्। ग्रन्थकारः सर्वत्र सूत्रार्थं संक्षेपरूपेण प्रस्तौति। पूर्ववर्तिग्रन्थापेक्षया ग्रन्थेऽस्मिन् सूत्रार्थः प्रायेण निर्दुष्टो महाभाष्याभिमतश्च स्वीकृतः। सूत्राणां तात्पर्यं पूर्वप्रकरणवशादनुवृत्त्या वा प्रस्तुतम्। एवमेव ग्रन्थसंक्षेपहेतुना येषां सूत्राणामर्थः प्रकरणवशाज्ज्ञायते तेषां बहूनां सूत्राणां वृत्तिग्रन्थकारेण न प्रदत्ता; यथा हि रूपावतारादिषु बहुत्र सूत्रावतरणात्पूर्वं प्रकरणावतरणात्पूर्वं प्रश्नं शङ्कां वोद्भाव्यानन्तरं सूत्रं प्रकरणं वोपक्रम्यते, न तथा सिद्धान्तकौमुद्याम्। ग्रन्थगौरवभयादियं रीतिर्भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां नातीवादृता। अपि च व्याख्यासौकर्याय ग्रन्थकारोऽयं सूत्रद्वयं सूत्रत्रयं वा समवायरूपेण एकत्रैव क्वचित्त्ववचिद् व्याख्याति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२.२.३. यद्यपि सिद्धान्तकौमुद्यां जयादित्य-शर्ववर्म-धर्मकीर्त्यादीनां बहूनां शाब्दिकानामुल्लेखोऽनुपलब्धस्तथापि तेषां ग्रन्था भट्टोजिदीक्षितस्य निःसंशयं परिचिता आसन् । एवमेव चन्द्र-दुर्ग-वामन-कैयट-जिनेन्द्रबुद्धि-हरदत्त-माधव-मैत्रेय-शाकटायन-भोज-नन्द्यु ज्ज्वलदत्ताऽत्रेय-क्षीरस्वामि-रामचन्द्रादिविदुषां मतानि सम्यग् विविच्य सिद्धान्तकौमुद्यां सङ्गृहीतानि । सूत्रस्वरूपविषये तदर्थविषये च वार्त्तिकं महाभाष्यं च प्रमाणीकृते । स्थाने स्थाने काशिका-रूपावतार-प्रक्रियाकौमुद्यादिभ्यः साहाय्यं गृहीतम् । ग्रन्थेऽस्मिन् कानिचिदुदाहरणानि पूर्वग्रन्थेभ्यः, कानिचिच्च नूतनग्रन्थेभ्यः परिगृहीतानि । कानचित् स्वयमेव निर्मितानि । नैकवारं व्यास-कालिदास-भारवि-माघ-भट्टि-भवभूति-श्रीहर्ष-मयूर-मुरारिप्रभृतिप्रणीतकाव्यग्रन्थेभ्यो बहूनि पद्यबद्धोदाहरणानि आदाय तदुपरि व्याकरणशास्त्रदृष्ट्या टिप्पणी कृता । कथमयं ग्रन्थः सिद्धान्तितार्थस्थापने पूर्वग्रन्था-नतिशेते तत्सर्वमस्मिन् प्रकरणे प्रतिपादितम् ।

२.३. तृतीये प्रकरणे—कथमष्टाध्यायीक्रमः प्रक्रियाक्रमश्च परस्परावलम्बिनौ तत्प्रदर्शितम् । पाणिनीयशब्दानुशासनाध्ययने हि द्वौ पन्थानौ । तौ च विश्लेषणात्मक-पद्धतिः संश्लेषणात्मकपद्धतिश्चेति नाम्ना व्यवहर्तुं शक्येते । व्याकरणशास्त्र इमे यथोद्देशपक्षः कार्यकालपक्षश्चेति नाम्ना क्रमेण व्यवह्रियेते । तत्र सूत्रार्थकरणे केषां शब्दानामनुवृत्तिरधिकारो वापेक्षते तज्ज्ञातुं यथोद्देशपक्ष उपादीयते; यतोऽस्मिन् स्वीये देश एव सूत्राणां प्रकरणानुगुणो वाक्यार्थः क्रियते । परं पाणिनीयाष्टके विप्रकीर्णानां सूत्राणां प्रक्रियायाः कृते कथमेकवाक्यता एकप्रदेशविषयता वा कर्तव्या तज्ज्ञातुं कार्यकालपक्षः ।

२.३.१. पाणिनिना अष्टाध्याय्यां विशिष्टसूत्रक्रमोऽनुसृतः । लाघवार्थं पाणिनिः पूर्वसूत्रवर्तिनां शब्दानामुत्तरत्राऽवृत्तिं नेच्छति । उत्तरवर्तिसूत्रेष्वदृष्टाः शब्दा वाक्यपरिपूरणाय पूर्वसूत्रेभ्योऽनुवर्तनीया भवन्ति । तथा चावश्यकानां शब्दानामा-वृत्तिपरिहाराय स सूत्रेण पुष्पाणीव अनुवृत्त्या सूत्राण्येकत्र बध्नाति तानीमानि सूत्राणि भिन्नभिन्नलक्ष्यानुग्राह्याण्यपि एकस्मिन् प्रकरणे पठितव्यानि भवन्ति । पुनः पुनस्तेषां शब्दानामावृत्तिपरिहाराय प्रकरणानुसारेण सूत्राणां विभागः समाश्रयणीयो भवति । सर्वाणि षत्वविधायकसूत्राण्येकत्र, सर्वाणि णत्वविधायकसूत्राण्येकत्र इत्येवं क्रम आश्रितः पाणिनिना । परं प्रक्रियाक्रमे लक्ष्यसिद्ध्यनुगुणस्य क्रमस्य महत्त्वेन प्रकरणभङ्गं विधाय तानीमानि सूत्राणि कदाचित् सुप्प्रकरणे कदाचित् तिङ्प्रकरणे निर्देष्टव्यानि भवन्ति ।

२.३.२. किं च परबलीयस्त्वस्थापनार्थं त्रिपाद्याः सपादसप्ताध्यायीदृष्ट्या असिद्धत्वस्थापनार्थं च विशिष्टः क्रमः पाणिनेरनुसर्तव्यो भवत्यष्टाध्याय्याम् । परं प्रक्रियाक्रमे तत्तल्लक्ष्योपकारकाणि सूत्राणि प्रयोगदेशे स्थापनीयानि भवन्ति । परं यदा विभिन्नेष्वध्यायेषु विप्रकीर्णानि सूत्राणि विभिन्नेषु प्रकरणेषु निर्दिष्टानि भवन्ति तदा तेषां प्रकरणानुगुणोऽर्थः छात्रैर्ज्ञातुं न शक्यते । तदर्थं वृत्तिः स्मृत्यारूढा कर्तव्या

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवतीति महान् क्लेशः । परमष्टाध्याय्यां हि समासविधायकसूत्राणि द्वितीयेऽध्याये वर्तन्ते, समासान्तप्रत्ययाश्च पञ्चमेऽध्याये प्रत्ययाधिकारे निवेशनीया भवन्ति । समस्ते पदे पूर्वोत्तरपदं निमित्तत्वेन स्वीकृत्य प्रवर्तमानानि सूत्राणि षष्ठाध्यायस्य तृतीये पादे निविष्टानि । अनेन विधिना समासप्रकरणेन सम्बद्धं कार्यमष्टाध्याय्यां बहुत्र विच्छिन्नरूपेण वर्तते । प्रक्रियाग्रन्थेष्वेतेषां विप्रकीर्णानां सूत्राणामेकदेशस्थापनं कर्तुं शक्यते । भवति च तद् अध्ययनसौकर्याय ।

२.३.३. एवं हि यथोद्देशपक्षः सूत्रार्थस्थापनार्थमष्टाध्यायीसूत्ररचनाज्ञानार्थ-मुपयुक्तः । परं कार्यकालपक्षः कथं सूत्राणामेकवाक्यताद्वारा प्रयोगनिष्पादकत्वं भवतीति दर्शयति । तस्मात् कथमिदं क्रमद्वयमन्योन्योपकारि भवतीत्यस्मिन् प्रकरणे प्रतिपा-दितम् ।

२.४. चतुर्थे प्रकरणे— कथं काशिकावृत्तौ कातन्त्र-चान्द्रादिव्याकरणपरम्परणां प्रभावः, एतादृशेषु किं स्थलेषु सिद्धान्तकौमुदीकारस्याभिमतमित्येवमादिकं विवेचनं वर्तते । तथा हि— काशिकायां मुनित्रयेणाव्युत्पादितानां बहूनां प्रयोगाणां समावेशः । तत्र नूतनप्रयोगसिद्धिकराणि वचनानि द्विविधानि वर्तन्ते । कानिचिद् बहुलप्रयोगदर्शनात् तेषां साधुत्वज्ञापनार्थं काशिकाकाराभ्यां स्वयमेव निर्मितानि, कानिचिच्च ताभ्यां पाणिनीयेतरव्याकरणपरम्पराभ्यो गृहीतानि । परमस्मिन् प्रकरणे काशिकाकृतोर्वचसां समावेशो न कृतः । केवलं येषु स्थलेषु पाणिनीयेतरव्याकरणपरम्पराणां काशिकावृत्त्यां प्रभावो दृश्यते तस्यैव विचारः प्राधान्येनात्र कृतः । एतद्विषये डॉ. किलहॉर्न-बेलवलकर-पावटे-महाभागप्रभृतिविदुषां मतस्यापि हेयोपादेयत्वेन विचारविमर्शः कृतः । एतत्कृते सर्वप्रथमं कातन्त्रचान्द्रव्याकरणद्वयस्य काशिकातः पूर्ववर्तित्वमुपस्थाप्य तदन-न्तरमेतद्ग्रन्थद्वयस्य काशिकायां वृत्तौ कियान् कीदृशश्च प्रभावोऽस्तीति महता विस्तरेण निरूपितम् ।

२.५. पञ्चमे प्रकरणे— लौकिकवैदिकोदाहरणानां ग्रन्थद्वयसमाविष्टानामुद्-भवस्थानस्य विचारः । प्रायः काशिकायां लौकिकोदाहरणानि महाभाष्याद् वा पूर्वेभ्यो वृत्तिग्रन्थेभ्यो वा परिगृहीतानि । परं प्रक्रियाकौमुदीसिद्धान्तकौमुद्योः परम्परागतानां लौकिकोदाहरणानां सङ्ख्या न्यूनतरा । एवमेव यत्र काशिका महाभाष्याल् लौकिकोदा-हरणानि प्रस्तौति तत्र सिद्धान्तकौमुदीकारः प्रायः प्रक्रियाकौमुदीप्रदत्तानि उदाहरणानि स्वीकरोति । महाभाष्ये च अव्याख्यातानां सूत्राणां कृते प्रक्रियाकौमुदीकारो नूतना-न्युदाहरणानि प्रस्तौति येषां काशिकया सह साम्यं वर्तते । काशिकाप्रदत्तेभ्यो लौकिको-दाहरणेभ्यो न ज्ञायते सुस्पष्टतया कः काशिकाकृतोर्धर्मः, को वा तेषां सम्प्रदायः । परं कौमुदीग्रन्थेषु स्थाने स्थाने राम-कृष्ण-हरि-प्रभृतीनां वैष्णवपरम्पराप्रथितनाम्नां सन्निवे-शात् कौमुदीकारा वैष्णवधर्मानुयायिन आसन्निति सुस्पष्टतया ज्ञातुं शक्यते । परमितः— सर्वत्रैव काशिकोदाहरणेभ्यः कौमुद्युदाहरणान्यत्यन्तं भिन्नानीति भ्रमो न कार्यः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकासिद्धान्तकौमुदीग्रन्थद्वयेऽपि कानिचिदुदाहरणानि परम्परागतानि वर्तन्त एव। ग्रन्थद्वये च यान्युदाहरणानि रामायण-महाभारत-दुर्गासप्तशती-सुश्रुत-चरक-रघुवंश-कुमारसंभव-भट्टि- किरातार्जुनीय-माघ–सूर्यशतक-उत्तररामचरित-अनर्घराघव–नैषधीय-चरितादनेकग्रन्थेभ्यो गृहीतानि वर्तन्ते तस्याप्यस्मिन् प्रकरणे मूलस्थलनिर्देशपुरस्सरं प्रतिपादनं कृतम्।

२.५.१. एतत्प्रकरणस्योत्तरार्धे ग्रन्थद्वयस्थवैदिकोदाहरणानां स्वरूपविषयिका चर्चा प्रस्तुता। पाणिनीयाष्टके किं सूत्रं छन्दोविषयकम्, किं सूत्रं भाषाविषयकमित्येकान्ततया निर्णेतुं न शक्यते। अष्टाध्याय्यां येषु सूत्रेषु 'भाषायाम्' इति पदं वर्तते तानि सूत्राणि भाषाविषयकाण्येव। परं सिद्धान्तकौमुद्यादिषु 'भाषायाम्' इत्युक्तेऽपि क्वचिद् व्याख्यानज्ञापकादिना सूत्रस्य छन्दोविषयकत्वं वैदिकोदाहरणसमर्थनाय प्रतिपादितम्। यथा "सख्यशिश्वीति भाषायाम्" (४।१।६२) इत्यत्र सिद्धान्तकौमुद्याम् 'इति' इति पदम् "इतिशब्दः प्रकारे भाषायामित्यस्यानन्तरं द्रष्टव्यः, तेन छन्दस्यपि क्वचिद् इति दिशा व्याख्या—'आ धेनवो धुनयन्तामशिश्वी' (ऋ. ३।५५।१६) इति वैदिकोदाहरणं समर्थितम्। परं काशिकायामस्य सूत्रस्य भाषाविषयकत्वमेवाङ्गीकृतम्। ग्रन्थद्वयेऽपि सूत्रस्य लोकवेदोभयसाधारणत्वं दर्शयितुं बहुषु स्थलेषु लौकिकोदाहरणैः सार्धं वैदिकोदाहरणान्यपि समुपलभ्यन्ते। उदाहरणार्थं यथा काशिकावृत्तौ (४।१।१४५), सिद्धान्तकौमुद्यां (सू. ११६८) च लौकिकैरुदाहरणैः सहोद्धृतं—"पाप्मना भ्रातृव्येण" इत्युदाहरणं तैत्तिरीयसंहिताया–(२।२।१।४) मुपलभ्यते। अतः पाणिनिसूत्रेषु यत्र 'मन्त्रे, छन्दसि, ब्राह्मणे, भाषायाम्' इत्यादीनि पदानि नोपलभ्यन्ते तदा तत्सूत्रं लोकवेदोभयसाधारणमित्यवगन्तव्यम्। अनन्तरं काशिकासिद्धान्तकौमुद्योरुदाहरणानि कस्यां संहितायां प्रचुरतया वर्तन्ते, किं तत्र कारणम्, किं वैदिकोदाहरणानां स्वरूपं समानमाहोस्विद् भिन्नमित्यादिविषयजातं चर्चितम्। अन्ते च ग्रन्थद्वये वैदिकत्वेनाभिमतान्युदाहणानि साम्प्रतमुपलभ्यमाने वैदिकवाङ्मये वा न वा इत्येतत्सर्वं डॉ ह्विट्नी-रामगोपालमहाभागप्रभृतिविदुषां मतानि विशिष्य विविच्य विस्तरेण निरूपितम्।

२.६ षष्ठे प्रकरणे— वार्त्तिकानां समीक्षणम्। तत्र सर्वप्रथमं काशिकावृत्तितः पूर्ववर्तिनां महाभाष्यस्थगद्यवार्तिकानां किं स्वरूपमिति विषयमधिकृत्य प्रस्तुतानां डॉ. वि लहार्न-प्रो. सरस्वतीप्रसादचतुर्वेदि-डॉ. रामसुरेशत्रिपाठि-डॉ. एस. डी. लद्दू-महोदयानां मतानामूहापोहः संक्षेपेण कृतः। एतदग्रे काशिकासिद्धान्तकौमुदीभ्यां महाभाष्यस्थगद्यवार्त्तिकानां स्वरूपं किमर्थं कथं वा परिवर्तितम्, किं तत्र प्रयोजनम् इति निरूप्य महाभाष्ये पृथगुपलब्धानां कात्यायनादिवार्त्तिकानां कथं ग्रन्थद्वये क्वचिद् वृत्तावेवान्तर्भावः कृतस्तत्परीक्षितम्। व्याख्यानादिवशेन पतञ्जलिनापि—'तर्त्तहि वक्तव्यम्, न वक्तव्यम्, कथमुच्यमानं गंस्यते' इत्यादिना सूत्रे वार्त्तिकार्थः कथं क्रोडीकर्तुं शक्यते तत्प्रदर्शितम्। अग्रे काशिकासिद्धान्तकोमुदीग्रन्थेषु वार्त्तिकस्वरूप-गणसूत्रस्वरूप—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भेदविषये विदुषां मतानि निरूपितानि । अन्ते च साधकबाधकप्रमाणोल्लेखपुरस्सरं किं ग्राह्यं किमग्राह्यमित्याद्यपि चर्चितम् ।

२.६.१. काशिकावृत्तावुद्धृतानां पद्यमयवार्त्तिकानां कारिकाणां च किमुद्भवस्थानम्, महाभाष्योपलब्धश्लोकवार्त्तिकेषु किमर्थं काशिकया परिवर्तनं कृतम्, महाभाष्येऽनुपलब्धानि परं काशिकया सङ्गृहीतानि पद्यानि केभ्यः सम्प्रदायान्तरेभ्यो गृहीतानि, काशिकावृत्तौ कथं किमर्थं च महाभाष्यस्थं गद्यवार्त्तिकं श्लोकरूपेण परिवर्तितम् इत्यादि महता प्रबन्धेन निरूपितम् ।

२.६.२. प्रकरणस्याग्रिमे भागे सिद्धान्तकौमुद्यामुद्धृतानां कारिकाणां किं मूलस्थानम्, काः कारिकाः काशिकोत्तरवर्तिव्याकरणग्रन्थेभ्यो गृहीताः, किं सिद्धान्तकौमुदी काशिकामात्रोपलभ्यमानाः कारिकाः प्रमाणीकरोति वा न वा इत्यादयो विषया विवेचिताः । एतद्विषयपरिशीलनेनेदं स्पष्टं भवति यद्यपि सिद्धान्तकौमुदी लोकप्रचलितानां शब्दशास्त्रसहकारिणां श्लोकानां सङ्ग्रहे काशिकावदेव तत्परा तथापि कौमुदीकृता ताः कारिकाः प्रमाणत्वेन न स्वीकृता याः केवलं काशिकावृत्तावेव प्रथममुपलभ्यन्ते ।

२.६.३. अग्रे महाभाष्यं प्रमाणीकृत्य ग्रन्थद्वये विद्यमानानामिष्टीनां किं स्वरूपम्, तासु काश्चन महाभाष्योत्तरवर्तिन्यः सन्ति न वेति चर्चितम् ।

२.६.४. सूत्रस्वरूपेण काश्चन परिभाषाः पाणिनिकृताः परं व्याकरणशास्त्रे तदुत्तरवर्तिनीनां परिभाषाणां बाहुल्यं वर्तते । स्वमतपुष्टये ग्रन्थकारैः काश्चन परिभाषा अन्यपरम्पराभ्योऽपि सङ्गृहीताः । अतः प्रसङ्गवशात् तत्सर्वं विषयजातमस्मिन् प्रकरण एव चर्चितम् ।

२.७. सप्तमे प्रकरणे — काशिकासिद्धान्तकौमुद्योः सूत्रार्थकरणे कथं मतभेदो भवतीति दर्शितम् । अनयोर्विभिन्नयोर्मतयोर्मध्ये कतरज्ज्यायस्तदपि विवेचितम् । साम्प्रतं पाणिनीयपरम्परायां सूत्रार्थप्रतिपादनविधौ महाभाष्यमेव प्रमाणभूतम । परं महाभाष्ये सर्वेषां पाणिनिसूत्राणामव्याख्यातत्वात् काशिकासिद्धान्तकौमुद्योश्च सर्वेषां व्याख्यातत्वात् काशिकासिद्धान्तकौमुद्योरपि महत्त्वं पाणिनीयसिद्धान्तप्रतिपादनदृष्ट्या न केनापि निराकर्तुं शक्यम् । काशिकासिद्धान्तकौमुद्योस्तुलनयाऽयमर्थो निर्गलितो भवति यत् सिद्धान्तकौमुदी सूत्रार्थप्रतिपादनवेलायां महाभाष्यं प्रायः प्राधान्येनालम्बते । काशिकायां तु नैकेषु स्थलेषु सूत्रार्थप्रतिपादने महाभाष्येण सह विरोधो दृश्यते । परं क्वचिद् महाभाष्यमविगणय्य काशिकायां प्रतिपादितः सूत्रार्थः सिद्धान्तकौमुद्यापि सम्मानितः । एतेषु स्थलेषु सिद्धान्तकौमुद्यां काशिकायाः प्रभावो महाभाष्येण च वैमत्यं स्फुटं भवति । तद् यथा—"वा यौ" (२।४।७७) इत्यस्य काशिकायां—'पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । यु इति ल्युटो ग्रहणम् । यौ परभूते अजेर्वा इत्ययमादेशो भवति । अवयणो दण्डः, प्राजनो दण्डः' इत्यर्थः । एष एव सिद्धान्तकौमुद्यां स्वीकृतः । परं महाभाष्येऽत्र यौ औणादिके युचि प्रत्यये परतोऽजघातोः 'वा' इत्यादेशो भवति,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'वायुः' इति च प्रयोगो निष्पद्यत इति मतान्तरमपि दर्शितम्। महाभाष्ये काशिका-सिद्धान्तकौमुदीप्रदर्शितं 'प्रवयणः, प्राजनः' इति रूपद्वयं "अजेर्व्यघञपोः" (२।४।५६) इत्यनेन ("वा लिटि" २।४।५५ इत्यस्माद् विकल्पविधानमनुवृत्य) साध्यते। तस्मादत्र सिद्धान्तकौमद्यां काशिकायाः प्रभावः। महाभाष्यस्थं व्याख्यानमेकदेशवृत्तिरिति तयोराशयः।

२.७.१. क्वचिच्च काशिकासिद्धान्तकौमुद्योः परस्परमेव भेदः, न तु भाष्येण सह। यथा—"अभिनिसः स्तनः शब्दसंज्ञायाम्" (८।३।८६) इत्यत्र काशिकायां पूर्वसूत्राद् विकल्पोऽनुवर्तते, न तथा सिद्धान्तकौमुद्याम्। एतत्सर्वं विमृश्यास्मिन् प्रकरणे महाभाष्यरूपावतारप्रक्रियाकौमुदीव्याकरणमिताक्षरादिग्रन्थानां साक्ष्येण प्रदीप-न्यास-पदमञ्जरी-लघुशब्देन्दुशेखर-तत्त्वबोधिनी-बालमनोरमादिटीकाग्रन्थानां च प्रमाणेन काशिकासिद्धान्तकौमुद्योः कुत्र कुत्र सूत्रार्थप्रतिपादने, अनुवृत्तौ, प्रत्यये, फले वा प्राधान्येन भेदो दृश्यते तत्सर्वं विस्तरशो निरूपितम्।

२.८. अष्टमे प्रकरणे—काशिकासिद्धान्तकौमुदीमध्ये सूत्रस्वरूपमविकृत्य कुत्र कुत्र भेदो वर्तते तत्प्रदर्शनाय सूत्रपाठान्तरसङ्कलनं कृतम्। अष्टाध्याय्यां कियती सूत्रसङ्ख्या इति विषयः पूर्वसूरिभिर्बहुचर्चितः। परं नाद्यावधि सूत्रसङ्ख्याविषये कोऽपि दृढनिश्चयो जातः। डॉ. किलहॉर्नमहोदयैर्महाभाष्यकाशिकास्थसूत्रपाठान्तरसङ्कलनं प्रथमं कृतम्। तदुत्तरवर्तिभिरन्यैश्च विद्वद्भिरस्मिन् विषये पुनः पुनः प्रयासः कृतः। परं न वर्तते कुत्रापि सर्वेषां सूत्राणां पाठान्तरसङ्कलनम्। डॉ. किलहॉर्नमहोदयैः स्वकीये सूत्रपाठान्तरसङ्ग्रहे सिद्धान्तकौमुदीस्थसूत्रपाठो न गृहीतः। क्वचिच्च सिद्धान्तकौमुद्या मुद्रितसंस्करणेष्वपि सूत्रस्वरूपविषये परस्परं भेदः। तस्मादस्मिन् प्रकरणे तत्तद्ग्रन्थटीका प्रमाणीकृत्य डॉ. गोल्डस्टूकर-किलहॉर्न-स्कूल्ड-बिर्वे-बेलवलकर-माधवकृष्णशर्म-रामशङ्कर-भट्टाचार्य-नारायणमिश्र-महाभागप्रभृतिविदुषां मतं सम्यगालोड्य काशिकासिद्धान्तकौ-मुद्योः सूत्रस्वरूपविषये महाभाष्याभिमतसूत्रपाठसाक्ष्येण कुत्र कुत्र भेदो वर्तत इति विवेचितम्।

२.९. नवमे प्रकरणे— काशिकासिद्धान्तकौमुदीस्थवैदिकोदाहरणानां (ग्रन्थ-द्वयस्य सूत्रक्रमाङ्कमुल्लिख्य) अकारादिक्रमेण सङ्कलनम्। यदा वैदिकवचनं वैदिकवाङ्मय उपलभ्यते तदा मूलग्रन्थस्योल्लेखः चन्द्रार्धद्वयाङ्किते भागे ( ) कृतः। तस्याग्रे काशिका-सिद्धान्तकौमुदीसूत्रक्रमाङ्कसङ्ख्याक्रमेण निर्दिष्टा वर्तते। यदा काशिकायामुद्धृतस्य वैदिकवचनस्य संहितादिषु प्रकारान्तरेण पाठो दृश्यते, न तु समानरूपेण, तदा टिप्पणभागे निर्देशः। उपलब्धवेदवाङ्मयेऽनुपलभ्यमानानि परं वैदिकत्वेनाभिप्रेतानि वचांसि उद्दिश्य डॉ. ह्विट्नी-रनु-आचार्यलिमये-महाभागानां किं मतं वर्तते तत् टिप्पणभागे दर्शितम्। यानि वचांसि वैदिकवाङ्मये नोपलभ्यन्ते तानि वचांसि सरलरेखयाङ्कितानि। येषामग्रे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकोष्ठभागे प्रश्नचिह्नं (?) वर्तते तानि वचनानि प्राधान्येन सिद्धान्तकौमुद्यां वर्तन्ते, परं भट्टोजिदीक्षितस्य लौकिकत्वेन वैदिकत्वेन वा अभिमतानि तन्निर्णेतुं न शक्यम् ।

२.१०. इत्थमस्मिन् प्रबन्धे न केवलं काशिकासिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम्, अपि तु पाणिनिशब्दशास्त्रपरम्परामधिकृत्य विविधविषयाः चिकित्सिताः । किं बहुना—मुनित्रयं, काशिकावृत्तिं, वृत्तिकारौ वामनजयादित्यौ, रूपावतारं, भाषावृत्तिं, प्रक्रियाकौमुदीं, प्रसादं, व्याकरणमिताक्षरां, वैयाकरणसिद्धान्तकौमुदी, काशिकासिद्धान्तकौमुद्योष्टीकाकारान् जिनेन्द्रबुद्धि-हरदत्तमिश्र-नागेशभट्ट-ज्ञानेन्द्रसरस्वती-वासुदेवदीक्षित-जयकृष्णप्रभृतीन्, तथैव काशिकासिद्धान्तकौमुदीस्थं विषयजातं चाधिकृत्य यद् वक्तव्यं समालोच्यं वास्ति तत्समीक्षाऽस्मिन् प्रबन्ध आधुनिकीं चिकित्सापद्धतिमाश्रित्य कृता—इति शम् ।

—: o :—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमं प्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(क) व्याकरणशास्त्रे सूत्रशैली

भाषायाः स्वरूपं सततं परिवर्तते। भाषा काठिन्यं जहाति, सारल्यं च गृह्णाति। श्लेषं परित्यजति सुगमां सरणिं चाददाति। यदा भाषा लोकप्रिया सुसम्पन्ना च भवति तदा भाषाविदो भाषागतशब्दानामपभ्रंशेभ्यो रक्षणाय तेषां यथार्थस्वरूपपरिज्ञानाय च तां व्याकरणनियमशृङ्खलाबद्धां कुर्वन्ति।[1] इदमेव व्याकरणशास्त्रस्य मूर्धाभिषिक्तं प्रयोजनम्। अत एव व्याकरणं शब्दानुशासनम् इत्युच्यते। तथाह महाभाष्यकारः पतञ्जलिर्महाभाष्यारम्भे "अथ शब्दानुशासनम्"[2] इति। नागेशेनास्य व्याख्या एवं कृता—"अनुशिष्यन्ते साधुशब्देभ्यः पृथग् विविच्य ज्ञाप्यन्तेऽनेन"[3] इति। व्याकरणशास्त्रे शब्दानुशासनं व्याकरणं तन्त्रमित्यतेते सर्वे शब्दाः पर्यायवाचित्वेनाभ्युपगम्यन्ते।[4]

एतत्सर्वं मनसिकृत्य शब्दानां साधुत्वप्रतिपादनाय वैयाकरणैः प्रकृति-प्रत्ययादीनां विभागस्य कल्पना कृता। अत एव भर्तृहरिणा वाक्यपदीये व्याकरणशास्त्रं भाषाया यथार्थस्वरूपस्य अयथार्थोऽसत्यः साधनभूत उपाय इति प्रतिपादितम्।

उपायाः शिक्षमाणानां बालानामपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥[5]

एतद्वचनं न केवलं संस्कृतभाषां विषयीकरोति, अपि तु सकलभाषाः। भाषायाः स्वरूपस्यावबोधो व्याकरणपरिगृहीतादसत्यात् प्रकृतिप्रत्ययकल्पनाद् ऋते न भवति।

---

१ द्र.—कपिलदेवः, सं. व्या. ग. प. आ. पा., संवत् २०१८, पृ. १।

२ म. भा. (किलहॉर्नसंस्करणम्), भाग १, पृ. १।

३ उद्द्योतः (व्या. म. भा., भागः १, झज्जरसंस्करणम्, १९६२), पृ. ३।

४ व्या. म. भा. (झज्जरसंस्करणम्), भागः १, पृ. ४४ :
"व्याक्रियन्ते शब्दा अनेनेति व्याकरणम्।"
न्यासः (का. वृ., भागः १, तारापब्लिकेशन्स, वाराणसी, १९६५), पृ. ७ :
"अनुशिष्यन्ते संस्क्रियन्ते व्युत्पाद्यन्तेऽनेन शब्दा इत्यनुशासनम्। शब्दानामनुशासनं शब्दानुशासनम्।"
ibid, पृ. ५ :
"तन्त्र्यन्ते व्युत्पाद्यन्ते शब्दा अनेनेति तन्त्रं व्याकरणम्। अनेकार्थत्वाद् धातूनां "तत्रि कुटुम्बधारणे" इत्येष धातुरत्र व्युत्पादने वर्तते।"

५ वा. प. (भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, १९६५), २।२३८॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शब्दस्य प्रयोगविषयो महान्वर्तते। कथं चाल्पेन यत्नेन महतो महतः शब्दौघस्य ज्ञानं भवेदिति प्रश्नः। ईदृशी समर्था व्याकरणशास्त्रस्य रचना कर्तव्या या शब्दानां प्रतिपत्तावुपायभूता भवेत्। तथाह भगवान् पतञ्जलिः—"शब्दानां प्रतिपदपाठस्तु नास्युपायः।....कथं तर्हीमे शब्दाः प्रतिपत्तव्याः? किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्"[1] इति। अतो लघुनोपायेन शब्दानां परिज्ञानाय उत्सर्गापवादरूपाणि सामान्यविशेषलक्षणानि प्रणेयानि। कालान्तर एतादृशा एव सामान्यविशेषनियमाः प्रायेण लाघवपूर्णाः सन्तोऽष्टाध्याय्यां परिणताः संपन्नाः। अधस्तनी सूत्रशब्दव्याख्या अमुमेवार्थं प्रमाणीकरोति।

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥[2]

अपि च —

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥[3] इति।

एतादृशान्येव सूत्राणि विश्वतोमुखं विस्तृतमर्थं स्वल्पाक्षरैः प्रतिपादयन्ति। अथ चास्य सूत्रशब्दस्य प्रयोगः कालान्तर एकस्य विशिष्टसाहित्यस्य कृतेऽजायत यस्मिन् संस्कृतव्याकरणं प्रतिष्ठितं विद्यते।

संज्ञा–परिभाषा–विधि–नियम–अतिदेश–अधिकारादीनि व्याकरणस्य षड्विधानि सूत्राणि।[4] तत्र "संज्ञा च नाम यतो न लघीयः"[5] इति संज्ञायाः स्वरूपम्; "परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलयति"[6] इति च पभिषायाः

---

१ म. भा. (किलहॉर्नसंस्करणम्), भागः १, पृ. ६।

२ वायुपुराणम् (हरिनारायणआपटे, आनन्दाश्रमः, पूना, शालिवाहनशकाब्दः १८२७), ५९।१४२, पृ. २०५॥ मुग्धबोधरामतर्कवागीशटीका, भागः १ (एशिआटिक सोसाइटी ऑव् बंगाल, १९११), पृ. ९।

३ शङ्कराचार्यविरचितब्रह्मसूत्रभाष्योपरि वाचस्पतिमिश्रप्रणीता भामतीटीका, ब्रह्मसूत्रम् १।१।१, पृ. ३४।

४ दुर्गसिंहप्रणीतकातन्त्रटीका (कलकत्ता, १८७४), सू. १।१।२, पृ. ४६९:

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥

५ म. भा. (किलहॉर्नसंस्करणम्), भागः १, पृ. ८१।

६ *ibid*, पृ. ३५९।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वरूप प्रकटीचकार पतञ्जलिः। एतादृशानि लघूनि लघुतराणि च संज्ञासूत्राणि परिभाषासूत्राणि च व्याकरणशास्त्रस्यैकस्मिन् भागे निर्दिष्टान्यपि कृत्स्नं शास्त्रमभिज्वलयन्ति। अधिकारसूत्राणां च व्यापकतामुररीकृत्य भगवता भाष्यकृता तानि त्रिधा विभक्तानि। यथा—"कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सुरञ्जलितः सर्वं वेश्माभिज्वलयति। अपरोऽधिकारो यथा रज्वायसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण। अपरोऽधिकारः प्रतियोगं तस्या-निर्देशार्थं इति योगे योग उपतिष्ठत इति।"[1] तथा अप्राप्तस्य प्रापणं विधिः, सर्वत्र प्राप्तस्य विधेस्तदितराविषयत्वरूपसकोचनं नियमः, अन्यधर्मस्यान्यत्रारोपणं चातिदेश इत्येवं क्रमेण विधिनियमातिदेशसूत्राणां कार्यं भवति। अनया रीत्या षड्विधैः सूत्रैः शब्दोपदेशार्थं भगवता पाणिनिना प्रयत्नं कृतम्। शब्दप्रतिपत्तौ लघीयानुपायो व्या-करणमिति मत्वा पतञ्जलिराचार्यः प्राह—"लध्वर्थं चाध्येयं व्याकरणम्, न चान्तरेण लघुनोपायेन शब्दाः शक्या विज्ञातुम्"[2] इति। अपि च "येन अल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्"[3] इति वचसा अयमेव शब्दोपदेशार्थं मार्ग उपादेयः, स चैव पाणिनेरभिमत इति प्रकाश्यते। अत एव यदा उपर्युक्तेन लघुनोपायेन विना महतः संस्कृतवाङ्मयस्यानन्तां शब्दश्रेणीं स्वकीयैः शब्दजलविन्दुभिर्वर्णयितुं कस्यापि क्षमता नाजायत, तदा-सूत्रशैली एव सर्वाधिकारसक्षमा, अनेनैव लघुनो-पायेन विपुलसंस्कृतवाङ्मयस्य शब्दराशेर्वर्णनं संभाव्यते, उपायान्तरेषु सा शक्तिर्न विद्यत इति विमृश्य व्याकरणशास्त्रप्रणेतृभिः सूत्रशैली एव समाश्रिता।

वैदिकवाङ्मयस्य शाखाप्रशाखाभेदैरेतत्प्रतीयते यत् पुराकालेऽध्ययनाध्यापनस्य प्रणाली सर्वथा मौखिकी आसीत्। श्रुतिशब्दोऽपि अमुमेवार्थं ध्वनयति।[4] तदा गुरुशिष्यावुभावपि पाठ्यविषयं कण्ठस्थीकर्तुं निगदेन कृतोद्यमौ आस्ताम्। प्रायः स्मृतिसौकर्यार्थं जनैः सूत्राणि प्रथमतः संहितारूपेणैव पठितानि स्युः। शब्दशास्त्रे च संहितापाठस्वीकरणेनैव सूत्राणां योगविभागपरम्पराऽभ्युपपद्यते। किं च सूत्राणां प्रतिव्यक्ति पठनेऽप्यष्टाध्याय्या नैकवारमुपलभ्यमाना छन्दोबद्धशैली[5] न केनापि

---

१ *ibid*, पृ. ११९।

२ *ibid*, पृ. १।

३ *ibid*, पृ. ६।

४ *ibid*, भागः २, पृ १५२: श्रूयतेऽनयेतिः श्रुतिः (३।३।९५, वा. ३)।

५ न्यासः १।४।५६ (का. वृ., भागः १, वृ. ५८८)—"एवं मन्यते-यदा सूत्राणि संहितया पठ्यन्ते—'शकि णमुल्कमुलावीश्वरे तोसुन्कसुनौ' (३।४।१२-१३) इति तदा...." इति।
अत्र पदमञ्जरी अपि द्रष्टव्या।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिषेद्धुं शक्यते । अत एव नैकैर्विद्वद्भिः "वृद्धिरादैच्" (१।१।१), "अदेङ् गुणः" (१।१।२) इति सूत्रद्वयं संयोज्य अनुष्टुभोऽयं प्रथमपाद इति स्वीकृतम् ।[1] पाणिनिसूत्रेषु प्राचीनछन्दोबद्धव्याकरणस्यानुकृतिः सम्यक्तयावलोक्यते—

"पक्षिमत्स्यमृगान् हन्ति" (४।४।३५)
"परिपन्थं च तिष्ठति" (४।४।३६) ।

अत्र इमे द्वे अपि सूत्रे अनुष्टुभो द्वौ पादौ भवतः । अत एव काशिकाया वचनमभ्युपपद्यते—"चकारो भिन्नक्रमः प्रत्ययार्थं समुच्चिनोति"[2] इति । अत एव पाणिन्युत्तरवर्तिभिर्वैयाकरणैश्चन्द्रगोमिप्रभृतिभिः "परिपन्थं च तिष्ठति" (चा. व्या. ३।४।३३) इदमेव सूत्रं प्रणीतम् ।

युधिष्ठिरमीमांसकमहोदयमतेन काशकृत्स्नात् पूर्वं सूत्ररचना ऋक्प्रातिशाख्यवत् श्लोकवद्धासीत् ।[3] परं छन्दोबद्धसूत्ररचानायां लाघवगौरवचर्चा गौणतां याति । तत्र च श्लोकपादपूरणार्थमनेकेषां पदानां संयोजनमावश्यकम् । अस्थानेऽपि चकारादयः शब्दाः पठनीया भवन्तीति हेतोश्छात्राणां स्मरणशक्तिसौकर्याय मुनिभिः स्वल्पपरिश्रमसाध्या सारवद्विश्वतोमुखी गद्यसूत्ररचनाऽभ्युपगता ।

(ख) पाणिनिपरम्परायाः कालविभागः

प्राचीनकाले यावन्ति शब्दशास्त्राणि विरचितान्यासन् तेषु केवलं पाणिनीयव्याकरणमेवाधुनोपलभ्यते । सूत्रात्मकेऽस्मिन् ग्रन्थेऽष्टौ अध्याया वर्तन्ते । अत एव कृतिरियमष्टाध्यायी अष्टकमिति वा कथ्यते । प्रत्यध्यायं चत्वारः पादाः, प्रतिपादं च बहूनि सूत्राणि वर्तन्ते । संपिण्डनेन सूत्रसङ्ख्या ३९९६ अथवा ३९९५ भवति । तथा चोक्तम्—

त्रीणि सूत्रसहस्राणि तथा नवशतानि च ।
षण्णवतिं च सूत्राणां पाणिनिः कृतवान् स्वयम् ॥[4]

अपि च—

चतुःसहस्री सूत्राणां पञ्चसूत्रविवर्जिता ।
अष्टाध्यायी पाणिनीया सूत्रैर्महेश्वरैः सह ॥[5]

---

१ द्र.—युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १, प्रथमसंस्करणम्, पृ. ८३ ।
२ का. वृ. ४।४।३६.
३ युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १, प्रथमसंस्करणम्, पृ. ८३-८४ ।
४ द्र—न्यासः (श्रीशचन्द्रचक्रवर्ती, १९१३-१९१६), भागः १, प्रस्तावना, पृ. १ ।
५ स्व. सि. च. (अन्नामलाइविश्वविद्यालयसंस्करणम्), श्लोकः १५ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्रन्थेऽस्मिन् विशालतां क्रमबद्धतां सूक्ष्मेक्षिकां च दृष्ट्वा पौरस्त्यैः पाश्चात्यैश्च विद्वद्भिरस्य गौरवं मुहुर्मुहुर्गीतम्। अस्य ग्रन्थस्यानितरसाधारणत्वादेव पूर्ववर्तीन्यन्यानि आपिशलादिव्याकरणानि कथामात्रावशिष्टानि बभूवुः।[1]

पाणिनिकालविषये विदुषां नैकानि मतानि वरीवृत्यन्ते। तत्र डॉ. गोल्डस्टुकरमतेन[2] पाणिनिः शुक्लयजुर्वेदब्राह्मणग्रन्थप्रणयनानन्तरं सञ्जातः। केचित् तद्धितप्रयोगाणामाधारेण यवनानीशब्दप्रचलनकालप्रमाणेन च डॉ. कीथमहाभागमतेन[3] पाणिनिः ३५० ख्रिष्टाब्दपूर्ववर्ती वर्तते। परन्तु अनेन डॉ. गोल्डस्टुकरकीथमहाभागप्रतिपादितसिद्धान्तद्वयेन सह प्रो. सरस्वतीप्रसादचतुर्वेदिमहोदयानां सर्वथा वैमत्यं विद्यते। तेऽष्टाध्याय्या वर्तमानं स्वरूपम् ऋक्प्रातिशाख्यात् पूर्ववर्तीति स्वीकृत्य[4] पाणिनेः समयः ७०० ख्रिष्टाब्दपूर्ववर्तीति स्वीकुर्वन्ति।[5] डॉ. बी. के. घोषमहाभागा[6] अष्टाध्यायीं ऋक्प्रातिशाख्यादुत्तरवर्तिनीति मत्वा पाणिनिं ख्रिष्टाब्दस्य चतुर्थपूर्वशतके स्थापयितुमिच्छन्ति। परं प्रो. एस. के. बेलवलकरमहोदयाः[7] प्रो. के. वी. पाठकमहाभागाश्च[8]—पाणिनिः ख्रिष्टाब्दस्य सप्तमशतकपूर्वमेवाभूदित्यङ्गीकुर्वन्ति। एतां पाणिनिविषये पृथक्पृथक्कालावलम्बिनीं भारतीयां पाश्चात्यां च विचारसरणिं पुरतः स्थापयित्वा अन्ते डॉ. वासुदेवशरण-

---

१ द्र.—युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १, पृ. ७; ६२-७८: साम्प्रतमैन्द्र - भागुरि - चारायण - काशकृत्स्नादि - व्याकरणानां कानिचिदेव सूत्राण्युलभ्यन्ते।

२ T. GOLDSTUCKER. *Pāṇini*, p.103.

३ A.B. KIETH, "Pāṇini's Vocabulary", *BK*, Vol i, 1945, pp. 343-45.

४ S.P. CHATURVEDI, "Pāṇini and the Ṛkprātiśākhya", *NIA*, Vol. i, pp. 550-459.

५ S.P. CHATURVEDI, "Pāṇini's Vocabulary and his Date", *SB*, part ii (VVRI, 1950), pp. 144-147.
अस्मिन् शोधपत्रे डॉ. कीथनिर्धारितपाणिनिकालविषयकसिद्धान्तस्य खण्डनं वर्तते

६ S.K. GHOSH, "Mr. CHATURVEDI on Pāṇini and the Ṛkprātiśākhya", *NIA*, Vol. ii, pp. 59-62.

७ S.K. BELVALKAR, *Systems of Sanskrit Grammar*, pp. 13-18.

८ K.B. PATHAK, "The Age of Pāṇini and Sanskrit as a Spoken Language", *ABORI*, Vol. xi, Part i, p. 83.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्रवालमहोदयः[1]—पाणिनेः कालः ५०० ख्रिष्टाब्दपूर्वं इति निर्धारयन्ति। एतन्मतं तैः परमतानि साधकबाधकयुक्तिपुरस्सरं खण्डयित्वा सोपपत्तिपूर्वकं विवेचितमत एव तत्स्वीकार्यमिति मे प्रतिभाति।

पाणिनीयशब्दानुशासनस्य तिस्रोऽवस्था वर्तन्ते—(१) त्रिमुनिकालः, (२) त्रिमुनिटीकाकालः, (३) प्रक्रियाकालश्च। प्रायः पाणिनिकालादारभ्य ख्रिष्टाब्दस्य षष्ठशताब्दपर्यन्तं त्रिमुनिकालः।[2] तत्र च पाणिनिकाले संस्कृतं लोकभाषा आसीत्।[3] सैव पतञ्जलिकाले शिष्टभाषात्वेन व्यवहृता। अस्मिन् काले शाब्दिकैर्भाषायां प्रयुक्ताः शब्दा व्याकृताः। परन्तु पाणिनिकाले संस्कृतभाषा जीवन्ती परिवर्तिनी चासीत्। अतः कालक्रमेण नूतनाः शब्दा नूतनाश्च प्रयोगा भाषायां संगृहीताः। एतेषां नूतनोद्भवानां शब्दानां विश्लेषणं विधाय भगवता पणिनिना व्याकरणशास्त्रे तेषां समावेशः कृतः। पाणिन्युत्तरकालेऽपि भाषा परिवर्तिनी आसीत्। सा चोत्तरोत्तरं स्फीता बभूव। एतेषां नूतनोदितानां शब्दानामन्तर्भावो व्याकरणशास्त्रे इष्ट्युपसंख्यानाभ्यां कृतो भगवता कात्यायनेन, पतञ्जलिना, अन्यैश्च वार्तिककृद्भिः। नूनं च वार्तिकानां सन्निवेशनेनेदं पाणिनीयं शब्दशास्त्रं पुष्पितं फलितं प्रतिमण्डितं चाभूत्।

एतज्जानन्त्येव सर्वे यद् भगवता कात्यायनेन नूतनं व्याकरणं न विरचितम् किन्तु पाणिनीयतन्त्रं पद्धतिं चावलम्ब्य तदेव व्याकरणं समुपबृंहितम्। अतीव दुःखकरोऽयं विषयो यदिदानीं कात्यायनप्रणीतानां वार्त्तिकानां मुद्रितः स्वतन्त्रग्रन्थो नोपलभ्यते।

पुराकालादेव वैयाकरणनिकाये वार्त्तिकलक्षणविषय ऐकमत्यं वर्तते। तथा हि—

तत्र च वार्त्तिके वररुचिरुक्तानुक्तदुरुक्ताद्यचिन्तयत्।[4]

---

१ V.S. AGRAWAL, *India as known to Pāṇini*, ii ed., p. 476:

"Cn the basis of his numismatic data Pāṇini thus belongs to the period of transition between the age of Bimbisāra and Kauṭilya; i. e. between the sixth and fourth century B.C. A date in the fifth centuy B.C. admirably reconcils the coin-references of the *Aṣṭādhyāyi*".

२ द्र.—सि. कौ. वै. प्र. (प्रो. उमाशंकरशर्मा ऋषि, चौखम्बा १९६२) भूमिका, पृ. ३।

३ द्र.—K.B. PATHAK, *ABORI*, Vol. xi, Part i, 1930, pp. 59-83.

४ इदं वचनं डॉ. रामसुरेशत्रिपाठिमहोदयैः "वार्त्तिक का स्वरूप" (अभि. भा., वर्ष ३, अङ्क १, १९६१, पृ. १) इति नामके स्वकीये शोधपत्रे शेषनारायणविरचितसूक्तिरत्नाकरग्रन्थस्य हस्तलेखस्यवचनत्वेन निर्दिष्टम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथैव च[1]—

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा विपश्चितः ।।[1]

नागेशोऽपि—

सूत्रेऽनुक्तदुरुक्तचिन्ताकरत्वं वार्त्तिकत्वम् ।[2] इति ।

अस्मिन् वार्त्तिकलक्षणे यद्यपि नागेशेन "उक्त" शब्दो न संगृहीतः,परमयमुद्द्योत एवान्यत्रोपलभ्यते । यथा हि—

उक्तानुक्तदुरुक्तचिन्ताकरत्वं हि वार्त्तिकत्वम्[3] इति ।

एतेषु वार्त्तिकलक्षणेषु "चिन्ता"शब्दः पुराकाले नासीदिति डॉ. रामसुरेशत्रिपाठि-महोदयानां मतम् ।[4] तेषां मतेन वार्त्तिकलक्षणेऽयं चिन्ताशब्दः केनापि पश्चात् प्रक्षिप्तो वर्तते । डॉ. गोल्डस्टुकर-वेबरमहाभागानामप्येतन्मतं यत् कात्यायनेन पाणिनिसूत्रेषु दोषोद्भावनदृष्ट्यैव वार्त्तिकानि प्रणीतान्यासन् ।[5] डॉ. बर्नेलमहाभागानामप्येष एव विचारः ।[6] परन्तु डॉ. किलहॉर्नमतेन कात्यायनेन

---

१ इदं वार्त्तिकलक्षणं के. वी. अभ्यंकरमहोदयलिखित—व्याकरणमहाभाष्यस्य (भागः ७, प्रस्तावनाखण्डम्, १९५४) वासुदेवशास्त्रिलिखितप्रस्तावनाभागे ८६ पृष्ठे—पराशरपुराणान्तर्गताष्टादशाध्यायस्थमुक्तम् । एवं हीदं युधिष्ठिरमीमांसक-महोदयैः (सं. व्या. शा. इति., भागः १, प्रथमसंस्करण, पृ. २१०) पाराशरोपपुराणस्थं स्वीकृतम् । परमद्यावधिः पराशरपुराणम्, पाराशरोपपुराणमिति वा कोऽपि मुद्रितग्रन्थो नोपलभ्यते ।

२ उद्द्योतः (व्या. म. भा., गुरुकुलझज्जरसंस्करणम, भागः १), पृ. १२५, सूत्रम् १ । १ । १.

३ *ibid*, भागः ५, पृ. २२०, सूत्रम् ७ । ३ । ५९: अत्र "वार्त्तिकत्वम्" इत्यस्य स्थाने "वार्त्तिककारत्वम्" इति लेखः ।

४ रामसुरेशत्रिपाठी, अभि. भा., वर्ष ,३ अङ्क १, १९६१, पृ. १-२: धर्मकीर्ति-विरचितप्रमाणवार्त्तिकग्रन्थ एव चिन्ताशब्दस्य प्रथमत्वेन प्रयोगः । तत एव व्याकरणस्य वार्त्तिकाराणां कृतेऽप्ययं प्रयुक्तो वर्तते ।

५-६ द्र.— F. KIELHORN, *Kātyāyana and Patañjali*, pp. 2-4: अत्र गोल्डस्टुकर-वेबर-बर्नेलप्रभृतीनां विदुषां कात्यायनवार्त्तिकानां विषये कीदृशो विचार इति तत्तत्प्रणीतग्रन्थेभ्योऽवतरणानि प्रस्तुतानि वर्तन्ते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वार्त्तिकानि पाणिनिशास्त्रे केवलं दोषानन्वेष्टुं न लिखितानि,[1] किन्तु निःपक्षपातेन तत्र गुणदोषविवेचनाय तानि प्रवृत्तानि । महाभाष्यकारस्य हृदि वार्त्तिककारं प्रति कालुष्यं नास्ति । वार्त्तिककारस्य चेतसि सूत्रकारमनु कोऽपि विद्वेषो नास्ति । यद्यपि महाभाष्ये—"कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्"[2] ; "आहोपुरुषिकामात्रं तु भवानाह"[3] ; "सैषा महतो वंशस्तम्बाल्लट्वानुकृष्यते"[4] ; "इयं युगपदाधिकरणवचनता नाम दुःखा च दुरुपपादा च"[5] इत्येवमादीनि वार्त्तिकमतखण्डनार्थप्रयुक्तानि कियताँशेनाधिक्षेपपराणि बहूनि वचनान्युपलभ्यन्ते, तथापि तानि कात्यायनविषये असूयापरत्वेन न ग्राह्याणि; किन्तु महाभाष्यस्य शैलीगतसौष्ठवस्यैव द्योतकानि । महाभाष्यकृदपि साधकबाधकयुक्तीः पुरतः स्थापयित्वा कदाचित्कात्यानमतमनुसरति, कदाचिच्च पाणिनिमतम् । न तु पाणिनिसूत्रेष्वेव तस्य पक्षपातः । कात्यायनवार्त्तिकानि सूत्रशैलीमाश्रित्य पाणिनिसूत्राणां मितशब्दैः सारशब्दैश्च गुणदोषविवेचनं कुर्वन्ति । सूत्रशैल्यामधिक्षेपपराणां शब्दानामवकाश एव नास्ति । अतः पाणिनिसूत्रेषु केवलं दोषान्वेषणं कर्तुं वार्त्तिकानि लिखितानि, वार्त्तिकस्थान् दोषानेवोद्भावयितुं पतञ्जलिना महाभाष्यं लिखितमिति मतं नादरणीयम् ।[6]

डॉ. एस. के. वेलवलकरमहोदयेन[7] कात्यायनस्य समयः ख्रि. पू. ३५०-५०० पर्यन्तं स्थापितः । श्रीशचन्द्रचक्रवर्तिमहोदयोऽपि ३५० ख्रिष्टाब्दपूर्ववर्ती एव कात्यायन इति निर्धारितवान् ।[8] परं केचन विद्वांसः पाणिनिकात्यायनमुनिद्वयस्य समकालिकत्वमपि कल्पयन्ति । तत्तु ऐतिहासिकदृष्ट्या प्रबलप्रमाणाभावाच्च सर्वथा हेयमेव प्रतिभाति । अपि च मुनिद्वयस्य परस्परं स्पर्धकत्वकल्पनमप्यनुचितम् । तस्मात् सारासारविवेचनेनैवं ज्ञायते यत् कात्यायनः ख्रिष्टाब्दात्पूर्वं ३५०तः नातिदूरवर्ती ।

---

१ *ibid*, p. 47:

"It is true that the Vārttikas are not a commentary on the rules of Pāṇini's grammar.....But it is in my opinion equally true that Kātyāyana, in composing his Vārttikas, did not propose to himself the task of finding fault with Pāṇini, for he justifies the rules of his predecessor as often as he finds fault with them."

२ म. भा. (किलहॉर्नसंस्करणम्), भागः १, पृ. ८ ।

३ *ibid*, पृ. १५ ।

४ *ibid*, पृ. २१ ।

५ *ibid*, पृ. ४३४ ।

६ रामसुरेशत्रिपाठी, अभि. भा., वर्ष ३, अङ्क १, १९६१, पृ. ६ ।

७ S. K. BELVALKAR, *Systems of Sanskrit Grammar*, p. 29.

८ न्यासः (श्रीशचन्द्रचक्रवर्ती), भागः १, प्रस्तावना, पृ. ६ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालान्तरेऽनेकैर्वैयाकरणैः सवार्त्तिकमिदं पाणिनीयाष्टकं व्याख्यातम्। परं यदा मध्यमाधिकारिणो वृत्तिसाहाय्येन पाणिनेः सूत्राणि न ज्ञातुमपारयन्, तदा कात्यायन-वार्त्तिकानामेका प्रौढा व्याख्या भगवता पतञ्जलिना व्यरचि। सा च साम्प्रतं "महाभाष्यम्" इति नाम्ना प्रसिद्धा वर्तते। अतः पाणिनेरष्टाध्यायी सवार्त्तिका सभाष्या टीकोपटीकाभिः समुपबृंहिता "पाणिनीयतन्त्रम्", "पणिनीयव्याकरणम्" इति निर्देशं भेजे।

महाभाष्यं न केवलं व्याकरणनिबन्धमात्रमित्यवगन्तव्यम्। अस्मिन् ग्रन्थे सर्वाण्यपि ज्ञातव्यानि विषयजातानि स्थाने स्थाने सपरिकरं विवेचितानि वर्तन्ते। तथोक्तं भर्तृहरिणा—

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥[1] इति।

तत्र सर्वेऽपि लौकिकव्यवहाराः, प्राक्तना इतिहासाः, आवश्यकधर्माः, दर्शनानां सिद्धान्ताश्च स्थाने स्थान उपवर्णिताः। विज्ञानस्यापि गूढतमाः सिद्धान्ता अस्मिन्-महाम्बुधावुपलभ्यन्ते। यथा "स्थानेऽन्तरतमः" (१।१।५०) इति सूत्रे—

"अचेतनेष्वपि। तद् यथा। लोष्टः क्षिप्तो वायुवेगं गत्वा नैव तिर्यग् गच्छति नोर्ध्वमारोहति पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः। तथा या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः स धूम आकाशदेशे निवाते नैव तिर्यग् गच्छति नावागवरोहति अब्विकारोऽप एव गच्छत्यान्तर्यतः। तथा ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितो नैव तिर्यग् गच्छति नावागवरोहति ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः"[2] इति।

महाभाष्ये यादृशी सरला, गभीरा, सुगमा च भाषा न तादृशी कस्मिन्नप्यन्यस्मिन् ग्रन्थेऽवलोक्यते।

पतञ्जलेः समयविषये नेतिहासविदां विभिन्ना मतयः। महाभाष्ये "जित्पर्याय वचनस्यैव राजाद्यर्थम्" (१।१।६८, वा. ७) इति वार्त्तिके "पुष्यमित्रसभा, चन्द्रगुप्तसभा" इत्युदाहरणद्वयं वर्तते। तत्र प्रथमश्चन्द्रगुप्तः खिष्टाब्दस्य ३२१ शतकपूर्वे मगधप्रदेशे मौर्यसाम्राज्यस्य संस्थापको बभूव। द्वितीयश्चन्द्रगुप्तः ३२० खिष्टाब्दे गुप्तवंशस्य शासकोऽभूत्। अयं द्वितीयश्चन्द्रगुप्तः पतञ्जलिसमकालिको नैव भवितुमर्हति; यतः पुष्यमित्रो मगधप्रदेशे शुङ्गवंशस्य संस्थापक आसीत्, यो

---

१ वा. प. २।४७९॥

२ म. भा. (किलहॉर्नसंस्करणम्), भागः १, पृ. १२३।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मौर्यवंशोद्भवाद् बृहद्रथादनन्तरं खिष्टाब्दपूर्वे १८३ संवत्सरे शासको बभूव। अपि च महाभाष्ये ३।१।२६ सूत्रे "पुष्यमित्रो यजते याजका याजयन्तीति, तत्र भवितव्यं पुष्यमित्रो याजयते याजका याजयन्तीति"; अग्रे च ३।२।१२३ सूत्रे "इह पुष्यमित्रं याजयामः" इत्यादिकं पतञ्जलिप्रदत्तं सर्वं वृत्तं कालिदासेन मालविकाग्निमित्र उपवर्णितमश्वमेधमेव लक्षयति। अयं पुष्यमित्रः खिष्टाब्दपूर्वे १४८ संवत्सरे स्वर्गं जगाम। महाभाष्ये ३।२।१११ सूत्रेऽपि "अरुणद् यवनः साकेतम्, अरुणद् यवनो माध्यमिकाम्" इत्यादिकमुदाहरणद्वयं विद्यते। ग्रीकदेशोद्भवेन महेन्द्रेण खिष्टाब्दपूर्वे १५० संवत्सरे 'साकेत-माध्यमिका' चेतिनगरद्वयमपि स्वायीत्तकृतमासीत्। अत एव पतञ्जलिः खिष्टाब्दपूर्वद्वितीयशतके निर्धारणीयः। परन्तु ए. एल. बशम्महोदयाः पतञ्जलिं खिष्टाब्दस्य पूर्वे प्रथमे शतके स्वीकुर्वन्ति।[1]

अस्मिन् त्रिमुनिकाले पाणिनिकात्यायनपतञ्जलिप्रणीतैर्नियमैर्भाषायाः शरीरं सुश्लिष्टं, सुपरिणतं, सुनियन्त्रितं च सञ्जातम्। तथा च संस्कृतभाषा अभिजातभाषा[2] (classical language) पदेन व्यवहृति भेजे। अयं त्रिमुनिकालो व्याकरणनिर्माणकालस्य केवला प्रथमैवावस्थासीत्। अस्यां शनैः शनैः प्रौढिं गच्छन्तीयं भाषा भाषाशास्त्रस्य जननी अभूत्। पाणिन्यादिकृतनियमानां परिपालनेन भाषायाः परिवर्तनं समाप्तिमगात्। नियमबद्धा चेयं संस्कृतभाषा शिष्टानामेव भाषा बभूव। त्रिमुनिकृतभूरिपरिश्रमेण वक्तुः शब्दयोजनाविषये प्रयोगनियम एव स्वातन्त्र्यमासीत् रूपपरिवर्तनस्य तु प्रश्न एव नासीत्; यतो ह्यत्र प्रातिपदिकानां धातूनां च सर्वाणि रूपाणि स्थैर्यं प्राप्तान्यासन्। अनन्तरं यद्यपि नवीनाः शब्दा आविर्भूतास्तथापि तैः पूर्वस्थापिता नियमा एव शरणीकर्तव्याः। व्याकरणस्थनियमेषु परिवर्तनस्य परिवर्धनस्य च कृते कोऽप्यत्रकाशो नासीत्। एवं रीत्या संस्कृतभाषाया यथार्थस्वरूपपरिज्ञानाय मुनित्रयस्याध्ययनमावश्यकमभूत्। अस्यामवस्थायां पाणिनिकात्यायनप-

---

१ B. N. PURI, *India in the Time of Patañjali, Reviewed* by A.L. BASHAM, *BSOAS*. Vol. xxii (London, 1959), pp. 595-596 :
"In fact that Patañjali mentions the Śakas along the Yavanas is hard to explain on assuption that he was contemporary of Puṣyamitra since at the time the Indo-Greeks were thoroughly established in north-western India, and were only gradually ousted by the Śakas at a much later period. The difficulty is briefly recognised by DR. PURI, but might have been given much fuller treatment. We suggest the possibility that Patañjali lived not in the second but in the early first century B.C., when traditions about Puṣyamitra and the Yavanas were still current, but when the Śakas had already penertrated the north-western frontiers of the sub-continent of India."

२ द्र.—सि. कौ. वै. प्र., भूमिका, पृ. ४।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तञ्जलिप्रणीतमूलग्रन्थानामेवाध्ययनं प्रावर्तत । संस्कृतस्य प्रचारोऽधिकतरः समजायत । अष्टाध्यायीक्रमावबोधने नासीत् किमपि काठिन्यम् । प्रायः प्राथमिकाश्छात्रा एकसंवत्सरपर्यन्तं संस्कृताध्ययने संजातेऽस्याः सम्यगध्ययनं कर्तुं समर्था आसन् । तदनन्तरं च सवार्त्तिकं महाभाष्यमधीत्य ते शब्दशास्त्रे कौशलमधिगच्छन्ति स्म । अयं क्रमः खिष्टाब्दस्य षष्ठशतकपर्यन्तं प्रचलित आसीत् ।

खिष्टाब्दस्य षष्ठशतकप्रारम्भात् त्रयोदशशतकपर्यन्तं त्रिमुनिटीकाकालः प्रतीयते । अतः पूर्वं यद्यपि मौखिकेन विधिना पाणिनिव्याकरणार्थावबोधने छात्रा निरता आसन् तथापि सामान्यानां छात्राणां कृत एष उपायोऽपर्याप्तोऽभूत् । तदर्थं सुलभं व्याकरणमावश्यकमासीत् । अत एव चन्द्रगोमिनामकेन[1] बौद्धाचार्येण पाणिनीयव्याकरणे किमपि परिवर्तनं परिवर्धनं च विधाय पाणिनीयव्याकरणसदृशमेकमपरं व्याकरणं व्यरचि । एतदारभ्य चान्द्रव्याकरणपरम्परा प्रवृत्ता । यद्यप्यस्मिन् व्याकरणे पाणिनीयान्येव मूलभूतानि तत्त्वान्यनुसृतानि तथापि चात्र दृश्यन्ते केचन मूलगामिनो विचाराः, ये न खलु महाभाष्य उपलभ्यन्ते । अयमेव तर्कोऽन्यैरपि हेतुभिर्दृढीकर्तुं शक्यते । महाभाष्यं विशृङ्खलितमासीत् । भूयांसस्तत्र पाठभेदा बभूवुः ।[2] महाभाष्याध्ययनपरम्परा लुप्तप्रायासीत् । तथा चोक्तं वाक्यपदीये भर्तृहरिणा—

वैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः ।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके ॥
यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः ।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः ॥
पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः ।
स नीतो बहुशाखात्वं चन्द्राचार्यादिभिः पुनः ॥[3] इति ।

---

१ चन्द्रगोमिनः कालविषये "काशिकायां पाणिनीयेतरव्याकरणपरम्पराणां प्रभावप्रदर्शनावसरे" अग्रे वक्ष्यामः ।

२ उद्द्योतः ३।१।२५:
"नित्यं कौ । उत्तरयोरिति पदस्वरसाद्धातोरेकाच इति सूत्र एवेदं वार्त्तिकमिति लभ्यते । तेनेतः पूर्वं नित्यमित्यादिसूत्रद्वयलेखो लेखकप्रमादात् ।"
उद्द्योतः ३।१।३४:
"नेषतु नेषतादिति दृश्यते" इति भाष्ये पाठः । लोकेऽपीति शेषः । नेष्टादिति दृश्यते इति लेखकप्रमादः ।"

३ वा. प. २।४८१-४८३ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राजतरङ्गिण्यां कल्हणोऽप्येवं वदति :—

देशान्तरादागमय्य व्याचक्षणान् क्षमापतिः ।
प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥
क्षीराभिधानाच्छब्दविद्योपाध्यायात् संभृतश्रुतः ।
बुधैः स ययौ वृद्धि स जयापीडपण्डितः ॥[1] इति ।

चान्द्रव्याकरणेऽष्टाध्यायीक्रमो नादृतः । अष्टाध्यायीक्रममाश्रित्य विलिखितं महाभाष्यं नामशेषमिवाभूत् । तेन पाणिनीयपरम्परा संशयपदवीमारूढा । अत एवाष्टाध्यायीक्रमस्थापनं भूय आवश्यकमिति ज्ञात्वा वामनजयादित्यनामकेन पण्डितद्वयेन पाणिनेरष्टाध्याय्या उपरि काशिकावृत्तिनाम्नी टीका विरचिता ।

(ग) काशिकातः पूर्वं वृत्तिग्रन्थानां स्थितिः

वैयाकरणैः "वृत्तिः" इति शब्दस्यार्थः पाणिनिसूत्राणामुदाहरणप्रत्युदाहरणसमन्वितं यथाक्रमं व्याख्यानमित्यभिप्रेयते ।[2] पुरा पाणिनिसूत्रेषु तादृशा बहवो वृत्तिग्रन्था आसन् येषु केचन महाभाष्यात् पूर्ववर्तिनो भवितुमर्हन्ति । तथा हि— महाभाष्यस्य सूक्ष्मेक्षिकया परीक्षण एतद्दृष्टिपथमायाति यत् पतञ्जलिराचार्यः काँश्चन वृत्तिग्रन्थान् निश्चप्रचं सम्यक् पठति स्म । परं यदा सर्वासु अष्टाध्यायीटीकासु महाभाष्यमनितरसाधारणं स्थानं प्रपेदे तदा अष्टाध्यायीमाश्रित्य विरचिता अन्ये सर्वे वृत्तिग्रन्था गौणत्वं भेजिरे । तेन च वृत्तिग्रन्थानामस्तित्वमपि साम्प्रतं समाप्तिं ययौ । अस्मिन् प्रकरणे काशिकातः पूर्ववर्तिनां वृत्तिग्रन्थानां स्थितिं साधयितुं केचन तर्का उपस्थाप्यन्ते ।

भगवता पतञ्जलिना महाभाष्ये द्विवारं "वृत्तिसूत्रम्" इति पदस्य प्रयोगः कृतः । "समर्थः पदविधिः" (२।१।१), "अनेकमन्यपदार्थे" (२।२।२४) सूत्रयोर्भगवता पतञ्जलिना क्रमश एवमुक्तम्—"न ब्रूमो वृत्तिसूत्रवचनप्रामाण्यादिति । किं तर्हि,

---

१ राज. ४।४८८-४८९ ॥

२ प. म. (का. वृ., भागः १), पृ. ४: "तत्र सूत्रार्थप्रधानो ग्रन्थो वृत्तिः ।" न्यासः (का. वृ., भागः १), पृ. ४: "तत्र च वृत्तिः—पाणिनिप्रणीतानां सूत्राणां विवरणम् ।"
म. भा., पस्प., ११: "न केवलं चर्चापदानि व्याख्यानम्—'वृद्धिः, आत्, एच्' इति, किं तर्हि ? उदाहरणं प्रत्युदाहरणम् वाक्याध्यारः—इत्येतत्समुदितं व्याख्यानं भवति ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वार्तिकवचनप्रामाण्यादिति"; "केचित्तावदाहुर्यद् वृत्तिसूत्र इति, संख्याव्ययासन्नादूराधिकसंख्याः संख्येये। अपर आह यद् वार्तिक इति।" तस्मादेवं ज्ञायते यदत्र "वृत्तिसूत्रम्" इति पदेन वार्तिकं न गृह्यते। नागेशेन महाभाष्यस्य (२।१।१) व्याख्यानावसरे स्वकीय उद्द्योते प्रथमं शङ्कामुपस्थाप्य तदनन्तरं समाधाने स्वकीयं मतमेवं प्रकटितं यत् पतञ्जलिः "वृत्तिसूत्रम्" इति पदेन पाणिनिसूत्राण्यभिप्रैति स्म।[1] अस्मादेव वचनाद् "वृत्तिः" सूत्रेष्वेव व्याख्यानस्वरूपेणोपतिष्ठते न तु कदाचिद् वार्तिकेषु इत्यप्यनुमीयते।

महाभाष्यकारेण "अचः परस्मिन् पूर्वविधौ" (१।१।५७) इत्यस्य व्याख्याने लिखितम् "अथ निमित्तेऽभिसंवध्यमाने यत्तदस्य योगस्य मूर्धाभिषिक्तमुदाहरणं तदपि संगृहीतं भवति। किं पुनस्तत्। षट्व्या मृद्व्येति[2]॥" अत्र "मूर्धाभिषिक्तम्" इति पदस्य प्रयोगस्तादृशानां प्रयोगाणां कृते वर्तते ये प्रयोगा सर्ववृत्तिषूदाहृतपूर्वा[3] आसन्निति कैयटोपाध्यायानां मतम्। 'सर्ववृत्तिषु' इति सप्तम्यन्तबहुवचनेन इदमपि स्पष्टं भवति यत् कैयटमतेन पतञ्जलिकालेऽष्टाध्याय्यामनेका वृत्तय आसन्, याश्च महाभाष्यकृता विदितपूर्वाः।

महाभाष्ये "पूर्वत्रासिद्धम्" (८।२।१) इत्यत्र "शास्त्रासिद्धत्वम्", "कार्यासिद्धत्वम्" इति पक्षद्वयं स्थापितम्। कैयटोऽत्र लिखति यदत्र पतञ्जलिना वृत्तिग्रन्थोपक्षेपेण शास्त्रासिद्धत्वमेवाश्रितम्।[4]

पतञ्जलिना "गाङ्कुटादिभ्योऽञ्णिन्ङित:" (१।२।१) इत्यस्य भाष्ये पृथक् पृथक् चत्वारोऽर्थाः प्रदर्शिताः।[5] इमे चत्वारः कल्पाः प्रायः पतञ्जलिना वृत्तिग्रन्थेभ्य एवाधिगताः। प्रायो यत्र यत्र पतञ्जलिना सूत्रार्थविषये नैकपक्षोद्भावनं कृतं तत्र तद् वृत्तिग्रन्थोपजीवि एव स्यादिति तर्कः। सर्वत्र सर्वे पक्षाः पतञ्जलेः स्वकल्पना-

---

१ उद्द्योतः २।१।१: "वार्त्तिकेष्वपि सूत्रलक्षणसत्त्वेन आर्षत्वेन च सूत्रमभ्युपगम्य पाणिनिसूत्राणां वृत्तिसद्भावात् वार्त्तिकानां सदभावाच्च तयोर्वैषम्यबोधनायेदम्। वृत्तियुक्तसूत्रं वृत्तिसूत्रमित्यर्थः।"

२ म. भा. (किलहॉर्नसंस्करणम्), भागः १, पृ. १४४।

३ प्रदीपः (म. भा., भागः १, झज्जरसंस्करणम्), सू. १।१।१५७, पृ. ४३०: "मूर्धाभिषिक्तमिति। सर्ववृत्तिषूदाहृतत्वात्।"

४ प्रदीपः (*ibid*, भागः ५), सू. ८।२।१, पृ. ३५४: "वृत्तिग्रन्थोपक्षेपेण शास्त्रासिद्धत्वमाश्रीयते न तु कार्यासिद्धत्वम्....।"

५ म. भा. (किलहॉर्नसंस्करणम), भाग. १, पृ. १९१।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसूता इति वचनं साहसमात्रं भवति। युधिष्ठिरमहोदया अप्येवमेव मन्वते।[1]

काशिकायां 'कष्टाय क्रमणे' (३।१।१४) इत्यत्र "कष्टशब्दाच्चतुर्थीसमर्थात् क्रमणेऽर्थेऽनावर्जने क्यङ् प्रत्ययो भवति" इति वृत्तिः। येन छात्रेणेयं वृत्तिः पठिता तस्य कृते महाभाष्यस्य "कष्टायेति किं निपात्यते? कष्टशब्दाच्चतुर्थीसमर्थात् क्रमणेऽनावर्जने क्यङ् निपात्यते"[2] इति व्याख्यानमाश्चर्यजनकम्। काशिकाकृतं व्याख्यानं यद्यस्माभिरनुसृतं तर्हि निपातनस्य चर्चाप्रसङ्ग एव नास्ति। तत्कथं महाभाष्यकारेण निपातनविषयिकी शङ्कोत्थापिता।[3] प्राय इदमपि व्याख्यानं पतञ्जलिना कस्या अपि वृत्तेरधिगतं स्यादिति वयमनुमिनुमः।

कैयटमतेन "वार्त्तिकम्" इति पदस्य व्युत्पत्तिः "वृत्तौ साधु वार्त्तिकम्"[4] इति दिशा निरूप्यते। अनया "वार्त्तिकम्" इति पदस्य व्युत्पत्त्या इदं ध्वन्यते यत् काश्चिद् वृत्तयः पाणिनिसूत्रेषु न केवलं महाभाष्यात् पूर्ववर्तिन्यः, अपि तु वार्त्तिकेभ्योऽपि पूर्वं विद्यमाना आसन्; ताश्च कात्यायनस्य सुपरिचिताः। अतो वार्त्तिकान्यपि प्रायो वृत्त्यधिष्ठितान्येव। परं कियताँशेन वार्त्तिकानि वृत्त्यधिष्ठितानि, कियताँशेन च तानि वृत्तिभ्यो विभिन्नानि इति नैश्चित्येन वक्तुं न पार्यते; यत उभयोरपि स्वरूपे फले च महान्भेदः। तथा हि—वार्त्तिकस्य स्वरूपं हि पाणिनिसूत्राणां समीक्षणम्। अतस्तानि सूत्रार्थं कदाचित् परिष्कुर्वन्ति, कदाचित् सूत्रं प्रत्याख्यापयन्ति, कदाचिच्च सूत्रं समर्थयन्ति।[5] परं वृत्तेः प्रधानं कार्यं हि केवलं सूत्रव्याख्यानम्।

काशिकावृत्तेः "वृत्तौ भाष्ये..." इति प्रथमश्लोकोऽपि अमुमेवार्थं प्रस्तौति; यतोऽस्मिन् श्लोके 'वृत्तौ' इति पदं 'भाष्ये' इत्यस्मात् पदात् पूर्ववर्ति वर्तते। हरदत्तोऽपि पदमञ्जर्यां ७।३।१७ सूत्रस्य व्याख्याने "पूर्वासु वृत्तिषु' तदस्य परिमाणं संख्यायाः संज्ञा इत्येकयोगेन पठितत्वात्, भाष्ये तत्र योगविभागस्योक्तत्वादेवमुक्तम्" इति वचनेन महाभाष्यात् पूर्वं केचन वृत्तिग्रन्था आसन्निति स्वीकरोति।

---

१ सं. व्या. शा. इति., भागः १, पृ. ३१५।

२ म. भा. (किलहॉर्नसंस्करणम्), भागः २ पृ. २५।

३ इदं विवेचनं युधिष्ठिरमीमांसकसंमतम्। द्र.—सं. व्या. सा. इति., भाः १, पृ. ३१५। अस्माकं मते वस्तुतोऽत्र चर्चा वर्तते। कष्टायेति क्यजन्तं रूपं निपात्यत इति सूत्रार्थः। कष्टायेति न चतुर्थी किं तु प्रकृतिप्रत्ययसहितस्य क्यजन्तस्य कष्टायशब्दस्य निपातनम्।

४ प्रदीपः (म. भा., भागः ३, झज्जरसंस्करणम्), सू. ४।२।६०, पृ. ६५३।

५ तुलना - उक्तानुक्तदुरुक्तार्थचिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनेन प्रमाणेनेदं निर्धार्यते यत् काशिकाकृतोर्निश्चप्रचं महाभाष्यादपि पूर्ववर्ती वृत्तिग्रन्थसमुदायः सुपरिचित आसीत्।

अपि च काशिकायां ८।३।४८ इत्यस्य वृत्तिभागे "भाष्ये वृत्तौ च नित्यं समासेऽनुत्तरपदस्थेत्यत्र परमर्षिःकुण्डिकेत्येतदेव प्रत्युदाहरणम्" इति व्याख्यायानमुपयभ्यते। अनेन काशिकोद्धृतव्याख्यानेनेदं ज्ञायते यद् महाभाष्यरचनानन्तरमपि काशिकावृत्तितः पूर्वं कोऽपि वृत्तिग्रन्थ प्रथित आसीत्, यस्मात् काशिकायां साहाय्यं गृहीतमभविष्यत्; यतो ह्युक्तस्थले 'भाष्ये' इत्यस्मात् पदात् 'वृत्तौ' इति पदमुत्तरवर्ति दृश्यते।

महाभाष्ये काशिकायां चानेकानि सूत्राणि तादृशानि वर्तन्ते यानि भिन्नार्थतया व्याख्यातानि। पाणिनिः स्वयमेव पाठभेदं शिष्यानध्यापयामास, क्वच्चि सूत्रस्य विभिन्नमर्थद्वयं पाठितवान् इति महाभाष्यात् काशिकावृत्तेश्च ज्ञायते। अत इदमनुमीयते यत् पाणिनिना अष्टाध्याय्यां स्वोपज्ञा काचिद् वृत्तिर्विरचिता स्यादिति। अत्र प्रमाणभूतानि कानिचिदुदाहरणानि प्रस्तूयन्ते। यथा महाभाष्ये १।४।१ सूत्रे-

"कथं त्वेतत् सूत्रं पठितव्यम्, किमाकडारादेका संज्ञेति, आहोस्वित् प्राक्कडारात्परं कार्यमिति। कुतः पुनरयं सन्देहः। उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः। केचिदाकडारादेका संज्ञेति, केचित् प्राक्कडारात्परं कार्यमिति।"[1]

काशिकायामधोलिखितानि प्रमाणानि आचार्यपाणिनेवृत्तिकारत्वं सूचयन्ति। यथा-

(१) शुङ्गाशब्दं स्त्रीलिङ्गमन्ये पठन्ति ते ढकं प्रत्युदाहरन्ति शौङ्गेय इति। द्वयमपि चैतत्प्रमाणमुभयथा सूत्रप्रणयनात्॥[2] का. वृ. ४।१।११७।

(२) सूत्रार्थद्वयमपि चैतदाचार्येण शिष्याः प्रतिपादिताः तदुभयमपि ग्राह्यम्॥ का. वृ. ५।१।५०।

(३) उभयमपि प्रमाणमुभयथा सूत्रप्रणयनात्॥[3] का. वृ. ५।१९४।

अतो ज्ञायते यद् आचार्येणावश्यमेव अष्टाध्याय्यां कापि वृत्तिर्लिखितासीत्।

---

१ म. भा. (कीलहॉर्नसंस्करणम्), भागः १, पृ. २९६।

२ तुलना - न्यासः ४।१।११७ : "उभयथा सूत्रप्रणयनादिति। उभयथा ह्येतत् सूत्रमाचार्येण प्रणीतम्, तस्मात् को विरोधः।"

३ तुलना - न्यासः ५।१।१९४: "उभयथेत्यादि। उभयस्मिन्नपि ह्यत्रार्थे सूत्रमेतदाचार्येण प्रणीतम्। द्वयमपि प्रमाणम्।"
अत्र प. म. अपि द्रष्टव्या।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महाभाष्ये "भाषायां सदवसश्रुवः" (३।२।१०८) इत्यत्र "उपसेदिवान् कौत्सः पाणिनिम्" [1] इति प्रयोगदर्शनात्, तथा काशिकायामप्यस्मिन् सूत्रे "उपसेदिवान् कौत्सः पाणिनिम्, अनूषिवान् कौत्सः पणिनिम्, उपशुश्रुवान् कौत्सः पाणिनिम्" इति प्रयोगबाहुल्यादेतद् वक्तुं शक्यते यद् भगवता पाणिनिना स्वकीयं शब्दानुशासनमवश्यमेव कस्मैचित् कौत्सनाम्ने शिष्याय अध्यापितमासीत्। काशिकाकाराभ्यामेषा शिष्यपरम्परा "आचार्योपसर्जनश्चान्तेवासिनि" (६।२।१०४) इत्यत्र "पूर्वपाणिनीयाः अपरपाणिनीयाः" इति प्रकारेण द्विधा स्वीकृता।

भर्तृहरिणा दीपिकायाम् "इग्यणः सम्प्रसारणम्" (१।१।४५) इप्यत्र आचार्यकृतसूत्रव्याख्यानस्य स्पष्टरूपेणोल्लेखः कृतः। यथा - "उभयथा आचार्येण शिष्याः प्रतिपादिताः, केचिद् वाक्यस्य केचिद् वर्णस्य" [2] इति।

अनेन दर्शितप्रमाणेन आचार्यपाणिनेः सूत्रार्थव्याख्यानपरा काऽपि वृत्तिरवश्यमेवासीदित्यनुमीयते। कथमन्यथा सूत्रप्रवचनकाले वृत्तीः, उदाहरणानि, प्रत्युदाहरणानि च विना सूत्रार्थज्ञानं स्यात्। इमां विद्वद्विचारसरणिं वासुदेवशरणअग्रवालमहोदया अपि स्वीकुर्वन्ति। सा यथा-

"पाणिनिः सूत्रव्याख्यानपरम्परायाः आदिकर्ता बभूव। सैव परम्परा तत्परम्परानुगामिभिः पाणिनीयशिक्षकैः शिष्यैश्चाक्षुण्णतया (उत्तरवर्तिकाले) अनुगता" [3] इति।

पाणिनिशास्त्रपरम्परायां कुणिनामा कोऽपि वृत्तिकार आसीत्। अस्मिन् विषये भर्तृहरि-कैयट-हरदत्तादिविरचितग्रन्थेषु कानिचित् प्रमाणान्युपलभ्यन्ते। महाभाष्यदीपिकायां १।१।३८ सूत्रे भर्तृहरिणा लिखितम् - "अत एषां व्यावृत्त्यर्थं कुणिनापि

---

१ म. भा. (किलर्हार्नसंस्करणम्), भागः २, पृ. ११५।

२ म. भा. दीपिका, सम्पा. के. वी. अभ्यंकर - वी. पी. लिमये, *ABORI*, Vol. L, p. 270.

३ V.S. AGRAWAL, *India as known to Pāṇini*, p. 32 :
"Pāṇini became the originator of a tradition of Sūtra explanation, which was handed down through unbroken succession of Pāṇinīya teachers and pupils following that system."

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्धितग्रहणं कर्तव्यम् । ...अतो गणपाठ एव ज्यायान्, अन्यापि वृत्तिकारस्य इत्येतदनेन प्रतिपादयति"[1] इति । कैयटः १।१।७५ सूत्रे कथयति - "कुणिना प्राग्ग्रहणमाचार्यनिर्देशार्थं व्यवस्थितविभाषार्थं च व्याख्यातम् । .... भाष्यकारस्तु कुणिदर्शनमशिश्रियद्" इति । अस्मिन्नेव (१।१।७५) सूत्रे हरदत्तो लिखति "कुणिना तु प्राचां ग्रहणमाचार्यनिर्देशार्थं व्याख्यातम्, भाष्यकारोऽपि तथैवाशिश्रियद्" इति ।

उपरिनिर्दिष्टप्रमाणत्रयेणेदं साध्यते यद् अष्टाध्याय्याः काऽपि कुणिविरचितवृत्तिरासीदिति ।[2]

भाषावृत्तिकारेण पुरुषोत्तमेन "कालोपसर्जने च तुल्यम्" (१।२।५७) इत्यस्मिन् सूत्रे "माथुर्यां तु वृत्तावशिष्यग्रहणमापादमनुवर्तते" इति मतान्तरमुपन्यस्तम् । अस्मिन् ग्रन्थे माथुरवृत्त्याः स्पष्टोल्लेखः । महाभाष्ये[3] काशिकायां[4] च "तेन प्रोक्तम्" (४।३।१०१) इत्यत्र माथुरी वृत्तेरुल्लेखः । तथा च "माथुरी" इति पदस्य तद्धितप्रत्ययान्ततयाऽस्या वृत्तेः कर्ता मथुरावासीति गम्यते । महाभाष्ये चास्या नामग्रहणाद् महाभाष्यात्पूर्ववर्तिनीति सूच्यते ।

---

१ म. भा. दीक्षिका, *ABORI*, Vol. L, p.230.

२ तुलना- M.D. SHASTRI, "The Traditional Basis of the Udāharaṇas in the Kāśikā and the Mahābhāṣya-", *PAIOC* (Benares, 1943), Vol.ii, p. 339.

३ म. भा. (किलहॉर्नसंस्करणम्), भागः २, पृ. ३१५ :
"न तर्हीदानीमिदं वक्तव्यम् । वक्तव्यं च । किं प्रयोजनम् । यत्तेन प्रोक्तं न च तेन कृतम् । माथुरी वृत्तिः ॥"
अत्र "माथुरी" इत्यस्य स्थाने क्वचिद् "माधुरी" इत्यपि लेखः प्राप्यते ।

४ का. वृ. ४।३।१०१ : "अन्येन कृता माथुरेण प्रोक्ता माथुरीवृत्तिः ॥"
अपि च द्र.—सं. व्या. शा. इति., भागः १, पृ. ३१९ ।

अत्र युधिष्ठरमीमांसकमहोदया एवं कथयन्ति यद् महाभाष्ये १।२ "१ सूत्रे शिष्यत्वाननुवर्तितत्वाज्ज्ञायते यद् महाभाष्ये शिष्यत्वमत्रैव निवर्तते । परं काशिकावृत्तिप्रमाणेन माथुरीवृत्तौ अशिष्यत्वमापादमनुवर्तते । अत एव १।२।५७ तः १।२।७३ सूत्रपर्यन्तं सप्तदशसूत्राणि माथुरीवृत्तौ अशिष्याण्येव जायन्ते । यथा च चन्द्रगोमिना स्वकीये व्याकरणेऽष्टाऽध्याय्याः १।२।५३, ५४, ५५, ५६, ५७ सूत्राणामशिष्यत्वादुपन्यासो न कृतस्तथैव तेनान्येषामपि पादपर्यन्तानां सूत्राणामशिष्यत्वं स्वीकृत्य पाठो न लिखितः । अतो ज्ञायते यदत्र चान्द्रव्याकरणेन माथुरीवृत्तितः साहाय्यं गृहीतमभविष्यत् । महाभाष्यकारेणाप्यष्टाध्याय्याः १।२।५८-७३ सूत्राणां प्रत्याख्यानं प्रकारान्तरेण कृतम् । अतः संभाव्यते यद् महाभाष्यकारो माथुरीवृत्त्या सह केनापि प्रकारेण ज्ञातपरिचय आसीत ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरा श्वोभूतिनामापि कश्चिद् वैयाकरणो बभूव। येन अष्टाध्यायीमधिकृत्य काचिद् वृत्तिर्लिखितासीत्। काशिकायां "श्युकः किति" (७।२।११) इत्यत्र "केचिद्" इति पदेनास्याः सङ्केतः। यथा हि—"केचिदत्र द्विकारनिर्देशेन गकारश्लेषं वर्णयन्ति" इति। अत्र न्यासकारेण "केचिद्" इति पदेन "श्वभूतिव्याडिप्रभृतयः" एव स्वीकृताः।

साम्प्रतं वररुचिकृतवृत्तेरपि केचन हस्तलेखाः प्राप्यन्ते। अस्या वृत्तेरुल्लेख आफ्रेक्टमहोदयेनापि स्वकीयायां पुस्तकपञ्जिकायां कृतः। अस्या एको हस्तलेखो मद्रासराजकीयग्रन्थालये विद्यत इति युधिष्ठिरमीमांसकमहोदयानां वचनम्।[1] परमयं वररुचिः कात्यायन एव, अथवा तदभिन्नः कश्चिद् वैयाकरण इत्यस्मिन् विषयेऽसंशयं वक्तुं न शक्यते।

"पूज्यपाद" इत्युपाधिधारिणा देवनन्दिनाष्टाध्याय्यां "शब्दावतारन्यासः" इति कश्चिद् वृत्तिग्रन्थो विरचित आसीत्। असौ ज्ञातिना जैनोऽपि सन् पाणिनीयव्याकरणे वैद्यशास्त्रे, अन्येषु च नैकेषु विषयेषु अव्याहतगतिरासीत्।[2] इयं कृतिः साम्प्रतं दुर्लभा एव।

दानपत्रेषु दुर्विनीतनामधारिणः कस्यचिद् वैयाकरणस्योल्लेखो वर्तते। इतिहासपण्डितैरयं[3] पाणिनीयशास्त्रे शब्दावतारटीकायाः, संस्कृतबृहत्कथाटीकायाः, किरातार्जुनीयपञ्चदशसर्गटीकायाश्च प्रणेता स्वीकृतः। इदं मतं महाराजपृथिवीकोङ्कणस्य दानपत्रादधस्तादुपस्थाप्यते। यथा हि तत्-

"श्रीमत्कोङ्कणमहाराजाधिराजस्याविनीतनाम्नः पुत्रेण शब्दावतारकारेण देवभारतीनिबद्धबृहत्कथेन किरातार्जुनीयपञ्चदशसर्गटीकाकारेण दुर्विनीतनामधेयेन..."[4] इति।

काशिकायाः प्रथमश्लोकस्य व्याख्यानावसरे न्यासे चुल्लिभट्टिविरचितायाः वृत्तेरुल्लेखो विद्यते। यथा - "वृत्तिः पाणिनीयसूत्राणां विवरणं चुल्लिभट्टिर्नृरादिविरचितम्" इति। तन्त्रप्रदीपेऽपि ८।३।९७ सूत्रे "सव्येष्ठा इति सारथिवचनोऽयम् अत्र चुल्लिभट्टिवृत्तावपि तत्पुरुषे कृति बहुलमित्यलुग् दृश्यते"[5] इत्यस्मिन् व्याख्याने चुल्लिभट्टेरुल्लेखः। अत एव ज्ञायते यत् पुरा काचित् चुल्लिभट्टिविरचितवृत्तिरपि काशिकातः पूर्ववर्तिनी आसीत्।

---

१ सं. व्या. शा. इति., भागः १, पृ. ३२०-३२३।

२ *ibid*, पृ. ३२३:

न्यासं जैनेन्द्रसंज्ञं सकलबुधनतं पाणिनीयस्य भूयो
न्यासं शब्दावतारं मनुजसहितं वैद्यशास्त्रं च कृत्वा।
यस्तत्त्वार्थस्य टीकां व्यरचयदिह भात्यसौ पूज्यपादः
स्वामी भूपालवन्द्यः स्वपरहितवचः पूर्णदृग्बोधवृत्तः॥

३-४ M. KRISHNAMACHARYIAR, *History of Classical Sanskrit Literature* p. 148

तुलना—सं. व्या. शा. इति., भागः १, पृ. ३३८।

५ अत्र "चुल्लि" इत्यस्य स्थाने केचन "चूर्णि" इत्यप्यामनन्ति। परं तस्मिन् विषये नास्ति कोऽपि दृढनिश्चयः।

द्र.—न्यासः (श्रीशचन्द्रचक्रवर्ती), भागः १, प्रस्तावना, पृ. ८।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत्र काशिकायाः प्रथमश्लोकस्य व्याख्याने न्यासे निर्लूरवृत्तेरप्युल्लेखः कृतः। निर्लूरवृत्तेर्नामनिर्देशः काशिकायाः प्रक्रियामञ्जरीटीकायां विद्यासागरमुनिनापि कृतः। यथा हि स वदति—"वृत्ताविति सूत्रार्थप्रधानो ग्रन्थो भट्टनल्लूरप्रभृतिभिर्विरचितः..."[1] इति। अत्रास्य वृत्तिकारस्य यथार्थनामविषये भेदः; यतो हि न्यासे "निर्लूर" इति, प्रक्रियामञ्जर्यां च "नल्लूर" इति वर्तते। कातन्त्रपरिशिष्टकारः श्रीपतिदत्तस्तु 'निर्लूर' इत्येवाभिधानं समर्थयति। यथा हि तस्य वचनम्—'भाषायामिप केचिच्चकरीतमिच्छन्ति। उक्तं हि भाष्ये भाषायामपि यङो लुगस्ति। निर्लूरवृत्तौ चोक्तम्—भाषायामपि यङो लुगस्तीति..."[2] इति। भवतु नाम शब्दविपर्ययः—निर्लूरोऽथवा नल्लूर इति। परमेतत् सुनिश्चितं यद् "निर्लूरः" "नल्लूरो" वा कोऽप्यष्टाध्यायीवृत्तिकर्ता अवश्यमेव काशिकातः पूर्ववर्ती आसीत्।

उपरिनिर्दिष्टप्रमाणैरेतद् ज्ञायते यद् महाभाष्यकाशिकावृत्तिप्रणयनात्पूर्वमनेके वृत्तिग्रन्था अष्टाध्यायीमधिकृत्य विरचिता आसन्। एतेषां साम्प्रतं नाममात्रेण सङ्केत एव केवलं तत्र तत्रोपलभ्यते।

(घ) काशिकावृत्तेः प्रणेतारौ

काशिकावृत्तिः केन प्रणीता इति विषये विदुषामैकमत्यं न वर्तते। किमेकैव वृत्तिर्द्वाभ्यां लिखिता, आहोस्विद् द्वे स्वतन्त्रे वृत्ती वामनजयादित्ययोरास्तामिति विषय मधिकृत्यात्र किञ्चिद् विचार्यते।

पाणिनीयव्याकरणग्रन्थेषु महाभाष्यादनन्तरं काशिकावृत्तिरेव महत्त्वपूर्णं ग्रन्थरत्नं विद्यते। इयं वृत्तिः पाणिनीयपरम्परां प्रचुरतयाधिगाहते। परं कोऽस्य ग्रन्थस्य कर्तेति नाद्यावधिरेकान्ततया वक्तुं शक्यते। साम्प्रतं काशिकाया यावन्ति संस्करणान्युपलभ्यन्ते तेषु प्रथमद्वितीयतृतीयचतुर्थपञ्चमाध्यायानामुपरि या वृत्तिः सा जयादित्यकृता, उर्वरितेषु चाध्यायेषु वामनकृतेति सर्वैः स्वीक्रियते। परं विविधैः प्रमाणैरेतज्ज्ञायते यद् वामनजयादित्याभ्यामुभाभ्यामपि अष्टाध्याय्याः पृथक् पृथक् रूपेण स्वकीयैकैका वृत्तिर्विरचितासीत्। अस्यार्थस्योद्वलकानि यानि प्रमाणान्युपलभ्यन्ते तानि प्रथमतोऽवलोकयामः।

---

१ द्र.—सं. व्या. शा. इति., भागः १, प्रथमसंस्करणम्, पृ. ३२९, टिप्पणम् ३।

२ द्र.—न्यासः (श्रीशचन्द्रचक्रवर्ती) भाग १. पृ. ८।

CC-0. Agamnigam Digital Preservation Foundation ,Chandigarh

सर्वप्रथमं चीनदेशोद्भवेन "इत्सिङ्ग"इति नामधारिणा यात्रिणा भारतवर्षयात्रावर्णनानुबन्धेन विलिखते ग्रन्थे काशिकावृत्तेः प्रणेतृत्वेन जयादित्य एव निर्दिष्टः। नास्ति तत्र वामनस्योल्लेखः।[1]

भाषावृत्तेरन्तिमश्लोकव्याख्यानावसरे[2] सृष्टिधराचार्येण स्वीयायां भाषावृत्त्यर्थविवृत्यां काशिकाया रचयिता जयादित्य इति स्पष्टमुद्घोषितम्। तथा हि- "काशयति प्रकाशयति सूत्रार्थमिति काशिका जयादित्यविरचिता वृत्तिः" इति।

भाषावृत्तावुपलब्धानां[3] वामनजयादित्यनामोल्लेखानां प्रमाणेन काशिकाया आदितः पञ्चमाध्यायानां कर्ता जयादित्यः, इतरेषां चाध्यायानां कर्ता वामन इति स्पष्टरूपेण वक्तुं शक्यते।

प्रौढमनोरमायाः शब्दरत्नटीकायां हरिदीक्षितः[4] काशिकायाः प्रथमद्वितीयपञ्चमषष्ठाध्यायानां वृत्तिकर्ता जयादित्यः, अन्येषां च वामन इति स्वीकरोति।

भारतीयप्रज्ञायां सरमोनियरविलियम्समहोदया[5] लिखन्ति यत् पाणिनेः सर्वासु टीकासु श्रेष्ठा टीका विद्यते वामनस्य काशिकावृत्तिः। काश्यां वाराणस्यां वा अस्या विरचनाद् वृत्तिरियं काशिकेतिनामधेयमवाप्तवती।

पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यासंशोधनमन्दिरे काशिकावृत्तेरष्टपरमिता हस्तलेखाः समुपलभ्यन्ते। तत्र १९३८ खिष्टाब्दे प्रकाशितं हस्तलेखसूचीपत्रं काशिकावृत्तिहस्तलेखान् ६० तः ६७ पर्यन्तेन ग्रन्थक्रमाङ्केन निर्दिशति।[6] तत्र ६१,

---

१ I-TSING, *A Record of the Buddhist Religion: As Practised in India and the Malaya Archipalago* (*A. D. 671-695*), Tr. J. TAKAKUSU, p. 176.
"This *Vṛtti-Sūtra* (*kāśikāvṛtti*) is a work of the learned Jayāditya."

२ **काशिकाभागवृत्त्योश्च सिद्धान्तं बोद्धुमस्तिधीः।**
तदा विचिन्त्यतां भ्रातर्भाषावृत्तिरियं मम॥ भा. वृ. ८।४।६८॥

३ **भाषावृत्त जयादित्यस्योल्लेखः** १।२।६; १।२।५९; २।४।७४; ४।२।३८; ४।२।९२; ४।३।२३; ५।१ २६; ५।१।१३२; ५।२।८१; ५।२।१०७; ५।३।१२; ५।३।६१: ५।४।५ ५।४।७५; ५।४।१२२.
भ.ष वृत्तौ वामनस्योल्लेखः ६।३।७०; ६।३।८५; ७।२।७५; ८।३।५; ८।३।११८.

४ **शब्दरत्नम्** (प्रौ. मनो.) भागः २, पृ. २८२: **"प्रथमद्वितीयपञ्चमषष्ठा जयादित्यकृतवृत्तयः। इ वामनकृतवृत्ताय इत्यभियुक्ताः॥"**

५ MONIER WILLIAMS, *Indian Wisdom*. p, 168:
"One of the best more modern commantaries on Pāṇinī is Vāmana's *Kāśikāvrtti*, so called because composed at Kāśī or Benāres."

६ *A Descriptive Catalogue of Mss*, BORI, Vol. ii, Grammar : Part 1 (Vedic and Pāṇinīya), 1938, p. 46-53.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६७ हस्तलेखयोः कर्ता वामनः । तथा ६०, ६४ हस्तलेखयोः प्रथमद्वितीयतृतीयचतुर्थाध्यायानां कर्ता जयादित्य इत्युल्लिखितम् ; तदितरेषां चाध्यायानां कर्ता वामनः । ६२ ग्रन्थक्रमाङ्के सप्तमाध्यायस्यान्ते वामनस्योल्लेखः । ६३ तमे हस्तलेखे आदितश्चतुर्णामध्यायानां कर्ता जयादित्य इति निर्दिष्टम् । उर्वरिताध्यायेषु नास्ति प्रणेतुर्निर्देशः । ६५-६६ हस्तलेखयोश्च नास्ति कुत्रापि ग्रन्थकर्तुनिर्देशः ।

अनेनोपरिनिर्दिष्टमतबाहुल्येन ज्ञायते यत्प्राचीनकालादेव काशिकाकर्तृविषये महती भ्रान्तिरासीत् । काशिकाया हस्तलेखप्रमाणेनेदं निर्वार्यते यद् उत्तरकालवर्तिनो लेखकास्तमेव काशिकाकर्तृत्वेन स्वीकुर्वन्ति यस्य नामधेयं काशिकाया हस्तलेखान्ते पूर्वलेखकैर्निर्दिष्टमासीत् । अत एव भाषावृत्तिकारेण काशिकाया एतादृशो हस्तलेखो दृष्टो भवेद् यत्रादितः पञ्चमाध्यायपर्यन्तानामध्यायानां कर्ता जयादित्यः, इतरेषां च वामन इति निर्दिष्टमासीत् । यथा च भाषावृत्तिटीकाकारेण सृष्टिधराचार्येण वस्मिन्नपि काशिकाहस्तलेखे जयादित्यस्यैव कर्तृत्वेन निर्देशादस्या वृत्तेः कर्ता जयादित्य एव कथितः ।वहिरङ्गस्य हस्ताधारस्य आधारेणैव प्राय इत्सिङ्ग-सरमोनियरविलियम्सप्रभृतयः काशिकाकर्तृविषये वामनजयादित्ययोरन्यतरस्य पृथक् पृथक् रूपणोल्लेखं कुर्वन्ति । अधुना काशिकाकर्तृविषये न्यासपदमञ्जर्योः किमभिप्रेतं तद्विभावयामः ।

काशिकाविवरणपञ्जिकाया न्यासापरनामधेयायाष्टीकायाः प्रणेता जिनेन्द्रबुद्धि-वामनजयादित्योभयविरचिता काशिकावृत्तिरित्यङ्गीकरोति । तथाच न्यासे वामनस्य जयादित्यस्य चैतादृशा बहव उल्लेखा विद्यन्ते येभ्य इदं ज्ञायते यद् वामनेन जयादित्येन च सर्वस्मिन् पाणिनीयाष्टके पृथक् पृथग् रूपेण स्वकीया वृत्तिः प्रणीतासीत् । एतदर्थमधस्तना न्यासपरिच्छेदा अवलोकनीयाः ।

"क्ङिति च" (१ । १ । ५) इति सूत्रस्य व्याख्याने न्यासकार एवं वदति—

"तथा हि- "ग्लाजिस्थश्च क्स्नुः" (३।२।१३) इत्यत्र **जयादित्यवृत्तौ** ग्रन्थः- "क्ङिति च" (१।१।५) इत्यत्र गकारश्चर्त्वभूतो निर्दिश्यते, तेन भुव इड् न भवति" इति । "श्युकः किति" (७।२।११) इत्यत्रापि **जयादित्यवृत्तौ** ग्रन्थः-"गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते भूष्णुरित्यत्र यथा स्याद्" इति । **वामनस्य** त्वेतत् सर्वमनभिमतम् तथा हि तस्यैव सूत्रस्य (७।२।११) **तद्विरचितायां** वृत्तौ ग्रन्थः—"केचिदत्र द्विककारनिर्देशेन गकारप्रश्लेषं वर्णयन्ति भूष्णुरित्येवं यथा स्यात् । सौत्रत्वाच्च निर्देशस्य-"श्युकः किति" (७।२।११) इत्यत्र चर्त्वस्यासिद्धत्वमनाश्रित्य रोरुत्वं न कृतं विसर्जनीयश्च कृत इति । "ग्लाजिस्थश्च क्स्नुः" (३।२।१३) इत्यत्र स्थाः आ इत्याकारप्रश्लेषेण स्थास्नोः सिद्धत्वान्न किञ्चिदेतत्"[1] इति ।

---

१ न्यासः (का. वृ., भागः १), पृ.८५ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

न्यासकारेणास्मिन् उद्धरणे "श्युकः किति" (७।२।११) इति सूत्रे वामन-जयादित्यविरचितयोर्द्वयोरपि वृत्त्योर्वर्तमानौ भिन्नौ पाठावुद्धृतौ। परं यदि वामनस्यैव सप्तमाध्याये वृत्ति इति स्वीक्रियेत तर्हि कथं द्वयोरपि वृत्त्योः पाठभेददर्शनं जिनेन्द्र-बुद्धिना कृतं सुसङ्गतं स्यात् ? यदि भिन्नौ पाठौ विभिन्नसूत्रवृत्तावुपलभ्यमानौ निर्दिष्टौ, तर्हि नायं विरोधः। "क्ङिति च" (१।१।५) इत्यत्रोपलभ्यमानः पाठो जयादित्यस्य, "ग्लाजिस्थश्च क्स्नुः" (३।२।१३) इत्यत्राप्येवं वदति इत्यत्रोपलभ्यमानः पाठो वामनस्येत्येतदपि वक्तुं शक्यते।

न्यासकारः 'स्यतासी लृलुटोः'' (३।१।३३) इत्यत्राप्येवं वदति—

"यदि तर्हि तासेरिदित्करणमनुनासिकलोपप्रतिबन्धार्थम्, एवं सति "इदितो नुम् धातोः" (७।१।५८) इत्यत्र यद् वक्ष्यति-"तासिसिचोरिदित्कार्यं नास्तीत्युच्चार-णार्थो निरनुनासिक इकार पठ्यते" इति तद् विरुध्यते ? नास्ति विरोधः, भिन्नकर्तृ-त्वात्। इदं हि **जयादित्यवचनम्** तत्पुनर्वामनस्य। **वामनवृत्तौ** तु तासिसिचोरिकार उच्चारणार्थो, नानुबन्धः पठ्यते। तेन विरोधो नाशङ्कनीयः। केन पुनरभिसन्धिना जयादित्यस्तासेरिकारस्यानुनासिकलोपप्रतिबन्धार्थतां कृतवान् ? येनाभिसन्धिना स तावच्छ्रूयताम्—आभाच्छास्त्रीयमसिद्धत्वमनित्यम्, अनित्यत्वन्तु तस्य (६।४।२२) तत्रैव प्रतिपादयिष्यते **जयादित्येन**। आभाच्छास्त्रीयस्य टिलोपस्यासिद्धत्वमिह नास्ति। अनित्यत्वादित्यभिप्रेत्य तासेरिकारस्यानुनासिकलोपे प्रतिबन्धार्थतोक्ता। **वामनेन** त्वसिद्धत्वमिहास्त्येवेति मन्यमानेनोच्चारणार्थतोक्ता। न हि टिलोपस्या-सिद्धत्वे सत्यमुनासिकलोपः प्राप्नोति। यदभ्युक्ता तत्प्रतिबन्धार्थतेकारस्य। यथैव हि गौनर्दीय आचार्यः—सन्निपातलक्षणपरिभाषाया उपस्थानमाश्रित्यातिजरं ब्राह्मणकुलं तिष्ठति, अतिजरैर्ब्राह्मणकुलैरिति भवितव्यमित्याह; अन्ये त्वनित्यत्वादस्याः परिभाषाया अनुपस्थानमाश्रित्यातिजरसं ब्राह्मणकुलमतिजरसैरिति भवितव्यमित्याहुः, तथेदमपि प्रयोजनद्वयमाभाच्छास्त्रीयस्यासिद्धत्वञ्चाश्रित्य वृत्तिकारावुक्तवन्ताविति वेदितव्यम्।

अन्ये चाचक्षते—प्राग् भादसिद्धाधिकार इतीमं पक्षमाश्रित्येकारस्यानुनासिकलोप-प्रतिबन्धार्थतोक्ता। सह तेनासिद्धाधिकार इत्याश्रित्योच्चारणार्थतेति। एतच्चाशक्यं विज्ञातुम्; प्राग् भादसिद्धाधिकार इत्यस्य पक्षस्य **जयादित्यवामनाभ्यामनाश्रितत्वात्**। अनाश्रितत्वं तु तत्रैव वृत्तावभिव्यक्तमिति तत एवावगन्तव्यम्। एते च स्वादयो येन नाप्राप्तिन्यायेनान्तरङ्गत्वाच्च सर्वेषां यगादीनामपवादाः, अन्तङ्गत्व तु तेषां लाव-स्थायामेव विधानात्"[1] इति।

साम्प्रतं तृतीयाध्यायस्य न्यासो जयादित्यवृत्तौ वर्तते, परमत्र न्यासकारेणाष्टाध्याय्याः "स्यतासी लृलुटोः" (३।१।३३) इत्यत्र निर्दिष्टवामनवृत्तेर्मतमपि "वामववृत्तौ तु तासिसिचोरिकार उच्चारणार्थं नानुबन्ध इति पठ्यते" इति शब्देन निर्दिष्टम्। परं

१ न्यासः (का. वृ., भाग : २), पृ. ४१०-४११।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Agamnigam Digital Preservation Foundation, Chandigarh.

यद्युच्येतेदं जयादित्येनोल्लिखितं वामनमतं न "स्यतासी लृलुटोः" (३।१।३३) इति सूत्रमाश्रयति; तर्हि न विरोधः। "इदुतो नुम् धातोः" (७।१।५८) इति सूत्रवृत्ताविदं वामनमतमुपलभ्यत एव।

"रुवादिभ्यः श्नम्" (३।१।७८) इति सूत्रस्य व्याख्याने न्यासकारः पुनः कथयति—

"एतच्च वृत्तिकारः स्वयमेव वक्ष्यति। विश्नानाम्, प्रश्नानामित्यत्र यद्यपि शकारवान् नशब्दः, तथापि तस्य न भवति; लाक्षणिकत्वात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्, न तु लाक्षणिकस्य..."[1] इति।

न्यासकारोऽत्र "श्नान्नलोपः" (६।४।२३) इति सूत्रस्य वृत्तिं लक्षयति।[2] स्वयमेवेति च शब्देन येन वृत्तिस्तृतीयाध्यायस्थेऽस्मिन् सूत्रे लिखिता तेनैव षष्ठाध्यायेऽपि लिखितेति स्पष्टमेवोक्तं भवति, अन्यथा ग्रन्थयोर्भिन्नकर्तृत्वे स्वयमेवेति वचनमसंगतं स्यात्।

हरदत्तमिश्रः पदमञ्जर्यां 'ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे" (६।१।१३) इत्यत्र "कारीषगन्ध्वीपुत्रः" इत्यादि रूपसाधनावसरे लिखति—

"अतद्गुणसंविज्ञानेऽत्र बहुव्रीहिः, अणप्रत्ययोऽन्तः समीपे यस्य कारीषगन्धेस्तस्मात्परः ष्यङित्यर्थः। प्रत्ययपक्ष एव वामनाचार्यस्य तत्राभिमतः"[3] इति।

अत्र "तत्राभिमतः" इति पदस्य लक्ष्यं "अणियोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे" (४।१।७८) इति सूत्रं वर्तते। अत्र वामन एवमभिप्रैति—"ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे" (६।१।१३)...."करीषस्येव गन्धोऽस्य, कुमुदस्येव गन्धोऽस्येति बहुव्रीहिः, तत्र "उपमानाच्च" (५।४।१३७) इति गन्धस्येदन्तादेशः, करीषगन्धेरपत्यमित्यण् तदन्तात् स्त्रियाम् "अणियोरनार्षयोः—" (४।१।७८) इति ष्यङः, ततश्चापि विहिते षष्ठीसमासः, सम्प्रसारणस्य" (६।३।१३९) इति दीर्घत्वम्"[4] इति।

तथा हि ४।१।७८ सूत्रे—करीषस्येव गन्धोऽस्य करीषगन्धिः, कुमुदगन्धिः, "तस्यापत्यम्" (४।१।९२) इत्यण्, तस्य ष्यङादेशः—करीषगन्ध्या, कौमुदगन्ध्या"[5] इति वचनम्।

---

१ न्यास : (का. वृ., भाग : २) पृ. ४५७।

२ का. वृ. ६।४।२३ : इनादिति श्नमयमुत्सृष्टमकारो गृह्यते, तत उत्तरस्य नकारस्य लोपो भवति। अनक्ति। भनक्ति...। विश्नानां प्रश्नानामित्यत्र "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव" इत्येवं न भवति।

३ प. म. (का. वृ., भाग : ४), पृ. ४६४।

४ का. वृ. ६।१।१३.
का. वृ. ४।१।७८.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतोऽत्र पदमञ्जर्यां (६।१।१३) "प्रत्ययपक्ष एव वामनाचार्यस्य तत्राभिमतः" इति वचनं ४।१।७८ सूत्रं प्रति वर्तते। तेन षष्ठाध्यायस्य चतुर्थाध्यायस्य च वृत्तिकार एक एव प्रतीयते। यदि च "तत्राभिमतः" इत्यस्य पदस्य केवलं तत्सूत्रस्यायमर्थो वामनसंमत इत्येवं क्रियते, न तु तत्सूत्रवृत्तौ वामनेन तत्सूत्रवृत्तिरेवं तदा नायं विरोधः, वृत्तिलेखनं विनापि तत्सूत्रस्य ईदृशोऽर्थो [वामनस्याभिप्रेत इति वक्तुं शक्यते।

परन्तु उपर्युक्ताद् ग्रन्थादग्रे पदमञ्जर्यां तत्रैव (६।१।१३) पुनरधोलिखितं वचनम्—

"तथा च "ये च तद्धिते" (६।१।६१) इत्यत्र वक्ष्यति—"अणिञन्ताद्वा परः ष्यङ् प्रत्यय एषितव्यः"[1] इति।

पदमञ्जरीकारोद्धृतपाठोऽयं साम्प्रतं "ये च तद्धिते" (६।१।६१) इत्यत्रानुपलब्धः; परन्तु तदग्रे "अचि शीर्षः" (६।१।६२) इत्यस्य वृत्तिभागे समुपलभ्यते। अत्रेदं प्रतीयते यद् हरदत्तेन "अचि शीर्षः" (६।१।६२) सूत्रं वार्त्तिकत्वेन स्वीकृत्य तस्य "ये च तद्धिते" (६।१।६१) इत्यस्य वृत्तिभागे एवान्तर्भावः कृत आसीत्। परं बहवः "अचि शीर्षः" (६।१।६२) इति सूत्रं वार्त्तिकत्वेन न स्वीकुर्वन्ति।

अपि च ४।१।७८ सूत्रस्य पदमञ्जर्यामधोलिखितं विवेचनम्—

"ये च तद्धिते" (६।१।६१) इत्यत्र वामनो[2] वक्ष्यति—यदि प्रत्ययः, कथमौदमेधेय इति, आपत्याद् विहितः [ष्यङ् सोऽप्यापत्य एव, तत्र यलोपे सिद्धम्"[2] इति।

पदमञ्जरीकारप्रदत्तमिदं विवेचनं साम्प्रतं "ये च तद्धिते" (६।१।६१) इत्यत्र "अचि शीर्षः" (६।१।६२) इत्यत्र च वामनवृत्तावनुपलब्धम्।

एवमेव पदमञ्जरीकारः पुनस्तत्रैव (४।१।७८ सूत्रे) एवं लिखति—

"जयादित्यस्तु मेने—शीर्षदिशसन्निपातेन ष्यङ्, स तिद्वघातं न करिष्यतीति।"[3]

अनेन पदमञ्जरीकारवचनबाहुल्येन ज्ञायते यत् षष्ठाध्यायस्थस्य ष्यङ्-प्रत्ययस्य विषये जयादित्येनाप्यवश्यमेव स्वकीयं मतं प्रदत्तं भविष्यति, अन्यथा टीकाकारवचनानि असंगतान्येव भविष्यन्ति।

यद्यप्युपर्युक्तैर्न्यासपदमञ्जरीप्रमाणैरेतत् सुस्पष्टं यद् वामनजयादित्ययोर्द्वयोरपि पाणिनिसूत्रेषु पृथक् पृथग् द्वे वृत्ती आस्ताम्, तथाप्येतत्परमं विचित्रं यत् टीकाद्वयेऽपि सन्त्येतादृशान्यपि प्रमाणानि येषां साहाय्येन काशिकावृत्तेः कर्ता एक एवेति वक्तुं

---

१ प.म. (का. वृ., भाग ४), पृ. ४६४।
२-३ प.म. (का. वृ., भागः ३), पृ ३८७।

. CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्यते । सुस्पष्टयेऽधस्तात् कानिचित् स्थलान्युद्धियन्ते ।

(१) काशिका—"ऐऔच्" (प्रत्याहारसूत्रम् ४) ।

"·····वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति । तच्छायानुकारिणो हि ते, न पुनस्त एव । पृथक्प्रयत्ननिर्वर्त्त्यं हि वर्णमिच्छन्त्याचार्याः । नुड्विधि-लादेशविनामे ऋकारे प्रतिविधातव्यम् । नुड्विधौ ऋकारग्रहणम्--आनृधतुः, आनृधुः । लादेशे ऋकारग्रहणम्-कर्तृणाम् ।"[1]

न्यासः—"·····नुड्विधिलादेशविनामेष्वित्यादि । नुडादिविधिषु यच्चोद्यमापतति ऋकारविषये तस्य प्रतिविधानं कर्तव्यमित्यर्थः । तत्र नुड्विधौ तावत्—ऋकारस्थो रेफो हल्ग्रहणेन गृह्यते । तेनात्रापि द्विहलोऽङ्गस्य नुड् भवति—आनृधतुः, आनृधुरिति । **एतत् स्वयमेव वृत्तिकारेण प्रतिपादनं कृतम् ।**"[2]

काशिका—"तस्मान्नुड् द्विहलः" (७।४।७१)

"·····ऋकारैकदेशो रेफो हल्ग्रहणेन गृह्यते । तेनेहापि द्विहलोऽङ्गस्य नुडागमो भवति—आनृधतुः, आनृधुः"[3]

न्यासः—"ऐऔच्" इत्यत्र "प्रत्याहारे वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयः, तेषु तत्कार्यं न भवति, तच्छायानुकारिणो हि ते, न पुनस्त एव, पृथक्प्रयत्ननिर्वर्त्त्यं हि वर्णमिच्छन्त्याचार्याः" इत्युक्त्वा "नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम्" इत्युक्तम् । तत्रावसरप्राप्त्या ऋकारे नुड्विधौ प्रतिविधानमाह-ऋकारैकदेशो रेफो हल्ग्रहेण गृह्यत इति । आनृधतुः, आनृधुरिति ।"[4]

(२) न्यासः—"ऐऔच्" (प्रत्याहारसूत्रम् ४) इत्यस्य टीकायां पुनः कथयति—"लादेशविधावपि—"र" इति सामान्यमुपादीयते । तेन यः केवलो रेफः, यश्च ऋकारस्थः—तयोर्द्वयोरपि ग्रहणम् । "ल" इत्यपि सामान्यमेव । ततोऽयं केवलस्य रेफस्य स्थाने केवल एव लकार आदेशो विधीयते । ऋकारस्याप्येकदेशविकारद्वारेण लृकारः । तथा च "लुटि च क्लृपः" (१।३।९३) इत्येवमादयो निर्देशा उपपद्यन्त इति । एतत् "कृपो रो लः" (८।२।१८) इत्यत्र **वृत्तिकृता स्वयमेव** प्रतिपादितम् ।"[5]

---

१ **का. वृ., भागः १, पृ. ३४-३७ ।**
२ **न्यासः (का. वृ., भागः १.), पृ. ३६ ।**
३ **का. वृ., भागः ६, पृ. १९० ।**
४ **न्यासः (का. वृ., भागः ६), पृ. १९० ।**
५ **न्यासः (का. वृ., भागः १), पृ. ३७ ।**

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

काशिका—"कृपो रो लः" (८।२।१८)

"कृपेर्धातो रेफस्य लकारादेशो भवति। "रः" इति श्रुतिसामान्यमुपादीयते। तेन यः केवलो रेफो यश्च ऋकारः, तयोर्द्वयोरपि ग्रहणम्। "लः" इत्यपि सामान्यमेव। ततोऽयं केवलस्य रेफस्य स्थाने लकारादेशो विधीयते। ऋकारस्यापि एकदेशविकारद्वारेण लृकारः। एवं च "लुटि च क्लृपः" (१।३।९३) इत्येवमादयो निर्देशा उपपद्यन्ते। कल्पता....।"[1]

अस्मिन् स्थले न्यासकारस्य "ऐऔच्" (प्रत्याहारसूत्रम् ४) इत्यस्य व्याख्यानं तथा काशिकायां ८।२।१८ सूत्रस्य वृत्तिपाठश्च द्वावपि प्रायेण समानौ; अन्यथा तु "ऐऔच्" (प्रत्याहारसूत्रम् ४) इत्यस्य व्याख्याने—"एतत् 'कृपो रो लः' (८।२।१८) इत्यत्र वृत्तिकृता स्वयमेव प्रतिपादितम्" इति न्यासकारवचनमसङ्गतं स्यात्।

(३) न्यासकारः—पुनस्तत्रैव ("ऐऔच्" इत्यस्य व्याख्याने) कथयति—"विनामविधावपि—"ऋवर्णाच्चेति वक्तव्यम्" इत्युक्त्वा "रश्रुतिसामान्यनिर्देशाद्वा सिद्धम्। अवर्णभक्त्या च व्यवधाने णत्वं भवतीति क्षुभ्नादिषु नृनमनप्तृप्नोतिग्रहणं णत्वप्रतिषेधार्थं द्रष्टव्यम्। अथवा ऋवर्णादपि णत्वं भवतीत्येतदेव तेन ज्ञाप्यते" इति **वृत्तिकृता स्वयमेव** प्रतिविहितम्।"[2]

काशिका—"रषाभ्यां नौ णः समानपदे" (८।४।१)

"ऋवर्णाच्चेति वक्तव्यम्। चतसृणाम्। तिसृणाम्। मातृणाम् पितृणाम्। रश्रुतिसामान्यनिर्देशात् सिद्धम्। वर्णभक्त्या च व्यवधानेऽपि णत्वं भवतीति क्षुभ्नादिषु नृनमनप्तृप्नोतिग्रहणं ज्ञापकम्। अथवा ऋवर्णादपि णत्वं भवतीत्येतदेवानेन ज्ञाप्यते।"[3]

न्यासः—"न हि ऋवर्णस्थो रेफो वर्णः, किं तर्हि? वर्णैकदेशः; तदेकदेशत्वात्, न हि वर्णैकदेशो वर्णग्रहणेन गृह्यते। तथा चोक्तम्—"वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति। तच्छायानुकारिणो हि ते, न पुनस्त एव। पृथक् प्रयत्ननिर्वर्त्त्यं वर्णमिच्छन्त्याचार्याः" इति। तस्माद् "ऋवर्णाच्च" इति वक्तव्यम्। तिसृणाम्, चतसृणामिति।"[4]

---

१ का. वृ., भागः ६, पृ. ३७४-३७६।
२ न्यासः (का. वृ., भागः १), पृ. ३८।
३ का. वृ., भागः ६, पृ: ६०२-६०३।
४ न्यासः (का. वृ., भागः ६), पृ. ६०२।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपरिनिर्दिष्टकाशिकावृत्तिन्यासोद्धरणानां साक्ष्येन साम्प्रतं काशिकायाः प्रथम-सप्तमाष्टमाध्यायानां प्रणेता एक एवासीदित्यस्मिन् वचने नास्ति कोऽपि शङ्कावसरः। तथा हि उपरिकथितेषु स्थलेषु पदमञ्जरीकारस्याप्येतादृशमेव व्याख्यानमुपलभ्यते। यथा पदमञ्जरी—७।१।७१ सूत्रे—

> "ऐऔच्" इत्यत्र "वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति" इत्युक्त्वा "नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम्" इत्युक्तम्, तत्रावसरे प्राप्ते नुड्विधौ प्रतिविधत्ते-ऋकारैकदेश इत्यादि।"[1]

पदमञ्जरी ८।२।१८ सूत्रे —"नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम्" इत्युक्तम्,तत्रावसरे प्राप्ते लादेशे प्रतिविधत्त—इति सामान्यमिति।"[2]

अनेन पदमञ्जरीकृतव्याख्यानेन काशिकायाः प्रथमसप्तमाष्टमाध्यायानां वृत्ति-कर्ता एक एव निश्चीयते। परं यदि "वृत्तिकारः" इति पदं वृत्तिकृतत्वसाधारण्याज्ज-यादित्यवामनयोरन्यतरं लक्षयतीत्युच्यते तर्हि नायं विरोधः। "स्वयमेव वृत्तिकारो" नाम "जयादित्यवामनयोरन्यतरः" इत्यस्याप्यर्थस्याभिप्रेतत्वात्।

उपरिनिर्दिष्टेषु समस्तन्यासपदमञ्जर्यवतरणेषु नास्ति कोऽप्येतादृशो दृढतमो निश्चयः, यस्याधारेण काशिकायाः प्रणेतृविषये वामनजयादित्ययोर्मध्ये कः कस्य भागस्याध्यायस्य वा कर्तासीदित्येकान्ततया वक्तुं शक्यते। कदाचिद् वामनजयादित्यौ द्वावपि सम्पूर्णमष्टाध्यायीं पृथक् पृथग् व्याचिख्यतुरित्यपि वक्तुं शक्यते।

(ङ) काशिकाकृतोर्धर्मः

इमौ वामनजयादित्यौ जैनावित्यनुमीयत इति बालशास्त्रिसम्पादितकाशिकावृत्ते-र्भूमिकायामुपन्यासः[3]। अन्ये चैमौ द्वावपि जैनौ वा बौद्धौ वेति कल्पयन्ति।[4] अतोऽस्मिन् विषये विदुषां मतान्यधस्तादुपस्थाप्यन्ते।

(१) अन्येषु आस्तिकग्रन्थेषु वयं सर्वत्र मङ्गलाचरणं पश्यामः। परन्तु अमरकोश-ग्रन्थवत् काशिकावृत्तिप्रारम्भे मङ्गलाचरणं न दृश्यते।

(२) काशिकाकृद्भ्यामष्टाध्याय्याः सूत्रपाठे वार्त्तिकानां प्रक्षेपः कृतः। एतादृशं प्रक्षेपमास्तिकधर्मानुयायिनो न कर्तुं पारयन्ति।

---

१ प.म. (का. वृ., भागः ६), पृ. १९०।

२ प. म. (का वृ., भागः ६) पृ. ३७५।

३ का. वृ. (बालशास्त्री), वाराणसी, १८९८, भूमिका, पृ. २।

४ MAX MULLER "The Kāśikā", *IA*, Vol. ix, pp 305-308.

तुलना—S. K. BELVALKAR, *Systems of Sanskrit Grammar*, P. 36.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(३) काशिकायां "सम्मानोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः" (१।३।३६) इत्यस्य वृत्तौ "चार्वी बुद्धिः, तत्सम्बन्धादाचार्योऽपि चार्वी, स लोकायते शास्त्रे पदार्थान्नियते, उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति।...नयते चार्वी लोकायते" इति पाठस्य लेखः।

अत एव निर्दिष्टप्रमाणत्रयेणेदं वक्तुं शक्यते यत् काशिकाकारः (जयादित्यः) नास्तिक आसीत्। अत्रोपस्थितान् प्रश्नान् यथाक्रमं विचारयामः।

"काशिकायां मङ्गलाचरणं न विद्यते" इत्यनेन प्रमाणेन काशिकाकारो नास्तिक (बौद्धसम्प्रदायस्य जैनसम्प्रदायस्य वानुयायिनौ) न भवितुं शक्नुतः, यतो हि सम्प्रदायान्तरेषु मङ्गलाचरणपद्धतिः पृथक् पृथगेव दरीदृश्यते। पौराणिकपरम्परायां रामं कृष्णं शिवं वा संलक्ष्य मङ्गलानि क्रियन्ते। विशुद्धवैदिकपरम्परायामग्निसूर्यादिदेवोद्देश्यकैर्वैदिकैर्मन्त्रैर्मङ्गलानि विधीयन्ते। बौद्धसम्प्रदाये जैनसम्प्रदाये वा क्रमेण भगवन्तं बुद्धमुताहो महावीरं संलक्ष्य मङ्गलानि क्रियन्ते। परं काशिकायाः प्रारम्भे मङ्गलमेव नास्ति, अतो मङ्गलानुसारेण काशिकाकृतोः कः सम्प्रदाय इति वक्तुं न पार्यते।

महाभाष्यारम्भे "अथ शब्दानुशासनम्" इत्यादिमं वचनम्। यद्यत्र अथशब्दस्यार्थो माङ्गलिकः स्वीक्रियते तर्हि काशिकावृत्तिविषयेऽपि तथा वक्तुं शक्यते, तत्रापि ग्रन्थारम्भे अथशब्दस्य विद्यमानत्वात्। यदि च महाभाष्येऽथशब्दोऽधिकारार्थः प्रयुज्यते[1] तदा काशिकायामपि स एवार्थः ग्राह्यः। महाभाष्योदाहरणेन एवं ज्ञायते यद् व्याकरणशास्त्रे मङ्गलाचरणं सर्वथा पृथक्त्वेनैवोपस्थापनीयमिति नानिवार्यम्। तथा हि पदमञ्जर्यां समादधाति हरदत्तः—

इष्टदेवनमस्कारः कार्यः सन्नेह किंकृतः।
वृत्तौ सूत्रे तथा भाष्ये वार्त्तिके च तदुच्यते॥
मनसा वचसा च कर्मणा कृत एवायमिहानिवेशितः।
न हि दर्भपवित्रपाणिताद्यपरं मङ्गलमत्र कीर्त्यते॥[2]

अनेन हरदत्तकृतोपन्यासेनेदं सुस्पष्टं यत्सूत्रवार्त्तिकभाष्यवृत्त्यादिग्रन्थेषु मङ्गलवचनमनिवार्यं न भवति। शब्दशास्त्रे मङ्गलाचरणं मनसा वाचा कर्मणा वापि कर्तुं शक्यम्। अपि च भगवतः पाणिनेः सूत्राणां विवेचनादन्तरेण किमन्यद् मङ्गलमत्र काम्यते। किमनेन पाणिनेः नास्तिकत्वं सिद्धं भवति। अत एव काशिकावृत्तिप्रारभे मङ्गलं नास्तीति प्रश्नो न कथमपि काशिकाकृतोर्नास्तिकत्वं समर्थयति।

---

१ म. भा. (किलहॉर्नसंस्करणम्), भागः १, पृ. १ :
"अथ शब्दानुशासनम्। अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते।"

२ प. म. (का. वृ., भागः १), श्लोकौ ७–८, पृ. ४।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूत्रपाठे वार्त्तिकानां प्रक्षेपविषयकः प्रश्नोऽपि न युक्तिसिद्धो भाति। तथा हि महाभाष्ये आचार्यपाणिनिप्रणीतानां सर्वेषां सूत्राणां पाठोऽनुपलब्धः। अपि च महाभाष्येऽनेकेषां सूत्राणां प्रत्याख्यानमपि भूयो भूयो दृश्यते। एवं स्थिते महाभाष्यविषये कोऽपि जनः काशिकावृत्तिवत् प्रश्नं नोद्भावयति यदस्य ग्रन्थस्य कर्ता नास्तिक आसीदिति। एवं स्थिते काशिकावृत्तिविषये नास्तिकताप्रश्नः कथं समुचितो भवेत् ? किं च महाभाष्यस्याध्ययनेनेदं ज्ञायते यद् यत्र पाणिनिसूत्रैः कात्यायनवार्त्तिकैश्च कार्यं न प्रतिपाद्यते तत्र आचार्यपतञ्जलिना स्वीयानि इष्टिवार्त्तिकादीनि कृतानि। अपि च कात्यायनवार्त्तिकानां स्वतन्त्रतोऽनुपलब्ध्या कात्यायनवार्त्तिकपाठे पतञ्जलिकृतप्रक्षेपोऽपि संभवति। बहुत्र च भाष्यकारेण "केचित्, अन्ये, अपरे" इत्यादिभिरनेकैः सङ्केतवचनैः पाणिनिकात्यायनाद्यतिरिक्तानामन्येषामप्याचार्याणां वचनानि प्रमाणत्वेनोपन्यस्तानि। यतश्च यदि सर्वतोभावेन व्याकरणशास्त्रे आचार्यपाणिनेः सूत्राणि कात्यायनस्य च वार्त्तिकान्येव प्रमाणत्वेन स्वीक्रियन्ते तदा तु शब्दशास्त्रेऽनेके प्रयोगा असाधव एव भविष्यन्ति। मुनित्रयासंगृहीतानां बहूनां शब्दानां साधुत्वं पाणिनिव्याकरणपरम्परायां काशिकावृत्तावेव प्रथमत्वेन संदृश्यते, अत एव काशिकाकृता ग्रन्थारम्भ एव प्रतिज्ञातं यदियं वृत्तिः पूर्वेषां सर्वेषां प्रकीर्णानां वृत्तिग्रन्थानां संग्रहः।[1] तत्कथमिदं वक्तुं समुचितं यदस्याः(काशिकायाः) कर्तृभ्यामष्टाध्याय्याः सूत्रपाठे प्रथमत्वेन वार्त्तिकानां प्रक्षेपः कृतस्तेनास्या वृत्तेः कर्तारौ नास्तिकावास्तामिति। यद्यपि काशिकायां चान्द्रव्याकरणादिपरम्पराणां प्रभावस्तथापि यानि वचनानि महाभाष्ये नोपलभ्यन्ते यानि च कुणिचुल्लिभट्टादिप्रणीतेष्वतिप्राचीनेषु वृत्तिग्रन्थेषु विद्यमानान्यासन् तेषामपि संग्रहोऽत्र सम्भाव्यते। काशिकाकर्तृभ्यां कानिचिद् वचनानि कल्पयित्वा सूत्रपाठे स्थापितानीत्येतन्मतं न युक्तियुक्तं भाति। काशिकायां पाणिनिशब्दशास्त्रे सूत्रवार्त्तिकरूपेण प्रकीर्णानां बहूनां वचनानां मतान्तराणां वा सङ्कलनमात्रम्। अत एवाष्टाध्याय्याः सूत्रपाठे काशिकाकृद्भ्यामेव प्रथमतो वार्त्तिकानां प्रक्षेपः कृत इत्यवद्यमेव प्रतिभाति।

नास्तिक्यसंसाधनार्थमुपस्थापितं तृतीयं कारणं काशिकाकृतलोकायतशास्त्रोल्लेखं विषयीकरोति। परमनेन हेतुना नेदं प्रमाणयितुं समुचितं यदस्या वृत्तेः कर्तारौ बौद्धधर्मस्य, जैनधर्मस्य वानुयायिनौ (नास्तिकौ) आस्तामिति। शब्दशास्त्रस्य पाणिनी-

---

१ वृत्तौ भाष्ये तथा नामधातुपार दषु।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसङ्ग्रहः॥ का. वृ., श्लोकः १।

तुलना—अन्यतः सारमादाय कृतैषा काशिका यथा।
वृत्तिस्तस्या यथाशक्ति क्रियते पञ्जिका तथा॥ न्यासः, श्लोकः २।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

येतरव्याकरणपरम्परास्वपि आस्तिकपरम्परावगाहिविचाराणामुल्लेखो गृह्यते । चान्द्र-व्याकरणं हि नाम बौद्धव्याकरणम् । परमस्मिन् आस्तिकग्रन्थस्थविचाराणामुल्लेखोऽपि वर्तते । चान्द्रे व्याकरणे स्मृतिपुराणादिग्रन्थेभ्यरुद्धृतानि[1] बहून्युदाहरणानि समुपल-भ्यन्ते । परं सत्यप्येतादृशे तस्य कर्ता चन्द्रगोमी बौद्ध एव निर्णीयते । स आस्तिकधर्मा-नुयायी स्यादिति कस्यापि मनसि शङ्का नोदेति । रूपावतारस्य च कर्ता धर्मकीर्तिः पाणिनिशास्त्रोद्धारकः सन्नपि बौद्ध एव; यतस्तेनैव तथा तस्य ग्रन्थस्य प्रतिज्ञाश्लोको[2] निर्दिष्टः । अभयनन्दी जैन आसीत् । तस्य कृतौ जैनेन्द्रव्याकरणमहावृत्तौ बहुषु स्थलेषु काशिकायाः प्रभावः । अस्ति च तत्रास्तिकविचारपराणां वचनानामुल्लेखः[3] । भाषावृत्ति-प्रणेता पुरुषोत्तमदेव आचार्यपाणिनिं बहुमन्वानोऽपि नास्ति आस्तिकवादिनां समर्थकः । तेन न कृतं वैदिकसूत्राणां व्याख्यानम् । किं च तद्ग्रन्थस्य प्रतिज्ञाश्लोकेन पूर्णतया बौद्ध एव स इति निश्चीयते ।[4]

किमुपरिनिर्दिष्टा वैयाकरणाः पाणिनेरधमर्णत्वाद् आस्तिकमतावलम्बिन इति व्यवह्रियते ? तादृशे स्वीकरणे तु अस्माकं विभ्रम एव भविष्यति ।

अपि च शब्दशास्त्रस्य मूर्धाभिषिक्तो हेतुर्वर्तते साधुशब्दविवेचनम् । शब्दशास्त्रस्य आस्तिकनास्तिकविचारैः सह नास्ति कोऽपि संबन्धः । भगवता पाणिनिनापि "ऋतूक्था-दिसूत्रान्ताट्ठक्' (४।२।६०) इत्यत्र उक्थादिगणे लोकायतशब्दस्य परिगणनं कृत-मस्ति। एतेन भगवान् पाणिनिरपि लौकायतिकमतानुयायी आसीदित्यनुमीयते चेत्तदनुमानं न सुतर्कप्रतिष्ठितं भवति । आस्तिकानां शास्त्रे नास्तिकानां लोकायतशब्दस्य कथं ग्रहणमिति प्रश्न एव नोदेति । शब्दशास्त्रे केवलं शब्दानामेव सिद्ध्यर्थमाचार्यादीनां प्रवृत्तिः; न तु आस्तिकनास्तिकमतप्रशंसार्थम्, न वा तेषां निन्दार्थम् । तथैव काशि-कायामपि प्रयोगव्युत्पादनमेव प्रधानीभूतं प्रयोजनम् । न हि साम्प्रदायिकदृष्ट्या लोका-यतशब्दस्य प्रयोगः; अपि तु केवलं शब्दशास्त्रदृष्ट्या एव । अस्माद् हेतोर्लोकायत-शब्दस्योदाहरणदानेन काशिकाकारौ बौद्धौ जैनौ वेति केषाञ्चिन्मतं स्यात्तर्हि तद्भ्रम-मूलकमेव । काशिकायां नास्तिकमतस्य गन्धोऽपि नास्ति । किं च न जैनमतानुयायिनः

---

१ चान्द्रव्याकरणे ६।३।३ सूत्रे—'व्यवसन्यधोऽधो व्रजति" इत्युदाहरणं मनुस्मृतौ ७।५३ द्रष्टुं शक्यते ।

चा. व्या. ६।३।१३ सूत्रगतोदाहरणानि—"द्वन्द्वं सूर्याचन्द्रमसौ । द्वन्द्वं नारद-पर्वतौ ।....द्वौ युधिष्ठिरार्जुनौ" वेदपुराणगामीनि वक्तुं शक्यन्ते ।

२ सर्वज्ञमनन्तगुणं प्रणम्य....॥ रूपा., भागः १, श्लोकः २ । तुलना—"स (धर्मकीर्तिः) सौगतमतानुयायीति ग्रन्थादौ निवेशितेन तद्विरचितेनैव सर्वज्ञप्रणामपूर्वकप्रतिज्ञा-श्लोकेन ज्ञायते ॥" रूपा., भागः१, भूमिका, पृ.१ ।

३ त्रियम्बकं यजामहे वायुवम्बरयोरिव ॥ जै. महा. १।२।१ ।
एति जीवितमानन्दः ॥ जै. महा. १।४।६१ (अयं रामायणे दृश्यते)

४ नमो बुद्धाय भाषायां यथात्रिमुनिलक्षणम् ॥ भा. वृ., श्लोकः १ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकाकारौ जैनावित्यङ्गीकुर्वन्ति, न वा बौद्धमतानुयायिनः काशिकाकारौ बौद्धावित्यङ्गीकुर्वन्ति। काशिकायां वैदिकोदाहरणबाहुल्येन[1] काशिकाकृतौ वैदिकधर्मानुयायिनावित्यपि अनुमातुं शक्यते। तस्मादन्यन्निश्चायकं प्रमाणं विना केवलं लोकायतशास्त्रसंबन्ध्युदाहरणेन काशिकाकृतोर्लोकायतत्वं, जैनत्वं, बौद्धत्वं वा न कदापि निर्णेतुं शक्यते।

(च) काशिकावृत्तेः समयः

खिष्टाब्दस्य द्वितीयशतकादारभ्य चतुर्दशशतकपर्यन्तं काशिकाकालं स्वीकुर्वद्भिः कृतभूरिपरिश्रमैः पौरस्त्यैः पाश्चात्यैश्च नैकैर्विद्वद्भिः स्वमतपुष्टये बहवस्तर्करूपस्थापिताः। अतः प्रथमं तेषां मतं समालोच्य पश्चात् स्वमतं प्रस्थापयिष्यामः।

इदं तु मया पूर्वमेवोक्तं यत् चीनदेशवास्तव्येन इत्सिङ्गेन वृत्तिसूत्रग्रन्थो जयादित्यविरचितग्रन्थत्वेन स्वीकृतः। परं तद्विषये केचन विद्वांसो वैमत्यं प्रदर्शयन्ति। तेषां विदुषां मध्ये आइ. एस. पावटे—पी. वी. काणे—एस. के. बेलवलकरमहाभागप्रभृतयः प्रमुखाः। यद्यपि डॉ. बेलवलकरमहोदयैः काशिकाया रचनाकालः खिष्टाब्दस्य सप्तमशतकमध्ये मुख्यत्वेन निर्धारितस्तथापि ते प्रच्छन्नरूपेण तं निर्धारितमपि कालं स्वग्रन्थस्य टिप्पणभागेऽस्वीकुर्वन्त एव प्रतीयन्ते; यतस्तैरिदं तत्रोपन्यस्तं यद् इत्सिङ्गकृतोल्लेखः कथमपि काशिकावृत्तिं न लक्षयति।[2] आइ. एस. पावटेमहोदयैरिदं डॉ. बेलवलकरमहोदयानां टिप्पणोद्धृतं वाक्यमेकान्ततया प्रमाणत्वेन स्वीकृत्य स्वकीयग्रन्थस्य भूमिकायां[3] महता बलेनेदं प्रतिष्ठापितं यद् न केनापि प्रकारेण इत्सिङ्गोल्लिखितजयादित्यविरचितवृत्तिसूत्रग्रन्थः काशिकावृत्तिं लक्ष्यीकरोति; यतो हि—

इत्सिङ्गो वृत्तिसूत्रस्योल्लेखं कुरुते। बहवो भारतीयविद्वांसोऽत्रेदं वृत्तिसूत्रम्—सूत्रवृत्तिरितिस्वरूपेण परिवर्तयन्तो वृत्तिसूत्रशब्दस्य काशिकया सह संबन्धं कामयन्ते।

---

१ काशिकायां बहुत्र लौकिकसूत्रव्याख्यानावसरेऽपि वैदिकोदाहरणानि समुपलभ्यन्ते। तद्विषये "ग्रन्थद्वयस्य वैदिकोदाहरणानां स्थितिः" इति प्रकरणं द्रष्टव्यम्।

२ S. K. BELVALKAR, *Systems of Sanskrit Grammar*, footnote 2, p. 35.

३ I. S. PAWATE, *The Structure of the Aṣṭādhyāyī*, Introduction, pp 9-10.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्सिङ्गः कथयति यदिदं वृत्तिसूत्रं शाश्वतनियमान् परिज्ञापयति। अयमुल्लेखः केनापि प्रकारेण काशिकाविषये नैव सङ्गच्छते।

जयादित्य एव वृत्तिसूत्रस्य प्रणेता इति इत्सिङ्गो वदति। परं साम्प्रतं काशिका वामनजयादित्योभयप्रणीता वृत्तिः। यदि इत्सिङ्गोनिर्दिष्टवृत्तिसूत्रग्रन्थेन काशिकावृत्तिरेवाभिप्रेता स्यात्, तर्हि स कस्मात् कारणाद् वामनविषये जोषमास्ते।

इत्सिङ्गानुसारेण वृत्तिसूत्रे पतञ्जलिनैका टीका व्यरचि। परमिदं पतञ्जलिव्याख्यातवृत्तिसूत्रमेव काशिका इति न भ्रमितव्यम्। आचार्यपतञ्जलिना स्वकीये भाष्ये "समर्थः पदविधिः" (२।१।१) इत्यस्य चतुर्विंशत्तमे वार्त्तिके वृत्तिसूत्रपदस्य स्पष्टरूपेणोल्लेखः कृतः। स यथा—"न ब्रूमो वृत्तिसूत्रवचनप्रामाण्यादिति। किं तर्हि, वार्त्तिकवचनप्रामाण्यादिति"। (तथा च वृत्तिसूत्रग्रन्थः काशिकावृत्तितो भिन्न इत्येव प्रतीयते)।

तस्माद् वयं बेलवलकरमहोदयमतमनुसृत्येदं वक्तुं समर्था यद् इत्सिङ्गकृतवर्णनं कथमपि काशिकया सह संबद्धं न भवति।[1]

एतदग्रे पुनः आइ. एस. पावटेमहाभागाः स्वग्रन्थस्य भूमिकाभागे "श्रवणबेलगोला" (सङ्ख्या ६४) इति ११६३ खिष्टाब्दस्य लिखितशिलालेखस्याधारेण देवनन्दि-जिनेन्द्रबुद्धि-पूज्यपादप्रभृतीनेकत्वेनैव स्वीकृत्य जैनेन्द्रव्याकरणस्य च कर्ता एक एवेति निर्धारयन्ति। अतोऽग्रे तैस्तत्र महामहोपाध्याय-आर.-नृसिंहार्यसम्पादितस्य कर्नाटककविचरितस्य (द्वितीयसंशोधितसंस्करणम्) उल्लेखो विहितः, यस्मिन् पूज्यपादस्य कालः ६०० खिष्टाब्दं वर्तते। परं तेषां मतेनैव (आइ. एस. पावटेमतेन) आर. नृसिंहाचार्यविलिखिते २१।१२।१९३३ दिनाङ्किते पत्रे पूज्यपादस्य कालः ४५० खिष्टाब्दमिति स्वीकृतम्। इदं प्रमामुररीकृत्य आइ. एस. पावटेमहोदया न्यासकारं ज्यपादं चोभावप्येकत्वेन स्वीकृत्य पूज्यपादस्य समयं ४५० खिष्टाब्दमिति निर्धाय अग्रे पुनर्लिखन्ति—बाणेन स्वकीये हर्षचरिते न्यासस्योल्लेखः कृतः।[2] बाणश्च हर्षवर्धनस्य सभापण्डित आसीत्। हर्षवर्धनस्य राज्यकालः ६०६-६४८ खिष्टाब्दमध्ये आसीत्। बाणविरचिते हर्षचरिते न्यासस्य नामग्रहणम्। न्यासस्य च रचनाकाल आर. नृसिंहाचार्यैः ४५० खिष्टाब्दं स्वीकृतम्, अत इदं निश्चीयते यत् काशिकावृत्तिर्या न्यासस्य समये एका प्राचीना, प्रौढा, अतिविश्रुता च कृतिरासीत् सा खिष्टाब्दस्य प्रथमशतकादपि पूर्वं स्थापयितुं शक्या[3] इति।

---

१ *Ibid*, पृ. १०।

२ *Ibid*, **तच्छ्रुत्वा बाणस्य.....पितृव्यपुत्रा भ्रातरः प्रसन्नवृत्तयो गृहीतवाक्या कृतगुरुपदन्यासा न्यायवादिनः सुकृतसंग्रहाभ्यासगुरवो लब्धसाधुशब्दा लोक इव व्याकरणेऽपि।**

३ I. S. PAWATE, *The Structure of the Aṣṭādhāyī*, Introduction.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आइ. एस. पावटेमहोदयैरित्सिङ्गकृतोल्लेखस्य निराकरणे डॉ. वेलवलकर-महोदयकृतटिप्पणस्य, कर्नाटककविविरचितभूमिकायां निर्धारितन्यासरचनाकालस्य च साहाय्यं स्वीकृतम्। परमिदं न ज्ञायते यत् पावटेमहोदयैः डॉ. वेलवलकरमहोदयकृते-त्सिङ्गमतनिराकरणविषयकटिप्पणस्यान्ते प्रतिपादितं मतं कुतो न स्वीकृतम्। तत्र हि डॉ. वेलवलकरमहोदया एवं कथयन्ति यत् काशिकायां वाक्यपदीयस्य नामग्रहणाद् वयं काशिकावृत्तिं केनापि प्रकारेण ६५० ख्रिष्टाब्दात् पूर्वं स्थापयितुं न शक्नुमः। तथा चानेनैवाधारेण न्यासस्य समयोऽपि ७५० ख्रिष्टाब्दात्पूर्वं न भवितुमर्हति, यतो भामहेन न्यासस्योल्लेखः कृत इति।[1] तदयं निर्गलितोऽर्थो यदाधारेण आइ. एस. पावटेमहोदयैरित्सिङ्गकृतजयादित्यविषयकोल्लेखस्य खण्डनं कृतं तेनैव प्रमाणेन पावटे-महोदयानामपि खण्डनं संजायते। तस्मात् पावटेमहोदयकृतः काशिकाकालनिर्णय आपातरमणीय एव भातीत्यास्तां तावत्।

अनेनानुबन्धेनेदमपि विवेचनीयं भवति यत् डॉ. वेलवलकरमहोदयैः स्वकीये टिप्पणभागे भामहकालनिर्णयस्योपोद्बलकत्वेन "जर्नल ऑफ बोम्बे ब्राञ्च रायल एशिआटिक, सोसाइटी, १९०९, पृ. ९४; इण्डियन एन्टिक्वेरी, ४१, पृ. २३२-२३७, तथा ४२, पृ. २५३-२६४" इत्यादीनां शोधपत्रिकाणामुल्लेखः कृतः। परं तासु शोध-पत्रिकासु नास्ति तत्र न्यासस्य कालविषये कोऽपि दृढनिश्चयः, यतस्तत्र "जर्नल ऑफ बॉम्बे ब्राञ्च रायल एशिआटिक सोसाइटी" इत्यभिधायां शोधपत्रिकायां प्रो. पी. बी. काणेमहोदयाः—न्यासकारः ७०० ख्रिष्टाब्दादनन्तरं बभूवेति यन्मैक्समूलरमहोदयानां मतं तन्नानुमन्यन्ते। ते हि न्यासस्य कालं बाणविरचितहर्षचरिताधारेण निर्धारयन्ति।

---

१. S. K. BELVALKAR, *Systems of Sanskrit Grammar*, footnote 2, p. 35 :

"Itsing's account of the *Vṛtti-Sūtra* by Jayāditya may not after all refer to the Kāśikā. He speaks of a commentary on the *Vṛtti-Sūtra* by Patañjali and writes as if Jayāditya completed the *Vṛtti* himself. Even so, however, we can not bring the *Kāśikā* any earlier than 650 A. D., seeing that on iv. 3.88 it mentions the *Vākyapadīya* by name. Jayāditya than appears to be at least a contemporary of Bhartṛhari the author of the *Vākyap-adīya*. Vāmana who probably wrote the last three chapters of the *Kāśikā* came soon after Jayāditya, and Jinendrabuddhi, the author of the *Nyāsa* on the *Kāśikā* came probably before 750, seeing that he is quoted by so early an author as Bhām-aha. Compare *JBBRAS* for 1909, p, 94; *Indian Anti-quary*, xli, pp. 232-237 and xlii, pp. 253-264."

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अमुं विषयमधिकृत्य ते तत्र लिखन्ति यद् बाणस्य समयः ख्रिष्टाब्दस्य ६२५ शतके वर्तते, अतो न्यासस्य काल ६०० ईसवीयशतकादुत्तरवर्ती न भवितुं शक्यते। परं के. बी. पाठकमहोदयैर्न्यासस्य कालः ६००तः शतवर्षोत्तरवर्त्ती इति स्वीकृतः।[१] अत्र निर्दिष्टदिशा डॉ. वेलवलकरमहोदयैः स्वीकृतो न्यासस्य ७५० ख्रिष्टाब्दकालः प्रो. पी. वी. काणेमहोदयनिर्धारितमतेन वैमत्यं भजते। किं च—भामहेन निर्दिष्टो न्यासग्रन्थः काशिकावृत्तिमधिकृत्य विलिखतं न्यासमेव द्योतयतीति प्रो. के. वी. पाठकमहाभागानां मतम्।[२] तेषां मतेन भामहाद् न्यासकारः पूर्ववर्ती न्यासकाराच्च दण्डी पूर्ववर्तीति निश्चीयते।[३] परमिदं मतं के. पी. त्रिवेदिमहाभागेभ्यो न रोचते।[४] तेषां मतेन भामहेन निर्दिष्टो न्यासः काशिकावृत्तेर्न्यासं नैव लक्ष्यीकरोति। इदमेव पण्डितयुधिष्ठिरमीमांसकमहोदयानामप्यभिमतम्।[५] शिशुपालवधेऽपि निर्दिष्टो न्यासग्रन्थः

---

१. P. V. KANE, "Bhāmaha, the Nyāsa and Māgha", *JBBRAS*, Vol. 23, p. 94 :
"Bāṇa belongs to the first half of the 7th century and so Nyāsa will have to be placed not later than 600 A.D. Prof. PATHAK places it 100 years later. I do not mean that this isolated passage should up set the whole reasoning based upon Itsing's statements."

२. K. B. PATHAK, "Daṇḍin, the Nyāsakāra and Bhāmaha", *IA*, Vol. xli, pp. 232-237. अपि चास्यैव लेखकस्य शोधपत्रम्—"Bhāmaha's Attack on the Buddhist Grammarian Jinendrabuddhi", *JBBRAS*, Vol. xxiii, pp. 18-31.

३. K. B. PATHAK, *IA*, Vol. xli, pp. 232-237.

४. K. P. TRIVEDI, "The priority of Bhāmaha to Daṇḍin", *IA*, Vol. xlii, pp, 258-264.

५. द्र.—सं. व्या. शा. इति., भागः १, पृ. २७७:
"तस्मादनर्थकमन्तग्रहणं दृश्यते। न्यासे तु प्रयोजनमन्तग्रहणस्योक्तं स्वभावैजन्तप्रतित्त्यर्थम्, इह मा भूत्—कुम्भकारेभ्य इति।" अयं महाभाष्यदीपिकायामुद्धृतो न्यासग्रन्थः साम्प्रतं जिनेन्द्रबुद्धिविरचिते न्यासे नोपलभ्यते, तेन पुरा बहवो न्यासग्रन्था आसन् इति कथयितुं शक्यः।
अपि च द्र.—सं. व्या. शा. इति., भागः १, पृ. ३६५:
जिनेन्द्रबुद्धिना कुत्रापि स्वकीये न्यासे "जनिकर्तुः प्रकृतिः" (१।४।३०) इत्यस्य ज्ञापकेन "वृत्रहन्ता" इति पदे समासविधानं नोपदिष्टम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकावृत्तेर्न्यासं नैव विषयीकरोति ।[१] प्राचीनकाले हि वृत्तिग्रन्थानां न्यासग्रन्थानां च बाहुल्यमासीत् ।[२] अत एव हर्षचरिते, काव्यालङ्कारे, शिशुपालवधे च स्मृतो न्यासकारः काशिकावृत्तिमधिकृत्य विरचितं न्यासग्रन्थं नैव अधिकरोति । तथा चैते सर्वेऽपि ग्रन्थाः काशिकायाः कालनिर्णयेऽनुपकारका एव भवन्तीति मे मतिः ।

पूर्वमेव मया निर्दिष्टं यत् प्रो. पी. वी.काणे-आइ. एस.पावटेमहाभागौ इत्सिङ्ग-कृज्जयादित्यविषयकमुल्लेखं न बहु मन्वाते । डॉ. वेलवलकरमहोदयास्तं प्रमाणीकुर्वन्तोऽपि इत्सिङ्गस्य लेखेन वैमत्यं प्रदर्शयन्ति, यदाधारेण आइ. एस. पावटेमहोदयाः काशिकाया रचनाकालं ख्रिष्टाब्दस्य प्रथमं शतकमिति निर्धारयितुं प्रयतन्ते ।

अन्यच्च, आइ. एस. पावटेमहोदयाश्चान्द्रव्याकरणस्य प्रभावं काशिकायां पश्यन्ति ।[३] अभ्युपगते च तस्मिन् चान्द्रव्याकरणमपि ख्रिष्टाब्दात् पूर्वं भवितुमर्हति । परं न कोऽपि विद्वान् चान्द्रव्याकरणं ख्रिष्टाब्दात् पूर्वमिति मनुते । यस्माच्चान्द्रव्याकरणं ख्रिष्टाब्दात् पूर्वं भवितुं नार्हति तत्कथं पावटेमहोदयाः ख्रिष्टाब्दात् पूर्ववर्तिन्यां चान्द्रव्याकरणस्य प्रभावमङ्गीकुर्वन्ति । यदि चन्द्राव्याकरणं ख्रिष्टाब्दस्य पञ्चमशतकस्य[४] कृतिस्तदा तु काशिकाया एव प्रभावश्चान्द्रव्याकरणे वर्तत इत्येव वक्तुमुचितम् । डॉ. वेलवेलकर[५]—किलहॉर्न[६]—विण्टरनिट्ज[७]—महाभागप्रभृतयः सर्वेऽपि विद्वांसश्चान्द्रव्याकरणस्यैव प्रभावं काशिकायां स्वीकुर्वन्ति । तदेव च युक्तिसिद्धं प्रतिभाति । वयं राजतरङ्गिण्यां[८] वाक्यपदीये[९] च चन्द्राचार्यस्योल्लेखं

---

१. F. KIELHORN, "On Śiśupālavadha, ii,112", *JRAS (of the Great Britain and Ireland)*, April 1908, pp. 495-502.

२. तुलना—सं. व्या. शा. इति., भागः १, पृ. २७७ ।

३. I. S. PAWATE, *The Structure of the Aṣṭādhyāyī*, pp. 10-11.

४. K.V. ABHYANKAR, A *Dictionary of Sanskrit Grammar*, p. 140 (चन्द्र-चन्द्रगोमिन्-स्थलद्वयम्)

५. S. K. BELVALKAR, *Systems of Sanskrit Grammar*, footnote 1, p. 38

६. F. KIELHORN, "The Cāndra-Vyākaraṇa and Kāśikā-Vṛitti", *IA*. Vol. xv, pp. 183-185.

७. M. WINTERNITZ, *History of Indian Literature*, Vol. iii, part ii, Tr. S. JHA, p. 433.

८. चन्द्राचार्यादिभिर्लब्ध्वादेशं तस्मात्तदागमम् ।
प्रवर्तितं महाभाष्यं स्वं च व्याकरणं कृतम् ।। राज. १।१७६.

९. पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः ।
स नीतो बहुशाखात्वं चन्द्राचार्यादिभिर्पुनः ।। वा. प. २।४८३.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पश्यामः । तथैव च वाक्यपदीयस्य नामनिर्देशः काशिकायां वरीवर्त्ति । तस्मात् चान्द्र-व्याकरणं वाक्यपदीयं च द्वे अपि काशिकातः पूर्ववर्तिनी । तथा च चान्द्रव्याकरणस्यैव काशिकायां प्रभाव इत्येव कल्पना ज्यायसी । एभिः प्रमाणैः पावटेमहोदयनिर्धारित-काशिकाकालनिर्णयस्य स्वरूपव्याक्रियैव पराक्रिया भवति ।

प्रो. बोथलिङ्कमहाभागैः कल्हणविरचितराजतरङ्गिण्याधारेण काशिकावृत्ति-कृद्वामनस्य कालः खिष्टाब्दस्याष्टमं शतकमिति निर्णीतम् । तैरेवं निर्धारितं यत् कल्ह-णपण्डितो नृपतिजयापीडस्य सभायां अलङ्कारशास्त्रस्य प्रधानः पण्डित आसीत् । तेन स्वीयायां राजतरङ्गिण्यां काशीर-दामोदरगुप्त-मनोरथ-शङ्खदत्त-चातक-सन्धिमत-वामनादिविदुषां निर्देशः कृतः । एतत्प्रमाणीकृत्य प्रो. बोथलिङ्कमहाभागा इत्थं प्रतिपादयन्ति यद् राज्ञो जयापीडस्यैव 'जयादित्य' इति द्वितीयं नामासीत् । वामनश्च तन्नृपतिसंसदि पण्डितपदवीमलङ्करोति स्म । जयापीडस्य राज्यकालः खिष्टाब्दस्या-ष्टमशतकसमीपवर्ती वर्तते । अतः काशिकाकारवामनस्यापि स एव समयो भवितु-महेति[1] । परमत्रेदं मनसि विचारणीयं यत् कल्हणपण्डितेन स्वकीये ग्रन्थे काशिकावृत्तेरु-ल्लेखो न कृतः । यदि काशिकावृत्तिकृद् वामन एव कल्हणस्याभिप्रेतोऽभविष्यत्तर्हि स कुत्रापि काशिकावृत्तेरुल्लेखमकरिष्यत्; यस्मान्न कृतोऽतः बोथलिङ्कमहाभागैर्निर्धा-रितः काशिकावृत्तिरचनाकालोऽसाम्प्रतमेवेति प्रतिभाति ।

वैयाकारणवामनविषये डॉ. कैपलरमहाभागानां[2] मतं सर्वथा डॉ. बोथलिङ्क-महाभागमतेन सह वैमत्यं भजते । तेषां मतेन अलङ्कारशास्त्रपण्डितेन वामनाभिधानेन प्रथममेकं काव्यालङ्कारनामकग्रन्थं विरचय्य पुनस्तस्योपरि एका स्वकीया वृत्तिः प्रणीतासीत् । तत्र ग्रन्थकारेण वृत्तिभागे शकुन्तला-रघुवंश-कुमारसंभव-माघ-किरातार्जुनीयादिग्रन्थानां, विशाखिल-कविराज-सदृशविदुषां चोल्लेखः कृतः । तेषु यदि कविराजो राघवपाण्डवीयस्य कर्ता स्वीक्रियेत तर्हि अयं काव्यशास्त्रकर्ता वामनो न्यूनातिन्यूनं १००० खिष्टाब्दोत्तरवर्ती भवितव्यः । परं तस्य (वामनस्य) आश्रयदाता जयापीडः ७७६ खिष्टाब्दे स्वर्गलोकमगच्छत् । तदिदं सर्वं परस्परविरुद्धं भवति । डॉ. कैपलरमहोदया विरोधपरिहाराय एवं प्रयतन्ते यद् बालशास्त्रिविरचितायां काशिका-भूमिकायामेकोऽपरोऽपि वामनो निर्दिष्टः ।[3] सोऽयं कर्मणा कविर्महाराष्ट्रदेशवासी चासीद् इति ज्ञायते । अयं वामनः १५९५ शकसंवत्सरे (= १६७३ खिष्टाब्दे) संबभूव । अनेन तृतीयावामनेन वैयाकरणवामनस्य तादात्म्यं नापादनीयम् । एवं स्वीकृते वैया-

---

१. बोथलिङ्कमहाभागानामिदं मतं मैक्समूलरमहोदयैः स्वकीये शोधपत्रे उद्धृतम् । द्र.—"The Kāśikā". *IA*, Vol. ix, p. 305.

२. काव्यालङ्कारवृत्तिः (डॉ. कैपलरः), १८७५, प्रस्तावना, पृ. ६-११; तुलना—M. MAXMÜLLER, *IA*, Vol. ix, p. 305.

३. का. वृ. (बालशास्त्री), १८९८, भूमिका, पृ. २ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करणो वामनोऽस्मात्काव्यकर्तुः तृतीयवामनात् पञ्चशतवर्षाणि पूर्वं भवितुं शक्नोति। अनेन हेतुना वैयाकरणवामनस्य कालः ११७३ ख्रिष्टाब्द इत्युद्घोषयन्ति डॉ. कैपलर-महोदयाः।

काशिकावृत्तिविषये डॉ. बर्नेलमहाभागाः[1] कथयन्ति यदियं कृतिः ख्रिष्टाब्दस्य द्वादशशतकस्य समीपवर्तिनी इति।

उपरिनिर्दिष्टरीत्या एतत्सुस्पष्टं भवति यत् काशिकायाः कालनिर्णये नास्ति पाश्चात्यविदुषामैकमत्यम्। तस्मात् प्रमाणान्तराण्यश्रित्य काशिकायाः कालनिर्णयमधिकृत्य किञ्चिद् विचारयामः।

धर्मकीर्तिप्रणीतरूपावतारस्य भूमिकाभागे एम. रङ्गाचार्यमहोदया एवं वदन्ति यत् काशिकाया रचनाकालः ख्रिष्टाब्दस्य नवमशतकादूर्ध्वं न वर्तते।[2] एतदग्रे ते प्रतिपादयन्ति यद् रूपावतारस्य धातुप्रत्ययपञ्जिकाप्रकरणे काशिकाव्याख्यात्रोर्हदत्तजिनेन्द्रबुद्धयोर्नामग्रहणाद[3] रूपावतारस्य रचनाकालः ख्रिष्टाब्दस्य त्रयोदशशतकपर्यन्तं भवितुमर्हतीति।[4] परममुं रूपावताररचनाकालं प्रो. के. ए. नीलकण्ठशास्त्रिणो नोरीकुर्वन्ति। नीलकण्ठशास्त्रिभिः[5] शिलालेखानुरोधेन लिखिते शोधपत्रे एवं निर्णीतं यत् पुरा "धम्मकीत्ति' इति नामात्यधिकं लोकविश्रुतमासीत्। इदं च नाम प्रायेण बौद्धवैयाकरणानां कृत एव प्रयुज्यते स्म। परन्तु "धम्मकीत्ति" इति "धर्मकीर्ति" इति च भिन्नं नामद्वयमिति भ्रान्तिर्न कर्तव्या। "धम्मकीत्ति" इति नाम "धर्मकीर्ति" इत्यस्यैव अपभ्रष्टं रूपं भवितुं शक्यते। किं च, अस्य धर्मकीर्तिविरचितरूपावतारस्याध्ययनार्थं प्राचीनकालेऽनेकैर्नृपतिभिर्नैकेषामध्यापकानामन्तेवासिनां च कृते बह्व्यो व्यवस्थाः संयोजिताः। अनेक-चोलवंशोद्भव-नृपति-शिलालेखा इममेवार्थं द्रढयन्ति। राजेन्द्रप्रथमस्य राज्यकाले (१०१२–१०४४ ख्रिष्टाब्दे) विलिखितेन "एण्णायिरम्" इति शिलालेखेनास्य पुष्टिर्भवति। अन्योऽपि शिलालेख एतदेव प्रकटयति। राजेन्द्रप्रथम-

---

१. BURNELL, *Aindra School of Sanskrit Grammarians*, p. 92: "It must be earlier than the twelfth century."

२. रूपा., भागः १, भूमिका, पृ. १२।

३. "अकूत इति वेदलोकप्रयोगदर्शनाद् दीर्घान्त एवायं हरदत्ताभिमतः, तदा लेट्त्वात् अकुविष्ट—इत्यपि भवति, जिनेन्द्रस्तु ह्रस्वान्तमेवापाठीत्, तत्तदा अकुत इति भवति।" रूपा., भागः २, पृ. १५७।

४. सूर्यकान्तबलिमहोदयेनापि धर्मकीर्तेः समयः १३०० ख्रिष्टाब्दे स्वीकृतः। द्र.— "An Introduction to Siddhāntakaumudī", *PAOIB* (Summaries), 1969, p. 418.

५. K. A. NILAKANTHA SASTRI, "A Note on the Rūpāvatāra", *JOR* (Madras), Vol. iii, part iii, pp. 277-280.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्योत्तराधिकारिणो राजाधिराजप्रथमस्य "त्रिभुवनी" इति स्थाने एकः शिलालेखः साम्प्रतमुपलभ्यते। अस्मादेव शिलालेखादिदं स्पष्टं भवति यत् "निरुमुक्कूडल्" इति स्थानेऽपि रूपावतारस्याध्यापनार्थमेकोऽध्यापकः १०६७ ख्रिष्टाब्दे नियुक्त आसीत्।[1] संकलनेन नीलकण्ठशास्त्रिमहोदया रूपावतारस्य रचनाकालं १०–१२ शतकमध्ये तथा काशिकायाः कालं ७०० ख्रिष्टाब्दसमीपे निर्धारयन्ति। अनेन विवेचनेन एम. रङ्गाचार्यमहोदयैर्निर्धारितो रूपावतारस्य काशिकायाश्च समयः (उपरिदर्शितप्रमाणविरुद्धत्वाद्) अनुपादेय एव प्रतिभाति।

रूपावतारस्य कालनिर्देशाद् नीलकण्ठशास्त्रिमतेन न्यासपदमञ्जर्योः प्रणयनमवश्यमेव दशमख्रिष्टाब्दात् पूर्ववर्ति भाव्यम्। यस्माच्च पदमञ्जर्यां न्यासस्य नामग्रहणं[2] तस्माद् न्यासकारो जिनेन्द्रबुद्धिः पदमञ्जरीकारात् पूर्ववर्ती।[3] अनेनैव कारणेन न्यासो-

---

१. K. A. NILAKANTHA SASTRI, *JOR*, Vol. iii, part iii, p. 278 : "Thus the Eṇṇāyiram inscription of the reign of Rajendra I (1012-1044) makes provision for feeding forty pupils who learn Rūpāvatāra: *Rūpāvatāram Ceṭpār nārpdinmar*, and for the maintenance of one teacher (*Rūpāvatāram Vakkāṇippān oruvaṇ*) on a salary of three *kuruṇis* of paddy per diem and one half of a *kalañju* of gold per annum. A simiar provision is made at Tribhuvanī for the maintenance of a teacher of Rūpāvatāra in a college in the reign of Rājādhirāja I. the successor of Rājendra I: *Rūpāvatāraṅ kėtpippān oruvanukku nel tūṇip-padakkum*, a wage twice as much as in the record cited above; the same inscription provided again for the feeding of thirty pupils studying this work : *Rūpāvataraṅkeṭpār muppadinmar*. It is worth mentioning that both these inscriptions state that there were other students and teachers in each of these colleges pursuing the study of advanced grammar (Vyākaraṇa). Yet another record dated A.D. 1067 gives details relating to a third educational institution at Tirumukkūḍal. Here both Vyākaraṇa Rūpāvatāra were taught by a single teacher who was paid a daily wage of one *tuṇi*, and ten *kāśus* apparently in that the popularity of Rūpāvatāra dates back at least to the eleventh century."

२. प. म. ४।१।२२: न्यासकारस्तु द्वौ बिस्तौ परिमाणमस्येति विगृह्णन् बिस्तं परिमाणं मन्यते।

३. F. KIELHORN, *JRAS*, 1908, pp. 499-502: अस्मिन् शोधपत्रे डॉ. किलहॉर्नमहोदयैः पदमञ्जर्याः प्रभावो न्यासोपरि स्वीकृतः। परं तत्र प्रमाणा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऽपि काशिकात उत्तरवर्ती इत्यत्र नास्ति कस्यापि शङ्कावसरः ।

उपर्युक्तविवेचनेदं स्पष्टं भवति यत् पाश्चात्यविद्वद्भिः खिष्टाब्दस्याष्टमशतकादारभ्य चतुर्दशशतकपर्यन्तं निर्णीतः समयो न बुद्ध्यारूढो भवति ।

मैक्समूलर[१]—विण्टरनिट्ज[२]—ए. बी. कीथ[३]—श्रीशचन्द्रचक्रवर्ति[४]—एम. कृष्णामाचारियर[५]-महाभागप्रभृतयः सर्वेऽपि विद्वांस इदं स्वीकुर्वन्ति यद् वामनजयादित्यावुभावपि काशिकायाः प्रणेतारौ स्तः, परन्तु तत्र जयादित्यापेक्षया वामन उत्तरवर्ती । परं केनापि विदुषा वामनस्य कालनिर्णये स्वकीयं मतं नैवोपदिष्टम् ।[६] श्रीशचन्द्रचक्रवर्तिमहाभागास्तु—इत्सिङ्ग्स्य भारतगमनादनन्तरमुपपञ्चाशेषु वर्षेषु वामनेन काशिकायाः स्वकीयो भागो लिखितः स्यादिति वदन्तोऽन्ततो गत्वा काशिकायाः कालः ६५० खिष्टाब्द इत्येव निर्धारयन्ति ।

काशिकावृत्तौ रामायण—महाभारत—नानार्थकोश—किरातार्जुनीयादिग्रन्थेभ्यरुदाहरणानि प्रदत्तानि वर्तन्ते । साम्प्रतं "प्रकाशनस्थेयाख्ययोश्च" (१।३।२३) इति सूत्रस्य वृत्तिभागे किरातार्जुनीयस्यैकस्य श्लोकस्य द्वितीयपाद उपलभ्यते । तथा हि—

भावात् प्रो. के. बी. पाठकमहाभागैस्तन्मतं महता प्रमाणेन परास्तम् । तत्कृते द्र.-K B. PATHAK, *JBBRAS*, Vol. 23. pp. 18-20; अपि च-"Jinendrabuddhi, Kaiyaṭa and Haradatta", *ABORI*, Vol. xii, part iii, pp. 249-250.

१. MAX MÜLLER, *IA*, Vol. ix, pp. 305-308.

२. M. WINTERNITZ, *History of Indian Literature*, Vol. iii, part ii, Tr. S. JHA, p. 433.

३. A. B. KEITH, A *History of Sanskrit Literature*, p. 429.

४. न्यासः (श्रीशचन्द्रचक्रवर्ती), भागः १, प्रस्तावना, पृ. १६-१७ ।

५. M. KRISHNAMACHARIAR, *A History of Classical Sanskrit Literature*, p. 155.

६. सर्वप्रथमित्सिङ्गलिखितभारतयात्रावर्णनस्य कसवारामहोदयैश्चीनीभाषात आङ्गलभाषयानुवादः कृतः । तदेवाधिकृत्य मैक्समूलरमहोदयैः काशिकाया रचनाकालो निर्धारितः । अन्येषां विदुषां निर्णयः प्राधान्येन जे. टाकाकसुकृताङ्गलभाषानुवादमधितिष्ठति । यद्यप्युभयोरपि अनुवादकयोः आङ्गलभाषानुवादे नास्ति कोऽपि जयादित्यविषयकस्थले महान् भेदस्तथापि भाषागतवाक्यविन्यासेऽवश्यं वैसादृश्यं दृश्यते । एतादृशं प्रतीयते यद् जे. टाकाकसुमहोदयैः स्वीयाङ्गलभाषानुवादसमये कसवारामहोदयकृताङ्गलभाषानुवादात् पूर्णं साहाय्यं गृहीतं वर्तते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"संशय्य कर्णादिषु तिष्ठते यः ॥"[1] इति ।
श्लोकोऽयं न्यासकारेण स्वकृतटीकायां पूर्णत्वेन निर्दिष्टः ।

एतदतिरिक्तं वयं काशिकायां "शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः" (४।३।८८) इत्यस्य वृत्तौ—"शब्दार्थसम्बन्धीयं प्रकरणम्, वाक्यपदीयम्" इत्युदाहरणं पश्यामः । प्रस्तुतमुदाहरणं शब्दार्थगुम्फितं ग्रन्थं सङ्केतयति । अत एतद् भर्तृहरिप्रणीत-वाक्यपदीयमेव लक्ष्यीकरोति, यतो हि भर्तृहरिणा स्वकीये ग्रन्थे पदवाक्यसम्बन्धिनः शब्दार्थस्यैव विवेचनं प्राधान्येन कृतं वर्तते ।

काशिकायां वाक्यपदीयस्य नामग्रहणात् के. बी.पाठक[2]-एस.के. वेलवलकर[3]—के. वी.अभ्यंकर[4]—विण्टरनिट्ज[5]—महाभागप्रभृतयो विद्वांसः काशिकावृत्तिं वाक्यपदी-यादुत्तरवर्तिनीं मन्यन्ते । परन्तु भर्तृहरिकालविषये इत्सिङ्गकृतोल्लेखमेव इमे प्रमाण-यन्ति । इतश्च, भर्तृहरिः ख्रिष्टाब्दस्य सप्तमशतके बभूव इत्येवंरूपेण इत्सिङ्गेन कृतं भर्तृहरेरुल्लेखं सर्वथा दोषपूर्णत्वेन मन्यमाना डॉ. सी. कुनहनराज[6]—

---

१. किरा. ३।१४:
जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तराया प्रमाथिनीनां विपदां पदानि ॥

२. K.B. PATHAK, *ABORI*, Vol. xii, part iii, pp. 247-248; Vol. xii, part iv, p. 389.

३. S. K. BELVALKAR, *Systems of Sanskrit Grammar*, footnote 2, p. 35.

४. K.V. ABHYANKAR, A *Dictionary of Sanskrit Grammar*, p. 269.

५. M. WINTERNITZ, *History of Indian Literature*, Vol. iii, part ii, Tr. S. JHA, p. 436.

६. C. KUNHANRAJA, "I-tsing and Bhartṛhari's Vākyapadīya" *Krishnaswami Aiyangar comm. Vol.*, 15th April, 1936, pp. 285-298: **अस्य शोधपत्रस्यायमभिप्रायः—इत्सिङ्गोल्लेखमनुसृत्य भर्तृहरिः ६४५ ख्रिष्टाब्दे स्वर्गलोकमगच्छत् । परन्तु अत्र इत्सिङ्गस्य भ्रान्तिः संभाव्यते यतो हि हरिस्वामिनोऽपि मृत्युकालः ६४५ ख्रिष्टाब्दोऽस्ति । तेन 'हरिः' इतिपदस्य सादृश्यहेतुना इत्सिङ्गेन हरिस्वामी एव भर्तृहरित्वेन निर्दिष्टोऽभ-विष्यत् । अपि च निरुक्तस्य महेश्वरटीकायां हरिस्वामिप्रणीतशतपथब्राह्मणटी-कायां च वाक्यपदीयस्य कारिकापाठः समुपलब्धः । द्वितीयं च, स्कन्दस्वामि-नोऽपि हरिस्वामिनामा कश्चित् शिष्य आसीत्, यः स्वसमयं ६३८ ख्रिष्टाब्द-मिति निर्दिशति। तेनैतदनुगम्यते यद् भर्तृहरिकालविषये इत्सिङ्गकृतोल्लेखो वाक्यपदीयकर्तारं भर्तृहरिं न विषयीकरोति ।**

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महोदयाः ५०० ख्रिष्टाब्दं, पण्डितयुधिष्ठिरमीमांसकमहोदयाः[1] ३४३ ख्रिष्टाब्दं (=४०० विक्रमाब्दं), प्रो. साधुराममहाभागाः[2] ३०० ख्रिष्टाब्दं भर्तृहरेः कालं मन्यन्ते। एवं स्थिते डॉ. एच. आर. रङ्गास्वामी आयङ्गारमहाभागाः[3] कथयन्ति यत् ख्रिष्टाब्दस्य पञ्चमशतकादूर्ध्वं भर्तृहरेः कालः कथमपि भवितुं नार्हति। तत्र कारणमेवं दृश्यते—मल्लवादिविरचितस्य न्यायचक्रनामकग्रन्थस्योपरि सिंहसूरिगणिविरचिता एका टीका समुपलभ्यते। अस्यां वसुरातो भर्तृहरेरुपाध्यायत्वेन निर्दिष्टः। सिंहसूरिगणेश्च कालः ६०० ख्रिष्टाब्दः। तस्माद् भर्तृहरिः ६०० ख्रिष्टाब्दात् पूर्ववर्ती। अपि च दिङ्नागप्रणीतप्रमाणसमुच्चयनामके ग्रन्थे (तिब्बतीयभाषायां) पञ्चमेऽध्याये 'अपोह' इति विवेचनावसरे यत् कारिकाद्वयं[4] वर्तते तस्य पाठो वाक्यपदीय[5] उपलभ्यते।

---

१. युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १, प्रथमसंस्करणम्, पृ. २६२: तथा हि वाक्यपदीयस्य रचना केनापि प्रकारेण ४०० विक्रमाब्दात् (=३४३ ख्रिष्टाब्दात्) उत्तरवर्तिनी नास्ति। अपि च द्र.—तत्रैव, पृ. २६५: वाक्यपदीयस्य रचना ४५० विक्रमाब्दादर्वाचीना नास्ति।

२. SADHU RAM, "Bhartṛhari's Date", *JGJRI*, Vol. ix, 1952 (issued in Nov. 1953), Parts 2-4, pp. 135-151. अस्मिन् शोधपत्रे धर्मकीर्ति-(प्रमाणवार्त्तिकस्य तट्टीकायाश्च कर्ता)-कुमारिल-पार्थसारथिमिश्र-समन्तभद्र-धर्मपाल-प्रभाकर-मल्लवादि-दिङ्नागादीनां कालनिर्देशपुरस्सरं भर्तृहरेः कालो निर्णीतः।

३. H. R. RANGASWAMI IYENGAR, "Bhartṛhari and Diṅnāga" *JBBRAS*, Vol. xxvi, pp, 147-149.

४. तस्मिन्नेव शोधपत्रे, पृ. १४८, टिप्पणभागे—(प्रमाणसमुच्चये):
Thigs—pa—daṅ. ni. tshogs. pa– yi
Chu. sogs. rnams la. rjod byed—ni।
grans daṅ tshad. daṅ dbyibs. rnams la
ltos. pa. me. d. par I jug. par. byed ॥
deyibs. daṅ. kha. dog. yan. log. rnams
knyad. par can. la gaṅ. I jug. p.
de. yi. yantag. la. sgra—in
rah tu. I jug. la. dun asma yin.

५. (संस्कृतभाषायां) वाक्यपदीये तु यथा :—
बिन्दौ च समुदाये च वाचकः सलिलादिषु।
संख्याप्रमाणसंस्थाननिरपेक्षः प्रवर्तते ॥ २।१५८.
संस्थानवर्णावयवैर्विशिष्टे यः प्रयुज्यते।
शब्दो न तस्यावयवे प्रवृत्तिरुपलभ्यते ॥ २।१५५

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा च दिङ्नागभर्तृहर्योः कोऽधमर्ण इति प्रश्ने समुपस्थिते प्रमाणसमुच्चयस्य विशालामलटीकाप्रमाणेन[1] भर्तृहरिरेवोत्तमर्ण इति निर्णीयते। अपि च प्रो. फौन्वालनरमहोदयमतेनापि दिङ्नागभर्तृहर्योर्दिङ्नाग एवोत्तरवर्ती। तेषां मतेन त्रैकाल्यपरीक्षानामकग्रन्थेऽपि वाक्यपदीयस्य काश्चन कारिका वरीवृत्यन्ते, तेन ते वसुरात-(भर्तृहरिगुरुः)-भर्तृहरि-दिङ्नागादीनां कालमधोलिखितरूपेण निर्धारयन्ति।

वसुरातः ४३०–४९० ख्रिष्टाब्दः।

भर्तृहरिः ४५०–५१० ख्रिष्टाब्दः।

दिङ्नागः ४८०–५४० ख्रिष्टाब्दः।

साम्प्रतमुपलभ्यमानप्रमाणाधारेणायमेव कालो भर्तृहरिविषये युक्तियुक्तो भातीति प्रो. के. ए. एस्. ऐयरमहोदयानां[2] मतम्।[3]

किरातार्जुनीयस्योल्लेखो महाराजाधिराजस्य पृथिवीकोङ्कणस्य दानपत्रे समुपलभ्यते।[4] तत्र दुर्विनीतः किरातार्जुनीयस्य पञ्चदशसर्गस्य (अथवा पञ्चदशसर्गाणां) टीकाकारत्वेन निर्दिष्टः। दुर्विनीतस्य राज्यकालः ५३९-५६९ विक्रमाब्दः (=४८२-५१२ ख्रिष्टाब्दः) निर्धारितः। पण्डितयुधिष्ठिरमीमांसकमहोदयैर्जयादित्यस्य जीवनकालः ४८२—६६१ ख्रिष्टाब्द इति निर्णीतम्।[5] तैर्दुर्विनीतस्य कालो जयादित्य-

---

(अत्र कारिकाद्वये प्रथमा कारिका वाक्यपदीयमुद्रितसंस्करणे (BORI, 1965) पूर्वापरविपर्ययरूपेण वर्तते।)

१. विशालामलटीका—Kha. cig. tu gtso. bor. cha tshas rnams la. jug. te 1 bha. rite. na. ris. yis smras. pa 1 cha. sogs. rnams la zes pai sog pai sgras. sa la. sogs pa. yoṅs su gzuṅ ṅo. 1 (भाषान्तरं यथा—"केचित्तु प्रधानमंशेषु वर्तते। भर्तृहरिणा उक्तं सलिलादिष्विति। आदिशब्देन पृथिव्यादीनां परिग्रहः") द्र.— H. R. RANGASWAMI IYENGAR, *JBBRAS*, Vol. xxvi, p. 149, footnote.

२. प्रो. फौन्वालनरमहोदयमतस्य कृते द्र.—K. A. S. AYER, *Bhartṛhari*, Chapter I, p, 2.

३. *Ibid*, p. 2 :
"This conclusion seems to be reasonable one in the present state of our knowledge, though it can not be looked upons as final."

४. सं. व्या. शा. इति., भाग : १, पृ. ३२८ : "श्रीमत्कोङ्कणमहाराजाधिराजस्याविनीतनाम्नः पुत्रेण शब्दावतारकारेण देवभारतीनिबद्धबृहत्कथेन किरातार्जुनीयपञ्चदशसर्गटीकाकारेण दुर्विनीतनामधेयेन··· ।"

५. सं. व्या. शा., इति., भाग : १, पृ. ३३३।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालस्य पूर्वसीमा, इत्सिङ्गकृतोल्लेखश्चोत्तरसीमा इति स्वीकृतम् । अपि च तेषां मतेन वामनस्य कालः ७०० विक्रमाब्दः (=६४३ ख्रिष्टाब्दः) वर्तते । अयं वामनोऽलङ्कारशास्त्रस्य प्रणेता नास्तीत्यपि तेषां मतम् ।[१]

डॉ. कीथ[२] महाभागैर्भारवेः समयः ५००-५५० ख्रिष्टाब्द इति स्वीकृतम् । प्रो. के. वी. पाठकमहोदयमतेन[३] भारवेः समयः ६३४ किंवा ५८० ख्रिष्टाब्द इति सन्दिग्धः । अन्ये च जना ऐहोलशिलालेखाधारेण भारविः ६३४ ख्रिष्टाब्दसमीपवर्तीति स्वीकुर्वन्ति ।[४]

काशिकायां "क्रीतात्करणपूर्वात्" (४।१।५०) इत्यस्य वृत्तौ 'सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी' इत्युदाहरणमुपलभ्यते । शब्दकौस्तुभे[५] भट्टोजिदीक्षितेन भट्टिकाव्यस्थमिदं पद्यमिति स्वीकृतम् । न्यासस्य सम्पादकाश्चक्रवर्तिमहोदया[६] अप्येवं वदन्ति यदिदं पद्यं माधवीयधातुवृत्तौ "डुक्रीञ्" इति धातौ भट्टिकाव्यस्थमिति निर्दिष्टं वर्तते । परन्तु धातुवृत्तौ केवलं श्लोक एत्र दृश्यते, न हि तत्र भट्टिकाव्यनाम्ना उल्लेखः । परं २।१।५५, ६।२।२ इत्येतयोः सूत्रयोः काशिकायामुद्धृतानां 'हंसगद्गदा, न्यग्रोधपरिमण्डला, दूर्वाकाण्डश्यामा' इत्याद्युदाहरणानां सम्बन्धोऽधोलिखितेन भट्टिकाव्योद्धृतश्लोकेन सह स्थापयितुं शक्यते । यथा—

योषिद्वृन्दारिका तस्य दयिता हंसगामिनी ।
दूर्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ।।[७]

चक्रवर्तिमहोदयैर्निर्दिष्टमिदं पद्यमुपरिनिर्दिष्टकाशिकागतोदाहरणैः सह साम्यं स्थापयति ।[८]

---

१. *Ibid*, pp. 333-334.
२. A. B. KEITH, *History of Sanskrit Literature*, p. 109.
३. K. B. PATHAK, *ABORI*, Vol. xii, part iii, pp. 247-248; part iv, p. 389.
४. C. HARIHARA SHASTRI, "Bhāravi and Daṇḍin", *IHQ*, Vol. xxvi, pp. 169-171.
   तुलना—M. WINTERNITZ, *History of Indian Literature*, Vol. iii, part i, Tr. S. JHA, pp. 70-71.
५. श. कौ. २।२।१६.
६. न्यासः (श्रीशचन्द्रचक्रवर्ती), भाग : १, प्रस्तावना, पृ. १७ ।
७. भट्टि. ५।१८.
८. **तुलना**— M. KRISHNAMACHARIAR, *History of Classical Sanskrit Literature*, p. 116.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा च यदि कदाचित् शब्दकौस्तुभानुसारेण 'सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी' इति पद्यं भट्टिकाव्यस्यैवावर्ततेत्यङ्गीकृतं स्यात् तर्हि तु काशिकारचनाकालो भट्टिकाव्यादुत्तरवर्ती भवितुमर्हति । भट्टिकाव्यस्य च समयः ६४१ ख्रिष्टाब्दादुत्तरवर्ती नास्तीति विदुषां मतम् ।[1]

अथ सुस्पष्टये भर्तृहरि-भारवि-भट्टिप्रभृतिग्रन्थकाराणामुपरिनिर्धारितकालोऽधस्तात् प्रस्तूयते—

(१) भर्तृहरिः ४५०-५१० ख्रिष्टाब्दः (वसुरात-दिङ्नागयोर्मध्ये) ।

(२) भारविः ४८२-६३४ ख्रिष्टाब्दः (पृथिवीकोङ्कणस्य दानपत्राधारेण, ऐहोलशिलालेखेन)

(३) भट्टिः ४९५-६४१ ख्रिष्टाब्दः (भट्टिकाव्ये नृपतिश्रीधरसेनोल्लेखस्याधारेण) ।

अनेन विस्तृतविवेचनेनावधार्यते यद् हर्षचरितोल्लिखितन्यासनामको ग्रन्थः कथमपि काशिकाया न्यासं न विषयीकरोति । साम्प्रतं काशिकायां ४५० ख्रिष्टाब्दात् ६४१ ख्रिष्टाब्दपर्यन्तलिखितानां ग्रन्थानां विवरणमुपलभ्यते । अस्यां परिस्थितौ न्यासकारो जिनेन्द्रबुद्धिः ६०० ख्रिष्टाब्दात् सर्वथा उत्तरवर्ती एव भवितुमर्हति । अनेनैव हेतुना आइ. एस. पावटेमहोदयकृतनिर्णयोऽपि स्वीकारानर्हः । रूपावताररचनाकालः १०-१२ ख्रिष्टाब्दशतकयोर्मध्ये वर्तत इति निर्धारितम् । अस्मिन् रूपावतारे हरदत्तजिनेन्द्रयोर्नामग्रहणात् पाश्चात्यविदुषां कैपलर-वर्नेल-वोथलिङ्कमहाभागप्रभृतीनां मतमपि चिन्त्यम्; यतो न्यासस्य रचनानन्तरं पदमञ्जरी प्रणयनेऽधिकसमस्यापेक्षा सुनिश्चिता । अत एव काशिकायां समुपलब्धग्रन्थानां सङ्केतद्वारेण काशिकाया रचनाकालः ५१०-६५० ख्रिष्टाब्दमध्ये प्रतीयते । अत्र च बहुषु सूत्रेषु वृत्तिपाठसाम्यात् सङ्कराच्चोभयोरपि काशिकाग्रन्थकारयोर्मध्ये तुलनया कः पूर्वं इति वक्तुं न पार्यते ।

---

१. A. B. KEITH, A *History of Sanskrit Literature*, p. 116.
तुलना—M. WINTERNITZ, *History of Indian Literature*, Vol. iii, part i, Tr. S. JHA, p. 79, footnote 1:
अत्रायं भावः—भट्टिकाव्यं वलभौ नृपतिश्रीधरसेनस्य शासनकाले लिखितमासीत् । परन्तु पुरा श्रीधरसेननामानश्चत्वारो नृपतय आसन् । तेषु प्रथमस्य कालः ४९५ ख्रिष्टाब्दः, अन्तिमस्य च ६४१ ख्रिष्टाब्दो वर्तते । तेन भट्टिः ६४१ ख्रिष्टाब्दात् पूर्ववर्तीति निश्चयः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(छ) वैयाकरणसिद्धान्तकौमुदीतः पूर्वं प्रक्रियाग्रन्थानां स्थितिः

परिवर्तमानेऽस्मिन् संसारे पठनपाठनादिक्रमेऽपि परिवर्तनं नास्वाभाविकम्। इतिहासाद् एतदधिगम्यते यदनया दिशा काले काले बहूनि परिवर्तनानि संजातानि। पुरा अध्ययनादिक्रमो मौखिक आसीत्। गुरुमुखात् श्रुत्वैव शिष्या विविधविषयेषु पारङ्गता भवन्ति स्म। आसीच्च तदा पुस्तकानामभावः। गच्छति काले भूर्जादिपत्रेषु लेखनार्थं यत्न आस्थितः। एवं च ख्रिष्टाब्दस्य द्वितीयशतकात् प्राग् व्याकरणाध्ययनानन्तरं वेदाध्ययनस्य परम्परासीत्, सेयं परम्परा पतञ्जलिकालात्पूर्वमेव परिवृत्तिमवाप्ता।[1]

ख्रिष्टाब्दस्य सहस्रेभ्योऽप्यधिकवर्षपर्यन्तं पाणिनीयव्याकरणस्याध्ययनमध्यापनञ्चाष्टाध्यायीक्रमेणैवाजायत। चीनयात्रिणा इत्सिङ्गेनापि भारतयात्रावर्णनानुबन्धेन इदमेव निवेदितम्।[2] संस्कृतजगति अष्टाध्यायीपठनानन्तरमेव तदा सर्वे विषयाः पाठ्या भवन्ति स्म।

एतेन प्रमाणेनेदं सिध्यति यदित्सिङ्गस्य भारतागमनवेलायां व्याकरणशास्त्रस्याष्टाध्यायीक्रमेणैवाध्ययनस्य पद्धतिरासीत्। परमुत्तरवर्तिनि काल इयं पद्धतिः परिवृत्तिमवाप्ता। किमत्र कारणम्, तदधुना विभावयामः।

अष्टाध्यायीक्रमेण शब्दशास्त्रस्य ज्ञानाय महानायासः कर्तव्यो भवति। संपूर्णमष्टाध्यायीमधीत्यैव कोऽपि—रामः, रामेण, रामाय इत्यादीनां प्रयोगाणां साधने सक्षमो भवति। यतो ह्यत्र रूपसिद्धौ "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (१।२।४५), कृत्तद्धितसमासाश्च" (१।२।४६), "स्वौजसमौट्"—(४।१।२), "ससजुषो रुः"

---

१. म. भा. (किलहॉर्नसंस्करणम्), भाग : १, पृ. ५:
"पुरा कल्प एतदासीत्। संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्तत्र स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते। तदद्यत्वे न तथा। वेदमधीत्य त्वरिता वक्तारो भवन्ति। वेदान्तो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः। अनर्थकं व्याकरणमिति।"

२. ITSING, A *Record of the Buddhist Religion*-, Tr. J. TAKAKUSU, p. 175:
"If men of China go to India for study they have first of all to learn this (grammatical) work, then other subjects, if not, their labour will be thrown away."

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(८।२।६६), "खरवसानयोर्विसर्जनीयः" (८।३।१५) इत्यादीनां पृथक् पृथगध्याय-भाजामनेकेषां सूत्राणामनिवार्यत्वेनोपस्थितिरपेक्ष्यते । वर्तते चाष्टाध्याय्यां सूत्राणां बाहुल्यम् । तत्रापि तत्तत्सूत्रेषु स्वल्पाक्षरैरेव शब्दैरतिगूढतमा भावाः सन्निवेशिताः पाणिनिना । अतः सरलरीत्या स्वल्पेन कालेन च व्याकरणज्ञानमिच्छतां पाठकानामष्टाध्यायीक्रमेण व्याकरणाध्ययनं बहुक्लेशकरं भवति स्म । तेन अध्येतारः पाणिनीय-व्याकरणाध्ययनात् पराजयन्ते स्म । अतः सौकर्येणाध्ययनज्ञानाय परम्परागतपद्धति-स्थकाठिन्यदूरीकरणायैव प्रक्रियाक्रमस्य (कौमुदीक्रमस्य) जनिर्जाता ।

यद्यपि व्याकरणान्तरेषु कातन्त्रस्य प्रक्रियाकमे प्रथमं स्थानं[1] तथापि पाणिनीय-व्याकरणपरम्परायां बुद्धधर्मावलम्बिना धर्मकीर्तिना रूपावतारनामकः प्रक्रियाग्रन्थः प्रथमो विरचितः । अस्य ग्रन्थस्य कः काल इत्यस्मिन् विषये मया काशिकाकालनिर्णया-वसर एव बहु चर्चितम्, तत्तत्रैवानुसन्धेयम् ।

ग्रन्थोऽयं भागद्वये विभक्तः—पूर्वार्धम्, उत्तरार्धं च । पूर्वार्धे संज्ञावतारः, सन्ध्यवतारः, विभक्त्यवतारः, अव्ययावतारः, स्त्रीप्रत्ययावतारः, कारकावतारः, समासा-वतारः, तद्धितावतारश्चेत्यादीनि प्रकरणानि विराजन्ते । उत्तरार्धे तु केवलं धातुप्रत्यय-पञ्चिकामात्रम् । अस्मिन् ग्रन्थे २६६४ पाणिनिसूत्राणि प्रक्रियाक्रमेण व्याख्यातानि ।[2] अत्र ग्रन्थकारः काशिकास्थमेव सूत्रपाठस्वरूपमनुसरति । प्रतिप्रकरणं प्रारम्भे स कञ्चन प्रश्नमुपस्थाप्यान्ते प्रश्नस्य समाधानार्थं प्रकरणमारभते ।[3] अनेनैव हेतुनास्य ग्रन्थस्य रूपा-वतार इति नामान्वर्थकरं भवति । प्रक्रियाक्रमानुसारिण्यस्मिन् ग्रन्थे बहूनि वैशिष्ट्यानि वर्तन्ते । उदाहरणार्थं धातुप्रत्ययपञ्चिकायां लकारादिक्रमः स्वीकृतः, तदधीनश्च गणक्रमः । अनेन प्रकारेण प्रतिलकारचर्चावसरमेक एव धातुः पुनः पुनः पठ्यते । इयं प्रक्रिया प्रथमतया सरला प्रतिभाति; यतो ह्यस्यां पद्धतौ लकारादिक्रमेण सर्वेषां धातूनां रूपाण्येकत्रैवोपलभ्यन्ते । परञ्चानेन प्रतिलकारचर्चावसरं पुनः पुनर्धातुप्रत्यावर्तनेनैका हानिरपि समभवत् । अस्यां पद्धतौ पाठको गणक्रमेण कमपि धातुं पूर्णतया नाध्येति । अतोऽत्र ग्रन्थे सर्वप्रकारेण सारल्यं नैव वर्तते ।

विचार्यमाणे तु रूपावतारस्थक्रमेऽपि सारल्यमस्त्येव । प्रक्रियाक्रमस्य सरली-करणमभिप्रेत्यात्र प्रथमं सार्वधातुकसंज्ञका लकारा गृहीताः, तदन्ते चार्धधातुकसंज्ञकाः । चतुर्णां सार्वधातुकलकाराणां पाङ्क्तपठनेन पाठकः संस्कृतभाषायां वार्तालापं कर्तुं

---

१. S. K. BALI, "An Introduction to Siddhāntakaumudī", *PAIOC* (Summaries), 25th Session, p. 418.

२. द्र.—आद्याप्रसादमिश्रः, प्र. कौ. वि., पृ. १३ ।

३. इतोऽप्यधिकाऽस्य विषयस्य चर्चा सिद्धान्तकौमुदीसूत्रार्थप्रतिपादनप्रसङ्गे द्रष्टव्या ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्नोति। प्रायेण वार्तालापसाधवः सर्वे प्रयोगाश्चतुर्णां सार्वधातुकलकाराणां चर्चायामेव व्युत्पादिता वर्तन्ते।[1] सार्वधातुकप्रकरणापेक्षया आर्धधातुकप्रकरणं किञ्चिद् विस्तरतरम्। अस्य प्रकरणस्यावसान एव सन्नन्त—यङन्त—यङ्लुगन्त—हेतुमण्णिजन्तादिप्रकरणानामवतारः। प्रक्रियासाधनाय आवश्यकानां सूत्राणां ग्रन्थकारस्तत्र तत्र व्याख्यानं काशिकावृत्तिमनुसृत्य करोति। अस्य ग्रन्थस्य उत्तरवर्तिग्रन्थेषु कः प्रभाव इति सूत्राणां समालोचनाप्रसङ्गेऽग्रे वक्ष्यामः।

सायणस्य धातुवृत्तौ, "दैवम्" इति ग्रन्थोपरि लीलाशुकमुनिभिर्विरचिते पुरुषकारव्याख्याने च प्रक्रियारत्नाभिधस्य व्याकरणग्रन्थस्योल्लेखो वर्तते। अतो युधिष्ठिरमीमांसकैरयं[2] प्रक्रियाग्रन्थ इति स्वीकृतम्। कोऽस्य कर्ता कस्मिन् काले प्रदेशे चायं ग्रन्थत्वेनावतीर्ण इत्यादिकं सर्वमेव संशयारूढम्। पुरुषकारव्याख्याने प्रक्रियारत्नस्य नामनिर्देशादस्य कालो वि. सं. १३०० (=१२४३) तः पूर्वं एव भवितुमर्हतीत्येव केवलं वक्तुं शक्यते। नातः परं वयमस्मिन् विषये किमपि जानीमः।

विमलसरस्वतिपण्डितेन खिष्टाब्दस्य पञ्चदशशतके रूपमालानामकस्य पाणिनीयप्रक्रियाग्रन्थस्य रचना कृता। साम्प्रतं ग्रन्थोऽयं वाराणसीतो श्रीमुरलीधरमिश्रमहोदयैः सम्पादितः प्रकाशितश्च, परं तत्र वर्तन्ते बहवो दोषाः। अस्यैको हस्तलेखः पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यासंशोधनमन्दिरे,[3] द्वितीयश्च कलिकातास्थराजकीयसंस्कृतमहाविद्यालये[4] वर्तते। हस्तलेखद्वयेऽपि यथाक्रमं वि. सं. १५०७ (=१४५० खिष्टाब्दः), वि. सं. १४९३ (=१४३६ खिष्टाब्दः) लेखनकालः।[5] अतः के. पी. त्रिवेदिमहोदयैः प्रक्रियाकौमुदीसमकालिकोऽयं ग्रन्थ इति स्वीकृतम्।

यद्यपि प्रक्रियाकौमुद्यां सिद्धान्तकौमुद्यां च रचनापद्धतिरस्माद् ग्रन्थाद् भिन्नैव वर्तते तथापि प्रक्रियापम्परायामग्रगामित्वादुपयोगित्वाच्चास्य ग्रन्थस्य महत्त्वपूर्णं स्थानम्। अस्मिन् ग्रन्थे प्रकरणक्रमस्तु एवं वर्तते; यथा हि—संज्ञामाला, स्वरसन्धिः, प्रकृतिभावः, व्यञ्जनसन्धिः, विसर्गसन्धिः, अजन्तमाला, हलन्तमाला, सर्वनाममाला, संख्याभागः, नियतलिङ्गमाला, छान्दस्यमाला, स्त्रीप्रत्ययमाला, कारकभागः, सार्वधातुकमाला,

---

१. सत्यकाम वर्मा, "पाणिनीय व्याकरण के प्रक्रियाकार", गु. प., अप्रैल-मई १९७०, पृ. ४१६।

२. युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १. प्रथमसंस्करणम्, पृ. ३८०।

३. द्र.—A *Descriptive Catalogue of Mss.*, Vol. ii, Grammar Part i (Vedic and Pāṇinīya), *BORI*, 1938, p. 71 (Ms No. 88)
तुलना—प्र. कौ. (के. पी. त्रिवेदी), भागः १, प्रस्तावना, पृ. ३०: अत्र—अयं हस्तलेखः डेक्कनकालेजपुस्तकालये वर्तत इत्युक्तम्।

४-५. द्र.—प्र. कौ., भागः १, प्रस्तावना, पृ. ३०।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावकर्मप्रक्रिया, नियतभागः, कृतः, तद्धिताः, समासाश्च ।[1] अस्मिन् ग्रन्थे न सन्ति सर्वाणि पाणिनीयसूत्राणि ।[2]

उपरिनिर्दिष्टैः रूपावतार-प्रक्रियारत्न-रूपमालादिग्रन्थैः संस्कृतव्याकरणशास्त्रे प्रक्रियापरम्पराया बीजनिर्वापणं कृतम् । अनेन बीजनिर्वापणेनास्मिन् शास्त्रे रूपसिद्धिदृष्ट्या आमूलपरिवर्तनं संजातम् । अनेनैव हेतुना च रूपावतारोऽस्यां परम्परायां मूलग्रन्थो बीजग्रन्थो वेति प्रसिद्धिं भेजे । तदुत्तरवर्तिनि काल इयं प्रक्रियापरम्परा प्रक्रियाकौमुदीग्रन्थेन पुष्पिता बभूव । परं प्रक्रियाकौमुद्याः पुष्पोद्भवानन्तरं प्राचीनानां रूपावतारादिग्रन्थानां महत्त्वं क्षीणतां प्राप्तम् । अथ कोऽस्य प्रक्रियाकौमुदीग्रन्थस्य कर्ता, कश्च तस्य कालः, किं च तत्र प्रयोजनमित्यधिकृत्य किञ्चित्प्रस्तूयते ।

ग्रन्थोऽयं शेषवंशावतंसेन रामचन्द्रेण प्रणीतः । अस्मिन् ग्रन्थे कुत्रापि ग्रन्थकारेण रचनाकालस्योल्लेखो नैव कृतः । अस्योपरि प्रसादनाम्नी टीका ग्रन्थकारपौत्रेणैव विरचिता । परं तेनापि स्वकीयं समयनिर्देशादिकं न प्रकटीकृतम् । पुण्यपत्तनस्थ-डेक्कन-कालेजपुस्तकालये प्रक्रियाप्रसादटीकाया एको हस्तलेखः संप्राप्यते । अत्र लिपिकालः संवत् १५८३ (=१५२६ ख्रिष्टाब्दः) इत्युट्टङ्कितः ।[3]

१५६० तमे संवत्सरे लिखितः प्रक्रियाकौमुदीप्रसादस्यैको हस्तलेखो बड़ौदास्थ-केन्द्रीयपुस्तकालये समुपलभ्यते ।[4] ततोऽपि प्राचीनतरोऽस्याष्टीकाया हस्तलेखो लन्दन-स्थइण्डियाआफिसपुस्तकालये विद्यते । तस्य संवत् १५३६ (=१४७९ ख्रिष्टाब्दः)

---

१. *Ibid*, पृ. ३१ ।

२. युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १, प्रथमसंस्करणम्, पृ. ३८० ।

३. "इति श्रीरामचन्द्रविरचितायां प्रक्रियाकौमुद्यां सुबन्तं समाप्तम् । श्रीः । श्रीः । श्रीः । स्वस्ति श्रीसंवत् १५८३ वर्षे शाके १४४८ प्रवर्तमाने भाद्रपदमासे शुक्लपक्षे त्रयोदश्यां शुभं भवतु । कल्याणमस्तु ।" इति ।
अस्य लेखस्याधारेण डॉ. भाण्डारकरमहोदया रामचन्द्रस्य समयं ख्रिष्टाब्दस्य पञ्चदशशतकमिति निर्धारयन्ति । द्र.—प्र. कौ., भागः १, प्रस्तावना, पृ. ४४:—
"If the great grandson of Rāmacandra lived in A. D. 1527 (=Saṁvat 1583, Śaka 1448), Rāmacandra [must have lived about 1450 A. D."

४. युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १. पृ. ३८१ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रचनाकालः ।[1]

अनेन प्रमाणेन ज्ञायते यद् विट्ठलेन १५३६ विक्रमसंवत्सरात् प्रागेव प्रसादटीका विरचिता । युधिष्ठिरमीमांसकमहोदया[2] रामचन्द्रस्य कालं संवत् १४८० (=१४२३ ख्रिष्टाब्दः) इति स्वीकुर्वन्ति । परं हेमाद्रिप्रणीत रघुवंशटीकायां प्रक्रियाकौमुद्याः प्रक्रियाप्रसादस्य च नामदर्शनात् के. पी. त्रिवेदिमहोदया रामचन्द्रः ख्रिष्टाब्दस्य चतुर्दशशतके वभूवेति निर्धारयन्ति ।[3] प्रो. सरस्वतीप्रसादचतुर्वेदिमहोदयमतेऽपि रामचन्द्रस्य १३४० ख्रिष्टाब्द एव समयः ।[4]

प्रक्रियाकौमुदीकार आन्ध्रदेशवास्तव्यः शेषवंशीयः कौण्डिन्यगोत्रोद्भवो ब्राह्मण आसीत् । वंशोऽयं पुराकालतो व्याकरणशास्त्रे लब्धप्रतिष्ठो वभूव । प्रसादटीकाकारो विट्ठला रामचन्द्रं शेषस्य, पाणिनेः, वररुचेः, शिवस्य वा अवतारं मनुते । एतेषां कुलं परमपावनमास्तिकं विष्णुभक्तं चासीत् । वेदान्तसिद्धान्तसंस्थापनेऽप्ययं वंशो ख्यातिमप्तवान् । अस्मिन्कुले सञ्जाता आचार्या व्याकरणशास्त्रे मीमासायां न्यायशास्त्रे च विश्रुता आसन् । श्रीगोपालाचार्याः कृष्णाचार्याश्च प्रक्रियाकौमुदीकृतां गुरवः । अस्मिन् शेषान्वये यस्य वृत्तमुपलभ्यत एतादृशः सर्वप्रथमः श्री अनन्ताचार्यो बभूव । तस्य नृसिंहनामा पुत्रोऽभवत् । तस्य च द्वौ पुत्रौ आस्ताम् ।[5] तयोर्ज्येष्ठो गोपालाचार्यः, कनिष्ठश्च कृष्णाचार्यः । कृष्णाचार्यस्यापि पुत्रद्वयमासीत् । तत्र ज्यायान् नृसिंहाचार्यः, कनीयान् रामचन्द्रः । अयमेव रामचन्द्रः प्रक्रियाकौमुदीकर्ता । एतत्सर्वं विट्ठलेन

---

१. *Ibid*, पृ. ३८१:
"सं. १५३६ वर्षे मावघदि एकादशी रवौ श्रीमदानन्दपुरस्थानोत्तमे आभ्यन्तरनगरजातीयपण्डितअनन्तसुतपण्डितनारायणादीनां पठनार्थं कुठारीव्यवगाहितसुतेन विश्वरूपेण लिखितम् ।"

२. अत्र युधिष्ठिरमीमांसकाः श्रीकृष्णविरचितायाः प्रक्रियाकौमुदीवृत्तेरेकं हस्तलेखं प्रदर्शयन्ति । अस्य हस्तलेखस्य लिपिकालः सं. १५१४ निर्दिष्टः । परमयं कालो न निर्दुष्टः । अस्मिन् विषयेऽधिकं भट्टोजिदीक्षितस्य कालनिर्णयावसरे द्रष्टव्यम् ।

३. द्र.—प्र. कौ., भागः १., प्रस्तावना, पृ. ४५

४. S. P. CHATURVEDI, "History of An Important Historical word in the Pāṇinian School of Grammar", *PAIOC*, 1935, p. 742.

५. सं. व्या. शा. इति., भागः १, पृ. २९५:—
"गोपालाचार्यमुख्या प्रथितगुणगणास्तस्य पुत्रा अभूवन्" इति प्रसादटीकाकारोल्लेखमधिकृत्य युधिष्ठिरमीमांसकमहोदया एवं वदन्ति यदस्मिन् श्लोके 'पुत्राः' इति बहुवचनेनैवं ज्ञायते यद् नृसिंहस्य न्यूनातिन्यूनं त्रयः पुत्रा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसादटीकायामुपन्यस्तम् ।[१] प्रक्रियाकौमुदीकृता "कालनिर्णयदीपिका", "वैष्णवसिद्धान्त-दीपिका" इत्यपि ग्रन्थद्वयं प्रणीतम् । प्रक्रियाकौमुदीकारमधिकृत्य विट्ठलेन प्रसादटी-कान्ते विशदो वंशवृक्षः प्रदत्तः ।

सत्स्वपि नैकेषु पूर्ववर्तिषु ग्रन्थेषु प्रक्रियाकौमुदीप्रणयने श्रीरामचन्द्राचार्याणां किं प्रयोजनमासीत् तदधुना विचार्यते ।

पाणिनिपरम्परायां खिष्टाब्दस्य दशमशतकद्वादशशतकयोर्मध्ये रूपावतारः सर्वप्रथमः प्रक्रियाग्रन्थः । परमयं ग्रन्थो न सर्वथा निर्दुष्टः । अत्रापि काश्चन त्रुटयो वर्तन्ते । एतदेव संलक्ष्य नारायणभट्टेनोक्तम्—"वृत्तौ चारु न रूपसिद्धिकथना रूपावतारे पुनः"[२] इति । अतो बहुदोषभागयं ग्रन्थः सर्वजनाभिमतो लब्धप्रतिष्ठश्च नैवाजायत । तदनन्तरमस्यां दिशि रूपमाला इति नामकोऽन्यो ग्रन्थोऽतीव संक्षिप्तो बभूव । प्रक्रियाज्ञापने सर्वथा असमर्थोऽयं ग्रन्थः स्वल्पप्रचार एव बभूव । अतः शाब्दी-प्रक्रियायाः सुखेन परिज्ञानाय छात्राणां कृते नूतनग्रन्थस्यावश्यकता आसीत् । अतो जिज्ञासूनां छात्राणां कृते आचार्यरामचन्द्रेण व्याकरणार्णवतरणिरूपः प्रक्रियाकौमुदी-ग्रन्थो व्यरचि । तथा चोक्तं विट्ठलेन—

"यथा कौमुदी सुखरूपा सती सकलानर्थानभिव्यनक्त्येवमियं सुखं जनयन्ती स्वल्पैरेव शब्दैः सकलान् शब्दानाञ्जस्येन प्रकाशयति । अन्ये हि ग्रन्था महान्तोऽतिगह-नाश्च तैः सहसा शब्दा न प्रकाश्यन्त इत्यवान्तरप्रयोजनमस्याः"[३] इति ।

अयं ग्रन्थो भागद्वयेविभक्तः—पूर्वार्धः, उत्तरार्धश्चेति । तत्र पूर्वार्धप्रकरणे सुवन्त-प्रक्रिया । तज्ज्ञानाय क्रमेण संज्ञाः, सन्धयः, स्वादयः, स्त्रीप्रत्ययाः, विभक्त्यर्थाः, समासाः, तद्धितप्रत्ययाश्च निरूपिताः । उत्तरार्धे तु तिङन्तप्रक्रिया; तत्र प्रथमं भ्वाद्यदादयो दशगणाः, अनन्तरं ण्यन्त-सन्नत-यङन्त-यङ्लुगन्तादिप्रक्रियाः । धातुभ्यो विहिततया कृत्प्रत्यया अपि उत्तरार्ध एव संगृहीताः । अन्ते च केषाञ्चिद् वैदिक-प्रयोगाणामपि साधुत्वं निर्दिष्टम् । अस्मिन् ग्रन्थे ग्रन्थकारस्य ग्रन्थसंक्षेप एव

आसन् । तेषु प्रथमो गोपालाचार्य आसीत् । परं प्रसादकारो विट्ठलो ग्रन्थान्ते (श्रीविट्ठलाचार्यगुरोस्तनूजं सौजन्यभाजं जितवादिराजम् । अनन्तसंज्ञं पदवा-क्यविज्ञं प्रमाणविज्ञं तमहं नमामि ।। प्रसादटीका, अन्तिमे भागे, श्लोकः ११) कमपि विट्ठलाचार्यगुरोस्तनूजमनन्तसंज्ञं प्रणमति । अनेनाधारेण नृसिंहस्य द्वितीयपुत्रो विट्ठल-स्तथा च कनिष्ठपुत्रः कृष्णाचार्य आसीद् इति वक्तुं शक्यते ।

१. द्र.—प्रसादटीका (प्र. कौ.), भागः २, पृ. ७९५-७९८ ।

२. प्र. स., श्लोकः ५, पृ. २ (त्रावणकोर, १९३१) ।

३. द्र.—प्रसादटीका (प्र. कौ.), भागः १, पृ. ११ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रधानं लक्ष्यम् । अतो ह्यत्र "नादिन्याक्रोशे पुत्रस्य" (८।४।४८), "त्रिप्रभृतिषु शाकटायनस्य" (८।४।५०), "सर्वत्र शाकल्यस्य" (८।४।५१), "उञि च पदे" (८।३।२१), "एकः पूर्वपरयोः" (६।१।८४), "स्त्रियाम्" (४।१।३), "सर्वत्र लोहितादिकतन्तेभ्यः" (४।१।१८), "कौरव्यमाण्डूकाभ्यां च" (४।१।१९), "संख्या-व्ययादेर्ङीप्" (३।१।२६), "दिक्पूर्वपदान्ङीप्" (४।१।६०), "वाह्वान्तात् संज्ञा-याम्" (४।१।६७), "संज्ञायाम्" ४।१।७२), "आवट्याच्च" (४।१।७५), "कारके" (१।४।२३), "अव्ययीभावः" (२।१।५), "अनभिहिते" (२।१।३), "अङ्गस्य" (६।४।१), "तत्पुरुषः" (२।१।२२), "लिङ् चोर्ध्वमौहूर्तिके" (३।३।१६४), "नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः" (३।३।१३५), "भविष्यति मर्यादावचनेऽवर-स्मिन्" (३।३।१३६), "कालविभागे चानहोरात्राणाम्" (३।३।१३७), "परस्मिन् विभाषा" (३।३।१३८) इत्यादीनि बहूनि सूत्राणि परित्यक्तानि । अमुं विषयमधिकृत्य स्वयमाचार्या ग्रन्थान्ते निवेदयन्ति—

आनन्त्यात् सर्वशब्दा हि न शक्यन्तेऽनुशासितुम् ।
बालव्युत्पत्तयेऽस्माभिः संक्षिप्योक्ता यथामति ॥[1] इति ।

अतः संक्षेपप्रधानेऽस्मिन् ग्रन्थे आदितोऽन्तपर्यन्तं १५२६ सूत्राणि परित्यज्य २४७० सूत्राण्येव ग्रन्थकारेण व्याख्यातानि ।[2] अस्य ग्रन्थस्य सूत्रपाठस्वरूपे व्याख्याने च काशिकाया रूपावतारस्य चातितरां प्रभावः । अस्मिन् ग्रन्थेऽपाणिनीयानां वोपदेवा-दिवैयाकरणानामपि प्रभावो वर्तते ।[3]

(ज) भट्टोजिदीक्षितस्य कालनिर्णयः

भट्टोजिदीक्षितस्य कालनिर्धारणविषये विद्वांसः पृथक् पृथग् मतमनुसरन्ति । प्रथमतो भट्टोजिदीक्षितस्य को गुरु इति विषये भिन्नानि मतानि सन्ति । अस्य प्रश्नस्यानिश्चितिरेव कालनिर्णयविषयकसंदेहस्य मूलभूतं कारणम् । वाइ. महालिङ्ग-शास्त्रिमहोदयमतेन अप्पयदीक्षितो भट्टोजिदीक्षितस्य गुरुरासीत् । शिवानन्दयोगीन्द्र-

---

१. प्र. कौ., भागः २, पृ. ७९४ ।
२. आद्याप्रसादमिश्रः, प्र. कौ. वि., पृ. २४; अपि च प्रक्रियाकौमुद्यामव्याख्या-तानां सूत्राणां कृते तत्रैव तृतीये परिशिष्टे १४९-१५५ पृष्ठानि द्रष्टव्यानि ।
३. प्रक्रियाकौमुद्यामपाणिनीयप्रयोगाणां प्रभावस्य कृते कानिचिद् उदाहरणानि प्र. कौ. वि. चतुर्थेऽध्याये द्रष्टुं शक्यानि ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाम्ना संन्यासिना अप्पयदीक्षितेन्द्रविजयनामके ग्रन्थेऽप्पयदीक्षितस्य जन्मकालनिर्देशः कृतः।[१] तस्मादिदं ज्ञायते यद् अप्पयदीक्षितः ४६५४ कलौ (=१५५३ ख्रिष्टाब्दे) जनिमापन्नः। शिवानन्दयोगीन्द्रेणायमेवार्थोऽप्पयदीक्षितप्रणीतस्य आत्मार्पणस्तुति-ग्रन्थस्य टीकायां निरूपितः। परं नीलकण्ठविरचिते शिवलीलार्णवेऽप्पयदीक्षितस्य कालविषयेऽन्यदेव मतमनुसृतम्। तत्र अप्पयदीक्षित आयुषो द्वासप्तति (७२) प्राप्य शतं प्रबन्धांश्चक्रे[२] इति निर्देशः। अप्पयदीक्षितश्च चिन्नतिम्म-चिन्नवोम्म-वेङ्कटपतिदेवादिराजेभ्यो लब्धाश्रयः पण्डित आसीत्। एतेषां त्रयाणामपि राज्ञां प्रशासनकालः १५४२ ख्रिष्टाब्दवर्षमारभ्य १५९३ वर्षपर्यन्तं वर्तते। यदा च अप्पयदीक्षितो द्वासप्ततिवर्षमवाप्तः, तदा वेङ्कटपतिदेवोऽप्पयदीक्षितस्यान्तिम आश्रयदाता बभूव। अस्य वेङ्कटपतिदेवस्य शासनसमये भट्टोजिदीक्षितो वाराणसीतः समागत्य अप्पयदीक्षिताद् विद्यामुपासितवान्। वेङ्कटपतिदेवस्य निर्देशो भट्टोजिदीक्षितेन तत्त्वकौस्तुभाख्ये ग्रन्थे[३] कृतो वर्तते। तद्वदेव भट्टोजिदीक्षितेन तन्त्रसिद्धान्तदीपिकायामप्पयदीक्षितस्य वन्दनं कृतं विद्यते।[४] अतश्च स (अप्पयदीक्षितः) भट्टोजिदीक्षितस्य गुरु इति ज्ञायते। एतत्सर्वं विचार्य महालिङ्गशास्त्रिणोऽप्पयदीक्षितस्य कालं १५२० तः १५९३

---

१. Y. M. Sastri, "Appayya Dīkṣita's Age", *JOR* (Madras), Vol. ii, parts iii-iv, p. 225:

वीणातत्त्वज्ञसंख्यालसितकलिसमाभाक् प्रमातीचवर्षे,
कन्यामासेऽथ कृष्णप्रथमतिथियुतेऽप्युत्तरप्रोष्ठपाद्भे।
कन्यालग्नेऽद्रिकन्यापतिरमितदयाशेवधिर्वैदिकेषु,
श्रीदेव्यै प्राग्यथोक्तं समजनि हि समीपेऽत्र काञ्चीनगर्याम्॥

चतुर्थचरणस्त्वेवं प्रकारेणापि वर्तते—

श्रीदेव्यै प्राग्यथाह स्म समजनि विरञ्चीशपुर्यां कलेशः॥१॥
लग्ने रवीन्द्रसुतर्योमकरे च मान्दौ मीने शशिन्यथ वृषे रविजे च भानौ।
चापे गुरौ क्षितिसुते मिथुने तुलायां शुक्रे शिखिन्यलिगते शुभलग्न एवम्॥२॥

२. *Ibid*, पृ. २२७:—

कालेन शम्भुः किल तावतापि कलाश्चतुष्षष्टिमिताः प्रणिन्ये।
द्वासप्तीतं प्राप्य समाः प्रबन्धान् शतं व्यधादप्पयदीक्षितेन्द्रः॥

३. द्र.—युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १, प्रथमसंस्करणम्, पृ. ३५२; ३५६।

४. Y. M. Sastri, *JOR* (Madras), Vol. ii, parts iii-iv, p. 233:

अप्पयदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ख्रिष्टाब्दपर्यन्तं निर्धारयन्ति। परं प्रो. पी. वी. काणेमहोदया[1] महालिङ्गशास्त्रिणामिदं मतं नोररीकुर्वन्ति। त एवं प्रतिपादयन्ति यद् अप्पयदीक्षितस्य नाम्न उल्लेखं कुर्वाणः[2] कदाचिद् अप्पयदीक्षितस्योत्तरकाले उत्कीर्णं स्यात्: तद्वदेव शिवानन्दयोगीन्द्रप्रदत्तमप्पयदीक्षितस्य जन्मपत्रमुत्तरवर्तिकाले विलिखितं भवेत्। अतो महालिङ्गशास्त्रिभिः कृतोऽप्पयदीक्षितस्य कालनिर्णयः केवलशिलालेखनामाधिष्ठितः संशीतिं भजते। अतः शास्त्रिभिः प्रतिपादितमप्पयदीक्षितस्य कालनिर्णयमननुमन्वानाः प्रो. काणेमहाभागाः १५५४ तः १६२६ ख्रिष्टाब्दपर्यन्तमप्पयदीक्षितस्य समयं स्वीकुर्वन्ति। तत्र प्रो. काणेमहोदयाः हुल्त्जमहोदयप्रदत्तशिलालेखानां विवरणं समधिकृत्यैवं कथयन्ति यद् अप्पयदीक्षितस्य पितामह आचार्यदीक्षित 'आच्चान्' इत्यपरनामधेय आसीत्, पिता च रङ्गराजाध्वरिः। अन्यच्च, चिन्नबोम्मेन अप्पयदीक्षितो ग्रन्थलेखनार्थं प्रेरित इति सर्वत्र विश्रुतम्। अयं चिन्नबोम्मश्चिन्नवीरस्य पुत्रो लिङ्गमनायकस्य च पिता आसीत्। एतादृशं विवरणं विलापाकदानपत्रे दृश्यते। विलापाकदानपत्रलेखनकालः १५२३ शकाब्दो वर्तते। वेल्लोरवास्तव्यस्य चिन्नबोम्मस्य शिलालेखाः १४७१ शकशतकमारभ्य १४८८ शकशतकपर्यन्तं समुत्कीर्णाः। यश्च वेङ्कटपतिदेवोऽप्पयदीक्षितं कुवलयानन्दरचनार्थं संप्रेरितवान् स हि प्रथमो वेङ्कटदेवः। तदनुबन्धेन प्रवृत्ताः शिलालेखाः १५०८ शकशतकमारभ्य १५७५ शकशतकपर्यन्तं (=१५८६-१६१३ ख्रिष्टाब्दपर्यन्तं) वर्तन्ते। एतत्सर्वं विमृश्य प्रो. काणेमहाभागा अप्पयदीक्षितस्य कालं १५५४ तः १६२६ ख्रिष्टाब्दपर्यन्तं निर्धारयन्ति। परं डॉ. राघवन्महोदयाः[3] "अप्पयनामनस्त्रयो जना एकस्मिन्नेव वंशे पृथक् पृथक् कालवर्तिन आसन्" इति प्रत्यपीपदन्। इदं विवेचनमप्पयदीक्षितस्य कालं संशयपदवीमारोहयति। एन. अय्यास्वामिशास्त्रिणोऽपि[4] इदमेवानुमन्वते। तेषां मतेन तन्त्रसिद्धान्तदीपिकायाः प्रणेता नासीद् भट्टोजिदीक्षितः, अपि तु तृतीयोऽप्पयदीक्षितः। तृतीयोऽप्पयदीक्षितो नीलकण्ठदीक्षितस्य कनिष्ठो भ्राता, द्वितीयस्य अप्पयदीक्षितस्य च दत्तकपुत्र आसीत्।

---

१. P. V. KANE, *History of Sanskrit Poetics*, 1961, pp. 319-320,

२. **शिलालेखविषये विस्तरेण द्र.-** Y. M. SASTRI, *JOR* (Madras), Vol. ii, parts iii-iv, pp. 225-237.

३. V. RAGHAVAN, "Appayya Dīkṣitas ii and iii", *PAIOC* (Tirupati, x session), pp. 176-180.

तुलना- P. V. KANE, *History of Sanskrit Poetics*, p. 321.

४. N. A. SASTRI, "(Appayya iii and his Mīmāṁsā work) *Tantrasiddhāntadīpikā*", *JOR* (Madras), 1928, Vol. ii., pp. 247-250.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतत्सर्वमप्पयदीक्षितस्य कालनिर्णये महत्प्रयूहं जनयति। अत एव एतेषां कतमोऽप्पयदीक्षितो भट्टोजिदीक्षितस्य गुरु आसीद् इति निश्चेतुं न किमपि प्रबलं प्रमाणमुत्पश्यामः।

भट्टोजिदीक्षितस्य कालं निर्धारयितुं श्रीयुधिष्ठिरमीमांसकमहोदया[1] हस्तलेखस्य प्रमाणं पुरतः स्थापयन्ति। त एवं प्रतिपादयन्ति यद् विट्ठलप्रणीतस्य प्रक्रियाकौमुदीप्रसादस्य (प्रक्रियाकौमुदीटीकायाः) प्राचीनतमो हस्तलेखो लन्दनस्थ-भारतकार्यालयपुस्तकालये विद्यते। अस्योपरि १५३६ विक्रमाब्दो (=१४७९ ख्रिष्टाब्दो) लिपिकालो वर्तते। विट्ठलेन व्याकरणस्याध्ययनं श्रीशेषकृष्णस्य (प्रक्रियाकौमुदीप्रकाशटीकाकर्तुः) पुत्राद् वीरेश्वराभिधानाद् (=रामेश्वरात्) कृतमासीत्।[2] श्रीशेषकृष्णप्रणीतायाः प्रक्रियाकौमुदीटीकाया एको हस्तलेखः पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यासंशोधनमन्दिरे समुपलभ्यते। अस्योपरि लिपिकालत्वेन १५१४ विक्रमाब्दो (=१४९७ ख्रिष्टाब्दो)[3] निर्दिष्टः। अनेन प्रकाशटीकायाः प्रसादटीकायाश्चोपलब्धहस्तलेखद्वयसहकारेण (१४७९-१४५७ ख्रिष्टाब्दः) इदं कथयितुं शक्यते यत् श्रीशेषकृष्णस्य मृत्युः १५२५ विक्रमाब्दे (=१४६८ ख्रिष्टाब्दे) वा ततः पूर्वमभूत्। अन्यच्च, भट्टोजिदीक्षितप्रणीतशब्दकौस्तुभे[4] पण्डितराजजगन्नाथप्रणीतमनोरमाकुचमर्दनग्रन्थे[5] च प्रक्रियाप्रकाशकर्तुः भट्टोजिदीक्षितस्य गुरुरिति निर्देशाद् एतद् ज्ञायते यत् प्रौढमनोरमायाः कर्ता भट्टोजिदीक्षितः श्रीशेषकृष्णस्य शिष्य आसीत्। तस्माद् वयमनुमिनुमो यद् भट्टोजिदीक्षितस्य जीवनकालः प्रायः १५१० तः १५७५ विक्रमाब्दपर्यन्तं (=१४५३ तः १५१८ ख्रिष्टाब्दपर्यन्तं) स्यात्।

भट्टोजिदीक्षितस्य कालं निर्धारयितुं युधिष्ठिरमीमांसकमहोदयनिर्धारितोऽप्पयदीक्षितस्य समयोऽपि उपस्कारको भवेद् इति मन्ये। युधिष्ठिरमीमांसकमहोदयमतेन

---

१. द्र.- सं. व्या शा. इति., भागः १, पृ. ३५२-३५३।

२. द्र- प्र. कौ. (प्रसादटीकोपेता), भागः २, पृ. ७९८, श्लोकः १०: "तमर्भकं कृष्णगुरोर्नमामि रामेश्वराचार्यगुरुं गुणाब्धिम्।"

३. अयं लिपिकालो युधिष्ठिरमीमांसकसंमतः।
तुलना- *List of Mss*, BORI, Poona, 1925, p. 12, Ms No. 328.

४. द्र.- सं. व्या. शा. इति., भागः १, टिप्पणम् २, पृ. ३५२:—
तदेतत् सकलमभिधाय प्रक्रियाप्रकाशे गुरुचरणैरुक्तम्।

५. प्रौ. म. कुच., पृ. १:—
शेषवंशावतंसानां श्रीकृष्णाख्यपण्डितानां चिरायार्चितयोः पादुकयोः प्रसादादासादितशब्दानुशासनास्तेषु च पारमेश्वरपदं प्रयातेषु··· प्रक्रियाप्रकाशमाशयानवबोधनिबन्धनैर्दूषणैः स्वयं निर्मितायां मनोरमायामाकुल्यकार्षुः...।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भट्टोजिदीक्षितस्तत्त्वकौस्तुभेऽप्पयदीक्षितं स्तौति, यस्य कालः १५३० तः १६०२ विक्रमाब्दान्तवर्ती (=१४७३-१५४५ ख्रि.) इत्येवं स्वीकृतः। यस्माच्च भट्टोजिदीक्षितोऽप्पयदीक्षितस्य शिष्यस्तस्मात् तस्य कालः १५१० तः १५७५ विक्रमाब्दपर्यन्तं (=१४५३ तः १५१८ ख्रिष्टाब्दपर्यन्तं) भवितुमर्हतीति श्रीयुधिष्ठिरमीमांसकमहाभागमतम्।[1]

एतेन युधिष्ठिरमीमांसकमहाभागकृतनिर्देशेनेदं सुस्पष्टं यद् भट्टोजिदीक्षितस्य जन्म तस्य गुरोरप्पयदीक्षितस्य जन्मनोऽपेक्षया उपविशानि वर्षाणि पूर्ववर्ति। यदा च भट्टोजिदीक्षितेन अप्पयदीक्षिताद् विद्या समुपलब्धा तदा तु भट्टोजिदीक्षितस्यायुः ४० वर्षाणां ५० वर्षाणां वा संभवेत्; अप्पयदीक्षितस्य च विंशतिः त्रिंशद् वर्षाणां वा संभविष्यति। परमेतादृशं मतमन्योपोद्वलकप्रमाणैः विना ग्राह्यं न भवति।

अन्यच्च श्रीयुधिष्ठिरमीमांसकमहोदयैः सङ्केतितः प्रकाशटीकाहस्तलेखस्य लिपिकालः पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यामन्दिरे १९२५ ख्रिष्टाब्दे प्रकाशितं हस्तलेखसूचीपत्रमनुसृत्य वर्तते।[2] परं तत्सूचीपत्रं साम्प्रतं १९३८ ख्रिष्टाब्दे प्रकाशितहस्तलेखसूचीपत्रापेक्षया दोषपूर्णम्। अस्मिन् नवीनहस्तलेखसूचीपत्रे युधिष्ठिरमीमांसकद्वारानिर्दिष्टप्रक्रियाप्रकाशहस्तलेखस्य लिपिकालो १७१४ संवत् (=१६५७ ख्रिष्टाब्दः) वर्तते।[3] १९२५ ख्रिष्टाब्दे प्रकाशिते हस्तलेखसूचीपत्रे तु अस्य हस्तलेखस्य १५१४ संवत् (=१४५७ ख्रिष्टाब्दः) लिपिकाल इति निर्दिष्टम्। परं पूर्वकालप्रकाशितलेखसूचीपत्रापेक्षया उत्तरवर्तिकालप्रकाशितसूचीपत्रं संस्कृतं संशोधितवस्वरूपं च वर्तते; अतस्तदेव प्रमाणीकर्तव्यं भवति। एतेनैव प्रमाणेन प्रकाशटीकाकर्तुः श्रीशेषकृष्णस्य मृत्युः १५२५ विक्रमाब्दसमीपे (=१४६८ ख्रिष्टाब्दसमीपे) अभूदिति मतमप्यकिंचित्करमेवाभाति।

अपि च यदि श्रीशेषकृष्ण एव भट्टोजिदीक्षितस्य गुरुरिति स्वीक्रियेत तर्हि शोधकर्तॄणां स्वीयाः ग्रन्थाः पूर्वापरविद्धत्वाद् हेया भवेयुः। तथा हि पण्डितयुधिष्ठिरमीमांसकमहोदयाः प्रथमं भट्टोजिदीक्षितं श्रीशेषकृष्णपुत्रस्य रामेश्वरस्य (वीरेश्वरस्य) शिष्यं मन्वानाः[4] अग्रे पुनः श्रीशेषकृष्णस्यैव भट्टोजिदीक्षितः शिष्य इति प्रतिपादयन्ति[5] तथैव प्रो. पी. वी. काणेमहोदयाः प्रथमं भट्टोजिदीक्षितिः श्रीशेषकृष्णस्यान्ते-

---

१. द्र.- सं. व्या. शा. इति., भागः १, पृ. ३५६।

२. द्र.- *List of Mss.*, BORI, 1925, p. 12, Ms. No. 328.

३. द्र - *Descriptive Catalogue of Mss.*, BORI, Vol. ii, part i. 1938, Ms. No. 113 $\left(\frac{328}{1895\text{-}1902}\right)$.

४. द्र- सं. व्या. शा. इति., भागः १, पृ. २९४।

५. *Ibid*, पृ ३५२-३५३.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वासीत्युक्त्वा[1] अनन्तरं तदग्रपृष्ठे—भट्टोजिदीक्षितः श्रीशेषकृष्णपुत्रवीरेश्वरस्य शिष्य इति प्रतिपादयन्ति। यतो हि तत्र मानचित्रद्वये परस्परं विरोधो वर्तते। 'अ' मानचित्रे भट्टोजिदीक्षितः श्रीशेषकृष्णस्य शिष्यो 'ब' मानचित्रे च स एव श्रीशेषकृष्णपुत्रवीरेश्वरस्य शिष्यः प्रदर्शितः।[2] वाराणसीवास्तव्यं शेषवंशं वर्णयन्तो विशाखापट्टमवास्तव्या आर्यवरगुरुरित्युपाधिभाज एस. पी. वी. रङ्गनाथस्वामिमहाभागाः[3] पेरुभट्ट-जगन्नाथ-भट्टोजिदीक्षिता-न्नभट्टादीन् श्रीशेषकृष्णपुत्रवीरेश्वरस्य शिष्यत्वेनाङ्गीकुर्वन्ति। परमेतन्मतं श्रीनारायणशास्त्रिपेण्डसे—सत्यव्रतशास्त्रिमहाभागादयो[4] नानुमन्यन्ते। ते हि भट्टोजिदीक्षितं श्रीशेषकृष्णस्यैव शिष्यत्वेन स्वीकुर्वन्ति।

यद्यपि भट्टोजिदीक्षितः श्रीशेषकृष्णपुत्रवीरेश्वरस्य (रामेश्वरस्य) शिष्योऽस्तीत्यत्र नास्ति किमपि प्रबलं प्रमाणं तथापि नैकेषां विदुषामुपरिनिर्दिष्टानि मतान्यस्मिन् विषयेऽवश्यं शङ्कां जनयन्ति। तेनास्मिन् विषये दार्ढ्येन किमपि वक्तुं न पार्यते।

अन्यदप्यस्याः शङ्कायाः कारणं भवितुमर्हति। पण्डितराजजगन्नाथः श्रीशेषकृष्णपुत्रवीरेश्वरं (रामेश्वरं) गुरुत्वेन स्वीकरोति।[5] स च पण्डितराजः ख्रिष्टाब्दस्य सप्तदशशतकपूर्वार्धे दिल्लीपतेः शाहजहाँनृपतेः सभापण्डित आसीत्।[6] एवमेव प्रक्रियाकौमुदीप्रसादटीकाप्रणेता विट्ठलोऽपि स्वकीये ग्रन्थान्ते—"तमर्भकं कृष्णगुरोर्नमामि रामेश्वराचार्यगुरुं गुणाब्धिम्"[7] इत्यनेन श्रीशेकृष्णपुत्ररामेश्वरं (वीरेश्वरं) निजगुरुत्वेन प्रणमति। यदि वयं श्रीयुधिष्ठिरमीमांसकमहोदयानां मतं स्वीकुर्मो यत् प्रसादटीकायाः १५३६ विक्रमाब्दे (=१४७९ ख्रिष्टाब्दे) लिखित एको हस्तलेखो लन्दनस्थ-भारतकार्यालयपुस्तकालये वरीवर्ति, तर्हि विषमा स्थितिः संजायते; यतः प्रसादटीकाकर्ता जगन्नाथश्च समकालीनौ भवतः। परं शाहजहाँनृपतिः १६८५ विक्रमाब्दे (=१६२८ ख्रिष्टाब्दे) राजपदवीमलङ्करोति स्म, यस्य राज्यपरिषदि पण्डितराजजगन्नाथः सभापण्डित आसीत्; तत्समकालीन एव प्रसादटीकाकर्ता भवितुमर्हति। परं यदि

---

१. P. V. KANE, *History of Sanskrit Poetics*, 1961. p. 324.

२. *Ibid*, p. 325.

३. S. P. V. RANGANATHSVAMI (Aryavarguru of Vizagapatam), "On the Seshas of Benares", *IA*, Vol. 41, pp. 245-253.

४. द्र.- वैयाकरणभूषणसारः (भैमीभाष्योपेतः), दिल्ली १९६९, भूमिकाभागे प्रस्तुतं मानचित्रम्, पृ. ४।

५. प्रौ. म. कुच., पृ. १: "अस्मद्गुरुवीरेश्वरपण्डितानां तनयैर्दूषितापि स्वमति-परीक्षार्थं पुनरस्माभिरपि निरीक्ष्यते।"

६. द्र.- सं. व्या. शा. इति, भागः १, पृ. ३५४-३५५।

७. प्र. कौ. (प्रसादटीकोपेता), भागः २, श्लोकः १०, पृ. ७९८।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसादटीकाया हस्तलेखो यदि १४७९ ख्रिष्टाब्दे लिखितः स्यात्, तर्हि विट्ठलस्य शाहजहाँनृपतेश्च कालविषये १५० वर्षाणां व्यवधानं भविष्यति । परमस्य १५० वर्षाणां व्यवधानस्य स्पष्टीकरणे श्रीयुधिष्ठिरमीमांसकाः सर्वथा असमर्थाः । यदि विट्ठलाचार्यः पण्डितराजजगन्नाथश्च उभावप्येकस्यैव गुरोः शिष्यावास्ताम्, तर्हि विट्ठलेन प्रसादटीका १४७९ ख्रिष्टाब्दे लिखितेति सर्वथाऽसंभाव्यमेव ।

किं च, यदि भट्टोजिदीक्षितप्रणीतशब्दकौस्तुभे स्मृतः प्रक्रियाप्रकाशकारस्तथा च पण्डितराजजगन्नाथविरचितप्रौढमनोरमाकुचमर्दने स्मृतः कृष्णपण्डित एक एवासीत्, तर्हि उपरिनिर्दिष्टप्रसादटीकाया हस्तलेखः कृष्णपण्डितं पञ्चदशशतकमध्यात् पूर्वकाले स्थापयन् न प्रामाण्यपदवीमारोहति; यतः ख्रिष्टाब्दस्य सप्तदशशतकस्य प्रथमचरणे विद्यमानात् पण्डितराजजगन्नाथात् तस्य (पण्डितराजस्य) गुरोः शेषवीरेश्वराच्च पूर्वः श्रीशेषकृष्णस्य जीवनकाल इति मन्तव्यम् । तथापि श्रीशेषकृष्णः षोडशशतकख्रिष्टाब्दे निःसंशयमेवासीद् इति स कथमपि पञ्चदशशतकमध्यात्पूर्ववर्ती भवितुं नार्हति ।

डॉ. सालेटोरमतेन[1] १५७५-१६२५ ख्रिष्टाब्दमध्यवर्ती, श्रीरायवहादुरवाम्बर्डेकरमतेन[2] १५७०-१६३५ ख्रिष्टाब्दमध्यवर्ती, डॉ. एस. के. वेलवलकरमतेन[3] १६३० ख्रिष्टाब्दसमीपवर्ती, प्रो. एस. पी. चतुर्वेदिमतेन[4] १६०० ख्रिष्टाब्दः, प्रो. पी. वी. काणेमतेन[5] १५८०-१६३० ख्रिष्टाब्दमध्यवर्ती, ए. बी. कीथमतेन[6] १७०० ख्रिष्टाब्दः,

---

१. द्र - P. K. Gode, "A New Approach to the Date of Bhaṭṭoji-dīkṣita", *ASVORI* (Tirupati), 1940, Vol. i, part ii, footnote 1, p. 116.

२. रायवहादुर वासुदेव अनन्त बाम्बर्डेकर, भट्टोजिदीक्षित ज्ञातिविवेक, मुम्बई, १९३९, पृ. ३४९ ।

३. S. K. Belvalkar, *Systems of Sanskrit Grammar*, pp. 46-47.

४. S. P. Chaturvedi, "History of an Important Historical Word-", *PAIOC*, viii session, 1935, p. 742.

५. P. V. Kane, *History of Sanskrit Poetics*, p. 324. अपि च प्रो. काणेमहाभागमतेन भट्टोजिदीक्षितस्य कालविषये नास्ति कोऽपि निश्चितो मानदण्डः; यतो हि ते १५७५-१६५०; १५६०-१६२०; १६२० ख्रिष्टाब्दमिति सन्दिग्धतया पृथक् पृथग् रूपेण तस्य कालं निर्धारयन्ति । द्र.— *History of Dharmaśāstra*, Vol. i, pp. 716; 517; 454.

६. A. B. Keith, *History of Sanskrit Literature*, footnote 4, p. 430.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एम. विण्टरनिट्जमतेन[1] च १६२५ ख्रिष्टाब्दो भट्टोजिदीक्षितस्य कालः ।

परं प्रो. पी.के. गोडेमहोदयैर्भट्टोजिदीक्षितप्रणीतग्रन्थानां हस्तलेखानां लिपिकालं समधिकृत्य भट्टोजिदीक्षितस्य कालो महता प्रबन्धेन निर्धारितः ।[2] तेषां मतेन भट्टोजिदीक्षितगुरुश्चरणैर्नृसिंहाश्रममहोदयैः पुरुषोत्तमपुरस्थाने १५४७ ख्रिष्टाब्दे तत्त्वविवेकनामा ग्रन्थः प्रणीत आसीत् । अस्य ग्रन्थस्य द्वितीयहस्तलेखस्य लिपिकालः १५५८ ख्रिष्टाब्दो वर्तते । तेऽस्मिन् विषये लिखन्ति यत् डॉ. दासगुप्तमतानुसारेण नृसिंहाश्रमस्य १५०० ख्रिष्टाब्दसमीपवर्ती कालः । अपि च नृसिंहाश्रमप्रणीततत्त्वविवेकग्रन्थोपरि भट्टोजिदीक्षितशिष्येन नीलकण्ठशुक्लाभिधानेन शब्दशोभानाम्नी टीका विरचितासीत् ।[3] तस्या हस्तलेखस्य लिपिकालः १६३७ ख्रिष्टाब्द उपलभ्यते । अतो भट्टोजिदीक्षितस्य समयः १५००-१६३७ ख्रिष्टाब्दमध्ये वरीवर्त्ति । भट्टोजिदीक्षितप्रणीतग्रन्थानामुपलभ्यमाना हस्तलेखलिपिकाला अमुमेवार्थं पुष्णन्ति । बङ्गस्थरायलएशियाटिकसोसाइटी इत्यस्यां संस्थायां भट्टोजिदीक्षितप्रणीतशब्दकौस्तुभस्य एको हस्तलेखो वर्तते । अस्योपरि १६३३ ख्रिष्टाब्दो लिपिकालः । भट्टोजिदीक्षितप्रणीतग्रन्थानामितोऽपि प्राचीनतराः केचन हस्तलेखाः पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यासंशोधनमन्दिरे समुपलभ्यन्ते । तेषु केचन प्रमाणस्वरूपेणात्र प्रदर्श्यन्ते ।

---

१. M. WINTERNITZ, *History of Indian Literature*, Vol. iii, part ii, Tr. S. JHA, p. 435.

२. P. K. GODE, *ASVORI*, Vol. i, part ii, pp. 117-127.

३. द्र.- *Ibid*, footnote, p. 122 :

शुक्लजनार्दनपुत्रो वछाचार्यस्य दौहित्रः ।
अभ्यस्तशब्दशास्त्रो भट्टोजिदीक्षितछात्रः ॥१॥
महसि प्राप्तनिजजन्मा कविनीतशर्मा निर्मितमेनम् ।
विनिर्ममे शैवः ॥२॥
यद्यपि खल बह लोची नदृषाक्लेशस्तदप्येषः ।
तुष्यतु तदेव तेजो विलसति यस्य प्रसादोऽयम् ॥३॥
त्रिनवषडेकमब्देतिक्रान्ते विक्रमादित्यात् ।
शिवरात्रौ शिवपदयोर्निजकृतिराधायि नीलकण्ठेन ॥इति श्रीनीलकण्ठकविकल्पिता शब्दशोभा समाप्तिमगात् । श्रीः ॥ संवत् १७३६ वर्षे भाद्रपदवदि ७ इन्दुवारे लिखितं कृष्णदासेन । गुर्जर गोडवाली इत्यादिः ॥ (अत्र 'त्रिनवषडेकम्" इत्यनेन १६९३ विक्रमाब्दः=१६३७ ख्रिटाब्दो बोध्यते ।)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(१) प्रौढमनोरमा,[1] हस्तलेखसङ्ख्या १३०; $\frac{६७१}{१८८३-८४,}$ लिपिकालः सम्वत् १७१३ (=१६५६ ख्रिष्टाब्दः)।

(२) प्रौढमनोरमा,[2] हस्तलेखसङ्ख्या १३२; $\frac{३३१}{१८९५-१९०२,}$ लिपिकालः संवत् १७०९ (=१६५२ ख्रिष्टाब्दः)।

(३) वैयाकरणसिद्धान्तकौमुदी,[3] हस्तलेखसङ्ख्या १२२; $\frac{३६}{१९०७-१५,}$ लिपिकालः संवत् १७२७ (=१६७० ख्रिष्टाब्दः)।

किं चास्माभिस्तत्र भट्टोजिदीक्षितप्रणीतस्य आचारकाण्डनामकग्रन्थस्यापि एको हस्तलेखः समुपलब्धः। यस्य १६४८ विक्रमाब्दः (=१५९१ ख्रिष्टाब्दः) लिपिकालो वर्तते।[4]

एतेन तत्त्वविवेक-शब्दशोभा-ग्रन्थद्वयहस्तलेखप्रमाणेन भट्टोजिदीक्षितप्रणीतग्रन्थानामुपलभ्यमानहस्तलेखानां साक्ष्येन च प्रो. पी. के. गोडेमहोदयाः १५४७-१६३७ ख्रिष्टाब्दमध्ये भट्टोजिदीक्षितस्य कालं मन्यन्ते। परं तैरेवान्यस्मिन् स्वकीये शोधपत्रे[5] तस्य (भट्टोजिदीक्षितस्य) कालः १५६० तः १६२० ख्रिष्टाब्दपर्यन्तं स्वीकृतः।

---

१. प्रो. गोडेमहाभागैः स्वशोधपत्रस्य १२१ पृष्ठस्य टिप्पणेऽस्य हस्तलेखस्य संख्या $\frac{६५७}{१८८३-८४}$ निर्दिष्टा। सा मुद्रणदोषयुक्ता। परं १९३८ ख्रिष्टाब्दे पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यासंशोधनमन्दिरे प्रकाशितहस्तलेखसूचीपत्रस्य द्वितीयभागस्य प्रथमखण्डानुसारेण हस्तलेखसंख्या $\frac{६७१}{१८८३-८४}$ इति स्वीकरणीया।

२. प्रो. गोडेमहोदयैः १२१ पृष्ठस्थटिप्पणेऽस्य कालः संवत् १७०८ निर्दिष्टः। परं १९३८ ख्रिष्टाब्दस्य सूचीपत्रानुसारेणात्र संवत् १७०९ लिपिकालो विभावनीयः।

३. प्रो. गोडेमहोदयैः स्वशोधपत्रस्य १२७ पृष्ठेऽस्य हस्तलेखस्य लिपिकालः १५७१ ख्रिष्टाब्दः (=१६२८-२७ संवत्) लिखितः। स अनुचितः। अत्र स्थाने संवत् १७२७ (=१६७०-७१ ख्रिष्टाब्दः) इत्यावश्यकम्। तुलनार्थं तत्रैव १२१ पृष्ठस्थटिप्पणं द्रष्टव्यम्।

४. *List of Mss.*, BORI, 1925, p. 36, Ms. No. $\frac{66}{1899\text{-}1915}$

५. P. K. Gode, "Varadarāja, A Pupil of Bhaṭṭojidīkṣita", *P.V. Kane felicitation Vol.* (=*A Volume of studies in Indology*, Poona, 1941), p. 188.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतदतिरिक्तं वाराणसीस्थसरस्वतीभवनग्रन्थालयस्य हस्तलेखसूचीपत्रेऽपि भट्टोजिदीक्षितविरचितानां केषाञ्चिद् ग्रन्थानां हस्तलेखानां लिपिकाल उपरिनिर्दिष्ट-कालापेक्षया पूर्ववर्ती। परमस्योल्लेखः प्रो. गोडेमहोदयैः स्वशोधपत्रे न कृतः। सुस्पष्टयेऽधस्तात् केचन हस्तलेखा लिपिकालपुरस्सरं प्रस्तूयन्ते।

(१) मासतिथिनिर्णयः[१], हस्तलेखसङ्ख्या १३८६५, लिपिकालः १६१२ विक्रमाब्दः (=१५५५ ख्रिष्टाब्दः)।

(२) वैयाकरणसिद्धान्तकौमुदी[२], हस्तलेखसङ्ख्या ३८५६०, लिपिकालः १५०३ शकाब्दः (=१५८१ ख्रिष्टाब्दः)।

(३) तिथिनिर्णयः,[३] हस्तलेखसङ्ख्या १२४५६, लिपिकालः १६६१ विक्र-माब्दः (=१६३४ ख्रिष्टाब्दः)।

(४) वैयाकरणसिद्धान्तकौमुदी,[४] हस्तलेखसङ्ख्या ४०१६३, लिपिकालः १६६१ विक्रमाब्दः (=१६३४ ख्रिष्टाब्दः)।

एतेषूपरिनिर्दिष्टहस्तलेखेषु यदि मासतिथिनिर्णयस्य लिपिकालः समुचितः स्यात्, तर्हि भट्टोजिदीक्षितस्य जन्मापि १५५५ ख्रिष्टाब्दाद् न्यूनातिन्यूनं विंशतिवर्षपूर्वं भवितुमर्हति। तथा च स्वीकृते एतादृशे न प्रतीयते कापि विप्रतिपत्तिः।[५]

अत एव श्रीशेषकृष्ण-नृसिंहाश्रमा-प्पयदीक्षितादिकालविषयमविचार्यापि भट्टो-जिदीक्षितप्रणीतग्रन्थोपलब्धहस्तलेखलिपिकालप्रमाणेन भट्टोजिदीक्षितस्य कालः १५३५ ख्रिष्टाब्दतः प्रारभ्य १७०० ख्रिष्टाब्दस्य प्रथमचरणपर्यन्तं (=१६२५ ख्रिष्टाब्दपर्यन्तं) भवितुमर्हतीति निर्गलितोऽर्थः।

---

१. द्र.- *A Descriptive Catalogue of Sanskrit Mss. Govt. Sanskrit College Library Banaras*, Vol. iii (1956), p. 196.
२. *Ibid*, हस्तलेखसूचीपत्रभागः १०, पृ. ६२ (१९६४)।
३. *Ibid*, हस्तलेखसूचीपत्रभागः ३, पृ. ६४ (१९५६)।
४. *Ibid*, हस्तलेखसूचीपत्रभागः १०, पृ. २१६ (१९६४)।
५. सरस्वतीभवनग्रन्थालयस्थहस्तलेखेषु वर्तन्ते केचन अप्रामाणिका अप्युल्लेखाः। हस्तलेखसूचीपत्रस्य तृतीयभागे (१९५६ प्रकाशिते) १६० पृष्ठे भट्टोजिदीक्षि-तप्रणीतचतुर्विंशतिमतव्याख्यानामकग्रन्थस्य (हस्तलेखसङ्ख्या १३४८८) लिपि-कालः ११५९ शकाब्दः (=१२३७ ख्रिष्टाब्दः) उपलभ्यते। सर्वथा दुष्टोऽयं काल इत्येवाहं मन्ये। तथैव हस्तलेखसूचीपत्रस्य दशमभागे (१९६४ प्रकाशिते) २२६ पृष्ठे लघुशब्देन्दुशेखरग्रन्थस्य (हस्तलेखसङ्ख्या ४०३०४) कर्ता भट्टोजिदीक्षितः प्रदर्शितो यो हि कथमपि स्वीकर्तुं न युज्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीयं प्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(क) काशिकावृत्तेः शैली

यस्य वाग्विन्यासो विषयप्रतिपादनपद्धतिश्चोभावपि रुचिरौ भवतः स एव ग्रन्थः प्रशंसार्हो भवति। इयमुक्तिर्महाभाष्यविषये काशिकावृत्तिविषये च पूर्णतया चरितार्था। महाभाष्यस्य प्रवचनपद्धतिः सुगमा सरला च विद्यते। तस्मिन् पाण्डित्यप्रचुरायाः समासभूयिष्ठायाश्च पद्धतेरभावः। वर्तन्ते च महाभाष्ये लघूनि लघुतमानि च वाक्यानि येषां साहाय्येन ग्रन्थकारः क्लिष्टमपि विषयं सुगमं करोति। यथा महाभाष्ये तथैव काशिकायामपि सरलः सुबोधश्च वाग्विन्यासः। परं यथा महाभाष्ये बहुषु स्थलेषु रुचिरसंवादमयतरङ्गानुबन्धिभिस्तरङ्गैश्चकितचकितः पाठको महाभाष्यपरिज्ञाने भ्रान्तो भवति न तथा काशिकायाम्। काशिकायां विस्तृतगद्यमयसंवादा न विद्यन्ते। तस्माद् ग्रन्थतात्पर्यपरिज्ञाने पाठकेन सौकर्यमनुभूयते। महाभाष्यविषये आचार्यभर्तृहरिरिदमेव द्रढयन् वदति—

अलब्धगाधे गाम्भीर्याद् उत्तान इव सौष्ठवात्।
तस्मिन्नकृतबुद्धीनां नैवावस्थितनिश्चयः[1] ॥इति।

द्वितीयं च, महाभाष्यस्य भाषा जीवन्ती सुलभा सुगमा संवादमयी व्यवहारक्षमा च वर्तते। एतादृशी भाषा प्रायः काशिकावृत्तौ नोपलभ्यते।

यद्यपि महाभाष्यस्य भाषा सरला सुगमा च तथापि क्लिष्टानां व्याकरण-दर्शनस्य सिद्धान्तानां प्रश्नोपप्रश्नसमाधानादिरूपेण शिष्याणां परिज्ञानं भवत्वित्येतदर्थं तत्र दीर्घाः संवादा विरचिताः। एषु संवादेषु शिष्यः, आचार्यदेशीयः, आचार्यश्च प्रश्नोपस्थापनं तन्निराकरणं च विदधति। शिष्यः शङ्कामुपस्थापयति, आचार्यशिष्यस्तां विशेषयुक्त्या समाधत्ते, आचार्यश्च सिद्धान्तमभिधत्ते। स्थाने स्थाने भूयो भूयः शङ्का उत्थाप्यन्ते, समाधानानि च विधीयन्ते। अन्ते च आचार्यस्तेषां सर्वेषां प्रश्नानां समाधानं प्रददाति। अत्र आचार्यस्यैतादृशी शैली विद्यते यत् स न कुत्रापि कस्यापि प्रश्नस्य समाधानं पूर्वं करोति। प्रथमं स सर्वेषां प्रश्नानां सर्वासां च समस्यानामुपस्थापने शिष्यान् प्रतीक्षते। अन्ते च स्वकीयं मतं निर्णयत्वेन व्यवस्थापयति। इयमेव पद्धति-र्व्याकरणपरम्परायां क्रमेण पूर्वपक्षीयभाष्यम्, एकदेशीयभाष्यम्, सिद्धान्तिभाष्यमिति च त्रिधा विभज्य स्वीकृता। महाभाष्योत्तरवर्तिकाले नैकैर्वैयाकरणैर्महाभाष्यस्य प्रामाण्यं स्वीकृत्य 'इति भाष्ये स्थितम्; इत्युक्तं भाष्ये; इत्युक्तमाकरे' इत्यादिभिर-नेकैर्वचनैस्तस्याधमर्णत्वं स्वीकृतम्।

यद्यपि महाभाष्यं प्रमाणभूतो ग्रन्थस्तथापि ग्रन्थेऽस्मिन् सर्वाणि पाणिनिसूत्राणि

---

१. वा. प. २।४८०.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न व्याख्यातानि। इतश्च काशिकायां यथाक्रमं सर्वेषां पाणिनिसूत्राणां व्याख्यानेन पुराकालादेव इयं वृत्तिरनितरसाधारणं महत्त्वं भेजे।

काशिकायाः सूत्रपाठः साम्प्रतमुपलभ्यमानात् सूत्रपाठाद् बहुत्र भिन्नः। साम्प्रतमुपलभ्यमानेऽष्टाध्यायीपाठे कैयटहरदत्तभट्टोजिदीक्षितप्रभृतिभिर्नैकेषां वार्त्तिकानां प्रक्षेपः स्वीकृतः। इदानीन्तना विद्वांसः कियतां सूत्राणामष्टाध्याय्यां प्रक्षेपः कृत इत्यस्मिन् विषये भिन्नं मतमवलम्बन्ते। तत्र बोथलिङ्कमहोदयेन सप्त, गोल्डस्टूकरमहोदयेन त्रीणि चत्वारि वा, वेलवलकरमहोदयेन पञ्च, किलहॉर्नमहोदयेन नव, स्कूल्डमहोदयेन दश, विर्वेमहाभागेन च सप्त सूत्राणि तादृशानि स्वीकृतानि यानि वस्तुतो वार्त्तिकान्येव। एतानि वार्त्तिकानि कदा सूत्रतां प्राप्तानीति न दृढनिश्चयस्तथापि खिष्टाब्दस्य पञ्चदश शतकात्पूर्वमेव तान्यष्टाध्याय्यां सूत्रत्वेन प्रतिष्ठितान्यभवन्निति[1] सन्देहविरहितम्। अस्मिन् विषये सूत्रपाठभेदप्रकरणेऽग्रे विस्तरेण वक्ष्यामः।

अपि च, महाभाष्ये बहुत्र येषां सूत्राणां योगविभागो नोपलभ्यते तेषां सूत्राणामपि क्वचिद् योगविभागः काशिकायामुपलभ्यते। अधोलिखितानि सूत्राणि तत्र निदर्शनम्।[2]

म. भा.	का. वृ.
उञ ऊँ।	उञः (१।१।१७) ऊँ (१।१।१८)
प्रादय उपसर्गाः क्रियायोगे।	प्रादयः (१।४।५८) उपसर्गाः क्रियायोगे (१।४।५९)

---

१. R. N. DANDEKAR, *Vedic Bibliography*, Vol. ii (1961), p, 98: "They had, however, already become part of Aṣṭādhyāyī before 15th Century A. D."

२. एतेषां सूत्राणां योगविभागः पृथक् पृथग् उपलब्धाष्टाध्यायीसूत्रपाठानुसारेण सङ्गृहीतः। एतेषु डॉ. किलहॉर्नमहोदयैर्महाभाष्यमनुसृत्य १।१।१७; १।४।५८; २।१।११; ६।१।३२; ७।३।११८ (नागेशमतेन च ६।२।१०७ इत्यधिकम्) षण्णां सूत्राणां योगविभागो निर्दिष्टः। अत्र च "इदुद्भ्यामौदच्च घेः" (७।३।११७; ११८; ११९) इत्येकमेव सूत्रं किलहॉर्नमतेन। एतदतिरिक्तं तेषां मतेन "संज्ञायां कुलालादिभ्यो वुञ्" (४।३।११७; ११८); "तदस्य परिमाणं संख्यायाः संज्ञासंघसूत्राध्ययनेषु" (५।१।५७; ५८); "तद्धितस्य कितः" (६।१।१६४; १६५) इत्यादीनि त्रीणि सूत्राण्यधिकानि वर्तन्ते। अस्य कृते द्र. - F. KIELHORN, "The Text of Pāṇini's Sūtras as Given in the Kāśikā-Vṛtti, compared with the text known to Kātyāyana and Patañjali", *IA*, Vol. xvi, pp. 179-181.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विभाषा अपपरिबहिरञ्चवः पञ्चम्या ।	विभाषा (२।१।११) अपपरिबहिरञ्चवः पञ्चम्या (२।१।१२)
ह्वः सम्प्रसारणमभ्यस्तस्य च ।	ह्वः सम्प्रसारणम् (६।१।३२) अभ्यस्तस्य च (६।१।३३)
दीर्घात् पदान्ताद् वा ।	दीर्घात् (६।१।७५) पदान्ताद् वा (६।१।७६)
उदराश्वेषुषु क्षेपे ।	उदराश्वेषुषु (६।२।१०७) क्षेपे (६।२।१०८)
वैयाकरणाख्यायां चतुर्थ्याः परस्य च ।	वैयाकरणाख्यायां चतुर्थ्याः (६।३।७) परस्य च (६।३।८)
औदञ्च धेः ।	औत् (७।३।११८) अच्च धेः (७।३।११९)
अनितेरन्तः ।	अनितेः (८।४।१९) अन्तः (८।४।२०)

एतानि सूत्राणि काशिकोत्तरवर्तिवैयाकरणैरपि योगविभागेनैव पठितानि ।

यथा महाभाष्ये नैकेषु स्थलेषु पूर्वेषां वैयाकरणानां वचनानि 'अपरे, अन्ये, केचिद्' इत्यादिभिर्वाक्यैरुद्धृतानि सन्ति; यथा च बहूनां वार्त्तिकानां 'अत्यल्पमिदमुच्यते'[1] इति विलिख्य पुनर्विस्तरः कृतस्तथैव काशिकायाम् 'अन्ये, अपरे' इत्यादिभिः पदैरनेकेषां वैयाकरणानां मतान्तराण्युपस्थितानि वर्तन्ते। अपि च बहुषु स्थलेषु 'अत्यल्पमिदमुच्यते'[2] इत्यादिभिर्वाक्यैः केषाञ्चिद् विस्तरो निर्दिष्टः। अत एवं ज्ञायते यद् द्वावपि ग्रन्थौ स्वसमयोपलभ्यमानसूत्रस्वरूपविषये वार्त्तिकस्वरूपविषये च भिन्नानि मतानि अवलम्बेते ।

---

१. महाभाष्ये कानिचिद् वार्त्तिकानि 'अत्यल्पमिदमुच्यते' इति प्रतीकेन व्यवहृतानि। भाष्यकारेण पाणिनिसूत्रे कात्यायनवार्त्तिके वा यत्र विस्तरोऽपेक्ष्यते तत्र 'अत्यल्पमिदमुच्यते' इति प्रतीकं प्रदाय द्वितीयं नवीनं वार्त्तिकमुपन्यस्तम्। एतेषु कानिचिदन्यैर्वैयाकरणैरपि प्रणीतानि वर्तन्ते (द्र.-रामसुरेश-त्रिपाठी, "श्लोकवार्त्तिक तथा अन्य वार्त्तिक", प्रा. प्र., वर्ष २, अङ्क १, पृ. १९)। 'अत्यल्पमिदमुच्यते' इत्यस्य प्रयोगो भाष्ये चतुस्त्रिंशत्तमेषु स्थलेषु वर्तत इति श्रीधरशास्त्रिपाठक-सिद्धेश्वरशास्त्रिचित्राव-मतम्। अस्मिन् विषये विस्तरेण द्र.-*Patañjali's Vyākaraṇa Mahābhāṣya, Avyayībhāvatat-puruṣāhnika* (S. D. Joshi), footnote 970, p. 222. (Poona, 1969).

२. द्र.- का. वृ. ३।१।१४; ८।४।४२.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकाया न्यासस्य च प्रारम्भे इदं स्पष्टीकृतं यदस्य व्याकरणशास्त्रस्य वृत्तिभाष्यनामधातुपारायणादिरूपेषु विप्रकीर्णस्य भावसंनिवेशोऽत्र कृतो वर्तते । काशिकायां बहुषु स्थानेषु साम्प्रतमन्यत्र कुत्राप्यनुपलभ्यमानानि वचनान्युपन्यस्तानि दृश्यन्ते । यथा हि ७।३।९५ सूत्रे इयं "आपिशलाः—तुरुस्तुशम्यमः सार्वधातुकासु च्छन्दसि, इति पठन्ति । तत्र सर्वेषामेव छन्दसि विषये विधिरयं भवति" इत्यनेन आपिशलेः सूत्रमुद्धरति । आपिशलिः पाणिनेः पूर्ववर्ती वैयाकरण आसीत् । एवमेव ७।२।१७ सूत्रे "सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन । शकितो घटः कर्तुम् । शक्तो घटः कर्तुम्" इत्यनेन सौनागमतं काशिका निर्दिशति । अस्य मतद्वयस्य काशिकाया ऋते पूर्ववर्तिषु ग्रन्थेषु कुत्राप्युल्लेखो न दृश्यते ।[1] अनयैव रीत्या विद्वांस एवं मन्यन्ते यत् काशिकाकर्तृभ्यां चान्द्रव्याकरणाद् बहूनि वचनानि स्वीकृतानि ।[2] परं काशिकया चान्द्रव्याकरणस्य निर्देशो न कृतः । यथा च चान्द्रव्याकरणस्य काशिकायां प्रभावस्तथैव कातन्त्रव्याकरणस्यापि प्रभावो वरीवृत्यते । अस्मिन् विषयेऽग्रे विस्तरेण वक्ष्यामः ।

काशिकायामेतादृशानि वचनान्युपलभ्यन्ते यानि काशिकातः पूर्ववर्तिषु ग्रन्थेषु वयं नोपलभामहे । बहवो विद्वांसस्तानि महाभाष्यानुक्तत्वादप्रमाणानि मन्यन्ते । तथा हि १।१।११ इत्यस्य वृत्तौ "मणीवादीनां प्रतिषेधो वक्तव्यः" इति काशिकोक्तं वक्तव्यम् । अत्र काशिका "मणी+इत्योष्ट्रस्य" इति सन्धिविच्छेदं कृत्वा "ईदूदेद्द्विवचनं प्रगृह्यम्" (१।१।११) इत्यनेन विहितायाः प्रगृह्यसंज्ञायाः प्रतिषेधं वक्ति । इदं काशिकाविरचितं वार्त्तिकं रूपावतारे, मिताक्षरावृत्तौ, प्रक्रियाकौमुद्यां च स्वीकृतम् । परं कैयट-हरदत्त-भट्टोजिदीक्षित-नागेश-प्रभृतयो भाष्यानुक्तत्वादप्रामाण्यमेवास्य वचनस्याङ्गीकुर्वन्ति । ते महानुभावा अत्र "मणी+व" इति रूपेण, अथवा "मणी+वा +उष्ट्रस्य" इति रूपेण सन्धिविच्छेदं कुर्वन्तः "इवार्थे वशब्दो वाशब्दो वा

---

१. द्र.- S. K. BELVALKAR, *Systems of Sanskrit Grammar*, p. 37.

२. द्र.- F. KIELHORN, "The Cāndra-Vyākaraṇa and the Kāśikā-Vṛtti", *IA*, Vol. xv, pp. 183-185.
तुलना- S. K. BELVALKAR, *Systems of Sanskrit Grammar*, footnote 1, p. 38.
अपि च- I. S. PAWATE, *The Structure of the Aṣṭādhyāyī*, Introduction, pp. 10-11.
अपि च- P. THIEME, "Pāṇini and the Pāṇinīyas," *JAOS*, Vol. 76, January/March 1956, p. 18:
"It has used, beside Patañjali, Candragomin's grammar."

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बोध्यः"[1] इति मन्यन्ते। शब्दान्तरेण यदि वक्तव्यं तर्हि कोशग्रन्थमुररीकृत्य एवं वक्तुं शक्यते यदत्र 'इव' शब्दो नैव वर्तते, अपि तु 'व' अथवा 'वा' इत्येव। अत एवेदं काशिकाविरचितं वार्त्तिकमनुपयुक्तम्। अमुमेवार्थमभिप्रेत्य बहवः कथयन्ति[2] यद् भाषायामाधिपत्यं यादृशं मुनित्रयस्य वर्तते न तादृशमन्यस्य कस्यापि वैयाकरणस्य। अतो मुनित्रयमपहायान्येषां वैयाकरणानां नूतनसूत्रप्रणयने वार्त्तिकप्रणयने वा नाधिकारः।

यद्यपि "मणीवादीनां प्रतिषेधो वक्तव्यः" इति वार्त्तिकं काशिकाया अभिमतं नानुसृतं वैयाकरणैस्तथापि बहूनि मुनित्रयानुक्तानि काशिकातः पूर्ववर्तिषु ग्रन्थेष्वनुपलभ्यमानानि वचनानि काशिकोत्तरवर्तिवैयाकरणैः प्रमाणत्वेन स्वीकृतानि। एतादृशानि वचनानि माधवीयधातुवृत्तौ, रूपावतारे, दुर्घटवृत्तौ, प्रक्रियाकौमुद्यां, सिद्धान्तकौमुद्यां च स्थाने स्थाने समुपलभ्यन्ते। अस्मिन् विषये वार्त्तिकविवेचनावसरेऽग्रे वक्ष्यामः।

इदमस्माभिः पूर्वमेव प्रतिपादितं यद् आचार्यपतञ्जलिना महाभाष्ये बहूनां सूत्राणां वार्त्तिकानां च प्रत्याख्यानं कृतम्, कुत्रचिच्च तेषां स्वरूपपरिवर्तनविषयेऽपि स्वकीयं मतं प्रस्फुटितम्। परं काशिकायां कस्यापि सूत्रस्य वार्त्तिकस्य वा प्रत्याख्यानं न कृतम्। परम्परामनुसृत्य येन रूपेण तान्युपलभ्यन्ते तथैव वृत्तौ निर्दिष्टानि सन्ति। अतो ज्ञायते यत् काशिकाकर्तृभ्यां स्वसमये पृथक् पृथग् रूपेण प्रख्यातस्वरूपाणां सूत्राणां पाठान्तरोऽपि सङ्गृहीतः। अधोलिखितानि च तानि सूत्राणि—

(१) अन्तर्घनो देशे (३।३।७८)।
अन्तर्घणो[3] देशे।

(२) विकर्णशुङ्गच्छगलाद् वत्सभरद्वाजात्रिषु (४।१।११७)।
विकर्णशुङ्गाच्छगलाद्[4] वत्सभरद्वाजात्रिषु।

(३) सहस्रेण संमितौ घः (४।४।१३५)।

---

१. सि. कौ., सू. १०० ॥ अत्र प्रौढमनोरमा-तत्त्वबोधिनी-बालमनोरमा अपि द्रष्टव्याः।
तुलना—अष्टाध्यायीभाष्यम् (दयानन्दसरस्वती), भागः १, सू. १।१।११.

२. द्र.- व्या. म. भा. (अभ्यंकरः), प्रस्तावनाखण्डः, भागः ७, पृ. ८९-९०.

३. का. वृ. ३।३।७८: "अन्ये णकारं पठन्ति—अन्तर्घणो देश इति। तदपि ग्राह्यमेव।"

४. का. वृ. ४।१।११७: "शुङ्गाशब्दं स्त्रीलिङ्गमन्ये पठन्ति, ततो ढकं प्रत्युदाहरन्ति, शौङ्गेय इति। द्वयमपि चैतत् प्रमाणम्। उभयथा सूत्रप्रणयनात्।"
तुलना—चा. व्या. २।४।४७ सूत्रे—"नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणाच्छुङ्गाया अपत्यं शौङ्गः।"
(यद्यपि चान्द्रवृत्तौ शुङ्गाशब्दस्य ग्रहणं तथापि तत्र काशिकानुसारि 'शौङ्गेय' इति रूपं नोपलभ्यते)।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सहस्रेण[1] समितौ घः ।

(४) अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच् (५।४।५७) ।
अव्यक्तानुकरणाद् द्व्यजवरार्ध्यादनितौ[2] डाच् ।

(५) प्रकृत्यान्तः पादमव्यपरे (६।१।११५) ।
नान्तः[3] पादमव्यपरे ।

(६) यजुष्युरः (६।१।११७) ।
यजुष्युरो ।[4]

(७) आङोऽनुनासिकः छन्दसि (६।१।१२६) ।
आङोऽनुनासिकः[5] छन्दसि बहुलम् ।

---

१. का. वृ. ५।४।१३५: "केचित्तु 'समितौ' इति पठन्ति । तत्रापि समित्या सम्मित एव लक्षयितव्यः ।"

२. का. वृ. ५।४।५७: "केचिद् 'द्व्यजवरार्ध्यात्' इति यकारं पठन्ति ।"

३. का. वृ. ६।१।११५ "केचिदिमं सूत्रं 'नान्तः पादमव्यपरे' इति पठन्ति । ते संहितायामिह यदुच्यते तस्य सर्वस्य प्रतिषेधं वर्णयन्ति ।"

४. का. वृ. ६।१।११७: "अपरे यजुष्युरो इति सूत्रं पठन्ति । उकारान्तमुरुशब्दं संबुद्धचन्तमधीयते त इदमुदाहरन्ति, उरो अन्तरिक्षं सजूरिति ।"
अपि च द्र.- क्षितीशचन्द्रचट्टोपाध्यायः, "पाठविमर्शः", मञ्जूषा (सेप्टेम्बर, १९५०), पृ. ३०-३१:—
"उरः शब्द एङन्तो यजुषि विषयेऽति प्रकृत्या भवति । उरो अन्तरिक्षम् । अपरे 'यजुष्युरो' इति सूत्रं पठन्ति । उकारान्तमुरुशब्दं संबुद्धचन्तमधीयते । त इदमुदाहरन्ति—'उरो अन्तरिक्षं सजूरिति' । इति । पाठयोरनयोः कस्तावत् सूत्रकारसम्मत इति विचारे भाष्यकारस्य...हरदत्तस्य वाभिमतं सर्वथा समादरणीयं स्यात्, अधन्यतया पुनरस्माकं नाभ्यां सूत्रमिदं धृतं विकृतं वा । यजुर्वेदे तैत्तिरीय-मैत्रायणी-काठकसंहितासु 'उरो अन्तरिक्षं सजूर्देवेन वातेन' (तै. सं. १।३।८।१; मै. सं. १।२।१५; ३।९।७; काठ. सं. २।२; ३।६) इत्यत्र 'उरो अन्तरिक्ष' इति संबुद्धचन्ते पदे एव दृश्यते । आपस्तम्ब-श्रौतसूत्रे (७।१५।१०) मानवश्रौतसूत्रे (१।८।३।२७) च स पव पाठो वरीवर्ति । वा. सं. (६।११) श. ब्रा. (३।८।१।१२२) च "उरोरन्तरिक्षात्" इति पाठः । स तु प्रकृते किमपि नोपकरोति । यथास्माभिर्दृष्टं तथा 'उरो अन्तरिक्षम्' इति याजुषी श्रुतिर्न विद्यते । अत एव प्रसिद्धतमलक्ष्यानुरोधेन 'यजुष्युरो' इति पाठ एव सूत्रकारसंमत इति प्रतिभाति ।"

५. का. वृ. ६।१।१२६: "केचिद् आङोऽनुनासिकश्छन्दसि बहुलम् इत्यधीयते ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(८) चुर्णादीन्यप्राणिषष्ठ्याः (६।२।१३४)।
चूर्णादीन्यप्राण्युपग्रहात्[1]।

(९) भ्यसो भ्यम् (७।१।३०)।
भ्यसोऽभ्यम्।[2]

(१०) गोतो णित् (७।१।९०)।
ओतो[3] णित्।

(११) श्युकः किति (७।२।११)।
श्युक[4] क्किति।

(१२) तीषसहलुभरुषरिषः (७।२।४८)।
तीषु[5]सहलुभरुषरिषः।

(१३) सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् (७।२।४९)।
सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनितनिपतिदरिद्राणाम्।[6]

(१४) ईडजनोर्ध्वे च (७।२।८०)।
ईडजनोः[7] स्ध्वे च।

(१५) अतो येयः (७।२।८०)

---

१. का. वृ. ६।२।१३४: "चूर्णादीन्यप्राण्युपग्रहात्' इति सूत्रस्य पाठान्तरम्।"

२. का. वृ. ७।१।३०: "केचित् पुनरभ्यमादेशमेत्वनिवृत्त्यर्थं कुर्वन्ति। येषां तु शेषे लोपष्टिलोपः, तेषामभ्यमादेश एव।"
चा व्या. २।१।२८: "भ्यसो भ्यम्' इति सूत्रं दृश्यते॥
कातन्त्रे च २।३।१५: "भ्यसभ्यम्' इति सूत्रम्॥

३. का. वृ. ७।१।९०: केचिद् 'ओतो णित्' इति पठन्ति। द्यो-शब्दादपि यत्सर्वनामस्थानं विद्यते तदर्थम्।"
प्रो. सरस्वतीप्रसादचतुर्वेदिमहोदयानां मतेन "गोतो णित्" इति सूत्रस्वरूपमयुक्तम्। अस्य स्थाने "ओतो णित्" इत्येव सूत्रं स्वीकरणीयम्। एतदर्थं द्र.— "On Pāṇini's Sūtra vii. 1.90, wrong wording or corrupt reading" *ABORI*, Vol. xxiii, pp. 77-79.

४. का. वृ. ७।२।११: "केचिदत्र द्विककारनिर्देशेन गकारप्रश्लेषं वर्णयन्ति।"

५. का. वृ. ७।२।४८: "तीषसह इति सूत्रे केचिदुदितमिषं पठन्ति।"
चान्द्रे ५।४।११८; "तीषुसह'- इति उदितमेव पाठः।

६. तुलना—चा. व्या. ५।४।११९: "सनीवन्तर्ध...सनितनिपतिदरिद्रः' इति सूत्रस्वरूपं वर्तते।

७. चा. व्या. ५।४।१५४: "जनीशीडः स्ध्वे" इति सूत्रस्वरूपम्।
कातन्त्रे ३।७।५: "ईड्जनोः सध्वे च" इति सूत्रम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतो[1] यासियः ।

(१६) परिमाणान्तस्या संज्ञाशाणयोः (७।३।१७) ।
परिमाणान्तस्या[2] संज्ञाशाणकुलिजानाम् ।

इत्यादीन्यष्टाध्याय्याः सूत्राणि काशिकाकाले नैकेषु व्याकरणग्रन्थेषु पृथक् पृथक् स्वरूपेण विद्यमानान्यभविष्यन् येषामुल्लेखोऽस्यां वृत्तौ वृत्तिकाराभ्यां (वामन-जयादित्याभ्याम्) तात्कालिकप्राप्तस्वरूपेण सह कृतोऽभविष्यदित्यनुमीयते ।

अस्मिन् ग्रन्थे प्रतिसूत्रमनुवृत्तिः, वृत्तिः, उदाहरणानि, प्रत्युदाहरणानि च शङ्कासमाधाननिर्देशपुरस्सरमुपलभ्यन्ते । सूत्राणां व्याख्या प्राचीनवृत्तीनामाधारेण महाभाष्यसहकारेण वा कृता[3] तेन तासां पूर्ववर्तिनीनां वृत्तीनामर्थप्रकारस्य ज्ञानमपि काशिकासकाशाज्जायते । वर्तन्ते चास्यां वृत्तावुदाहरणानि प्रायः प्राचीनानि क्रमागतानि[4] येन परम्पराया रक्षा भवति । ऐतिहासिकसामग्रीदृष्ट्या गणपाठदृष्ट्या च ग्रन्थोऽयमतीव मूल्यवान् रमणीयश्च ।[5] ग्रन्थेऽस्मिन् रामायण-महाभारत-सुश्रुत-चरक-किरातार्जुनीयादिग्रन्थेभ्योऽपि कानिचित् पद्यानि समुदाहृतानीति सर्वमनुपदं यथाकालमग्रे वक्ष्यामः ।

---

१. का. वृ. ७।२।८०: "केचिदत्र 'अतो यासियः' इति सूत्रं पठन्ति ।"

२. का. वृ. ७।३।१७: "असंज्ञाशाणकुलिजानाम्' इति केचित् पठन्ति ।"
तुलना—चा. व्या. ६।१।२६: "संख्यायाः संवत्सरपरिमाणस्यासंज्ञाशाणकुलिजस्य' इति सूत्रं दृश्यते ।

३. P. THIEME, *JAOS*, Vol. 76, p. 18:
"The same applies to the interpretative statements of the Kāśikā. They are again, for the most part, copied from the Mahābhāṣya and receive, again, their full meaning only when considered within the context of Patañjali's arguments. They have no value of their own. With respect to those statements that are not taken from Patañjali, we may be free to attribute them to the authors of the Kāśikā or to older sources: but there is no evidence or even likelihood that any of them are older than Patañjali."

४. *Ibid:*
"The Kāśikā copies most of its examples from the Mahābhāṣya."

५. तुलना - का. वृ. (शोभितमिश्रः), उपोद्घातः, पृ. १५-१६ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(ख) सिद्धान्तकौमुद्याः शैली

वैयाकरणसिद्धान्तकौमुदीतः पूर्वभाविनां प्रक्रियाक्रमानुसारिग्रन्थकर्तॄणां पुरत इमे प्रश्ना आसन् यत् कथं केन वा प्रकारेणास्मिन् शास्त्रे प्रकरणरचना कर्तव्या, कथं चाल्पेन यत्नेन महतो महतः शब्दौघस्य ज्ञानं भविष्यति, केन प्रकारेण प्रक्रियाया ज्ञानं भविष्यति, केन प्रकारेण सूत्राणि सङ्घटनीयानि, कानि च तत्र ग्रह्याणि, कानि च पुनः परित्यजनीयानि, ग्राह्येष्वपि सूत्रेषु कः खलु सङ्घटने क्रम आश्रयणीय इति। परं प्रकाशितायां सिद्धान्तकौमुद्यामुपर्युक्ता चिन्ता दूरीकृता।

सिद्धान्तकौमुद्यां ग्रन्थसंक्षेपविधौ भट्टोजिदीक्षितमहोदयाः सर्वथा प्रयतमाना एव लक्ष्यन्ते। ग्रन्थेऽस्मिन् केन विधिना सूत्राणि व्याख्यातव्यानि, तथा च पूर्ववर्तिषु व्याकरणग्रन्थेषु सूत्राणां व्याख्याने को हि दोष आसीत्, कश्च तत्र मार्गो ग्राह्यः, काशिकावृत्त्यादिग्रन्थेषु प्रदत्तं सूत्रस्वरूपं शुद्धमशुद्धं वेत्यादिसर्वं प्रश्नजातं विमृश्य प्रायः सर्वत्र महाभाष्यं पुरस्कृत्य विषयप्रतिपादनं कृतं वर्तते। अत्र ग्रन्थकारेण समाश्रिता विषयप्रतिपादनपद्धतिः, तेन कृता प्रकरणरचना, विषमस्थलान्यपहाय तेन कृतं सिद्धान्तानुगुणं सूत्रार्थविवरणमित्यादिसर्वं प्रशंसार्हं वर्तते। एभिरेव गुणैरयं ग्रन्थो रूपावतारप्रक्रियाकौमुदीग्रन्थानतिशेते।

भाषायामर्थावबोधकत्वाद् वाक्यस्फोट एव ज्यायान्। अनेनैव चार्थसमाप्तिर्जायते। अत्र च तिङन्तं सुबन्तं चोभयं सहकारिभावेनापेक्षते। अतः "तिङ्सुबन्तचयो वाक्यम्"[1] इति व्याकरणसमयं सम्यगवधार्य सुबन्तानां तिङन्तानां चोभयेषां शब्दानां यथाक्रमं ज्ञानसम्पत्तयेऽयं ग्रन्थः 'पूर्वार्धम्, उत्तरार्धम्' चेति द्विधा विभक्तः। तथा हि-सुबन्तानां ज्ञानाय पूर्वार्धे क्रमेण संज्ञा-सन्धि-स्वादि-स्त्रीप्रत्यय-कारक-समास-तद्धितादयो निरूपिताः। उत्तरार्धे तु भ्वाद्यादयो दशगणाः, ण्यन्तादयश्च तिङन्तप्रक्रियाः, धातुभ्य एव विहिताः (उणादिप्रकरणेन सह) कृत्प्रत्यया व्याख्याताः। अन्ते च वैदिकीप्रक्रिया, फिट्सूत्रैः सह स्वरप्रक्रिया, लिङ्गानुशासनम्, गणपाठश्च संस्थापितः।

प्रक्रियाग्रन्थस्य पूर्वोत्तरार्धरूपेण विभाजनं प्रथमतः प्रक्रियाकौमुद्यां दृश्यते। परं सिद्धान्तकौमुद्यां कानिचित् प्रकरणानि पूर्वप्रक्रियाग्रन्थाद्यपेक्षया परिवर्त्य संस्थापितानि। अपरं च प्रक्रियाकौमुद्यामनन्तर्भूतानाम् उणादि-फिट्सूत्र-लिङ्गानुशासन-गणपाठादीनामन्तर्भावः सिद्धान्तकौमुद्यां कृत इति प्रशंसार्हम्।

---

१. अमर. (शब्दादिवर्गः) १।२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्मिन् ग्रन्थे भट्टोजिदीक्षितैर्लौकिकानां शब्दानां साधनप्रसङ्गेऽष्टाध्यायीक्रममवलम्ब्य सूत्रव्याख्या न कृता। वैदिकप्रकरणं विहाय ग्रन्थेषु प्रकरणेषु वैदिकप्रयोगविशेषान् साधयितुं प्रायेण यत्नो नैव विहितः। परं क्वचिद् वोपदेवादिशाब्दिकानां मतेन लोकेऽपि तथाविधानां प्रयोगाणां सद्भावाद्, रामचन्द्रादिपाणिनीयैर्वैयाकरणैर्वोपदेवमतानुसरणाच्च केषाञ्चन वैदिकसूत्राणामुपन्यासो वैदिकप्रकरणादन्यत्रापि ग्रन्थकारेण कृतः। तथा हि—

सि. कौ. सूत्रसङ्ख्याः	सूत्राणि
१८८९	छन्दसि[1] परिपन्थिपरिपरिणौ पर्यवस्थातरि (५।२।८९)
१९६१	वा[2] ह च छन्दसि (५।३।१३)
२००७	तुश्छन्दसि[3] (५।३।५९)
२८६९	प्रत्यपिभ्यां[4] ग्रहेः (३।१।११८)
३०९३	छन्दसि[5] लिट् (३।२।१०५)
३०९४	लिटः कानज्वा (३।२।१०६)
३०९५	क्वसुश्च (३।२।१०७)
३११७	णेश्छन्दसि[6] (३।२।१३७)
३११८	भुवश्च (३।२।१३८)
३१५०	क्याच्छन्दसि[7] (३।२।१७०)
३१५१	आद्वगमहनजनः किकिनौ लिट् च (३।२।१७१)

महाभाष्ये १७१३ सूत्राणि यथास्थलं व्याख्यातानि; रूपावतारे २६६४ सूत्राणि व्याख्यातानि; प्रक्रियाकौमुद्यां च २४७० सूत्राणि व्याख्यातानि। परं सिद्धान्तकौमुद्यां सर्वाण्येव पाणिनिसूत्राणि समावेशितानि। यद्यपि पाणिनीयाष्टकस्य कियती सूत्रसङ्ख्या

---

१. बा. म. ५।२।८९: "इदं सूत्रं वैदिकप्रक्रियायामेव व्याख्यातुमुचितम्।"

२. बा. म. ५।३।१३: "यद्यपि वैदिकप्रक्रियायामिदमुपन्यसनीयं तथापि वाग्रहणस्य पूर्वसूत्रे अपकर्षज्ञानायात्र तदुपन्यासः।"

३. बा. म. ५।३।५९: "छान्दसमप्यत्रोपन्यस्तम्।"

४. बा. म. ३।१।११८: "ननु छान्दसस्य किमर्थमिहोपन्यासः...।"

५. बा. म. ३।२।१०६-१०७: "इमौ कानच्क्वसू आदेशौ छान्दसाविति अत्रैव भाष्यकैयटयोः स्पष्टम्।"

६. बा. म. ३।२।१३७: "इदं सूत्रं वैदिकप्रक्रियायामेव व्याख्यातुमुचितम्।"

७. बा. म. ३।२।१७०-१७१: 'छान्दसमप्येतत्सूत्रद्वयं भाषायामित्यादिवक्ष्यमाणवार्त्तिकविवेचनाय इहोपन्यस्तम्।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यस्मिन् विषये नैव ऐकमत्यमुपलभ्यते तथापि यावन्ति सूत्राणि साम्प्रतं काशिकादिग्रन्थेषूपलभ्यन्ते तानि सर्वाण्येवात्र ग्रन्थकारेण विवेचितानि ।

तथा हि—सिद्धान्तकौमुदीतः पूर्ववर्तिषु प्रक्रियाग्रन्थेषु सूत्रपरित्यागेऽपि वैमत्यं दृश्यते । यतो हि यानि अधिकारसूत्राणि अष्टाध्याय्यां केवलमुत्तरसूत्रेऽनुवृत्त्यर्थं पठितानि (यथा—"कारके" १।४।२३; "अव्ययीभावः" २।१।५; "तत्पुरुषः" २।१।२२; "अनभिहिते" २।३।१; "स्त्रियाम्" ४।१।३; "अङ्गस्य" ६।४।१; "एकः पूर्वपरयोः" ६।१।८४ इत्यादीनि) वर्तन्ते तानि रूपावतारे तु व्याकृतानि; परं प्रक्रियाकौमुद्यां तानि नान्तर्भूतानि । प्रक्रियाकौमुद्यां तु ग्रन्थकारेण केवलम्—"धातोः" (३।१।९१), "भूते" (३।२।८२), "लस्य" (३।४।७७), "ङ्याप्प्रातिपदिकात्" (४।१।१), "समर्थानां प्रथमाद् वा" (४।१।८२) इत्यादीन्येव कानिचिदधिकारसूत्राणि नाममात्रेण पठितानि दृश्यन्ते; परं सिद्धान्तकौमुद्यां न कस्यापि सूत्रस्य परित्यागः कृतः ।

काशिकावृत्त्यपेक्षया सिद्धान्तकौमुद्यां सूत्रत्रयस्य पाठान्तरमधिकमुपलभ्यते । यथा हि तत्—

१५५७ "आकर्षात्ष्ठल्" (४।४।९) ।
"आकषात्" इति पाठान्तरम् ।

१८६४ "आकर्षादिभ्यः कन्" (५।२।६४) ।
"आकषादिभ्यः"[1] इति रेफरहितो मुख्यः पाठः ।

१८६८ "सस्येन परिजातः" (५।२।६८) ।
"शस्येन"[2] इति पाठान्तरम् ।

प्रक्रियाग्रन्थेषु प्रयोगाणां साधुत्वप्रतिपादनाय तत्तल्लक्ष्यविषयकाणि सूत्राणि यान्यष्टाध्याय्यां विभिन्नेषु स्थलेषु प्रसृतानि सन्ति तान्येकत्र व्याख्यातानि वर्तन्ते । एतदर्थं रूपावतारे तादृशानि बहूनि सूत्राण्यवलोक्यन्ते येषां व्याख्या ग्रन्थकारेण तत्तल्लक्ष्यसंस्कारकत्वं दर्शयितुं नैकवारं कृता । यथा हि—

(१) "अचो ञ्णिति" (७।२।११५)—अजन्तपुँल्लिङ्गे 'सखायौ' इति प्रयोगे ।
" " 'गौः' इति प्रयोगे ।

(२) "अजाद्यतष्टाप्" (४।१।४)—अजन्तस्त्रीलिङ्गे; स्त्रीप्रत्यये च ।

(३) "अनेकाल्शित्सर्वस्य" (१।१।५२)—संहितावतारे स्वरसन्धौ ।
विभक्त्यवतारे अजन्तपुँल्लिङ्गे ।

(४) "अव्ययादाप् सुपः" (२।४।८२)—संहितावतारे स्वादिसन्धौ ।
अव्ययावतारे । समासावतारे ।

१-२. अस्य सूत्रद्वयस्य पाठान्तरं हरदत्तेनापि स्वीकृतम् ।
तत्कृते द्र.—प. म. ५।२।६४; ५।२।६८.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(५) "आदेः परस्य" (१।१।५४)—विभक्त्यवतारे (अजन्तपुं.; हलन्तपुं.)

(६) "आनङ् ऋतो द्वन्द्वे" (७।३।४५)—समासावतारे द्वन्द्वसमासे।

अलुगादिसमासाश्रयविधौ।

एतादृशानि स्थलानि रूपावतारे प्राचुर्येण वर्तन्ते। परं न केवलं रूपावतारे एवायं क्रम आश्रितः, अपि तु प्रक्रियाक्रमस्य समर्थकैः श्रीरामचन्द्रमहोदयैरपि प्रक्रियाकौमुद्यां तादृशी पद्धतिरनुसृता। तैस्तत्र बहूनां सूत्राणां व्याख्यानं वारद्वयं कृतं वर्तते। तथा हि—

(१) आदेः परस्य (१।१।५४)-हल्सन्धौ, हलन्ते च।

(२) अनेकाल् शित् सर्वस्य (१।१।५५)-संज्ञाप्रकरणे, अजन्ते च।

(३) धातोः (३।१।९१)-भ्वादौ, कृदन्ते च।

(४) विसर्जनीयस्य सः (८।३।१५)-हल्सन्धौ, विसर्गसन्धौ च।

(५) कुप्वोः ≍ क ≍ पौ च (८।३।३७)-हल्सन्धौ, विसर्गसन्धौ च।

प्रक्रियाकौमुद्यामेकैकस्य सूत्रस्य वारं वारं या व्याख्यानपरम्परा विद्यते सा तस्या (प्रक्रियाकौमुद्यां) रूपावतारस्य प्रभावं द्योतयति। परं सिद्धान्तकौमुद्यां कुत्राप्येकस्मिन् स्थले पूर्वव्याख्यातसूत्रस्य पुनर्व्याख्यानं नोपलभ्यते।

अत्र भट्टोजिदीक्षितः सूत्रार्थं संक्षिप्ततया व्याख्याति। सिद्धान्तकौमुद्यां केषुचित् स्थलेषु सूत्रव्याख्यानावसरे काशिकावृत्तेः, क्वचिद् रूपावतारस्य, कुत्रचिच्च प्रक्रियाकौमुद्याः प्रभावो दृश्यते। अत्र ग्रन्थकारः पूर्वां सूत्रार्थव्याख्यानपरम्परां विहाय बहुत्र नवीनमेव सूत्रार्थं प्रतिपादयति। तत्सर्वं यथाक्रमं वक्ष्यामः।

यथा काशिकायां बहुषु स्थलेषु सूत्रस्थस्यैकैकस्य पदस्य वृत्तौ पर्यायत्वेन उपन्यासः कृतो न तथा प्रायः प्रक्रियाक्रमग्रन्थेषु। यथा हि "पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणी-" (२।१।६५) इति सूत्रम्—"उभयव्यञ्जना पोटा इत्यभिधीयते। युवतिर्नवयौवना स्त्री। स्तोकमल्पपर्यायः, कतिपयं च। गृष्टिरेकवारप्रसूता। धेनुः प्रत्यग्रप्रसूता। वशा वन्ध्या। वेहद् गर्भपातिनी। बष्कयणी तरुणवत्सा। पोटादिभिः सह जातिवाचि सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति। इभपोटा..." इति पर्यायोल्लेखपुरस्सरं काशिकायां व्याख्यातम्। एतादृशं व्याख्यानमत्र सिद्धान्तकौमुद्यां न वर्तते। द्वितीयं च, यथा काशिकायां "पाघ्राध्मास्थाम्ना-" (७।३।७८) इत्यस्य योऽर्थः प्रतिपादितः स एव रूपावतारे भिन्नां शब्दयोजनामाश्रित्य विशदीकृतः। परं रूपावतारानन्तरं संक्षेपरुचयो वैयाकरणाः। तथा हि—"पाघ्रादीनां क्रमात् पिबादय आदेशाः स्युः शिति" इत्यर्थः प्रक्रियाकौमुद्यां वर्तते। सिद्धान्तकौमुद्यां—"पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे" इत्यर्थो विहितः। नास्त्यत्र प्रक्रियाकौमुदीसिद्धान्त-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कौमुद्योः सूत्रार्थकरणे कोऽपि भेदः । परं प्रक्रियाकौमुदीतः पूर्ववर्तिषु ग्रन्थेषु "इत्संज्ञक-शकारादौ प्रत्यये परे" इति सूत्रार्थभागो नोपलभ्यते ।

सन्ति परम्पराद्वयेऽपि तादृशानि बहूनि सूत्राणि येषां व्याख्यानपद्धतौ किमपि वैशिष्ट्यं न प्रतीयते । यथा "तिप्तस्झि-" (३।४।७८), "स्वौजसमौट्" (४।१।२) इत्यादिषु सूत्रेषु सूत्रार्थव्याख्यानविधौ कस्मिन्नपि ग्रन्थे नास्ति विशेषः । एतादृशेषु स्थलेषु केवलं शब्दानां विपर्यासं नाममात्रेण विधाय ग्रन्थकारैर्व्याख्या कृता । परं बहुषु स्थलेषु काशिकायां वृत्तौ प्रक्रियाक्रमग्रन्थानामपेक्षया पाठकेन सारल्यमनुभूयते ।

अष्टाध्याय्यां तादृशान्यपि सूत्राणि विद्यन्ते येषां स्वरूपेणैवार्थावबोधो भवति । अतस्तेषां सूत्राणां भट्टोजिदीक्षितैस्तत्र वृत्तिर्नैव कृता । तत्र कुत्रचित् 'स्पष्टम्' इति, क्वचिच्च केवलमुदाहरणमात्रमेव तैः प्रदत्तम् । तेषु कानिचिदत्र प्रदर्श्यन्ते । यथा—

नीचैरनुदात्तः (१।२।३०) । स्पष्टम् । अर्वाङ् ।
झलां जश् झशि (८।४।५३) । स्पष्टम् ।
परश्च (३।१।२) । अयमपि तथा ।
युष्मदस्मद्भ्यां ङश्योऽश् (७।१।२७) । स्पष्टम् ।
उत्सादिभ्योऽञ् (४।१।८६) । औत्सः ।
गोधाया ढ्रक् (४।१।१२९) । गौधेरः ।
क्षत्राद् घः (४।१।१३८) । क्षत्रियः ।
स्वसुश्छः (४।१।१४३) । स्वस्रीयः ।

इत्यादीनि ।

एतादृशी सूत्राणां व्याख्यानपद्धतिः प्रक्रियाक्रमग्रन्थप्रधाने रूपावतारे नाश्रिता; यतो हि तत्र "उत्सादिभ्योऽञ्" (४।१।८६), "शिवादिभ्योऽण्, (४।१।११५), "गोधाया ढ्रक्" (४।१।१२९), "स्वसुश्छः" (४।१।१४३) इत्यादीनि सूत्राणि पूर्ण-रूपेण व्याख्यातानि वर्तन्ते । परं सिद्धान्तकौमुद्यां भट्टोजिदीक्षितैः प्रक्रियाकौमुदी अनुकृता । प्रक्रियाकौमुद्यामपि तादृशानां बहूना सूत्राणां वृत्तिमनुक्त्वैवोपन्यासो विद्यते । अतः सिद्धान्तकौमुदीस्था एषा पद्धतिः दीक्षितैः पूर्वाचार्येभ्य एव गृहीतेति सुनिश्चितम् ।

पाणिनीयव्याकरणे तादृशानामपि सूत्राणां सङ्ख्याल्पीयसी एव येषां सूत्रैरे-वार्थबोधो भवति । परं भट्टोजिदीक्षितैस्तेषां बहूनां सूत्राणामपेक्षितापि वृत्तिर्नैव लिखिता यत्र सूत्राणां तात्पर्यं पूर्वप्रकरणवशादनुवृत्त्या वा सुस्पष्टं जायते । यथा हि—

(१) शोणात्प्राचाम् (४।१।४३) । शोणी, शोणा ।

(२) विभाषोपसर्गे (२।३।५९) । पूर्वयोगापवादः । शतस्य शतं वा प्रतिदीव्यति ।

(३) भक्ष्येण मिश्रीकरणम् (२।१।३५) । गुडेन धाना गुडधाना ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(४) पापाणके कुत्सितैः (२।१।५४)। पूर्वसूत्रापवादः। पापनापितः। अणककुलालः।

(५) षष्ठी (२।२।८)। राज्ञः पुरुषो राजपुरुषः।

(६) उपमानानि सामान्यवचनैः (२।१।५५)। घन इव श्यामो घनश्यामः।

(७) अते शुनः (५।४।९६)। अतिश्वो वराहः। अतिश्वी सेना।

एवमन्यान्यपि स्थलान्यवधेयानि। परं वृत्तिमनुक्त्वैव उदाहरणमात्रप्रधाना एतादृशी सूत्रव्याख्यानपद्धतिः प्रक्रियाक्रमग्रन्थेषु नास्ति मूलगामिनी; यतो हि व्याकरणमिताक्षरायां भाषावृत्तावपि क्वचित् क्वचिद् एतादृशी सूत्रव्याख्यानपरम्परा समवलोक्यते। सुस्पष्टये भाषावृत्तितः कानिचित् सूत्राणि प्रस्तूयन्ते। यथा—

(१) शोणात् प्राचाम् (४।१।४३)। शोणी। प्राचां किम्—शोणा।

(२) भक्ष्येण मिश्रीकरणम् (२।१।३५)। समस्यते। गुडेन मिश्रा धाना गुडधाना।

(३) वा संज्ञायाम् (५।४।१३३)। पुष्पधन्वा पुष्पधनुर्वा।

उपर्युक्तेन प्रमाणेन ज्ञायते यद् एतादृशी सूत्रव्याख्यानपद्धतिरुत्तरोत्तरं स्फीता सती सिद्धान्तकौमुद्यां प्राधान्येन समाश्रिता यत्र सूत्राणां तात्पर्यं पूर्वप्रकरणवशाद् अनुवृत्त्या वा सुस्पष्टं ज्ञायते। अपि च भट्टोजिदीक्षितानामयं ग्रन्थः सर्वेषामुपरिवर्णितानां ग्रन्थानां मध्ये उत्तरवर्तित्वमधिगाहते। तेनैव हेतुना तेषां ग्रन्थे पूर्वेषामाचार्याणां प्रभावः परिलक्ष्यते, यद्यपि तैस्तथा ऋणनिर्देशो न कृतः।

इदमप्यत्रावधेयं यद् यथा क्वचित् क्वचिद् रूपावतारे वयं प्रकरणस्थापनशैलीं पश्यामस्तथा न लभामहे तदुत्तरवर्तिषु प्रक्रियाक्रमग्रन्थेषु। रूपावतारे बहुत्र प्रकरणसंस्थानात् सूत्रोपस्थापनाद् वा तत्पूर्वं तद्विषये प्रश्नः शङ्का वा क्रियते। तदनन्तरं च तद्विषयकं सूत्रं संस्थाप्यते। तथा हि स्त्रीप्रत्ययावतारस्यारम्भे—"अथ स्त्रीप्रत्ययान्ता निर्दिश्यन्ते। के पुनः स्त्रीप्रत्ययाः? टाप् डाप् चाप् ङीप् ङीष् ङीन् ऊङ् ति इत्येते स्त्रीप्रत्ययाः। प्रथमं तावत् टाप्। अजाद्यतष्टाप् (४।४।४)" इति। एवमेव कारकावतारस्य प्रारम्भे—"अथ विभक्त्यर्थाः प्रदर्श्यन्ते। का पुनर्विभक्तयः? सु औ जस् इति प्रथमेत्येवमादयः। कस्मिन्नर्थे प्रथमा? प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (२।३।४६)। किं प्रातिपदिकम्? अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (१।२।४५)। अनर्थकस्यापि निपातस्य प्रातिपदिकज्ञेष्यते (म. भा.)। कृत्तद्धितसमासाश्च (१।२।४६)" इति। ग्रन्थसंक्षेपहेतुना एतादृशी शैली कौमुदीग्रन्थेषु नोपलभ्यत।

व्याख्यासौकर्यहेतुनापि सिद्धान्तकौमुद्यां बहुत्र बहूनि सूत्राणि यथाक्रमं पृथक् पृथग् रूपेण स्थापयित्वा तदन्ते तेषां वृत्तिरेकत्रैवोपन्यस्ता। यथा—"दंशसञ्जस्वञ्जां शपि" (६।४।२५) "रञ्जेश्च" (६।४।२६) एषां शपि न लोपः"इति। अस्मिन् प्रसङ्गे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बालमनोरमाकारो वदति—"व्याख्यासौकर्याय सूत्रद्वयमुपात्तम्" इति। एतादृशी शैली सिद्धान्तकौमुद्यां बहुत्र दृश्यते।

यद्यपि भट्टोजिदीक्षितैरत्र सूत्रार्थप्रतिपादनावसरे व्याघ्रभूति[1]—चान्द्र[2]—दुर्ग[3]—वामन[4]—शाकटायन[5]—न्यासकार[6]—कैयट[7]—हरदत्त[8]—भोज[9]—नन्दि[10]—उज्ज्वलदत्त[11]—आत्रेय[12]—सुधाकर[13]—स्वामि[14]—मैत्रेय[15]—माधवादिवैयाकरणानां[16],

---

१. सि. कौ. २५४२: "विदलृ लाभे"। ..व्याघ्रभूत्यादिमते सेट्कोऽयम्।

२. सि. कौ. २५४७: "वनु याचने"। वनुते। ववने। चान्द्रमते परस्मैपदी। सि. कौ २५६५: "बध संयमने"। बाधयति। "बन्ध" इति चान्द्रः।

३. सि. कौ. २३४३: "शंसु स्तुतौ"। अयं दुर्गतावपि इति दुर्गः,

४. सि. कौ. १७७: "इह ऋक्पाद एव गृह्यते" इति वामनः।

५. सि. कौ. २५७४: शाकटायनस्तु कथादीनां सर्वेषां पुकमाह। तन्मते कथापयति।

६. सि. कौ. २३२९: "षेवृ सेचने"। ..अयं सोपदेशोऽपि इति न्यासकारादयः।

७. सि. कौ. २१७: "उभयशब्दस्य द्विवचनं नास्ति" इति कैयटः। "अस्ति" इति हरदत्तः।

८. सि. कौ. २३८७: "गाङ् गतौ"।...अगास्त। अदादिकोऽयमिति हरदत्तादयः।

९ सि. कौ. २३५३: "ध्वन शब्दे"।...ध्वनयति घण्टाम्। अन्यत्र ध्वानयति। ...अत्र भोजः "दलिवलिस्खलिरणिध्वनित्रपिक्षपयश्च" इति पपाठ।

१०. सि. कौ. २३५३: "कदि, क्रदि, क्लदि वैक्लव्ये"। "वैकल्ये" इत्येके। "त्रयोऽप्यनदिते" इति नन्दी। "इदिते" इति स्वामी। "कदि क्रदी" इदितौ "क्रद क्लद" इति चानिदिताविति मैत्रेयः।

११. सि. कौ. २४७९: अयमन्तः स्थादिरित्युज्ज्वलदत्तो बभ्राम।

१२. सि. कौ. २५४७: "क्षणु हिंसायाम्"। ... क्षिणु च। उप्रत्ययनिमित्तो लघूपधगुणः। "संज्ञापूर्वको विधिरनित्यः" इति न भवतीत्यात्रेयादयः। भवत्येवेति अन्ये।

१३. सि. कौ. २३५५: "टुवम् उद्गिरणे"। इहैव निपातनाद् ऋतः इत्वं सुधाकरः।

१४. सि. कौ. २३६२: "मिदृ मेदृ मेधार्हिंसनयोः"। ... "थान्ताविमौ" इति स्वामी। ... "धान्तौ" इति न्यासः।

१५. सि. कौ. २२९१: "हुर्छा कौटिल्ये"। "कौटिल्यमपसारणम्" इति मैत्रेयः।

१६. सि. कौ. २३५३: "मारणतोषणनिशामनेषु ज्ञा"। "निशामनं चाक्षुषज्ञानम्" इति माधवः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राञ्चः[1] इति निर्देशेन रामचन्द्रमहोदयानां चोल्लेखः कृतस्तथाप्यस्मिन् ग्रन्थे शर्ववर्म-जयादित्य-धर्मकीर्त्यादीनां बहूनां शाब्दिकानामुल्लेखो नोपलभ्यते। अपि च तिङन्त-प्रकरणे एवाधिक्येन नैकेषां वैयाकरणानामुल्लेखः।

एतदतिरिक्तं सिद्धान्तकौमुद्यां प्रसङ्गवशेन अमर-यादव-विश्वादि-कोशग्रन्थेभ्यः; व्यास-कालिदास-मयूर-भारवि-भट्टि-माघ-श्रीहर्ष-मुरारि-प्रभृतिप्रणीतेभ्यो महाकाव्य-नाटक-स्तोत्रग्रन्थभ्येश्चोदाहरणानि[2] उपन्यस्तानि। किं बहुना, भाष्य-वार्त्तिक-काशिका-प्रक्रियाग्रन्थादिसारांशसङ्कलनेन, मतान्तरप्रदानेन, तत्तत्कालसमुदितानां नैकेषां शब्दानां सङ्ग्रहेण च गहनतरव्याकरणाम्भोधिमुत्तितीर्षूणां भवति च नौरिव परमोपकारिणी, अपूर्वा, अन्वर्थसंज्ञिका, कौमुदीवाह्लाददायिनी, वैयाकरणसिद्धान्तकौमुदीनाम्नी भट्टोजिदीक्षितकृतकृतिरियम्।

---

१. सि. कौ. २२१४: परत्वान्नित्यत्वाच्च "अतो येयः" (७।२।८०) इति प्राञ्चः।... भवेयुः। (अस्मिन् स्थले सिद्धान्तकौमुद्या प्रक्रियाकौमुदी-ग्रन्थेन सह तुलना विधेया)

२. उदाहरणानां विषयेऽग्रे द्रष्टव्यम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृतीयं प्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टाध्यायीक्रमस्य प्रक्रियाक्रमस्य च विरोधपरिहारः

पाणिनेर्व्याकरणमष्टाध्यायीनाम्ना अष्टकमिति नाम्ना वा प्रसिद्धम् । पतञ्जलिः पाणिनेर्व्याकरणं शब्दानुशासनमिति[1] नाम्ना व्यवहरति । पाणिनेर्व्याकरणं हि न ऐतिहासिकं (Historical) व्याकरणं किं तु वर्णनात्मकम् (Descriptive) एव । तद्यथा, ऐतिहासिकदृष्ट्या 'अवोचत्' इति रूपम् अभ्यस्तस्य वचधातोर्जायते । परं पाणिनिरनभ्यस्तस्य 'वच परिभाषणे' इत्यस्माद् धातो उमागमसाहाय्येन 'अवोचत्' इति रूपं साधयति ।

अस्या नूतनाया वर्णनात्मकपद्धतेरेतद्वैशिष्ट्यं यदिमामाश्रित्य कोऽपि अधीती पाणिनीयव्याकरणे सूत्रसाहाय्येन महतो महतः शब्दौघान् उत्पादयितुं शक्नोति । यन्त्रं यथा बहूनि वस्तूनि निर्मातुं प्रभवति तथैव अष्टाध्यायीसूत्रैः नैके संस्कृतभाषाशब्दा यान्त्रिकपद्धत्या व्युत्पादयितुं शक्यन्ते । आधुनिका भाषाशास्त्रज्ञाः पाणिनीयव्याकरणस्य शब्दनिर्मितिसामर्थ्यं मनसि कृत्वा पृच्छन्ति यत् कथं पुनरिदमाचार्यपाणिनेर्लक्षणं प्रवृत्तम् । कीदृशी खल्वस्य शास्त्रस्य प्रवृत्तिर्यया महान् शब्दराशिर्निर्मातुं शक्यते । कथं स मुनिः संस्कृतभाषाया वाक्यविश्लेषणे प्रवृत्तोऽभवदिति । पाणिनेः शब्दशास्त्रप्रवृत्तिं जिज्ञासव इदानीन्तना विद्वांसो न केवलं व्याकरणस्य शब्दापशब्दविवेकसामर्थ्येन संतुष्टाः किं तु शब्दराशिर्निर्मित्यर्थं या पाणिनिना शास्त्रप्रवृत्तिरनुसृता तां ज्ञातुमतीव समुत्सुकाः । अनेनैवाशयेन भगवान् पतञ्जलिर्वदति—"अनभ्युपाय (एष) शब्दानां प्रतिपत्तौ प्रतिपदपाठः ।··· कथं तर्हीमे शब्दाः प्रतिपत्तव्याः । किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम् । येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् । किं पुनस्तत् । उत्सर्गापवादौ । कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः । कथं जातीयकः पुनरुत्सर्गः कर्तव्यः कथं जातीयकोऽपवादः । सामान्येनोत्सर्गः कर्तव्यः, तद्यथा "कर्मण्यण्" (३।२।१) । तस्य विशेषेणापवादः, तद्यथा "आतोऽनुपसर्गे कः" (३।२।३)[2] इति ।

पाणिनिव्याकरणाध्ययनेन महतः शब्दराशेः प्रक्रियापूर्वकं निर्मितिः कर्तुं शक्येति भाष्याशयः ।

---

१. म. भा. (किलहॉर्नसंस्करणम्), भागः १, पृ. १ : "अथ शब्दानुशासनम् । अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ।"

२. *Ibid*, भागः १, पृ. ६ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विदुषां मतेन पाणिनिशब्दानुशासनस्य द्वौ मार्गौ।[1] तौ च विश्लेषणात्मकपद्धतिः संयोगात्मकपद्धतिश्च इति नाम्ना व्यवहरामः। व्याकरणशास्त्रे इमौ यथोद्देशपक्षः कार्यकालपक्षश्चेति रूपेण व्यवह्रियेते। तथा च "यथोद्देशं संज्ञापरिभाषम्", "कार्यकालं संज्ञापरिभाषम्" इति परिभाषाद्वयमत्र द्वे महत्त्वपूर्णे पद्धती स्थापयति। पाणिनेः शब्दानुशासनस्य सूत्राणां व्याख्यानं केन प्रकारेण कर्तुं शक्यमित्याशयं मनसि कृत्वा इमे द्वे परिभाषे अनुशिष्टे। किमर्थं पाणिनिना अस्मिन्प्रकरणेऽस्मिन्नुद्देशे वा सूत्रं पठितम्, तत्सूत्रार्थकरणे केषां शब्दानामनुवृत्तिरधिकारो वापेक्षते; तज्ज्ञातुं विश्लेषणात्मकपद्धतिः (अष्टाध्यायीक्रमस्य) उपयुक्ता भवति।[2] परमष्टाध्याय्यां विकीर्णानां बहूनां सूत्राणां प्रक्रियायाः कृते एकवाक्यता एकप्रदेशविषयता चावश्यकी इति निरूपयितुं कार्यकालपक्ष उपादीयते।[3]

पाणिनीयव्याकरणे "विप्रतिषेधे परं कार्यम्" (१।४।२), "असिद्धवदत्राभात्" (६।४।२२), "पूर्वत्रासिद्धम्" (८।२।१) इत्यादीनि नैकानि सूत्राणि तादृशानि वर्तन्ते यत्र सूत्रपाठक्रम एव प्राधान्येनाश्रीयते। अत्र सूत्रपाठक्रमं विना किं पूर्वम्, किं परम्, किमाभात्, का त्रिपादी, का च सपादसप्ताध्यायी इत्यस्य ज्ञानं कदापि न संभवति; प्रक्रियाक्रमे सर्वेषां सूत्राणां प्रदेशदेशीयत्वेन क्रमस्याभावात्। अपि च प्रक्रियाक्रमे क एकसंज्ञाधिकारः, किमधिकारस्था भसंज्ञा, पदसंज्ञा कं देशमाश्रयति इत्यधिगमोऽष्टाध्यायीक्रमं विना न कयापि रीत्या भवितुमर्हति। किं च प्रक्रियाक्रमे सत्स्वपि पृथग् रूपेण संज्ञादिप्रकरणेषु न तत्र सङ्घटितानि सर्वाणि संज्ञादिविधायकसूत्राणि यथा अष्टाध्याय्यामेकत्रैव यथाक्रमं मुनिना विरचितानि सन्ति। तदित्थं हि इत्संज्ञाप्रकरणम्—

उपदेशेऽजनुनासिक इत् (१।३।२)
हलन्त्यम् (१।३।३)

---

१ द्र.- S. D. Joshi, "Two Methods of Interpreting Pāṇini", *JUP (HS)*, No. 23, 1966, pp. 53.

२. परि. शे (किलहॉर्नसंस्करणम्), भागः १, १९६२, पृ. २: "उद्देशमनतिक्रम्य इति यथोद्देशम्। उद्देश उपदेशदेशः। अधिकरणसाधनश्चायम्। यत्र देश उपदिश्यते तद्देश एव वाक्यार्थबोधेन गृहीतशक्त्या गृहीतपरिभाषार्थेन च सर्वत्र शास्त्रे व्यवहारः।"

३. परि. शे., भागः १, पृ. ५-६: "कार्यकालमित्यस्य च कार्येण काल्यते स्वसन्निधिं प्राप्यत इत्यर्थः। कार्येण स्वसंस्काराय स्ववृत्तिलिङ्गचिह्नितपरिभाषाणामाक्षेप इति यावत्। अत एव "पूर्वत्रासिद्धम्" (८।२।१) इतिसूत्रे भाष्ये... कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमित्युक्तम्।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न विभक्तौ तुस्माः (१।३।४)
आदिर्ञिटुडवः (१।३।५)
षः प्रत्ययस्य (१।३।६)
चुटू (१।३।७)
लशक्वतद्धिते (१।३।८)
तस्य लोपः (१।३।९)

एतदतिरिक्तमित्संज्ञाविधायकं सूत्रं कुत्राप्यन्यस्मिन् स्थलेऽष्टाध्याय्यां नोपलभ्यते। तथैव च णत्व-षत्व-कित्त्व-पित्त्व-प्रगृह्यसंज्ञाऽऽत्मनेपदप्रक्रिया-परस्मैपदप्रक्रिया-एकसंज्ञाधिकार-एकदेशाधिकारादीनि प्रकरणानि पाणिनीये समवायरूपेणैव यथास्थलमुपतिष्ठन्ते। प्रक्रियाक्रमेणाधीतं व्याकरणं छात्राणां स्मृतिपथात् शीघ्रं विलुप्यते। पुनः पुनर्घोषणेनापि तत् सत्वरमेव विस्मृतं भवति। परमष्टाध्यायीक्रमेण प्राप्तं ज्ञानं सूत्रपाठक्रमेणानुवृत्तिसंस्कारेण च चिरस्थायि अविस्मरणीयं भवति।

यदि पाणिनीयसूत्राणामध्ययनं विच्छिन्नरूपेण भवेत् तदा तानि टीकाकर्तॄणां स्पष्टीकरणं विना सर्वथा बोद्धुमशक्यानि भवन्ति।[1] तथा हि—सिद्धान्तकौमुद्यां "आद्गुणः" (६।१८७) इति सूत्रमच्सन्धौ व्याख्यातं वर्तते। अत्रास्य सूत्रस्य अधोलिखिता वृत्तिर्ग्रन्थकारेण निर्दिष्टा—

"अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् संहितायाम्" इति।

अस्यां वृत्तौ 'अचि, पूर्वपरयोः, एकः, संहितायाम्' इत्यादीनि पदानि कुतः समायातानि इत्यस्य ज्ञानं प्रक्रियाक्रमेण न जायते। अस्य सुस्पष्टये छात्रैः सूत्रेण सह वृत्तिरपि शुकवत् घोट्यते। परं तु अष्टाध्यायीक्रमेण छात्रैरेतेषां पदानां ज्ञानं सूत्रानुवृत्तिज्ञानेन सह सौकर्येण कर्तुं पार्यते। अत एव सूत्रक्रमपाठे तेषां वृत्तिस्मरणार्थं वृथैव परिश्रमो न कर्तव्यो भवति। भवति च तेषामष्टाध्यायीक्रमात् समयलाभः।

अष्टाध्यायीक्रमे लौकिकीप्रक्रिया वैदिकीप्रक्रिया इत्येव भेदो न वर्तते। स्वरवैदिकसूत्राणामर्थोदाहरणानि तत्तत्सूत्रस्थाने एव दीयन्ते। प्रक्रियाक्रमे च वैदिकसूत्राणां स्वरसूत्राणां च ग्रन्थस्यान्तिमे भागे संस्थापितत्वाद् बहुभिश्छात्रैस्तत्र यत्नो न क्रियते। अत उपेक्षितेषु तत्प्रकरणेषु कथं तत्र गतिः स्यादिति सर्वजनीनोऽयमनुभवः।

एतेऽष्टाध्यायीक्रमेणाधीतविषया वैयाकरणाः प्रक्रियाक्रमो दुरुपपादो बहुक्लेशावह इति प्रतिपादयन्ति। यथा—

---

१. BALLANTYNE, *Laghukaumudī*, preface, p. l.
तुलना— S. D. JOSHI, *JUP (HS)*, No. 23, 1966, p, 55.

२. द्र.- का. वृ. (शोभितमिश्रसम्पादिता, वाराणसी. १९५२), पृ. १४।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यच्छात्रं बहुभिर्दिनैः कतिपयैः क्रीडामनस्कैरपि,
स्वाचार्याश्रमवासिभिः सरलया रीत्या पुराधीयते ।
गुर्वर्थं परिपूर्णमुत्तमतया संक्षिप्तकायं च यत्,
तत्कीदृग् विपरीतरूपमधुना हा हन्त ! जोघुष्यते ।।
तदिदानीं महाकायं भीमरूपं गृहीतवत् ।
यद् दृष्ट्वा प्रपलायन्ते बालाः कोमलबुद्धयः ।।
योऽप्याग्रहेण पठति पाणिनिक्रमवर्जितम् ।
तदवश्यं स सम्पूर्णं यापयत्यत्र जीवितम् ।।
अयि विद्वद्वरा धीराः ! निजशिष्यायुषः क्षयम् ।
रात्रिन्दिवं जायमानं मनागपि न पश्यथ ।।
तस्मात् क्रमेण सूत्राणि पठनीयानि यत्नतः ।
अनुवृत्त्यादिसौकर्यात्तदथोऽपि न दुर्ग्रहः ।।
पाणिनीयपठनाय पाणिनेर्यः क्रमः स न कदापि हीयताम् ।
वृत्तिघोषणमहापरिश्रमान्मुक्तिरेव फलमस्य दृश्यताम् ।।[1] इति ।

किमर्थं पाणिनिना अष्टाध्याय्यां विशिष्टः सूत्रक्रमोऽनुसृतः ? लाघवार्थं पाणिनिः पूर्वसूत्रवर्तिनां शब्दानामुत्तरत्रावृत्तिं नेच्छति । सूत्रेष्वदृष्टाः शब्दा वाक्यपरिपूरणाय पूर्वसूत्रेभ्योऽनुवर्तनीया भवन्ति । तथा चावश्यकानां शब्दानामावृत्तिपरिहाराय पाणिनिः सूत्रेण पुष्पाणीव अनुवृत्त्या सूत्राण्येकत्र बध्नाति । तानीमानि सूत्राणि भिन्नभिन्नलक्ष्यानुग्राहणाण्यपि एकस्मिन् प्रकरणे पठितव्यानि भवन्ति । पुनः पुनस्तेषां शब्दानामावृत्तिपरिहाराय प्रकरणानुसारेण सूत्राणां विभागः समाश्रयणीयो भवति । सर्वाणि षत्वविधायकसूत्राण्येकत्र, सर्वाणि णत्वविधायकसूत्राण्येकत्रेत्येवं क्रम आश्रितः पाणिनिना । परं प्रक्रियाक्रमे लक्ष्यसिद्ध्यनुगुणस्य क्रमस्य महत्त्वेन प्रकरणभङ्गं विधाय तानीमानि सूत्राणि कदाचित् सुप्प्रकरणे कदाचित् तिङ्प्रकरणे निर्देष्टव्यानि भवन्ति ।

किं च परबलीयस्त्वस्थापनार्थं त्रिपाद्याः सपादसप्ताध्यायीदृष्ट्या असिद्धत्वप्रतिपादनार्थं च विशिष्टः क्रमः पाणिनेरनुसर्तव्यो भवत्यष्टाध्याय्याम् । परं प्रक्रियाक्रमे तत्तल्लक्ष्योपकारकाणि सूत्राणि प्रयोगदेशे स्थापनीयानि भवन्ति । परं यदा विभिन्नेष्वध्यायेषु विप्रकीर्णानि सूत्राणि विभिन्नेषु प्रकरणेषु निर्दिष्टानि भवन्ति तदा तेषां प्रकरणानुगुणोऽर्थः छात्रैर्ज्ञातुं न शक्यते । तदर्थं वृत्तिः स्मृत्युपारूढा कर्तव्या भवतीति महान् क्लेशः ।

परं कार्यकालपक्षगामिनः प्रक्रियाक्रमसमर्थकाः पण्डिता एवं स्वपक्षमण्डनं कुर्वन्ति । यदि वयमष्टाध्यायीक्रममनुसरेम, तर्हि यानि सूत्राण्यष्टाध्याय्यां विभिन्नेषु स्थ-

---

१. लघु कौ. (भीमसेनशास्त्री), भागः १, आत्मनिवेदनम्, पृ. १४-१५ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लेषु विप्रकीर्णानि सन्ति तेषां सूत्राणां प्रयोगनिष्पत्तौ सङ्कलनस्वरूपकार्यं कष्टप्रदं भवति। अनुवृत्त्यधिकारौ मनसि विधाय एकविषयानुबन्धिनामुत्सर्गापवादप्रतिप्रसवसूत्राणां यो विशिष्टः क्रमोऽष्टाध्याय्यां समाश्रितस्तस्य ज्ञानं शब्दसाधनार्थं न बहूपयुक्तं भवति। यतः षत्वणत्वविधायकेषु बहुषु सूत्रेष्वेकमेव सूत्रं कदाचित् तत्तल्लक्ष्यं संस्करोति। किं च शब्दसाधनार्थं विभिन्नेषु प्रकरणेषु विप्रकीर्णानां बहूनां सूत्राणां तत्तल्लक्ष्योपकारकाणामेकत्रापादनं कर्तव्यं भवति। परं यदि छात्रास्तत्तल्लक्ष्यसंस्कारकाणि एकप्रयोगसमवायीनि सूत्राणि कथमेकत्रानेयानीत्यस्मिन् विषये अनभ्यस्ताः स्युस्तर्हि पाणिनिसूत्राणां यत् लक्ष्यसाधकत्वं शब्दनिष्पादकत्वं वा वर्तते तच्छात्राणां मनसि कथं प्रतिबिम्बितं भवेत्।

तथा हि—पाणिनीये क्वचिद् ज्ञापकेन, क्वचिद् योगविभागेन, कुत्रचिद् व्याख्यानेन, क्वचन पदानामनुकर्षणेन, क्वचिद् मण्डूकप्लुत्या, क्वचित् परिगणनेन, एकत्र भाष्यार्थपरिशीलनेन, इतरत्र वार्त्तिकचिन्तनेन, अपरत्र च गणपाठादिसाधनेन ते तेऽर्थाः साधनीया दृश्यन्ते। तत्र "वृद्धिरादैच्" (१।१।१) इत्येवमादीनि संज्ञासूत्राणि कानिचन प्रथमेऽध्याये; "तत्पुरुषः" (२।१।२२) "संख्यापूर्वो द्विगुः" (२।१।५२) इत्येवमादीनि कानिचन द्वितीये; "सनाद्यन्ता धातवः" (३।१।३२) इत्यादीनि तृतीये; "पूर्वोऽभ्यासः" (६।१।४) इत्यादीनि च कानिचन षष्ठेऽध्याये वर्तन्ते। अनुवृत्त्यर्थं तेषां सूत्राणां तेषु तेषु प्रकरणेषु समावेशः कर्तव्यो भवति। अष्टाध्याय्यां समासविधायकसूत्राणि द्वितीयेऽध्याये वर्तन्ते। परं समासान्तप्रत्ययाः पञ्चमाध्याये प्रत्ययाधिकारे निवेशनीया भवन्ति। समस्ते पदे पूर्वोत्तरपदं निमित्तत्वेन स्वीकृत्य प्रवर्तमानानि सूत्राणि षष्ठाध्यायस्य तृतीये पादे निविष्टानि। अतः समासप्रकरणेन संबद्धं कार्यमष्टाध्याय्यां बहुत्र विच्छिन्नरूपेण वर्तते। अत एकप्रयोगसमवायिनां सूत्राणां कथं प्रयोगसिद्ध्यर्थमेकत्रापादनं कर्तव्यं भवति तज्ज्ञानमष्टाध्यायीक्रमेण सूत्राणामध्ययने न सिध्यति।

उपरिवर्णिता यथोद्देशपक्षस्वरूपा पूर्वा पद्धतिः (अष्टाध्यायीक्रमः) सूत्राणां तात्कालिकीं प्रायोगिकीमुपयोगितामविगणय्य यद्देशे सूत्राणि पठितानि तत्रैव तेषां वाक्यार्थं जनयति। कैयटमतेन[1] यः कोऽपि पाणिनिक्रमेणाष्टाध्यायीमधीते स केवलं

---

१. प्रदीपः (म. भा., भागः १, ऋज्जरसंस्करणम्, प्रथमसंस्करणम्), पृ. २१६: "यथोद्देशपक्षाश्रयेण परिहारः। कथं पुनरयं पक्षो यावता कार्यार्थत्वात् संज्ञापरिभाषस्य कार्यकालतैव न्याय्या। नैष दोषः। यदाऽनुद्दिश्य प्रयोजनविशेषं प्रयोजनमात्रमभिसंधाय 'भविष्यति किञ्चिदनेन प्रयोजनम्' इति संज्ञापरिभाषं प्रणीयते, तदा संभवत्येवायं पक्षो यथाश्रुतग्राहिप्रतिपत्रपेक्षः।" १।१।११.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूत्रस्य सामान्यार्थं वेत्ति। यथोद्देशपद्धत्या यदा सूत्राणां वाक्यार्थः क्रियते तदा कथमयं प्रयोगनिष्पादनक्षमो भवतीति ज्ञातुं न शक्यते, किं तु अग्रे संज्ञापरिभाषादिसूत्राणामुपयोगो भविष्यतीति मत्वैव तेषां वाक्यार्थः क्रियते। भविष्यति किञ्चिदनेन प्रयोजनमिति मत्वा ये केवलं जिज्ञासुबुद्ध्या सूत्राणां स्वीयप्रदेशे वाक्यार्थं कुर्वन्ति तेषां कृते यथोद्देशपक्षः। अनेन क्रमेण अध्ययनस्यैतत् प्रयोजनं यत् पाठकः सूत्राणां क्रममवगन्तुं समर्थो भवति। अष्टाध्यायीक्रमस्मरणेनानुवृत्तिज्ञानं भवति। तेन सूत्रार्थकरणे न क्लेशः। परमेवं स्थितेऽपि केषुचन स्थलेषु तत्तत्सूत्रार्थबोधं प्रति अन्येषां भिन्नप्रकरणस्थानां सूत्राणां ज्ञानमावश्यकं भवति। अतः कार्यकालपक्ष इव यथोद्देशपक्षेऽपि सूत्राणामेकवाक्यता कर्तव्या भवति। यथा "वृद्धिरादैच्" (१।१।१) इत्यस्य सुस्पष्टयेऽनेकेषामेतदुत्तरवर्तिसूत्राणामपि ज्ञानमनिवार्यत्वेनापेक्षते।

कार्यकालपक्षः (प्रक्रियाक्रमः)—कथं पाणिनिसूत्राणां प्रयोगसिध्यर्थमुपयोगः कर्तव्यः; किं वा पाणिनिसूत्राणां मूर्धाभिषिक्तं प्रयोजनमिति प्रदर्शयति। यावद् अष्टाध्यायीक्रममाश्रित्य सूत्रार्थस्य ज्ञानं च परिपूर्णं भवति तावत् तस्य सूत्रस्य सूत्रान्तरैः साकं प्रयोगनिष्पादकं प्रयोजनं नोपलभामहे।

अनेन प्रकारेण महाभाष्ये पद्धतिद्वयस्योल्लेख उपलभ्यते।[1] तत्रैव च महाभाष्यकारेण लिखितं यत् कार्यकालपक्षे सूत्राणां निर्धारितः क्रमः परिवर्तते। भाष्ये १।१।१२ सूत्रविवेचनावसरे लिखितं यद् यद्यपि १।१।११, १।१।१२ द्वे अपि प्रगृह्यसंज्ञासूत्रे "एचोऽयवायावः" (६।१।७८ इदं सूत्रमयादीनां विधानं करोति) इत्यस्मात् सूत्रात् पूर्वभाविनी तथापि इमे संज्ञासूत्रे "प्लुतप्रगृह्या अचि नित्यम्" (६।१।१२५) इत्यनेन सहैकवाक्यतापन्ने भवतः। संज्ञासूत्राणां स्वदेशेन न पृथग् वाक्यार्थः, किं तु विधिसूत्रेण सहैव। इमे (१।१।११,१२) संज्ञासूत्रे स्वदेशं त्यक्त्वा विधिसूत्रदेशं नाम प्रकृतिभावसूत्रदेशं समाश्रयतः। अतश्चात्र संज्ञासूत्रं कार्यकालपक्षे "प्लुतप्रगृह्या अचि नित्यम्" (६।१।१२५) इति सूत्रेण सह संबद्धमस्ति।[2]

---

१. म. भा. (किलहॉर्नसंकरणम्), भागः १, सूत्रं १।१।११, पृ. ६६ : "एवं तर्हि किं न एतेनकार्यकालसंज्ञापरिभाषमिति। यथोद्देशमेव संज्ञापरिभाषम्।"
अपि च *Ibid*, सूत्रं १।१।१२, वार्त्तिकं ३, पृ. ६८ : "एवं तर्हि परैव प्रगृह्यसंज्ञा। कथम्। कार्यकालं हि संज्ञापरिभाषम्। यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्।"

२. *Ibid*, पृ. ६८ : "विप्रतिषेधे परमित्युच्यते। पूर्वा च प्रगृह्यसंज्ञा परेऽयादयः। परा प्रगृह्यसंज्ञा करिष्यते। सूत्रविपर्यासः कृतो भवति। एवं तर्हि परैव प्रगृह्यसंज्ञा। कथम्। कार्यकालं हि संज्ञापरिभाषम्। यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। प्रगृह्याः प्रकृत्येत्युपस्थितमिदं भवति अदसो मादिति।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र यथोद्देशपक्षः सूत्रार्थस्थापनार्थम्, अष्टाध्यायीसूत्ररचनाज्ञानार्थमुपयुक्तः। परं कार्यकालपक्षः कथं सूत्राणामेकवाक्यताद्वारा प्रयोगनिष्पादकत्वं भवति तद्दर्शयति।

अनया रीत्या अष्टाध्याय्या अध्ययनं द्वाभ्यां प्रकाराभ्यां कर्तुं शक्यते। प्रथमपद्धतौ प्रतिसूत्रार्थज्ञानं स्वातन्त्र्येण लभ्यते। द्वितीयस्यां पद्धतौ सूत्राणां सामूहिकं प्रयोगनिष्पादनसामर्थ्यमस्मद्बुद्धिप्रविष्टं भवति।

किं बहुना। यन्त्रं कियत्, कथं कार्यं करोतीत्येतत्परिज्ञानाय यन्त्रस्य घटकीभूतानामवयवानां प्रत्यवयवं किं कार्यं वर्तत इत्येतज्ज्ञानमावश्यकम्। तथा च यन्त्रस्य प्रत्यवयवं ज्ञानमावश्यकम्, एवमेव यन्त्रस्य समुदायरूपेण ज्ञानमावश्यकम्; तथैव पाणिनेरष्टाध्याय्या अपि। पृथक्तया प्रतिसूत्रज्ञानमावश्यकम्, तथैव सूत्राणामेकवाक्यतां विधाय कथं तेषां व्यापृत्तिः प्रयोगनिष्पादनाय भवतीति ज्ञानमप्यावश्यकम्।[१]

अत एव अष्टाध्यायीक्रमः प्रक्रियाक्रमश्च द्वावपि न परस्परविरोधिनौ मार्गौ। अपि तु द्वयोः समावेश एव अष्टाध्याय्याः संपूर्णतया ज्ञानं भवेन्नान्यथा।

१, S. D. Joshi, *JUP (HS)*, No. 23, 1966, p. 56;
"It can be stated that Pāṇini's system can be compared to a complicated machine, since the study of the isolated rules in his system, is as important as the study of the working of the isolated part of the complicated machine."

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्थं प्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकायां पाणिनीयेतरव्याकरणपरम्पराणां प्रभावः, सिद्धान्तकौमुद्यां मुनित्रयानुक्तस्याप्रमाणत्वम् ।

अष्टाध्याय्यां येषां प्रयोगाणां साधुत्वं पाणिनिप्रणीतसूत्रैर्नाजायत, ये च तदुत्तरवर्तिकाले प्रचलिताः समभवन्, तेषां साधुत्वप्रतिपादनाय आचार्यकात्यायनेन यथास्थलं वार्त्तिकानि संग्रथितानि । कात्यायनानन्तरं बहूनां प्रयोगाणां सिद्धये आचार्यपतञ्जलिरपि भूयांसि इष्टिवचनानि प्रणिनाय । पाणिनिव्याकरणपरम्परायामस्य मुनित्रयस्य वचांसि बहुकालपर्यन्तं प्रमाणितान्यभवन् । मुनित्रयेण तत्सर्वैः प्रमाणीकृतम् । परं काशिकाकालेऽस्यां परम्परायां पुनरप्येकं नूतनं परिवर्तनं संजातम् ।

काशिकाया अध्ययनेनैतज्ज्ञायते यदस्याः कर्तारौ पाणिनिप्रणीतसूत्रैः साकं कतिवारं पाणिनीयेतरव्याकरणपरम्परासूत्राण्यपि व्याचख्यतुः । अत एवास्याः कर्तृभ्यामस्यां वृत्तौ मुनित्रयेणानुक्तानां केषाञ्चित् प्रयोगाणामपि समावेशोऽकारि । तानीमानि नूतनप्रयोगसिद्धिकराणि वचनानि द्विविधानि वर्तन्ते । पूर्वतनेषु व्याकरणग्रन्थेष्वपठितान्यपि प्रयोगबाहुल्यादुपन्यस्तानि वा मुनित्रयेणापठितान्यपि पाणिनीयेतरव्याकरणपरम्पराभ्यो गृहीतानि वा । ये शब्दास्तदा भाषायां प्रयुक्ताः पूर्वव्याकरणग्रन्थैश्चासंगृहीतास्तेषां सिध्यर्थं काशिकाकर्तृभ्यां स्वीकृतानि नूतनान्येव वचनानि अत्रोपदिष्टानीति तत्तत्सूत्रव्याख्यानावसरे हरदत्तमिश्रमहोदया वारम्वारं प्रतिपादयन्ति ।[1] परमस्मिन् प्रकरणे पाणिनीयेतरव्याकरणपरम्पराणां प्रभावः कथं काशिकायां वृत्तौ वर्तते तदेव केवलं तुलनात्मकरूपेण प्रस्तूयते । काशिकाकृत्प्रणीतानां स्वतन्त्रवचनानां विचारोऽस्मिन् प्रकरणे नाभिप्रेतः ।

ख्रिष्टाब्दस्य ५१० तः ६५० पर्यन्तं काशिकाया रचनाकाल इति मया पूर्वमेवोक्तम् । तथा च शब्दशास्त्रे पाणिनीयेतरव्याकरणपरम्परानुगामिनी द्वे व्याकरणे काशिकातः पूर्ववर्तिनी भवितुमर्हतः । ते हि कातन्त्र-चान्द्रव्याकरणे । जैनेन्द्रव्याकरणं तु काशिकापूर्ववर्तित्वेन नाङ्गीकृतम्; यतस्तत् काशिकायाः समकालिकमेव (ख्रिष्टाब्दस्य

---

१. प. म. १।२।५९: "भाष्यवार्त्तिकयोरपठितमपि शिष्टप्रयोगदर्शनात् पठितम् ।"
प. म. २।३।३२: "असत्यपि मुनित्रयवचने प्रयोगबहाहुल्यादेवं व्याख्यातम् ।"
प. म. ५।१।५४: "अङ्गगात्र इत्यादिभाष्येऽनुक्तमप्येतत् प्रयोगबाहुल्याद् वृत्तिकारेणोक्तम् ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षष्ठशके) वर्तत इति विदुषां मतम् ।[1] अपि च काशिकायां जैनेन्द्रव्याकरणस्य प्रभावो वर्तते न वेत्यत्रापि विदुषां वैमत्यं वर्तते ।[2] एवं स्थिते जैनेन्द्रव्याकरणविषये किमप्येकान्ततया वक्तुं न पार्यते । किं च जैनेन्द्रव्याकरणे पाणिनिसूत्राण्येव शब्दविपर्ययं कृत्वोपदिष्टानि । नास्ति तेषु किमपि नूतनत्वम् । अपि च जैनेन्द्रव्याख्याकृता अभयनन्दिना तु सूत्रव्याख्यानावसरे प्रायः काशिकैवानुगतेत्यपि वक्तुं शक्यते अतः काशिकाया उपरि जैनेन्द्रव्याकरणस्य प्रभाव इति नानुमन्यन्ते विद्वांसः ।

कातन्त्रव्याकरणं लौकिकभाषाया एव लघुतरं व्याकरणं भूत्वापि पाणिनिपरम्परायामनुक्तान् काँश्चिद् नवीनान् प्रयोगान् प्रस्तौति । एतेषां समावेशः काशिकायां वृत्तौ कातन्त्रव्याकरणस्य नामनिर्देशं विना कृतो वर्तते । कातन्त्रव्याकरणं ख्रिष्टाब्दस्य प्रथमशतकादूर्ध्वं चतुर्थशतकपर्यन्तं विरचितमासीत् ।[3] एतद्व्याकरणोपरि दुर्गसिंहेन विरचिता टीकापि काशिकातः पूर्ववर्तिनीति युधिष्ठिरमीमांसकमहोदयानां मतम् ।[4] तदनुसृत्य कातन्त्रदुर्गसिंहटीकायाः कथं काशिकायां प्रभावस्तत् प्रतिपादयिष्यते ।

चान्द्रव्याकरणस्य बौद्धसम्प्रदायानुगामित्वेऽपि तस्य पाणिनिपरम्पराया नातिदूरवर्तित्वम् । चान्द्रव्याकरणस्य काशिकावृत्त्या तुलनायां कृतायामिदमेव दृढीभवति यत् काशिकाकृद्भ्यां चान्द्रव्याकरणस्य निर्देशं विनैव स्वीयायां वृत्तौ चान्द्रात् साहाय्यं गृहीतं वर्तते । यदि चास्य व्याकरणस्य स्वरविषयको विलुप्तो भाग उपलब्धोऽभविष्यत्तदा काशिकावृत्तेः स्वरसूत्रव्याख्यानेष्वपि एतद्व्याकरणस्य प्रभावो बोधयितुं सुकरोऽभविष्यत् । चान्दव्याकरणं काशिकातः पूर्ववर्तीत्यस्मिन् विषये न केनापि शङ्कितव्यम् । चान्द्रव्याकरणं हि चन्द्रगोमिनामकेन बौद्धपण्डितेन ख्रिष्टाब्दस्य पञ्चतशके विरचितमिति एस. के. बेलवेलकर[5]-के.वी. अभ्यंकर[6]-प्रभृतीनां मतं वर्तते । डॉ.बी. लिबिशमहोदयमतेन[7] चन्द्राचार्यस्य कालो गुप्तवंशशासनसमयादारभ्य ख्रिष्टाब्दस्य ६५० शतकपर्यन्तं भवितुमर्हति । परं भर्तृहरिप्रणीते वाक्यपदीये चन्द्राचार्यस्योल्लेखात्[8] स

---

१. द्र.- जै. व्या. (जैनेन्द्रमहावृत्तिसहितम्), भूमिकाभागः, देवनन्देः समयः, पृ. २९-३२ ।

२. द्र.- I. S. PAWATE, *The Structure of the Aṣṭādhyāyī*, Introduction, pp. 10-11.

३. S. K. BELVALKAR, *Systems of Sanskrit Grammar*, p. 83.

४. युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १, प्रथमसंस्करणम्, पृ. ४०८-४०९ ।

५. *Systems of Sanskrit Grammar*, p. 58.

६. *A Dictionary of Sanskrit Grammar*, p. 140.

७. B. LIEBICH, "The Chandra- Vyakarana", *IA*, Vol. xxv, p. 105.

८. द्र.- वा. प. (BORI, 1965), कारिका ३।४८३.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(चन्द्रगोमी) भर्तृहरेः पूर्ववर्ती । एवञ्चाधुनिकैः समीक्षकैर्भर्तृहरेः समयः खिष्टाब्दस्य पञ्चमशतके निर्धारितः ।[1] यतश्च वाक्यपदीयस्य नामग्रहणं काशिकायामुपलभ्यते,[2] अतश्चन्द्रगोमी भर्तृहरिश्च द्वावपि काशिकातः पूर्ववर्तिनावास्तामिति सुनिश्चितम् ।[3]

उपरिनिर्दिष्टेन कालक्रमेण कातन्त्रं चान्द्रं च द्वे अपि काशिकातः पूर्ववर्तिनी । काशिकाया उपरि अनयोर्व्याकरणयोः प्रभावो द्विविधो वर्तते । प्रथमतो मुनित्रयवचनेन ये प्रयोगा न सिध्यन्ति, येषां कृते च कातन्त्रे चान्द्रे वा वचनं वर्तते; तेषां कृते काशिकायामपि नूतनान्येव वार्त्तिकानि प्रणीतानि वर्तन्ते । एतेषां प्रयोगाणां साधनविधौ महाभाष्यमविगणय्य चान्द्रव्याकरणमेव काशिकया प्राधान्येनानुसृतम् । तत्सर्वमुदाहरण-मुखेनाधस्ताद् निर्दिश्यते ।

काशिकायाम् "इन्धिभवतिभ्यां च" (१।२।६) इत्यस्मिन् सूत्रे "श्रन्थिग्रन्थि-दम्भिस्वञ्जीनामिति वक्तव्यम् । श्रेथतुः, श्रेथुः । ग्रेथतुः, ग्रेथुः । देभतुः, देभुः । परिष्वस्वजे, परिष्वस्वजाते" इति व्याख्यानं समुपलभ्यते । अत्र सिद्धान्तकौमुदीकारः कथयति "श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा, इति व्याकरणान्तरम् । देभतुः । सस्वजे इति भाष्योदाहरणादेकदेशानुमत्या इहाप्याश्रीयते"[4] इति । बालमनोरमाकारोऽ-प्येवमेव स्वीकरोति । परन्तु व्याकरणमिताक्षराकारेण अन्नंभट्टेन अस्मिन् विषये "भाष्यवार्त्तिकयोरदर्शनान्मतान्तरमेतदित्याहुः"[5] इति विलिख्यास्य मतान्तरत्वमेव

---

१. K. A. S. AIYER, *Vākyapadīya*, chapter I, p. 2.

२. का. वृ ४।३।८८: "शब्दार्थसम्बन्धीयं प्रकरणं वाक्यपदीयम् ।"

३ चान्द्रव्याकरणस्य तद्वृत्तेश्च प्रणेता एकोऽथवा अन्यः कश्चिदित्यस्मिन् विषये विदुषां वैमत्यं वर्तते । तत्र डॉ. लिबिशमहाभागाः काशिकोपरि चान्द्रव्याकरणस्य प्रभावं स्वीकुर्वन्ति । परं के. सी. चटर्जीमहोदयसम्पादितेन चान्द्रव्याकरणसंस्करणेन तत्र तत्र काशिकाया एव प्रभावश्चान्द्रे ज्ञायते । अतश्चान्द्रव्याकरणस्य को वृत्तिकर्तेति विवादास्पदम् । एतदधिकृत्य रॉबर्ट-बिर्वेमहाभागैरेकं शोधपत्रं लिखितम् । तत्र तैः के. सी. चटर्जीमहाभागमतम-स्वीकृत्य प्रमाणान्तरैः डॉ. लिबिशमहाभागमतमेव समर्थितम् । तेषां मतेन चान्द्रव्याकरणस्य त्रयो वृत्तिकर्तारः । तेषु आदितश्चतुर्थाध्यायपर्यन्तभागस्य स्वयं ग्रन्थकर्ता एव वृत्तिकर्ता, परं पञ्चमषष्ठाध्याययोर्द्वौ वृत्तिकर्तारौ । तौ च ग्रन्थकाराद् भिन्नौ । द्र.- R. BIRWE, "Is Candragomin the Author of Cāndra-Vṛtti ?", *Mélanges Dindeche* (Paris, 1968). p. 127-142.

४. द्र.- सि. कौ. (मोतीलालबनारसीदाससंस्करणम्, १९६०), भागः ३, पृ. २०१-२०२; ३०१; ३३० ।

५. व्या. मि. १।२।६.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संसूचितम् । भाषावृत्तिकारश्च स्पष्टतया अत्र जयादित्यस्योल्लेखं करोति ।[1] कातन्त्रं तु "तृफलभजत्रपश्रन्थिग्रन्थिदन्भीनां च" (३।४।५४), "परोक्षायामिन्धिश्रन्थिग्रन्थिदन्भीनामगुणे" (३।६।३) इति सूत्रद्वयेन 'श्रेथतुः, ग्रेथतुः, देभतुः' इत्यादीनि रूपाणि साधयति । चान्द्रव्याकरणेऽपि "लिटीन्धिश्रन्थग्रन्थाम्" (५।३।२५), "दम्भस्सनि च" (५।३।२६), "स्वञ्जः" (५।३।२७) इत्येतेषु सूत्रेषु इमानि सर्वाणि रूपाणि समुपलभ्यन्ते ।

काशिकायां "द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्" (२।२।३) इत्यत्र "तुरीयशब्दस्यापीष्यते । तुरीयं भिक्षायाः, तुरीयभिक्षा । भिक्षातुरीयं वा" इति विवेचनम् । महाभाष्ये सिद्धान्तकौमुद्यां च नैतदुपलभ्यते । शब्दकौस्तुभे तु "तुरीयस्यापीष्यते इति वृत्तिकाराः । एतच्च भाष्यादौ नास्ति" इति विलिख्येदं वृत्तिकृद्वचनं स्वीकृतम् । व्याकरणमिताक्षरायां[2] त्विदं कौमुदीकारस्य (प्रक्रियाकौमुदीकारस्य) वचनत्वेन निर्दिष्टम् । परं कातन्त्रव्याकरणस्य "पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः" (२।५।५) इत्यधस्ताद् दुर्गसिंहवृत्तौ, चान्द्रव्याकरणे च "विशेषणमेकार्थेन" (२।२।१८) इत्यत्र "तुरीयभिक्षा, भिक्षातुरीयम्" इत्यादिपाठदर्शनात् तयोरेवान्यतरस्य प्रभावः काशिकायां प्रतीयते ।

काशिकायां "चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः" (२।३।७३) "अत्रायुष्यादीनां पर्यायग्रहणं कर्तव्यम् । शं देवदत्ताय, शं देवदत्तस्य । ...प्रयोजनं देवदत्ताय, प्रयोजनं देवदत्तस्य ।... पथ्यं देवदत्ताय, पथ्यं देवदत्तस्य" इत्यादिकं व्याख्यानं समुपलभ्यते । महाभाष्येऽस्यानुपलब्धिः ।[3] सिद्धान्तकौमुदीकारोऽत्र "व्याख्यानात् सर्वत्रार्थग्रहम् । मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः" इति वचनेन काशिकायाः समर्थनं करोति । चान्द्रव्याकरणे तु "आशिष्यायुष्यभद्रार्थकुशलार्थैश्च" (२।१।९८) इत्यस्य वृत्तौ काशिकाभिमतमेव व्याख्यानमुपलभ्यते । अतोऽस्यैव काशिकायां वृत्तौ प्रभावः प्रतिभाति ।

काशिकायाम् "एतिस्तुशास्वृदृजुषः क्यप्" (३।१।१०९) इत्यस्य वृत्तौ "शंसिदुहिगुहिभ्यो वेति वक्तव्यम्" इति वक्तव्यं दृश्यते । सिद्धान्तकौमुद्यामस्मिन् सूत्रे "शंसिदुहिगुहिभ्यो वेति काशिका" इति वचनेनास्य महाभाष्यानुक्तत्वं प्रकटीकृतम् । एवमेव शब्दकौस्तुभेऽपि ।[4] दुर्गसिंहवृत्तौ "कृवृषिमृजां वा" (४।२।२८) इत्यत्र

---

१. भा. वृ. १।२।६: "अत्रेष्टिः- श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति जयादित्यः ।"

२. व्या. मि. २।२।३: "तुरीयस्यापीति कौमुद्याम् ।"

३. अ. भा (दयानन्दसरस्वती), भागः १, सू. २।३।७३: "अत्र काशिकायाम्— अत्रायुष्यादीनां पर्यायग्रहणं कर्तव्यमिति वार्त्तिकम् । महाभाष्ये त्वत्रेदं न दृश्यते ।"

४. श. कौ. ३।१।१०९: "एतच्च वृत्तावेव स्थितम् । भाष्ये तु नास्ति ।"
तुलना- प. म. ३।१।१०९: "भाष्ये एतदुपसङ्ख्यानं न दृष्टम् ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकानुसारि व्याख्यानमुपलभ्यते । चान्द्रव्याकरणे च "कृवृषिमृजिशंसिदुहिगुहः" (१।१।१२५) इत्यस्मिन् सूत्रे काशिकोक्तं वचनं स्पष्टतया परिलक्ष्यते । तस्मात्तयोरेवान्यतरस्य काशिकायां प्रभावः ।

काशिकायां "विभाषा ग्रहः" (३।१।१४३) इत्यत्र "भवतेश्चेति वक्तव्यम् । भवतीति भावः भवः" इति व्याख्यातम् । अत्र सिद्धान्तकौमुदीकारेण "भवतेश्चेति काशिका" इत्युक्तम् । तथैव शब्दकौस्तुभेऽपि "एतद्वक्तव्यं भाष्यं नास्ति" इति वचनेन काशिकानिर्दिष्टस्य वचनस्य महाभाष्यानभिमतत्वमेव प्रकटीकृतम् । चान्द्रव्याकरणे हि "भुवो वा" (१।१।१५१) इत्यनेन णस्य विकल्पविधानात् (भवतेर्णो वा भवति । भावः, भवः) काशिकानिर्दिष्टस्य मतस्य मूलं चान्द्रव्याकरणमेव प्रतिभाति ।

काशिकायां "फलेग्रहिरात्मम्भरिश्च" (३।२।२६) इत्यस्य वृत्तौ "अनुक्तसमुच्चयार्थश्चकारः । कुक्षिम्भरिः, उदरम्भरिः" इति पाठो दृश्यते । परं महाभाष्येऽत्र 'उदरम्भरिः' इति प्रयोगसिद्धये किमपि विधानं नास्ति ।[1] सिद्धान्तकौमुदीकारस्तु प्रथमं चकारेण 'कुक्षिम्भरिः' इति प्रयोग संसाध्य पुनरग्रे 'उदरम्भरिः' इति सिद्धये "चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठुः" इति वचनेन चान्द्रव्याकरणोद्धृतं सूत्रं निर्दिशति । दुर्घटवृत्तावप्येतादृशं[2] (सिद्धान्तकौमुदीसंमतं) चान्द्रव्याकरणस्वरूपं निर्दिष्टं वर्तते । परन्तु साम्प्रतं चान्द्रव्याकण एतादृशं सूत्रस्वरूपं कुत्रापि नोपलभ्यते । तत्र तु "फलेग्रहिरात्मम्भरिः कुक्षिम्भरिः" (१।२।१०) इत्येव सूत्रम् । कातन्त्रे "आत्मोदरकुक्षिषु भृञः खिः" (४।३।३९) इति पाठात् काशिकानिर्दिष्टानि सर्वाणि रूपाणि कातन्त्रमूलान्येव प्रतीयन्ते ।

काशिकायां "पूः सर्वयोर्दारिसहोः" (३।२।४१) इत्यधः "भगे च दारेरिति वक्तव्यम् । भगन्दर." इति व्याख्यातम् । भाष्यादावदृष्टत्वादिदं शब्दकौस्तुभे सिद्धान्तकौमुद्यां च[3] भट्टोजिदीक्षितेन काशिकावचनत्वेनैव स्वीकृतम् । कातन्त्रस्य २।१।२९ सूत्रे दुर्गसिंहवृत्ताविदं समुपलभ्यते । तथैव चान्द्रे १।२।२० सूत्रे 'भगं दारयतीति भगन्दरः इति व्याख्यानम् । तस्मात्तयोरेवान्यतरस्य काशिकायां प्रभावः ।

---

१. म. भा. ३।२।२६: "आत्मंभरिरिति किं निपात्यते। आत्मनो सुम्भृञश्चेन्प्रत्ययः । अत्यल्पमिदमुच्यते ।
भृञः कुक्ष्यात्मनोर्मुम् च (वा) । भृञः कुक्ष्यात्मनोर्मुम् चेति वक्तव्यम् । कुक्षिम्भरिः । आत्मम्भरिश्चरति यूथमसेवमानः ।"

२. द्र - दु. वृ. ३।२।२६.

३. श. कौ. ३।२।४१: "भगे च दारेरिति वक्तव्यमिति काशिका । 'भाष्यादावदृष्टमपीदं बाहुलकेन लभ्यते ।"
अत्र सि. कौ. अपि द्रष्टव्या ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"कर्मणि हनः" (३।२।८६) इत्यत्र काशिकायां वृत्तौ "कुत्सितग्रहणं कर्तव्यम्, इह मा भूत्—चौरं हतवान् इति" इत्यादिकं विवेचनमुपलभ्यते। सिद्धान्तकौमुद्यामस्यानुपब्धिः। परं शब्दकौस्तुभेऽत्र भट्टोजिदीक्षितेन लिखितम्—"अत्र काशिका—कुत्सितग्रहणं कर्तव्यम्, इह मा भूत्-चौरं हतवान् इति। यद्यपीदं भाष्ये नास्ति तथापि शक्तिस्वभावाल्लभ्यत इति भावः" इति। एतादृशमेव तत्त्वबोधिन्यां व्याख्यानं वर्तते।[1] कातन्त्रे "कर्मणि हनः कुत्सायाम्" (४।२।८२) इति स्पष्टमेव काशिकावचनपुष्टिकरं सूत्रम्। चान्द्रेऽपि "हनः कुत्सायाम्" (१।२।६४) इत्यस्मिन् स्पष्टतया कुत्सितग्रहणं वर्तते। तथा चास्यैव सूत्रस्य व्याख्याने 'कुत्सायामिति किम्—चौरं हतवान्' इति चान्द्रे प्रत्युदाहरणं दृश्यते। अतः कातन्त्रचान्द्रयोरेवात्र काशिकायां प्रभावः।

"भुवश्च" (३।२।१३८) इत्यत्र काशिकायां वृत्तौ "चकारोऽनुक्तसमुच्चयार्थः। भ्राजिष्णुना लोहितचन्दनेन" इति व्याख्यानं प्राप्यते। महाभाष्ये इदमनुपलब्धम्। सिद्धान्तकौमुद्यां तु "चकारोऽनुक्तसमुच्चयार्थः। भ्राजिष्णुरिति वृत्तिः। एवं क्षयिष्णुः। नैतद् भाष्ये दृष्टम्" इति निर्दिष्टम्। व्याकरणमिताक्षरायां[2] शब्दकौस्तुभेऽपि[3] चास्य भाष्यानुक्तत्वं स्वीकृतम्। परन्तु कातन्त्रे 'भ्राजिष्णुः' इति प्रयोगः "भ्राज्यलङ्कृञ्-" (४।४।१६) इत्यादिना जायते। तथा च चान्द्रेऽपि "प्रजनरुच्यपत्रपवृधुसहचरभ्राजः" (१।२।६२) इत्यनेन लोके[4] सिध्यति।

"स्वपितृषोर्नजिङ्" (३।२।१७२) इति सूत्रे काशिकायां "धृषेश्चेति वक्तव्यम्। धृष्णक्" इति व्याख्यानमुपलभ्यते। अस्य महाभाष्ये पाठोऽनुपलब्धः। सिद्धान्तकौमुदीकारस्त्विदं वचनं काशिकावाक्यत्वेन स्थापयति। यथा "धृषेश्चेति वाच्यमिति काशिकादौ" इति। तथैव च शब्दकौस्तुभेऽपि।[5] चान्द्रव्याकरणे तु 'धृष्णक्' इति प्रयोगो नोपलभ्यते। परं कातन्त्रे "तृषिधृषिस्वपां नजिङ्" (४।४।५४) इत्यनेन उपरिकथितप्रयोगस्य सिद्धिः। एतेन प्रमाणेन "धृष्टे धृष्णक् वियातश्च"[6] इत्यमर-

---

१. त. बो. ३।२।८६: "अत्र काशिका—'कुत्सितग्रहणं कर्तव्यमिह मा भूत्—चोरं हतवान्' इति। यद्यपीदं भाष्ये नास्ति तथापि शब्दशक्तिस्वाभाव्यादिदं लभ्यत इत्याहुः।"

२. व्या. मि. ३।२।१३८: "चकारात् भ्राजिष्णुनेति लोकेऽप्युदाहृतं काशिकायाम्, तत्तु भाष्यानुक्तम्।"

३. द्र - श. कौ. ३।२।१३८.

४. 'भ्राजिष्णुः' इत्यस्य प्रयोगो लोके बहुत्र वर्तते। यथा—
रघु. १६।६९: भ्राजिष्णुना सातिशयं विरेजुः।
म. भारते, द्रोण. ९४।१५: भ्राजिष्णु वक्त्रं निचकर्त देहात्।

५. श. कौ. ३।२।१७२: "धृषेश्च इति काशिका। धृष्णक्।"

६. अमर. (विशेष्यनिघ्नवर्ग) ३।२५; प. ३५६.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कोशवचनं काशिकाकृद्व्याख्यानं च सार्थकं जायते ।

काशिकायां "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" (४।१।५४) इत्यत्र "अङ्ग-गात्रकण्ठेभ्य इति वक्तव्यम्" इति वर्तते । महाभाष्ये एतन्नोपलभ्यते । तथा च सिद्धान्तकौमुद्यामस्मिन् विषये लिखितम्—"अत्र वृत्तिः—अङ्गगात्रकण्ठेभ्यो वक्तव्यम् । स्वङ्गी, स्वङ्गेत्यादि । एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित् । भाष्याद्यनुक्तत्वादप्रमाणमिति प्रामाणिकाः" इति । एतादृशमेव विवेचनं भट्टोजिदीक्षितेन शब्दकौस्तुभेऽपि कृतम् ।[१] इदं वक्तव्यं प्रयोगबाहुल्याद् वृत्तिकारेणोपन्यस्तमिति पदमञ्जर्यां भावः ।[२] भाषावृत्तौ त्विदं मतान्तरत्वेन प्रदर्शितम् ।[३] बालमनोरमाकारः सिद्धान्तकौमुदीमेव समर्थयति ।[४] परं चान्द्रव्याकरणे "नासिकोदरौष्ठजङ्घादन्तकर्ण-शृङ्गगात्रकण्ठात्" (३।२।६२) इति सूत्रं वर्तते । तदेव च काशिकानिर्दिष्टवार्त्तिकस्योत्पत्तिस्थलं प्रतिभाति ।[५]

काशिकायां "पङ्गोश्च" (४।१।६८) इत्यस्य वृत्तौ "श्वशुरस्योकाराकार-लोपश्च वक्तव्यः । श्वश्रूः" इति व्याख्यातम् । भट्टोजिदीक्षितस्यास्मिन् विषये नास्ति कोऽपि भेदः । परं महाभाष्ये एतादृशं किमपि व्याख्यानं नोपलभ्यते ।[६] चान्द्रे तु "पङ्गू श्वश्रूः" (२।३।७८) इत्यनेन 'श्वश्रूः' इति रूपं व्युत्पाद्यते । तस्यैव काशिकादिषु प्रभावः प्रतिभाति ।[७]

---

१. द्र.- श. कौ. ४।१।५५.

२. प. म. ४।१।५४: "अङ्गगात्र इत्यादि भाष्येऽनुक्तमप्येतत् प्रयोगबाहुल्याद् वृत्तिकारेणोक्तम् ।"

३. भा. वृ. ४।१।५४: "अङ्गगात्रनेत्रकण्ठेभ्योऽपि वेत्येके ।"

४. बा. मनो. ४।१।५५: "वृत्तिग्रन्थस्य मूलं दर्शयति – एतच्चेति । प्रामाणिका इति । एवं च तन्वङ्गी, सुगात्री, कलकण्ठी इत्यपभ्रंशा एवेति भावः ।"

५. डॉ. किलहॉर्नमहोदयेन काशिकायां वृत्तौ अधोलिखितेषु सूत्रेषु चान्द्रव्याकरणस्य प्रभावः स्वीकृतः । तानि चेमानि—
४।१।५४, ६५, ८५, १५६; ४।२।४२; ४।३।८, १४४; ४।४।२९, ७८, १०१; ५।१।१२, ९४, १२६, १३१; ५।१।१२८; ५।३।१२; ७।२।४८, ४७; ७।३।१७, सुस्पष्टये द्र.- F.KIELHORN,*IA*, Vol. xv, pp. 183-185.

६. बा. मनो. ४।१।६८: "श्वशुरस्येति । वृत्त्यादौ पठितमिदम् ।... वस्तुतस्तु 'श्वशुरस्य-' इति वचनममूलकमेव भाष्ये अदृष्टत्वात् "ङ्याप्प्रातिपदिकात्" इति सूत्रस्थभाष्यविरोधाच्च ।··· तथा च श्वश्रूरित्यव्युत्पन्नं प्रातिपदिकमिति शब्देन्दुशेखरे स्पष्टम् ।"

७. द्र.- उपरिनिर्दिष्टा टिप्पणी ५ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" (४।१।८५) इत्यस्य वृत्तिभागे काशिकायां "यमाच्चेति वक्तव्यम्। याम्यः" इति पाठो निर्दिष्टः। भट्टोजिदीक्षितेनायं शब्दकौस्तुभे सिद्धान्तकौमुद्यां च काशिकाविरचित एव स्वीकृतः।[१] चान्द्रव्याकरणे "दित्यदित्यादित्ययमाण्ण्यः" (२।४।२) इत्यनेन 'याम्यः' इति प्रयोगो निष्पाद्यते। तथापि—पाणिनिपरम्परायां 'याम्यः'[२] इति प्रयोगसिद्धये किमपि विधानं नासीत्। तद्दृष्ट्वा काशिकायामस्य समावेशश्चान्द्रव्याकरणात् कृत इत्येव वक्तुमुचितम्।[३]

अष्टाध्याय्यां "कुलात्खः" (४।१।१३९) इत्यनेन 'कुलीनः' इत्येव रूपं सुसम्पनं भवति। न तु कदाचिद् 'आढ्यकुलीनः' इति। परं काशिकायां सिद्धान्तकौमुद्यादिषु च उपर्युक्तं रूपद्वयमपि संसाधितम्। तत्र हि सूत्रव्याख्यानावसरे काशिकादिषु "उत्तरसूत्रे (४।१।१४०) पूर्वप्रतिषेधादिह (४।१।१३९) तदन्तः केवलश्च दृश्यते" इति सूत्रादधिकं कल्पनापूर्वकं विधानम्। अनेनैव च प्रकारेण ४।१।१३९ सूत्रेण केवलकुलशब्दात् पदान्तस्थकुलशब्दात् (आढ्यकुलशब्दात्) च खप्रत्ययः संभवति, नान्यथा। चान्द्रव्याकरणे तु "खः पदान्ताच्च" (२।४।७३) इत्यनेन रूपद्वयमपि सङ्गच्छते। तेन तस्यैव काशिकायां प्रभाव इति प्रतीतिः।

काशिकायाम् "अणो द्व्यचः" (४।१।१५६) इत्यस्य वृत्तौ "त्यदादीनां वा फिञ् वक्तव्यः। त्यादायनिः, त्यादः। यादायनिः, यादः। तादायनिः, तादः" इति व्याख्यानं वर्तते। महाभाष्येऽस्याभावः। सिद्धान्तकौमुदीकारस्य नास्ति काशिकावचनेन सह कोऽपि विरोधः। बालमनोरमाकारस्त्विदं व्याख्यानं प्रामादिकं मन्यते। यतो हि स भाष्येऽस्य वार्त्तिकस्यादर्शनात् "उदीचां वृद्धाद्गोत्रात्" (४।१।१५७) इत्यनेनैव त्यदादीनां वृद्धत्वात् प्रयोजनसिद्धिं स्वीकरोति।[४] परं चान्द्रव्याकरणे "त्यदादिभ्यो वा" (२।४।८९) इत्यत्र "त्यादायनिः, यादायनिः। त्यादः, यादः" इत्यादीनां पाठदर्शनात् काशिकायामप्ययं पाठश्चान्द्राद् गृहीत इति लक्ष्यते।[५]

---

१. सि. कौ. ४।१।८५: "यमाच्चेति काशिका।"
अत्र श. कौ. अपि द्रष्टव्यः।

२. भाषायां याम्यशब्दप्रयोगस्तु यथा—दुर्गा. २।१४—
याम्येन चाभवन् केशाः।

३. तुलनार्थं द्र.- पृ. ९७, टि. ५।

४. बा. मनो. ४।१।१५६: "त्यदादीनां फिञ् वा वाच्यः। त्यादायनिः, त्यादः। इति क्वचित्पुस्तके दृश्यते। तत्तु प्रामादिकम्, "त्यदादीनि च" इति त्यदादीनां वृद्धत्वाद् "उदीचां वृद्धत्वाद्-" इत्येव सिद्धेः, भाष्येऽस्य वार्त्तिकस्य अदर्शनाच्च।"

५. तुलनार्थं द्र.- टि. ५, पृ. ९७।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकायां "लाक्षारोचनाशकलकर्दमाट्ठक्" (४।२।२) इत्यत्र "शकलकर्दमादणपीष्यते। शाकलम्, कार्दमम्" इति व्याख्यानमुपलभ्यते। महाभाष्ये 'शाकलम्, कार्दमम्' इत्युदाहरणद्वयं नोपलभ्यते। भट्टोजिदीक्षितेनेदं वृत्तिकारवचनत्वेन स्वीकृतम्।[1] भाषावृत्तिकारस्त्विदं मतान्तरत्वेन स्थापयति।[2] यथा हि चान्द्रव्याकरणे "शकलकर्दमाद्वा" (३।१।३) इत्यस्य वृत्तौ "शाकलिकम्, शाकलम्। कार्दमिकम्, कार्दमम्" इति पाठस्तेन तु चान्द्रस्यैव काशिकायां प्रभावः।

काशिकायां "भिक्षादिभ्योऽण्" (४।२।३८) इत्यस्य वृत्तौ "युवतिशब्दोऽत्र-पठ्यते, तस्य ग्रहणसामर्थ्यात् पुंवद्भावो न भवति—भस्याढे तद्धिते इति। युवतीनां समूहो यौवतम्" इति विवेचनं समुपलभ्यते। भाषावृत्तौ तु समूहार्थे युवतिशब्दाद् 'यौवतम्' इति जयादित्यमतेन 'भस्याढे तद्धिते' (६।३।३५ वा.) इति पुंवद्भावे सति 'यौवनम्' इति भागवृत्तिमतेन च द्वौ प्रयोगौ व्युत्पादितौ।[3] रूपावतारे च युवतिशब्दात् समूहार्थे प्रयोगो न प्रदर्शितः। प्रक्रियाकौमुद्यां यद्यपि 'यौवनम्' इति प्रयोगो वर्तते, परं तत्र काशिकावद् "भस्याढे तद्धित इति। नेह पुंवद्भावो युवतिशब्दपाठसामर्थ्यात्" इति व्याख्यानदर्शनात् 'यौवनम्' इति प्रयोगविषये पाठकानां भ्रान्तिर्जायते, यतो हि प्रक्रियाकौमुदीव्याख्यानेन 'यौवतम्' इत्येव प्रयोगः सिध्यति, न तु 'यौवनम्' इति। अतोऽत्र प्रक्रियाकौमुद्यां पाठो भ्रष्टो जात इत्येव प्रतीयते। अत्र सिद्धान्तकौमुदीकारः काशिकामतेन सह पूर्णतया विरोधं प्रदर्शयति। अत एव तेन 'युवतीनां समूहो यौवनम्' इत्येव प्रयोगो भिक्षादिगणे संसाधितः, अर्थात् "युमिश्रणे" इत्यस्माद्धातोः "कनिन् युवृषितक्षि"-(उ. १५४) इत्यौणादिककनिन्प्रत्ययान्तो युवन्शब्दो नित्स्वरेणाद्युदात्तः। ततः स्त्रियां "यूनस्तिः" (४।१।७७) इति तिप्रत्ययस्य प्रत्ययस्वरेणोदात्तत्वे सति शिष्टस्वरेण युवतिशब्दस्य "अनुदात्तादेरञ्" (४।२।४४) इति अनुदात्तादित्वाद् अञि प्राप्ते "भिक्षादिभ्यः···" (४।२।३८) इत्यणि कृते सति "भस्याढे तद्धिते" (६।३।३५ वा.) इति पुंवत्त्वे, तिप्रत्ययस्य निवृत्तौ, "अन्" (६।४।१६७) इति अनः प्रकृतिभावाट्टिलोपाभावे 'यौवनम्' इति रूपम्। अञि तु प्रकृतिभावस्याप्रवृत्तेष्टिलोपः स्यादिति भावः।[4] ननु एवं प्रकारेण "गार्भिणं यौवतं गणे"[5] इति कोशग्रन्थो न सङ्गच्छेत इति विचार्य सिद्धान्तकौमुदीकारः

---

१. श. कौ. ४।२।२: "शकलर्दमाभ्यामणपीष्यत इति वृत्तिकारः।··· भाष्यादौ तु नैतदस्ति॥" अत्र सि. कौ. अपि द्रष्टव्या।

२. भा. वृ. ४।२।२: "शकलकर्दमाभ्यामणपीत्येके।"

३. भा. वृ ४।२।३८: "युवतिशब्दाद् यौवतमिति जयादित्यः। भस्याढे तद्धित इति पुंवद्भावे यौवनमिति भागवृत्तिः।"

४. द्र.- बा. मनो. ४।२।३८; ६।४।१६४.

५. अमर. २।६।२२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनर्लिखति—"शत्रन्तादनुदात्तादेरञि यौवतम्" इति । अस्यायं भावः, शतृप्रत्ययस्वरेण मध्योदात्तत्वादनुदात्तादिरयं 'युवत्' शब्दः । तत्र "शतुः" उगित्वाद् "उगितश्च" (४।१।६) इत्यनेन ङीपि सति 'युवती' इति प्रयोगः । तस्य हि पुंवत्त्वेन ङीपो निवृत्तौ "अनुदात्तादेरञ्" (४।२।४४) इत्यनेन अञि 'यौवतम्' इति रूपं निष्पद्यते ।[1] द्वितीयं च, यद्यपि भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां भिक्षादिगणे युवतिशब्दस्य पाठः स्वीकृतस्तथापि तेन महाभाष्यानुरोधेन प्रौढमनोरमायां[2] तु भिक्षादिगणे युवतिशब्दस्य अनौचित्यमेव प्रतिपादितम् । तदेव च तत्त्ववोधिनीवाल-मनोरमाकारादिभिः स्वीकृतम् । अत एव भट्टोजिदीक्षितस्यास्मिन् विषये काशिकया सह प्राधान्येन भेदः ।[3] परं चान्द्रव्याकरणे "भिक्षादिभ्योऽण्" (३।१।४४) इत्यस्य वृत्तौ "युवतिपाठसामर्थ्यान्न पुंवद्भावः । यौवतम्" इति व्याख्यानमुपलभ्यते । अतश्चान्द्रस्यैव काशिकायां प्रभावः प्रतीयते ।

"ब्राह्मणमाणववाडवाद्यन्" (४।२।४२) इत्यत्र काशिकाया वृत्तौ "वातादूलः" इति वाक्येन 'वातानां समूहो वातूलः' इति प्रयोगो व्युत्पादितः । अत्र महाभाष्य-सिद्धान्तकौमुद्योरेतादृशं व्याख्यानमनुपलब्धम् । पुनश्च काशिकायां "वहुलं छन्दसि" (५।२।१२२) इत्यस्य वृत्तौ "वातानां समूहः, वातं न सहत इति वा वातूलः" इति पाठ उपन्यस्तः । अयं तु सर्वथा महाभाष्यसिद्धान्तकौमुदीसंमतः । चान्द्रव्याकरणे "वातादूलः" (३।१।५५) इति सूत्रम् । तदेव दृष्ट्वा काशिकायामुपर्युक्तं वचनं संगृहीतम् ।[4]

काशिकायां "गहादिभ्यश्च" (४।२।१३८) इत्यस्य वृत्तौ "वेणुकादिभ्यश्छण् वक्तव्यः" इति वचनं दृश्यते । महाभाष्येऽस्यानुपलब्धिः । भट्टोजिदीक्षितस्य नास्ति कोऽपि काशिकया सह विरोधः । चान्द्रव्याकरणे "वेणुकादिभ्यश्छण्" (३।२।६१) इति सूत्रम् । तस्यैवात्र काशिकायां प्रभावः ।[5]

काशिकायां "मध्यान्मः" (४।३।८) इत्यत्र "आदेश्चेति वक्तव्यम् । आदिमः" इति व्याख्यानं संदृश्यते । परन्तु महाभाष्ये ४।३।२३ सूत्रे "अग्रादिपश्चाड्डिमच्" इति

---

१. द्र.- बा. मनो. ४।२।३८; ६।४।१६४.

२. प्रौ. मनो. ४।२।३८; ६।४।१६४: "नैतद् युक्तं भाष्यवार्त्तिकयोरिह युवतिशब्दपाठस्य प्रत्याख्यानात् । तथा चेह (यौवनमित्यस्मिन् प्रयोगे) औत्सर्गिकोऽण् (४।२।३७ सूत्रेण), न तु भिक्षादित्वप्रयुक्त इत्यवधेयम् ।" अत्र श. कौ. अपि द्रष्टव्यः ।

३. पदमञ्जर्यां व्याकरणमिताक्षरायां च मतद्वयमपि संगृहीम् ।

४. द्र.- टि. ५, पृ. ९७ ।

५. तुलना—S. K. BELVALKAR, *Systems of Sanskrit Grammar*, p. 38, footnote 1.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वार्त्तिकेन 'आदिमः' इति रूपं जायते। सिद्धान्तकौमुद्यामपि महाभाष्यानुसारि वचः।[१] परं चान्द्रव्याकरणे "मध्यादिभ्यां मः" (३।२।८२) इत्ययेन मप्रत्यये सति 'आदिमः' इति प्रयोग सिध्यति। अतः काशिकायां चान्द्रस्य प्रभावः।[२]

काशिकायां "नित्यं वृद्धशरीरादिभ्यः" (४।३।१४४) इत्यत्र "एकाचो नित्यं मयटमिच्छन्ति, तदनेन क्रियते। त्वङ्मयम्। स्रङ्मयम्। वाङ्मयम्" इति वृत्तौ पाठः। भाष्येऽयमनुपलब्धः। सिद्धान्तकौमुदीकारेण काशिकया सह किमपि वैमत्यं न प्रदर्शितम्। चान्द्रव्याकरणे "मयडभक्षाच्छादने" (३।३।१०६), "एकाचः" (३।३।११०) इति सूत्रद्वयप्रामाण्याद् एकाच्छब्देनैव नित्यत्वेन मयट्प्रत्ययस्य विधानं समुपलभ्यते। तस्यैव काशिकायां प्रभावः।[३]

"परिमुखं च" (४।४।२६) इत्यत्र काशिकायां वृत्तौ "चकारोऽनुक्त-समुच्चयार्थः। पारिपार्श्विकः" इति व्याख्यातम्। भाष्येऽस्याभावः। सिद्धान्तकौमुद्यां शब्दकौस्तुभे च काशिकानुसारी पाठः। नास्ति तत्र कोऽपि विरोधः। चान्द्रव्याकरणे "परेर्मुखपार्श्वात्" (३।४।२८) इति सूत्रम्। तेनैव च 'पारिपार्श्विकः' इति प्रयोगो निष्पद्यते। अतश्चान्द्रव्याकरणमेव काशिकाया मूलस्थलमिति गम्यते।[४]

काशिकायां वृत्तौ "खः सर्वधुरात्" (४।४।७८) इति सूत्रे "योगविभागः कर्तव्य इष्टसंग्रहार्थः। उत्तरधुरीणः दक्षिणधुरीणः" इति व्याख्यानम्। महाभाष्ये कौमुद्यां चेदमनुपलब्धम्। शब्दकौस्तुभे त्विदं वृत्तिकारवचनत्वेनैवोद्धृतम्।[५] भाषा-वृत्तिकारश्चेदं मतान्तरेण कल्पयति।[६] चान्द्रे "सर्वोत्तरदक्षिणादेः खः" (३।४।७६) इति सूत्रं वर्तते। तदेवात्र काशिकायां योगविभागत्वेन स्वीकृतम्।[७]

काशिकायां "परिषदो ण्यः" (४।४।१०१) इत्यस्य वृत्तौ "णप्रत्ययोऽप्यत्रेष्यते। तदर्थं योगविभागः क्रियते—'परिषदः' णो भवति। परिषदि साधुः पारिषदः। ततः 'ण्यः' परिषद्य इत्येव" इति विवेचनं वर्तते। महाभाष्ये नात्र कापि योगविभाग-विषयिका कल्पना। सिद्धान्तकौमुद्यां तु योगविभाग एव स्वीकृतः। परं भाषावृत्ति-

---

१ श. कौ. ४।३।८: "मध्यमम्। अत्र वृत्तिकारः। आदेश्च। अवोधसोर्लोपश्चेति पठित्वा—आदिमः, अवमः, अधम इत्युदाजहार। तत्रादिम इति रूपम् अग्रादि-पश्चाड्डिमजिति वार्त्तिकेन सिद्धम्।"

२-४. द्र.- टिप्पणी ५, पृ. ६७।

५. श. कौ. ४।४।७७: "ख इति योगविभाग इष्टसिध्यर्थः कर्तव्यः।"

६. भा. वृ. ४।४।७८: "योगविभागादुत्तरधुरीणदक्षिणधुरीणौ चेत्येके। धुरीणश्चेत्यन्ये।"

७. द्र.- टिप्पणी ५, पृ. ६७।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारोऽत्र काशिकोक्तं विधानं "णोऽपीष्यत इति जयादित्यः" इति वचनाद् जयादित्यकृतमेव मन्यते। चान्द्रव्याकरणे "परिषदो ण्यश्च" (३।४।१०३) इत्यनेन ण्यप्रत्यये 'पारिषद्यः' णप्रत्यये च 'पारिषदः' इति प्रयोगद्वयं जायते। एतदेव काशिकाकृतो योगविभागस्य मूलम्।[१]

काशिकायां "तदर्थं विकृतेः प्रकृतौ" (५।१।१२) इत्यस्य वृत्तौ "केचित्तु तस्मै हितमित्यनुवर्तयन्ति" इति वचनेन मतान्तरमुपन्यस्तम्। महाभाष्ये तादृशं किमपि वक्तव्यं नास्ति। भट्टोजिदीक्षितेनापि मतद्वयमत्र स्वीकृतम्। परं तेन 'केचित्' इति विलिख्य स्पष्टरूपेण मतान्तरं न प्रदर्शितम्। चान्द्रव्याकरणे तु "विकृतेः प्रकृतौ" (४।१।१६) इत्यत्र "तस्मै इत्येव" इत्युल्लेखः। अतः प्रतीयते यत् काशिकायां 'केचित्' इति वचनेन चान्द्रव्याकरणस्यैव मतं संगृहीतम्।[२]

काशिकायां "तदस्य ब्रह्मचर्यम्" (५।१।९४) इत्यस्य द्विप्रकारकं व्याख्यानमुपलभ्यते।[३] सिद्धान्तकौमुदीकारेणापि तथैवानुसृतम्। महाभाष्यस्येऽस्य सूत्रस्य व्याख्यानमनुपलब्धम्। चान्द्रव्याकरणे "तदस्य ब्रह्मचर्यं" (४।१।१०६) इत्यत्र सर्वं काशिकासंमतमेव विवेचनम्। अतस्तस्यैवात्र काशिकायां प्रभाव इति प्रतीयते।[४]

काशिकायां "सख्युर्यः" (५।१।१२६) इत्यत्र "दूतवणिग्भ्यां चेति वक्तव्यम्। दूत्यम्। वाणिज्यम्" इति विवेचनं वर्तते। महाभाष्येऽस्याभावः। भाषावृत्ताविदं जयादित्यवचनत्वेन स्वीकृतम्।[५] सिद्धान्तकौमुदीकारोऽपि इदं काशिकोद्धृतं मनुते।[६] चान्द्रव्याकरणे "सखिदूतवणिग्भ्यो यः" (४।१।१४२) इति सूत्रम्। तस्यैव काशिकायां प्रभावः।[७]

काशिकायाम् "इगन्ताच्च लघुपूर्वात्" (५।१।१३१) इत्यत्र "कथं काव्यमिति। ब्राह्मणादिषु कविशब्दो द्रष्टव्यः" इति व्याख्यानम्। महाभाष्येऽस्मिन् विषये किमपि वक्तव्यं नास्ति। सिद्धान्तकौमुद्यां तु काशिकानुसारि वचः। चान्द्रव्याकरणे "लघोरि-

---

१-२. तुलनार्थं टिप्पणी ५, पृ. ९७।

३. न्यासः; प. म. ५।१।९४: "उभयस्मिन्नर्थे सूत्रमेतदाचार्येण प्रणीतम्, तेन द्वयमपि प्रमाणमिति कथयतः।"

४. द्र.- टिप्पणी ५, पृ. ९७।

५. भा. वृ. ५।१।१२६: "दूतवणिग्भ्यां चेति जयादित्यः।"

६. सि. कौ. ५।१।१२६ दूतवणिग्भ्यां च। "दूतस्य भाव कर्म वा दूत्यम्। वाणिज्यमिति काशिका।"

७. तुलनार्थं टिप्पणी ५, पृ. ९७।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कोऽकवे:" (४।१।१४७) इत्यत्र "अकवेरिति किम् । काव्यम् । ब्राह्मणादित्वात् ष्यञ्" इति व्याख्यानम् । तस्यैव काशिकायां प्रभाव: ।[1]

"योपधाद्गुरूपोत्तमाद् वुञ्" (५।१।१३२) इत्यत्र काशिकायां वृत्तौ "सहायाद् वेति वक्तव्यम् । साहायकम् । साहाय्यम्" व्याख्यानं कृतम् इति । महाभाष्ये त्विदं नोपलभ्यते । भट्टोजिदीक्षितस्तु सिद्धान्तकौमुद्यां काशिकागतमविरोधेनैव स्वीकरोति । "जयादित्यमतेन साहाय्यमित्यपि, न भवति चेति भागवृत्ति:" इति दुर्घटवृत्तावुपन्यास: ।[2] चान्द्रव्याकरणे "योपधाद् गुरूपोत्तमादसुप्रख्याद् वुञ्" (४।१।१४८) इत्यनेन 'साहाय्यम्, साहायकम्, सहायता' इत्यादीनि रूपाणि साधितानि । अतश्चान्द्रव्याकरणस्यैव काशिकायां प्रभाव: ।

काशिकायां वृत्तौ "अवारपारात्यन्तानुकामं गामी" (५।२।११) इत्यत्र "विगृहीताच्च, विपरीतादपीष्यते, अवारीण:, पाराव रीण:" इत्यादिकं व्याख्यानम् । महाभाष्येऽत्र "परोवरीण:, परंपरीण:,[3] इति प्रयोगद्वयं दृश्यते, न तु काशिकानुसारि विधानम् । सिद्धान्तकौमुदी काशिकामनुकरोति । चान्द्रव्याकरणे "पारावारावारपारात्यन्तानुकामं गामी" (४।२।१७) इत्यनेन काशिकागतं सर्वं सुसम्पन्नं भवति ।

काशिकायाम् "ऊषसुषिमुष्कमधो र:" (५।२।१०७) इत्यस्य वृत्तौ "नगपांसुपाण्डुभ्यश्चेति वक्तव्यम् । नगरम्, पांसुरम्, पाण्डुरम्" इति विवेचनं वर्तते । तदग्रे च पुन: "कच्छ्वा ह्रस्वत्वं च कच्छुरम्" इत्युल्लेख: । महाभाष्ये "नगाच्चेति वक्तव्यम् । नगरम्" इत्येव पाठ: । परं भाषावृत्तौ "कच्छ्वा ह्रस्वत्वम्" इत्येव जयादित्यवचनत्वेनोपन्यस्तम् । व्याकरणमिताक्षरायां "रप्रकरणे खादिभ्य उपसंख्यानम्" इत्युपसंख्यानेनैव नगरादीनां सिद्धि: प्रदर्शिता । तत्र "कच्छ्वा ह्रस्वत्वं च" इत्येव वचनं "कच्छुर: इति प्रयोगसिद्धये पृथक्त्वेनोपन्यस्तम्, न तु "नगपांसु" इत्यादिकम् । सिद्धान्तकौमुदीकार: काशिकामनुकरोति । चान्द्रे "ऊषादिभ्यो र:" (४।२।१११) इत्यनेन 'नगर:, पांसुर:, पाण्डुर:' इत्यादीनां सिद्धि: । तथा च तत्रैव "कच्छ्वा ह्रस्वत्वं च । कच्छुर:" इति व्याख्यानम् । तत एव काशिकायां "नगाच्च" इति महाभाष्योक्तवार्त्तिके पांसुपाण्डुशब्दाभ्यामपि उपन्यास: कृत इति प्रतीयते ।

काशिकायां "केशाद्वोऽन्यतरस्याम्" (५।२।१०९) इत्यत्र "अर्णसो लोपश्च । अर्णव:" इति वृत्तिस्थपाठ: । भाष्येऽस्याभाव: । सिद्धान्तकौमुद्यां काशिकानुसारी पाठ:, नास्ति च कोऽपि तत्र विरोध: । लघुशब्देन्दुशेखरे बालमनोरमायां चास्य भाष्यानुक्त-

---

१. तुलनार्थं द्र.- टिप्पणी ५, पृ. ९७ ।

२. तुलना- भा. वृ. ५।१।१३२: "साहाय्यमित्यपि ब्राह्मणादित्वादिति जयादित्य: । नेति भागवृत्ति: ।"

३. द्र.- म. भा. ५।२।१०, वा. १-२ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वमेव सूचितम् ।[1] चान्द्रव्याकरणे "केशादिभ्यो वः" (४।२।११३) इत्यधः "अर्णसो लोपश्च । अर्णवः" इति पाठः । स एव काशिकयानुसृतः ।

काशिकायां "द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः" (५।२।१२८) इत्यस्य व्याख्याने प्राण्यङ्गान्नेष्यते । पाणिपादवती" इतिः पाठः । महाभाष्येऽस्यादर्शनमिति बालमनोरमाकारः ।[2] सिद्धान्तकौमुद्यां काशिकानुसारि वचनम् । चान्द्रव्याकरणे "चार्थरोगगर्हितात्प्राणिस्थादस्वाङ्गादिनिः" (४।२।१२५) इति सूत्रम् । अतश्चान्द्रमेव काशिकयानुसृतमिति किलहॉर्नमतम् ।[3]

काशिकायां "किमोऽत्" (५।३।१२) इत्स्य वृत्तौ "त्रलमपि केचिदिच्छन्ति—कुत्र । तत्कथम् ? उत्तरसूत्राद् वावचनं पुरस्तादपकृष्यते" इति व्याख्यानं समुपलभ्यते । सिद्धान्तकौमुद्यामपि उत्तरसूत्राद् वावचनमपकृष्यते । महाभाष्ये त्विदमनुपलब्धम् ।[4] चान्द्रव्याकरणे "क्व कुत्रेहात्र" (४।३।११) इति सूत्रदर्शनात् काशिकया तान्येव रूपाणि अपकर्षेण साधितानि ।[5]

काशिकायाम् "अतिशायने तमबिष्ठनौ" (५।३।५५) इत्यत्र वृत्तौ "यदा च प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते तदातिशायिकान्तादपरः प्रत्ययो भवत्येव । देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे । युधिष्ठिरः श्रेष्ठतमः कुरूणाम्" इति व्याख्यानं चकास्ति । सिद्धान्तकौमुद्यामिदमनुपलब्धम् । महाभाष्ये श्रेष्ठतमशब्दो वैदिकत्वेनैव स्वीकृतः, न तु लौकिकत्वेन । यथा हि तत्र व्याख्यानम्-"तदन्ताच्च स्वार्थे छन्दसि दर्शनं श्रेष्ठतमायेति (वा.) । तदन्तादातिशायिकान्तात् स्वार्थे छन्दस्यातिशायिको दृश्यते, देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे" इति । अस्मिन् प्रकरणे अन्नंभट्टो व्याकरणमिताक्षरायां लिखति—"प्रकर्षप्रत्ययान्ताच्छन्दसि स्वार्थे दर्शनम् । श्रेष्ठतमाय कर्मणे । श्रेष्ठायेत्यर्थः । प्रकर्षवतां प्रकर्षविवक्षायामातिशायिकान्तादपरः प्रत्ययः तेन 'श्रेष्ठतमो युधिष्ठिरः' इत्यादिप्रयोग उपपन्न इति काशिकायाम् । तत्तु भगवदनभिमतम् । इह त्रीणि शुक्लानीत्यादिना वाचकश्चेत् प्रयुज्यतामित्यन्तेन महता प्रबन्धेन निरस्तत्वाद्" इति । पदमञ्जरीकारोऽपि 'युधिष्ठिरः श्रेष्ठतमः कुरूणाम्' इत्यन्याय्यं मनुते । भाषावृत्तिकारस्त्वस्मिन् विषये मतद्वयमपि पृथक् पृथग् निर्दिशति ।

---

१. लघुशब्दे. (चौखम्बा, संवत् १९७९), भागः २, पृ. ३५१-३५२: "अर्णसो लोपश्चेति । भाष्ये न दृश्यते ।"
बा मनो. ५।२।१०९: "इदं तु वार्त्तिकं भाष्ये न दृश्यते ।"

२. बा. मनो. ५।२।१२८: "प्राण्यङ्गान्नेति । व्याख्यानमेवात्र शरणम्, एवंविधवार्त्तिकस्य भाष्ये अदर्शनात् ।"

३. द्र.- टिप्पणी ५, पृ. ९७ ।

४. भा. वृ. ५।३।१२: "त्रलमपि केचिदिच्छन्ति कुत्रेति जयादित्यः ।"

५. द्र.- टिप्पणी ५, पृ. ९७ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्यथा—"इह भाषायां द्वितीयः प्रकर्षप्रत्ययो नेष्यते। तेन श्रेष्ठतरो ज्येष्ठतम इति न भवतीत्येके। भवतीति जयादित्यः। तेन युधिष्ठिरः श्रेष्ठतमः कुरूणाम्"[1] इति। तथा च सरस्वतीकण्ठाभरणस्य हृदयहारिणीटीकयापि[2] काशिकाकृद्व्याख्यानस्य पुष्टिर्भवति। चान्द्रव्याकरणे "द्विबहुषु तरप्तमपौ" (४।३।४५) इत्यस्मिन् सूत्रे "प्रकृष्टानामपि पुनः प्रकर्षे तरप्तमपौ भवत एव। यथा, युधिष्ठिरः श्रेष्ठतमः कुरूणाम्" इति व्याख्यानम्। अत एव प्रतीयते यत् काशिकायां चान्द्रव्याकरणस्यैव प्रभावः, चान्द्रव्याकरणे चात्र श्रेष्ठतमशब्दस्य छन्दसि एव प्रयोग इति न निर्दिष्टम्।[3]

---

१. भा. वृ. ५।३।६१.

२. स. क. हृदयहारिणी ५।३।७८: "ईयसुन्निष्ठन्भ्याम्" आतिशायिकान्तादातिशायिको न भवतीत्युक्तम्। ततोऽपि तरप्तमपौ यथा स्यातामित्ययमारम्भः। ईयसुनन्तादिष्ठन्नन्ताच्च प्रकर्षे तरप्तमपौ भवतः। ·····युधिष्ठिरः श्रेष्ठतमः।"

३. भाषायां श्रेष्ठतरश्रेष्ठतमशब्दयोः प्रयोगो बहुत्र वर्तते। यथा—

यदा द्रोणो विविधानस्त्रमार्गान् विदर्शयन् समरे चित्रयोधी।
न पाण्डवान् श्रेष्ठतमान् निहन्ति तदा नाशंसे विजयाय संजय॥
म. भार. (पूना), १।१।३०

अर्धं भार्या मनुष्य भार्या श्रेष्ठतमः सखा।
भार्या मूलं त्रिवर्गस्य भार्या मित्रं मरिष्यतः॥ *Ibid* १।६८।४०

एता नया दृष्टपूर्वा सभा देवेषु पाण्डवः।
तवेयं मानुषे लोके सर्वश्रेष्ठतमा सभा॥ *Ibid*, २।११।४५

ततो दिशः संप्रविहृत्य पार्था मृगान् वराहान् महिषांश्च हत्वा।
धनुर्धराः श्रेष्ठतमाः पृथिव्यां पृथक् चरन्तः सहिता बभूवुः॥
Ibid, २।२५३।१.

तानब्रवीत् पुनर्देवो मत्तः श्रेष्ठतरो हि यः।
तं सारथिं कुरुध्वं मे स्वयं संचित्य माचिरम्॥ *Ibid*, ५।२४।८६

तपो विशिष्टादपि वै विशिष्टान्मुनिसंचयात्।
मन्ये श्रेष्ठतरं त्वां वै रहस्यज्ञानवेदनात्॥ म. भार. (गीता प्रेस),
अ.दिपर्वान्तर्गतानुक्रमणिकापर्व, १।१.

तपसाऽभ्यधिकः शक्रः शक्तश्चैव स्वभावतः।
ब्रह्मण्यश्च कृतज्ञश्च ज्येष्ठः श्रेष्ठतमो गुणैः। हरिवंशो ८८२३ (कलकत्ता)

श्रीमद्दयानन्देनापि श्रेष्ठतमशब्दो लौकिकोदाहरणेषु निर्दिष्टः। यथा—
द्र.- अ. भा. २।३।४१: "ब्राह्मणानां वेदविच्छ्रेष्ठतमः, ब्राह्मणेषु वेदविच्छ्रेष्ठतमः।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकायां "शिलाया ढः" (५।३।१०२) इत्यत्र वृत्तौ "केचिदत्र ढञ्नमपीच्छन्ति, शैलेयम्" इति पाठो दृश्यते। व्याकरणमिताक्षरायां तु सूत्र एव योगविभागः स्वीकृतः। तथा च तत्र "वस्तेर्ढञ्" (५।३।१०१) इत्यस्मात् 'ढञ्' इत्यनुवर्तनेन 'शैलेयम्' इति प्रयोगो जायते। सिद्धान्तकौमुद्यामपि योगविभागेनैव कार्यसिद्धिः कृता। तथा हि उपरिकथितं योगविभागं—"वस्तेर्ढञ्; शिलायाः (ढञ्); ढः (शिलायाः)" इति संलक्ष्य के. बी. पाठकमहोदया अत्र काशिकायां जैनेन्द्रव्याकरणस्य प्रभावं स्वीकुर्वन्ति। यतो हि जैनेन्द्रे "वस्तेर्ढञ्" (४।१।१०७), शिलायाः (४।१।१०८), "ढः" (४।१।१०९) इति पाठो वर्तते। परं आइ एस. पावटेमहाभागा अमुं न पुरस्कुर्वन्ति। तेषां मतेन तु चान्द्रव्याकरणे "वस्तेर्ढञ्" (४।३।७९) इत्यनन्तरं "शिलाया ढश्च" (४।३८०)—शिलाया इवार्थे वर्तमानाया ढो भवति ढञ्। शिलेयं दधि, शैलेयम्" इति सूत्रं तद्व्याख्यानं चोपलभ्यते। यतो जैनेन्द्राच्चान्द्रमेव पूर्ववर्ति; अतश्चान्द्रस्यैव काशिकायां प्रभावः, न तु जैनेन्द्रस्य इति तेषां मतम्।[1]

अष्टाध्याय्यां "देवमनुष्यपुरुषपुरुमर्तेभ्यो द्वितीयासप्तभ्योर्बहुलम्" (५।४।५६) इत्यनेन देवादिभ्यो द्वितीयासप्तम्यन्तेभ्यस्त्राप्रत्ययो बाहुल्येन भवति। परन्तु काशिकायां "बहुलवचनादन्यत्रापि भवति। बहुत्रा जीवितो मनः" इत्यपि व्याख्यानं कृतं वर्तते। महाभाष्य एतादृशं व्याख्यानमनुपलब्धम्। सिद्धान्तकौमुद्यां तु काशिकानुसारि वचनम्। चान्द्रव्याकरणे "देवादिभ्यो द्वितीयासप्तम्योर्बहुलम्" (४।४।४०) इत्यत्र "बहून् बहुषु वा बहुत्रा। अन्येभ्योऽपि च यथादर्शनम्" इति विवेचनं संदृश्यते। तस्माच्चान्द्रस्य काशिकायां प्रभाव इति ज्ञायते।

काशिकायाम् "अच् प्रत्यन्ववपूर्वात्सामलोम्नः" (५।४।७५) इत्यस्य वृत्तौ—

"कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः।
गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि॥

कृष्णभूमः। पाण्डुभूमः। उदग्भूमः। पञ्चनदम्। पञ्चगोदावरम्। 'नदीभिश्च' इत्यव्ययीभावः। भूमेरपि संख्यापूर्वाया अच्प्रत्यय इष्यते—द्विभूमः प्रासादः। त्रिभूमः। दशभूमकं सूत्रम्। अन्यत्रापि च दृश्यते। पद्मनाभः। ऊर्णनाभः। दीर्घरात्रः। समरात्रः। अरात्रः। तदेतत्सर्वमिह 'अच्' इति योगविभागं कृत्वा साधयन्ति" इति व्याख्यानम्। सिद्धान्तकौमुद्यामयं पाठः पृथक् पृथग् वार्त्तिकमुखेनैव निर्दिष्टः,[2] न तु

---

१. द्र.- I. S. PAWATE, *The Structure of the Aṣṭādhyāyī*, intorduction, pp. 10-11.

२. सि. कौ. सू. ९४३: "कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते (वा.)। कृष्णभूमः। उदग्भूमः। पाण्डुभूमः। द्विभूमः प्रासादः। संख्याया नदीगोदावरीभ्यां च (वा.)। पञ्चनदम्। सप्तगोदावरम्। अच् इति योगविभागादन्यत्रापि। पद्मनाभः।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारिकामुखेन। महाभाष्ये योगविभागस्याभावाद् बालमनोरमाकारस्तु "पृषोदरादीनि यथोपदिष्टम्" (६।३।१०९) इत्यनेनैव कार्यसिद्धिं योजयति।[1] भाषावृत्तौ चेयं कारिका जयादित्यकृतित्वेन स्वीकृता।[2] चान्द्रव्याकरणे "पाण्डूदक्कृष्णाद्भूमेः" (४।४।७२), "संख्याया नदीगोदावर्योश्च" (४।४।७३), "नाभेः" (४।४।१०४) इत्यादीनि सूत्राण्युपलभ्यन्ते। अतश्चान्द्रस्यैव काशिकायां प्रभावः।[3]

काशिकायाम् "अञ् नासिकायाः संज्ञायां नसं चास्थूलात्" (५।४।११८) इत्यस्य वृत्तौ "पक्षेऽच्प्रत्ययोऽपीष्यते। खुरणसः। खरणसः" इति व्याख्यातम्। सिद्धान्तकौमद्यामपि तथैव स्वीकृतम्। नास्ति कोऽपि तत्र काशिकया सह भेदः। "भाष्ये त्विदं न दृश्यते" इति बालमनोरमाकारो वदति। चान्द्रव्याकरणे "खुरखराण्णस् वा" (४।४।११२) इत्यनेन काशिकासंमतानि रूपाणि सिध्यन्ति। अतश्चान्द्रस्यैवात्र काशिकायां प्रभावः।

"नित्यमसिच् प्रजामेधयोः" (५।४।१२२) इत्यघः काशिकायां "नित्यग्रहणं किम्, यावता पूर्वसूत्रेऽन्यतरस्यां ग्रहणं नैव स्वर्यते? एवं तर्हि नित्यग्रहणेनान्यत्रापि भवतीति सूच्यते।

श्रोत्रियस्येव ते राजन् मन्दकस्याल्पमेधसः।
अनुवाहकता बुद्धिर्नैषा तत्त्वार्थदर्शिनी॥"

इत्यादिकं व्याख्यानम्। अत्र भाषावृत्तौ "नित्यग्रहणाद् अल्पमेधस इति जयादित्यः" इति वचनम्।[4] सिद्धान्तकौमुद्यामस्याभावः। परं तत्त्वबोधिन्यामिदं वृत्तिकारवचनत्वेन निर्दिष्टम्।[5] चान्द्रे च "मन्दाल्पाच्च मेधायाः (४।४।१६०) इति सूत्रस्वरूपम्। जैनेन्द्रव्याकरणेऽपि चान्द्रव्याकरणानुसारि सूत्रस्वरूपमुपलभ्यते।[6] परं काशिकायां चान्द्रस्यैव प्रभावः, न तु जैनेन्द्रस्य। जैनेन्द्रस्य काशिकायाः समकालिकत्वात्।

---

१. बा. मनो. ५।४।७५: "नेदं वार्त्तिकम्।··· वस्तुतस्तु योगविभागस्य भाष्येऽदर्शनात् पृषोदरादित्वमेवोचितम्।"
२. भा. वृ. ५।४।७५: "कृष्णोदक्...उत्तरे यदि। इति जयादित्यः।"
३. तुलना- S. K. BELVALKAR, *Systems of Sanskrit Grammar*, p. 38, footnote 1.
४. तुलना— प. म. ५।४।१२२: "एवं तर्हीत्यादि। भाष्ये एतन्नाश्रितम्।"
५. त. बो ५।४।१२२: "अस्वरितत्वादेव अन्यतरस्यां ग्रहणाननुवृत्तिसिद्धौ नित्यग्रहणमन्यतो विधानार्थम्। तेन अल्पमेधसः, इति सिध्यतीति वृत्तिकारादयः।"
६. जै. व्या. ४।२।१६०.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकायां "न न्द्राः संयोगादयः" (६।१।३) इत्यत्र "वकारस्याप्ययं प्रतिषेधो वक्तव्यः। उज्जिजिषति" इति विवेचनं विद्यते। महाभाष्ये सिद्धान्तकौमुद्यां च 'उज्जिजिषति' इति प्रयोगस्य कृते किमपि वक्तव्यं नास्ति। चान्द्रव्याकरणे "नन्द्बो हलि" (५।१।४) इत्यनेन काशिकोक्तं रूपं सिध्यति।

काशिकायाम् "एत्येधत्यूठ्सु" (६।१।८९) इत्यत्र "प्रादूढोढ्येषैष्येषु" इति वार्त्तिकस्वरूपम्। परं महाभाष्ये सिद्धान्तकौमुद्यां च "प्रादूहोढोढ्येषैष्येषु इति वार्त्तिकम्। काशिकाया वार्त्तिके ऊहशब्दस्याभावः। चान्द्रे तु "प्रादूढोढ्येषैष्येषु" (५।१।८९) इति सूत्रस्वरूपम्। अतश्चान्द्रस्य काशिकायां प्रभावः।

काशिकायाम् "अन्येषामपि दृश्यते" (६।३।१३७) इत्यधः "शुनोदन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु" इति वार्त्तिकं वर्तते। महाभाष्ये सिद्धान्तकौमुद्यां चास्य सर्वथाभावः। व्याकरणमिताक्षरायामप्यस्य भाष्यवार्त्तिकानुक्तत्वं सूचितम्।[1] चान्द्रव्याकरणे "अन्येषामपि" (५।२।१४५) इत्यनेन काशिकास्थवार्त्तिकनिर्दिष्टप्रयोगाणां सिद्धिर्भवति। अतः काशिकायामिदं वचनं चान्द्रादेव गृहीतमिति प्रतीयते।

काशिकायां "तीषसहलुभरुषरिषः" (७।२।४८) इत्यत्र "केचिदुदितमिषं पठन्ति" इति मतान्तरमुद्धृतम्। महाभाष्ये सिद्धान्तकौमुद्यां चास्यानुपलब्धिः। चान्द्रे तु "तीषुसहलुभरुषरिषः" (५।४।११८) इत्यस्मिन् सूत्रे उदिदेव 'इष्' निर्दिश्यते। अत चान्द्रस्य काशिकायां प्रभावः।[2]

"सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्" (७।२।४९) इत्यत्र काशिकायां वृत्तौ "केचिदत्र भरज्ञपिसनितनिगतिदरिद्राणाम् इति पठन्ति" इत्यनेन मतान्तरेण द्वितीयं सूत्रस्वरूपं निर्दिष्टम्। महाभाष्ये इदमनुपलब्धम्। सिद्धान्तकौमुद्यां काशिकानुसारि द्वितीयमपि सूत्रस्वरूपं संगृहीतम्। चान्द्रे "सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनितनिपतिदरिद्रः" (५।१।११९) इति सूत्रम्। अतः काशिकाया द्वितीयं सूत्रस्वरूपं चान्द्रमेव लक्ष्यीकरोति।[3]

"परिमाणान्तस्यासंज्ञाशाणयोः" (७।३।१७) इत्यत्र काशिकायां वृत्तौ "असंज्ञाशाणकुलिजानाम् इति केचित् पठन्ति" इति वचनेन द्वितीयमपि सूत्रस्वरूपं प्रदर्शितम्। अस्य महाभा येऽभावः। सिद्धान्तकौमुद्यां काशिकानुसारि वचः। परं प्रक्षिप्तांशविषये नास्ति कोऽप्युल्लेखः। चान्द्रव्याकरणे "संख्यायाः संवत्सरपरिमाणस्यासंज्ञाशाणकुलिजस्य" (६।१।२६) इत्यस्मिन् सूत्रे कुलिजशब्दो दृश्यते। तस्माच्चान्द्रस्यैव काशिकायां प्रभावः।[4]

---

१. व्या. मि. ६।१।१३७: "शुनो दन्तदंष्ट्राकर्णककुद (कुन्द) वराहपुच्छेषु। श्वादन्तः। श्वदंष्ट्रः।··· इदमपि भाष्यवार्त्तिकानुक्तम्।"

२-४. द्र- तुलनार्थं टिप्पणी ५, पृ. ९७।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकायां "जे प्रोष्ठपदानाम्" (७।३।१८) इत्यस्मिन् सूत्रे "प्रोष्ठपदानामिति बहुवचननिर्देशात् पर्यायेऽपि गृह्यते। भद्रपादः" इति व्याख्यानं विद्यते। भाष्ये इदं नास्ति। सिद्धान्तकौमुद्यां काशिकया सह नास्ति किमपि वैमत्यम्। चान्द्रव्याकरणे "जाते प्रोष्ठभद्रात् पदस्य" (६।१।२८) इत्यनेन 'प्रोष्ठपादः, भद्रपादः' इति प्रयोगौ सिध्यतः।

"हृदभगसिन्ध्वन्ते पूर्वपदस्य च" (७।३।१९) इत्यत्र काशिकायां "सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः, सक्तुसिन्धुषु भवः साक्तुसैन्धवः। पानसैन्धवः, सिन्धुशब्दः कच्छादिषु पठ्यते, तेन तदन्तविधिरिष्यते इत्यण् प्रत्ययः" इत्यादिकं व्याख्यानं प्राप्यते। सिद्धान्तकौमुद्यामपि तथैव। महाभाष्येऽस्यादर्शनम्। चान्द्रे "हृदभगसिन्धोः पूर्वपदस्य च" (६।१।२९) इत्यस्य वृत्तौ काशिकासंमतं व्याख्यानम्।

"अनुशतिकादीनां च" (७।३।२०) इत्यत्र काशिकायां वृत्तौ "असिहत्य—तत्र भवम् आसिहत्यम्। अस्यहत्य इति केचित् पठन्ति, ततोऽपि विमुक्तादित्वादण्। अस्यहत्यशब्दोऽस्मिन्नध्यायेऽस्ति आस्यहात्यः। अस्यहेति इत्येवमपरे पठन्ति, अस्यहेतिः प्रयोजनमस्य आस्यहैतिकः, अत एव वचनादस्य प्रातिपदिकत्वं विभक्तेश्चालुक्" इति विस्तृतं विवेचनं दृश्यते। महाभाष्ये सिद्धान्तकौमुद्यां चास्यादर्शनम्। चान्द्रव्याकरणे तु "अनुशतिकादीनाम्" (६।१।३०) इत्यस्य वृत्तौ "अस्यहत्यशब्दोऽस्मिन्नस्तीति विमुक्तादिभ्योऽण्, आस्यहत्यः। अस्यहेतिः प्रयोजनमस्य आस्यहैतिकः। अत एव वचनात् पदसमुदायात् ठञ्, विभक्तेश्चालुक्" इति व्याख्यानं समुपलभ्यते। इतोऽपि अग्रे काशिकायाश्चान्द्रस्य च सर्वं व्याख्यानं प्रायोऽभिन्नरूपेणैव वर्तते। अतोऽत्र काशिकया चान्द्रव्याकरणात् पूर्णरूपेण साहाय्यं गृहीतमिति प्रतीयते।

काशिकायां "देवता द्वन्द्वे च" (७।३।३१) इत्यत्र "यो देवताद्वन्द्वः सूक्तहविः सम्बन्धी तत्रायं विधिः" इति विधानम्। महाभाष्ये कौमुद्यां चास्याभावः। चान्द्रव्याकरणे "देवतानां चार्थे सूक्तहविषोः" (६।१।३१) इति सूत्रेण काशिकागतं विधानं सुसम्पन्नं भवति।

काशिकायां "प्रयाजानुयाजौ यज्ञाङ्गे" (७।३।६२) इत्यस्य वृत्तौ "प्रयाजानुयाजग्रहणं प्रदर्शनार्थम्, अन्यत्रापि एवं प्रकारे कुत्वं न भवति। एकादशोपयाजाः। उपांशुयाजमन्तरा यजति। अष्टौ पत्नीसंयाजा भवन्ति। ऋतुयाजैश्चरन्ति, इत्येवमादि सिद्धं भवति" इति व्याख्यानं विद्यते। महाभाष्ये सिद्धान्तकौमुद्यां च एतादृशं किमपि विधानं नास्ति। चान्द्रे "यजो बहुलम्" (६।१।९८) इत्यत्र 'पत्नीसंयाजः, उपांशुयाजः, ऋतुयाजः, इत्यादीनि रूपाणि दृश्यन्ते।

काशिकायां "सोऽपदादौ" (८।३।३८), "इणः षः" (८।३।३९) इति सूत्रद्वयव्याख्यानावसरे "पाशकल्पककाम्येषु" परत एव सन्धिजातं कार्यं कृतम्। महाभाष्य एता-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृशं किमपि विधानं नास्ति ।[1] सिद्धान्तकौमुद्यां तु काशिकानुसारी पाठ एव वार्त्तिक-रूपेणोपन्यस्तः ।[2] चान्द्रव्याकरणे "ससंख्यस्यानादौ सः" (६।४।३२) इत्यत्र पाश-कल्प-कशब्देषु परतः, "रोः काम्ये" (६।४।३३) इत्यत्र काम्यशब्दपरतः, "इणः षः" (६।४।३४) इत्यत्र च पाश-कल्प-क-काम्येषु परत एव सन्धिकार्याणि विधीयन्ते । अतः काशिकायां चान्द्रव्याकरणस्यैव प्रभावः प्रतीयते ।

उपरिनिर्दिष्टेन प्रमाणबाहुल्येनेदं दृढतरं भवति यत् काशिकायां वृत्तौ कातन्त्रस्य, दुर्गसिंहकृतकातन्त्रवृत्तेः, सवृत्तिचान्द्रव्याकरणस्य च प्रभावो बहुत्र दरी-दृश्यते । अनयैव रीत्या तत्काले समुपलब्धानां चान्द्रकातन्त्रेतरव्याकरणानामपि प्रभावः काशिकायां दृश्यते । तथा हि—काशिकायां "विभाषा भावादिकर्मणोः" (७।२।१७ इत्यत्र "सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन । शकितो घटः कर्तुम्" शक्तो घटः कर्तुम्" इति व्याख्यानेन सौगानां मतमुपन्यस्तम् । एवमेव "तुरुस्तुशम्यमः सार्वधातुके" (७।३।९५) इत्यस्य वृत्तौ "आपिशलास्तुशम्यमः सार्वधातुकासु च्छन्दसीति पठन्ति" इत्यनेन आपिशलाः स्मृताः । परमेतत् काशिकोद्धृतमतद्वयं साम्प्रतमुपलभ्य-मानेषु पूर्ववर्तिग्रन्थेषु नोपलभ्यते ।[3]

एवमेव काशिकायां "श्युकः किति" (७।२।११) इत्यत्र "केचिदत्र द्विककार-निर्देशेन गकारप्रश्लेषं वर्णयन्ति, भूष्णुरित्येवं यथा स्यात्" इति विधानम् । एतद् न्यासकारेण श्वभूतिव्याडिप्रभृतीनां मतत्वेन व्याख्यातम् ।[4]

अपि च "एकाच उपदेशेऽनुदात्तात्" (७।२।१०) इत्यत्र काशिकायाम्—

"दिहिर्दुहिमेहतिरोहती वहिर्नमिस्तु षष्ठो दहतिस्तथा लिहिः ।
इमेऽनिटोऽष्टाविह मुक्तसंशया गणेषु हान्ता प्रविभज्य कीर्तिता ॥

देग्धा । दोग्धा ।··· मुक्तसंशया इति किम् ? तन्त्रान्तरे चत्वारोऽपरे पठ्यन्ते-सहिमुहि-रिहिलुह्यः । तत्र सहेर्विकल्पस्तकारादौ, मुहिरपि रधादौ पठ्यते, तेन तौ ससंशयौ सवि-कल्पौ ।इतरौ तु धातुषु न पठ्येते । कैश्चिदभ्युगम्येते इति स्वरूपेणैव ससंशयौ" इति विवेचनं विद्यते । इदं स्थलं न्यासकारोऽधोनिर्दिष्टरीत्या व्याकरोति "तन्त्रान्तरे इति । आपिशलेर्व्याकरणे । ···कैश्चिदभ्युपगम्येते इति । आपिशलिप्रभृतिभिः" इति ।

काशिकायां "पूङः क्त्वा च" (१।२।२२) इत्यत्र "क्त्वाप्रत्ययस्य न क्त्वा सेडिति सिद्ध एव प्रतिषेवः । तस्य ग्रहणमुत्तरार्थम् । तथा चोक्तम्—नित्यमकित्त्वमिडाद्योः

---

१. त बो. ८।३।३८: "पाशकल्पककाम्येषु इति वृत्तिः । संभवप्रदर्शनमेतत् ।।" अत्र बा. मनो अपि द्रष्टव्या ।

२. द्र.- सि. कौ., सू. १५२.

३. द्र.- S. K. BELVALKAR, *Systems of Sanskrit Grammar*. p. 37.

४. न्यासः ७।२।११: "केचित् श्वभूतिव्याडिप्रभृतयः "श्युकः किति" इत्यत्र द्विककारनिर्देशेन हेतुना चर्त्वभूतो गकारः प्रश्लिष्ट इत्येवमाचक्षते ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्त्वानिष्ठयोः, क्त्वाग्रहणमुत्तरार्थम्" इति व्याख्यानं कर्तुर्नामग्रहणं विनैवोपन्यस्तम्। परं महाभाष्यतो ज्ञायते यदिदं भारद्वाजीयानां मतं वर्तते। तथा हि—"भारद्वाजीयाः पठन्ति। नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थम्"[1] इति। न्यासपदमञ्जर्योरपि महाभाष्यसंमतं व्याख्यानम्। अस्माद् ज्ञायते यत् काशिकायां पूर्वेषां वैयाकरणानां मत-प्रदानावसरे प्रायेण तत्कर्तुर्नामग्रहणं न कृतं वर्तते।

तथा हि काशिकायाम्—

"वृत्तौ भाष्ये तथा नामधातुपारायणादिषु।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसङ्ग्रहः॥"

इति प्रथमः श्लोकः। अत्र न्यासकार एवं व्याचख्यौ—"तत्र च वृत्तिः—पाणिनिप्रणीतानां सूत्राणां विवरणं चूल्लिभट्टिनल्लूरादिविरचितम्"[2] इति। तथा च हरदत्तोऽपि "तत्र सूत्रार्थप्रधानो ग्रन्थो वृत्तिः, सा चेह पाणिनिप्रणीतानां सूत्राणां कुणिप्रभृतिभिराचार्यै-र्विरचितं विवरणम्"[3] इति वचनेनाष्टाध्यायीमधिकृत्य लिखितानां काशिकातः प्राग्व-र्तिनीनां वृत्तीनां स्थितिं प्रकटयति। किमधिकेन, न्यासकारस्तु स्पष्टरूपेण स्वकीये व्याख्याने निर्दिशति यदस्यां वृत्तौ नास्ति किमपि नूतनत्वम्, अपि तु अन्यासामितः पूर्ववर्तिनीनां वृत्तीनां सारमात्रम्। तथा हि—

"अन्यतः सारमादाय कृतैषा काशिका यथा।
वृत्तिस्तस्या यथाशक्ति क्रियते पञ्चिका तथा॥"[4] इति।

अनेन दृढीभवति यत् काशिकायां स्थाने स्थाने काशिकातः पूर्ववर्तिनीनां चुल्लिभट्टि-नल्लूर-कुणि-प्रभृतिभिराचार्यैरष्टाध्यायीमधिकृत्य विरचितानां वृत्तीनां प्रभावो वर्तते। परं चान्द्रकातन्त्रव्याकरणाद् ऋतेऽन्यानि व्याकरणानि सांप्रतं नोपलभ्यन्ते।

---

१. म. भा. (किलहॉर्नसंस्करणम्), भागः १, पृ. २०१।
२. न्यासः (का. वृ., भागः १), पृ. ४।
३. प. म. (का. वृ., भागः १), पृ. ४।
४. न्यासः, द्वितीयः श्लोकः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चमं प्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(क) ग्रन्थद्वयस्य लौकिकोदाहरणानां स्थितिः

(१)

काशिकागतानि लौकिकोदाहरणानि प्रायः परम्परानुसारीण्येव प्रतीयन्ते। उत्तरवर्तिव्याकरणपरम्परावगाहिनां प्रक्रियाक्रमावलम्बिनां ग्रन्थानामवगाहनेन इदं सुस्पष्टं भवति यत्काशिकागतानामुदाहरणानां मूलस्थानं महाभाष्ये उताहो काशिकातः पूर्ववर्तिषु व्याकरणग्रन्थेषु प्रतिष्ठितमस्ति। प्रक्रियाक्रमानुगामिषु ग्रन्थेषु तु कानिचनोदाहरणानि परम्पराप्राप्तानि कानिचन च पुनर्नूतनानि अन्येभ्यो वाङ्मयग्रन्थेभ्यः सङ्गृहीतानि।

नवीनोदाहरणानि विशेषतो रामचन्द्रमहोदयानां प्रक्रियाकौमुदीग्रन्थे समुपलभ्यन्ते। तथा च तदुत्तरवर्तिभिः सिद्धान्तकौमुदीसदृशैर्ग्रन्थैस्तेषां मार्गोऽनुसृतः। भट्टोजिदीक्षितैर्नूतनपरम्परामाश्रित्य नवीनोदाहरणप्रदर्शनमेव निजपरम्परापुष्टये प्रक्रान्तम्। अस्यार्थस्य सिद्धये कानिचिदुदाहरणानि प्रस्तूयन्ते। तथा हि—

सूत्राणि	काशिकावृत्तिः	प्र. कौ., सि. कौ.
"विभाषोपयमने" (१।२।१६)	उपायत कन्याम्, उपायंस्त कन्याम्। उपायत भार्याम्, उपायंस्त भार्याम्।	रामः सीतामुपायत उपायंस्त वा।
"प्रकाशनस्थेयाख्ययोश्च" (१।३।२३)	तिष्ठते कन्या छात्रेभ्यः।	कृष्णाय तिष्ठते गोपी (प्र. कौ.), गोपी कृष्णाय तिष्ठते (सि. कौ.)।
"अधिशीङ्स्थासां कर्म" (१।४।४६)	ग्राममधिशेते। ग्राममधितिष्ठति। पर्वतमध्यास्ते।	अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिः।
"हीने" (१।४।८६)	अनुशाकटायनं वैयाकरणाः। अन्वर्जुनं योद्धारः।	अनुहरिं सुराः।
"कर्मणि द्वितीया" (२।३।२)	कटं करोति। ग्रामं गच्छति।	हरिं भजति।
"इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च" (६।१।१२७)	दधि अत्र, दध्यत्र। मधु अत्र, मध्वत्र।	चक्रि अत्र, चक्री अत्र, चक्रयत्र।
"ऋत्यकः" (६।१।१२८)	खट्व ऋश्यः। माल ऋश्यः। होतृ ऋश्यः।	ब्रह्म ऋषिः। ब्रह्मर्षिः।
"वा शरि" (८।३।३६)	वृक्षः शेते। प्लक्षः शेते वृक्षश्शेते। प्लक्षश्शेते।	हरिः शेते, हरिश्शेते।
"स्तोः श्चुना श्चुः" (८।४।४०)	वृक्षश्शेते। प्लक्षश्शेते। वृक्षश्चिनोति।	रामश्शेते (प्र. कौ.), हरिश्शेते (सि. कौ.)। रामश्चिनोति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतदवलोकनेनेदं दृष्टिपथमायाति यत् प्रक्रियाकौमुदीकारेण काशिकाप्रदत्तानामुदाहरणानां न केवलं स्वरूपमेव परिवर्तितं विद्यते अपि तु तेन तत्कृते नवीनान्येवोदाहरणान्युपन्यस्तानि वर्तन्ते । परं पाणिनिशास्त्रे परम्पाप्राप्तोदाहरणानि किमर्थं परिवर्तितानि कथं च तेषां परिवर्तनं सञ्जातमित्यस्मिन् विषये न किमपि नैश्चित्येन वक्तुं शक्यम् । तथापि शिष्याणां सौकर्येण बोधो भवत्वितीच्छया इमानि नवीनान्युदाहरणानि ग्रन्थकारैः प्रचलितपरम्परां मनस्यवधार्य प्रदत्तानि । एषु नूतनग्रन्थेषु तत्कालावलम्बिन्या धार्मिकविचारसरणेरुताहो सामाजिकवातावरणस्य प्रभावोऽजायत । इदमप्यत्र ध्येयं यद् एतैरर्वाचीनग्रन्थप्रतिपादितैरुदाहरणैः सा पुराणी उदाहरणपद्धतिरवश्यमेव विनष्टा यस्याः सकाशाद् वयं प्राचीनमैतिहासिकतथ्यं बोद्धुं समर्था आस्म । एतेषु सिद्धान्तकौमुद्यादिग्रन्थेषु परिवर्तितोदाहरणानां बाहुल्यं सन्धिप्रकरणे, कारकप्रकरणे, आत्मनेपदप्रक्रियायां, परस्मैपदप्रक्रियायां च दृष्टिगोचरतां समायाति ।

यदि प्रक्रियाकौमुदीसिद्धान्तकौमुदीसदृशग्रन्थस्थैरुदाहरणैर्महाभाष्यकाशिकावृत्त्योरुदाहरणानां तुलना भवेत् तर्हि इदं स्पष्टं भवति यत् काशिकोदाहरणानि प्रायेण महाभाष्यमनुसरन्ति । एतत्सिद्धयेऽत्र वयं कानिचित् स्थलानि निर्दिशामः ।

सूत्राणि	म. भा., का. वृ.	प्र. कौ., सि. कौ.
"ऋडोऽनुसंपरिभ्यश्च" (१।३।२१)	आनुते शृगालः । आपृच्छते गुरुम् । देवदत्ताय शपते । यज्ञदत्ताय शपते ।	आनुते । आपृच्छते । विप्राय शपते (प्र. कौ.) । कृष्णाय शपते (सि. कौ.) ।
"समवप्रविभ्यः स्थः" (१।३।२२)	अस्ति सकारमातिष्ठते । आगमौ गुणवृद्धी आतिष्ठते ।	नित्यं शब्दमातिष्ठते (प्र.कौ.), शब्दं नित्यमातिष्ठते (सि.कौ)
"उपान्मन्त्रकरणे" (१।३।२५)	भिक्षुको ब्राह्मणकुलमुपतिष्ठते । भिक्षुको ब्राह्मणकुलमुपतिष्ठते ।	भिक्षुर्धार्मिकमुपतिष्ठति, उपतिष्ठते वा (प्र. कौ.) । भिक्षुकः प्रभुमुपतिष्ठति, उपतिष्ठते वा (सि. कौ.)।
"अनुर्लक्षणे" (१।४।८१)	शाकल्यस्य संहितामनुप्रावर्षत् ।	जपमनुप्रावर्षत् ।
"आङ् मर्यादावचने" (१।४।८९)	आकुमारं यशः पाणिनेः ।	आमुक्तेः संसारः । आसकलाद् ब्रह्म ।

उपर्युक्तेषूदाहरणेष्विदं स्पष्टं परिलक्ष्यते यत् काशिकावृत्तिर्महाभाष्ये यान्युदाहरणानि आसन् तेषां कृते नवीनान्युदाहरणानि न प्रस्तौति । परं प्रक्रियाकौमुद्यां काशिकास्थानामुदाहरणानां कृतेऽन्यान्येवोदाहरणानि प्रस्तुतानि । सिद्धान्तकौमुद्यां तु प्रक्रियाक्रमावलम्बित्वात् प्रक्रियाकौमुदीप्रदत्तान्येवोदाहरणानि प्राधान्येन स्वीकृतानि सन्ति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महाभाष्ये येषां सूत्राणां व्याख्यानं स्वातन्त्र्येण न कृतं तेषामप्युदाहरणानि प्रसङ्गवशेनान्येषां सूत्राणां विवेचनसमये पतञ्जलिना प्रस्तुतानि वर्तन्ते । तादृशानामप्युदाहरणानां पाठः काशिकावृत्तौ महाभाष्यमनुसृत्य कृतो वर्तत इति डॉ. मङ्गलदेवशास्त्रिणां मतम् । ग्रन्थोऽयमुदाहरणानां कृते महाभाष्यं पूर्णतया अनुसरतीति तेषामभिप्रायः । ते अग्रे कथयन्ति यद् यानि सूत्राण्यस्मिन्नाकरग्रन्थे (महाभाष्ये) नोपदिष्टानि सन्ति तेषां कृते काशिकाकर्तृभ्यां पूर्वविरचितवृत्तिग्रन्थेभ्यः (कुण्यादिवृत्तिभ्यः) एव साहाय्यं गृहीतं भविष्यति ये ग्रन्था महाभाष्यादपि पूर्ववर्तिन आसन् । अतः काशिकावृत्तिः कुणिवृत्तेः परिवर्तितस्वरूपो वृत्तिग्रन्थरिति तेषां मतम् ।[1]

(२)

पद्यवद्धोदाहरणानां प्रसङ्गे काशिकायां वृत्तौ रामायण-महाभारत-चरक-सुश्रुत-किरातार्जुनीय-नानार्थकोशादिग्रन्थेभ्यरुदाहरणान्युपलभ्यन्ते । परमिदं विस्मयावहं यद् नानार्थकोश[2]-महाभारते[3] वर्जयित्वा कस्याप्यन्यस्य ग्रन्थस्योल्लेखो नैव कृतः काशिकावृत्त्या । अस्यां वृत्तौ यानि पद्यानि महाभारतादुद्धृतानि तानि अवस्ताद् निर्दिश्यन्ते ।

(१) मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सरौ मम ॥ का. वृ. १।१।११.
म. भार. (पूना) १२।१७१।१२.

(२) धूमायन्त इवाश्लिष्टा प्रज्वलन्तीव संहताः ।
उल्मुकानीव मेऽमी स्वा ज्ञातयो भरतर्षभ ॥ का. वृ १।१।३५.
महाभारते—
धूमायन्ते व्यपेतानि ज्वलन्ति संहितानि च ।
धृष्टराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ ॥
म. भार. ५।३६।५८; ६२।१९.

(३) विना वातं···पतितौ द्रुमौ ॥ का. वृ. २।३।३२; हरिवंशः ३४६४-६५.

(४) पतनान्ताः समुच्छ्रयाः ॥ का. वृ. ३।३।४९.
वा. रा. अयोध्या. १०५।१६; म. भार. १४।४४।१८.

---

१. M. D. SHASTRI, "The Traditional Basis of the Udāharaṇas in the Kāśikā and the Mahābhāṣya, and Mutual Relation of the Works Regarding the Same", *PAIOC*, xii session, Vol. ii, p. 339:
"There will be no exaggeration in saying that the Kāśikā is a revised edition of Kuṇi's Vṛtti which pre-existed even the Mahābhāṣya."

२. का. वृ. (शोभितमिश्रः) १।२।३६.

३. का. वृ. ४।१।१०३. "कथमनन्तरः अश्वत्थामा द्रौणायन इत्युच्यते । नैवात्र महाभारतद्रोणो गृह्यते ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(५) कामक्रोधौ[1] मनुष्याणां खादितारौ वृकाविव ॥ का. वृ. ५।३।११५.
म. भार. १२।२८।१४; ३०७।११.

(६) श्रोत्रियस्येव ते राजन् मन्दकस्याल्पमेधसः ।
अनुवाहकता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥ का. वृ. ५।४।१२२.
म. भार. १२।१०।१.

अपि च महाभारते—

श्रोत्रियस्येव ते राजन् मन्दकस्याविपश्चितः ।
अनुवाहकता बुद्धिर्धर्ममेवैकमीक्षते ॥ म. भार. ५।१३०।६.

अस्मिन् ग्रन्थे रामायणस्य पद्यद्वयं वर्तते । तत्रैकं पद्यं महाभाष्येऽपि दृश्यते । यथा—

(१) एति[2] जीवितमानन्दो नरं वर्षशतादपि ।
जीव पुत्रक मा मैवं तपः साहसमाचर ॥ का. वृ. २।३।५४.

परमस्य पद्यस्य रामायणे काशिकावत् पाठो न दृश्यते । यथा हि रामायणे पाठः—

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।
एति जीवितमानन्दो नरं वर्षशतादपि ॥
वा. रा. सुन्दर. (गीताप्रेस), ३४।६; (Baroda) ३२।६.

(२) प्रदीयतां दाशरथाय मैथिली[3] ॥ का. वृ. ४।१।९५.
वा. रा. युद्ध. ९।२१, २२; १४।३, ४; २५।३३.

अस्यां वृत्तौ चरक-सुश्रुत-किरातार्जुनीयग्रन्थानां यानि पद्यानि समुपलभ्यन्ते तानि यथाक्रमं निर्दिश्यन्ते ।

(१) फली वनस्पतिर्विज्ञेयो वृक्षाः पुष्पफलोपगाः ।

---

१. महाभारते 'कामक्रोधौ' इत्यस्य स्थाने 'जरामृत्यू' इति लेखः ।

२. अस्य पद्यस्य महाभाष्ये (१।३।१२, वा. ७; ३।१।६७. वा. ५)—"एति जीवितमानन्दः" इत्येव भाग उपलभ्यते । पद्यमिदमध्यात्मरामायण-कुवलयानन्दग्रन्थयोरपि संदृश्यते । द्र.- K. T. Teleng, "The Rāmāyaṇa Older than Patañjali", *IA*, Vol. iii, p. 124.

३. श्लोकोऽयं हनुमन्नाटके (दामोदरमिश्रसंकलिते, निर्णयसागरसंस्करणे) ७।९; ७।१० उपलभ्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः[1] ॥ का. वृ. ८।४।६.

चरके यथा—

फलैर्वनस्पतिः पुष्पैर्वानस्पत्यः फलैरपि ।
ओषध्यः फलपाकान्ताः प्रतानैर्वीरुधः स्मृताः ॥

चरकसंहिता-सूत्रस्थाने १।७३, पृ. ७ ।

इदं पद्यं चान्द्रव्याकरणस्य वृत्तिभागे (६।४।१०५) पूर्वार्धोत्तरार्धविपर्ययेण प्राप्यते । अमरकोशेऽप्यस्य पद्यस्य 'ओषध्यः फलपाकान्ताः'[2] इति भाग उपलभ्यते ।

(२) व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥ का. वृ. ६।१।६३.

सुश्रुते—

व्यायामस्विन्नगात्रस्य[3] पद्भ्यामुद्वर्तितस्य च ।
व्याधयो नोपसर्पन्ति सिंहं क्षुद्रमृगा इव ॥

सुश्रुत-चिकित्सास्थाने २४।४३, पृ. ५८७ ।

(३) संशय्य कर्णादिषु तिष्ठते यः ॥ का. वृ. १।३।२३.

किरात. ३।१४.

अस्यां वृत्तौ ग्रन्थकारौ चान्द्रवृत्तिमपि उदाहरणार्थं प्रमाणीकरुतः । चान्द्र-व्याकरणस्य चान्द्रवृत्तेश्च रचयिता एक एवास्तीति केषाञ्चिद् विदुषां मतम् ।[4] एवं स्वीकृते इमान्युदाहरणानि निश्चयेन चान्द्रवृत्तेः प्रभावमत्र बोधयन्ति । यथा हि तानि—

(१) कच्चिज्जीवति ते माता कच्चिज्जीवति ते पिता ।
मारविद त्वां पृच्छामि कच्चिज्जीवति पार्वती ॥ का. वृ. ३।३।१५३.

चान्द्रे तु "कच्चिज्जीवति ते माता" (१।३।११७) इत्येव वर्तते ।

(२) युधिष्ठिरः श्रेष्ठतमः कुरूणाम् ॥ का. वृ. ५।३।५५.

चा. व्या. ४।३।४५.

---

१. इदं पद्यं डॉ. किलहॉर्नमहोदयेनापि चरकसंहितास्थमुक्तम् । परं तत्र पाठान्तरं न निर्दिष्टम् । द्र.- F. KIELHORN, "Quotations in the Mahābhāṣya and the Kaśikā-Vṛtti", *IA*, Vol. xiv, footnote, p. 327.

२. अमर. (वनौषधिवर्गः) २।६ ।

३. सुश्रुते "व्यायामस्विन्नगात्रस्य" इत्यस्य स्थाने "व्यायामक्षुण्णगात्रस्य" इत्यपि टिप्पणे पाठः ।

४. युधिष्ठिरमीमांसकः, सं. व्या. शा इति., भागः १, पृ. ४१९ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(४) रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथो भगवान् अस्माकं शत्रुमर्दनः ॥ का. वृ. ८।१।१८.
चान्द्र वृत्तौ—
रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
मारजिद् भगवान् बुद्धः अस्माकं कुलनन्दनः ॥ चा. व्या. ६।३।१६.

काशिकायां कानिचित् पद्यबद्धोदाहरणानि महाभाष्याद् उपन्यस्तानि । अतस्तानि परम्पराप्राप्तान्यपि कथयितुं शक्यन्ते । यथा—

(१) वरतनु[1] संप्रवदन्ति कुक्कुटाः ॥ म. भा., का. वृ. १।३।४८.
(२) उभौ लोकौ संचरसि इमं चामुं च देवल ॥ म. भा., का. वृ. १।३।५४.
(३) सुसूक्ष्मजटकेशेन सुलभाजिनवाससा ।
पुत्री पर्वतराजस्य कुतोर्हेतोर्विवाहिता ॥ का. वृ. २।२।२४.
महाभाष्ये —
सुसूक्ष्मजटकेशेन[2] सुलभाजिनवाससा ।
समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति ॥ म. भा. २।२।२४.
(४) पतिमती पृथिवी ॥ का. वृ. ४।१।३२.
महाभाष्ये—
प्रथते त्वया पतिमती पृथिवी ॥ मा. भा. ४।१।३२.
(५) इहैव भव मान्यत्र गाः ॥ का. वृ. ६।१।९४.
महाभाष्ये—
इहैव भव मा स्म गाः ॥ म. भा. ६।१।९४.
(६) महीपालवचः श्रुत्वा जुघुषुः पुष्पमाणवाः ॥ म. भा., का. वृ. ७।२।२३.

उपर्युक्तैः पद्यैः काशिकायां महाभाष्यस्य पद्यबद्धोदाहरणानां प्रभावः स्पष्ट एव संलक्ष्यते । परं न केवलमिमां परम्परां काशिकावृत्तिरेवानुसरति; यतो महाभाष्ये तादृशानि बहूनि पद्यानि वर्तन्ते येषां पाठ उत्तरवर्त्तिनि प्राचीननवीनपरम्पराद्वयेऽपि समानरूपेणोपलभ्यते । तथा हि—

(१) खाडिति कृत्वा निरष्ठीवत् ॥ म. भा., का. वृ., सि. कौ. पदमञ्जरी ४।६२.
(२) बुभुक्षितं न प्रतिभाति किञ्चित् ॥ म. भा., का. वृ, भा. वृ., सि. कौ. २।३।२.

---

१. इदं भोजविरचितशृंगारप्रकाशे (२।३७२) अप्युदाहृतम् । द्र.- V. P. LIMAYE, *CCSM*, p. 102.

२. श्लोकोऽयं पदमञ्जरीकारसंमतः । द्र.- प. म. २।२।२४ । परं महाभाष्यस्य किलहॉर्नसंस्करणे श्लोकस्य पूर्वार्ध एव दृश्यते । तथा च—मै. सं. ३।१३।३; तै. सं. ५।६।१३-"शितिरन्ध्रोऽन्यतः शितिरन्ध्रः समन्तशितिरन्ध्रस्ते..." इति पाठो दृश्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(३) वाताय कपिला विद्युदानपायातिलोहिनी ।
पीता भवति सस्याय दुर्भिक्षाय सिता भवेत् ।। म. भा. २।३।१३.

काशिकायामत्र तृतीये चरणे "पीता वर्षाय विज्ञेया" इति पाठः। भाषावृत्तौ सिद्धान्तकौमुद्यां चास्य पद्यस्य प्रथमपाद एव वर्तते ।

(४) चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ।।
म. भा., का. वृ., भा. वृ., सि कौ, २।३।६६

(५) गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः ।
म भा., का. वृ., सि. कौ. ३।३।२१.

(६) कालः पचति भूतानि कालः संहरति प्रजाः ।। म. भा. ३।३।१६७.

काशिकायामत्र "कालः पचति भूतानि"[1] इत्येव पाठः। सिद्धान्तकौमुद्यां च "भूतानि कालः पचतीति वार्ता" इति रूपेण प्राप्यते ।

अनेनैतद् ज्ञायते यन्न केवलं काशिकावृत्तिरेव परम्परागतोदाहरणानां ग्रहणे महाभाष्यं प्राधान्येनावलम्बते, अपि तु सिद्धान्तकौमुद्यपि बहुषु स्थलेषु परम्परावलम्बिनी ।

श्रीशचन्द्रचक्रवर्तिना "सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी"[2] (का. वृ. ४।१।५०) इत्यस्मिन् विषये लिखितं यद् माधवीयधातुवृत्तौ "डुकृञ्" इति धातावयं श्लोको भट्टिकाव्यगतत्वेन निर्दिष्टः[3] । भट्टोजिदीक्षितैरपि शब्दकौस्तुभे (२।२।१६) अस्य कर्ता भट्टिरिति स्वीकृतम् । परमेतद्विस्मयावहं यदमुमं श्लोकमधिकृत्य माधवीयधातुवृत्तौ नास्ति कस्यापि ग्रन्थस्योल्लेखः[4]। न च व्याख्यातमिदं न्यासपदमञ्जर्योः। साम्प्रतं भट्टिकाव्येऽपि नास्त्यस्योपलब्धिः। काशिकायां २।१।५५ सूत्रे 'हंसगद्गदा, न्यग्रोधपरिमण्डला' इत्युदाहरणद्वयं वर्तते । अनेनोदाहरणद्वयेन सह ६।२।२ सूत्रस्य वृत्तिभागें 'दूर्वाकाण्डश्यामा' इत्यधिकमुदाहरणं दृश्यते । काशिकास्थानीमानि त्रीण्युदाहरणानि भट्टिकाव्यस्थमधोलिखितं श्लोकं स्मारयन्ति ।

योषिद्वृन्दारिका तस्य दयिता हंसनादिनी ।
दूर्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ।। भट्टि. ५।१८

श्लोकोऽयमस्माभिः काशिकायाः समयनिर्धारणावसरेऽपि बहुचर्चितः ।

---

१. यद्यपीदं पद्यं मैत्रायण्युपनिषदि (६।१५), महाभारते (१।१।८८) चोपलभ्यते। परं सिद्धान्तकौमुदीसहकारेणास्य लोकप्रचलितत्वमेव ध्वन्यते । तेनैवास्माभिरिदमत्रोपन्यस्तम् ।

२. तुलना-"सहधर्मचारिणी मे त्वं प्राणेभ्योऽपि गरीयसी ।।"
वा. रा. अरण्य. १०।२१.

३. न्यासः (श्रीशचत्द्रचक्रवर्ती), भागः १, पृ. १७।

४. द्र - मा. धातु. (प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६४), पृ. ५१९ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकोद्धृतान्यधोलिखितपद्यान्यनुपलब्धमूलकानि—

क्रोष्टा विकुरुते स्वरान् (१।३।३४)
ध्वाङ्क्षो विकुरुते स्वरान् (१।३।३४)
खाडिति कृत्वा निरष्ठीवत् (१।४।६२)
पञ्चसु त्वेकरूपासु जय एव भविष्यति (२।१।१०)
सहैव[1] दशभिः पुत्रैर्भारं वहति गर्दभी (२।२।२८)
अश्मानं दृशदं मन्ये···माता न पश्यति (२।३।१७)
दुःखे हेमन्तशिशिरे (२।४।२८)
अहोरात्राविमौ पुण्यौ (२।४।२८)
अजयं नोऽस्तु सङ्गतम् (३।१।१०५)
सुप्तोऽहं किल विललाप (३।२।११५)
जघान[1] कंसं किल वासुदेवः (३।२।११७)
भ्राजिष्णुना लोहितचन्दनेन (३।२।१३८)
गन्ताखेटं विकत्थनः (३।२।१५०)
तिमिरपटलैरवगुण्ठिताश्च रात्र्यः (४।१।३१)
गतो गणस्तूर्णमसिक्निकानाम् (४।१।३६)
सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी (४।१।५०)
अनन्तरो रामो जामदग्न्यः (४।१।१०५)
उभयत्र दशाहानि कुलस्यान्नं न भुज्यते (४।१।१६५)
तथा हि जातं हिमवत्सु कान्थकम् (४।२।१०३)
केनेदं मुषितः पन्था गात्रे पक्ष्मालिधूसरः (४।२।१२८)
केनेदं लिखितं चित्रं मनोनेत्रविकाशि यत् (४।२।१२८)
द्वैप्यं भवन्तोऽनुचरन्ति चक्रम् (४।३।१०)
आहेयमजरं विषम् (४।३।५६)
घटिदिति गम्भीरमम्बुदैर्नदितम् (६।१।५८)
सैष दाशरथी रामः···महाबलः (६।१।१३४)
आचर्यं कर्म शोभनम् (६।१।१४७)

---

१. पद्यमिदं शङ्कराचार्यकृतब्रह्मसूत्रभाष्योपरि वाचस्पतिमिश्रविरचितभामती-टीकायामप्युपलभ्यते। द्र.- भामती ३।४।३२; परं वाचस्पतिमिश्रस्य कालः काशिकात उत्तरवर्ती। तेदेदं पद्यं कस्मादप्यन्यस्माद् ग्रन्थात् काशिकायां गृहीतं भवेदिति प्रतीयते।

२. द्र.- निरुक्तभाष्ये महेश्वरटीका, द्र.- V. P. LIMAYE, *CCSM*, p. 209.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वे शकुनयो भक्ष्या विष्किरा कुक्कुटाद्ऋते (६।१।१५०)
ग्राममद्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः (६।१।१५२)
समुद्रमात्रं न सरोऽस्ति किञ्चन (६।२।१४)
जानार्दनस्त्वात्मचतुर्थ एव (६।३।६)
त्रीणामपि समुद्राणां युगान्तेषु समागमः (७।१।५३)
भक्षकश्चेन्न[1] विद्येत वधकोऽपि न विद्यते (७।३।३५)
हित्वा राज्यं वनं गतः (७।४।४३)
अयं दण्डो हरानेन (८।१।१९)
चकाद्धि पलितं शिरः (८।२।२५)
सभक्तौ शकुनेः पादौ (८।२।४८)

(३)

सिद्धान्तकौमुद्यां संज्ञाप्रकरणादारभ्य उत्तरकृदन्तप्रकरणपर्यन्तं भट्टोजिदीक्षितैः प्रायेण लौकिकसंस्कृतभाषोपयोगिव्युत्पत्तये लौकिकान्यवोदाहरणानि संगृहीतानि। परं क्वचित् क्वचित् प्रसङ्गवशेन वैदिकोदाहरणान्यपि प्रदत्तानि। अत्रेदमपि ध्येयं यद् बहुत्र सिद्धान्तकौमुदीकारेण पद्यबद्धोदाहरणवेलायां पद्यकर्तॄणां तत्कृतानां ग्रन्थानां वा नामनिर्देशः कृतः, यथा—'इति माघः'; 'इति कालिदासः'; 'इति भट्टिः'; 'इति भारविः'; 'इति मुरारिः'; 'इति श्रीहर्षः' इति। परं तादृशानां स्थलानां सङ्ख्या नास्त्यधिका। सन्ति च एकस्यैव कर्तुर्बहवो ग्रन्थाः। अत एवास्मिन् विषये पाठकानां समीक्षकानां च भ्रान्तिर्मा भूद् इति विमृश्य लौकिकभागस्य (उणादि-प्रकरणस्थवर्जितानां) लौकिकवैदिकपद्यबद्धोदाहरणानां सङ्ग्रहोऽधस्ताद् विधीयते।

सि. कौ. सूत्रसङ्ख्या	उदाहरणानि	ग्रन्थाः
९	क्व १ वोऽश्वाः	(ऋ. ५।६१।२)
,,	रथानां न ये २ ऽराः	(ऋ. १०।७८।४)
,,	शतचक्रं यो ३ ह्य	(ऋ. १०।१४४।४)
,,	अग्निमीले (पुरोहितम्)	(ऋ. १।१।१)

१. महाभारते (१३।११६।२९) तु—
यदि चेत्खादको न स्यान्न तदा घातको भवेत्।
घातकः खादकार्थाय तं घातयति वै नरः॥ इति प्राप्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१००	मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम	(म. भार. १२।१७१।१२)
१०२	अस्मे इन्द्राबृहस्पती	(ऋ. ४।४६।४)
१०६	सोमो गौरी अधिश्रितः	(ऋ. ६।१२।३)
,,	मामकी तनू	(पै. स. १।६।८)
११६	मदोदग्राः ककुद्मन्तः	(रघु. ४।२२)
१५०	घनाघनः क्षोभणः	(ऋ. १०।१०३।१)
१७७	सेमामविड्ढि प्रभृतिम्	(ऋ. २।२४।१)
,,	स इत्क्षेति	(ऋ. ४।५०।८)
,,	य ईशिषे	
,,	सैष दाशरथी रामः	(काशिका ६।१।१३४)
,,	स एवमुक्त्वा	(रघु. २।५२)
,,	सोऽहमाजन्मशुद्धानाम्	(रघु. १।५)
२३७	ककुद्दोषणी	
,,	पदङ्घ्रिश्चरणोऽस्त्रियाम्	(अमर. २।६।७१)
,,	स्वान्तं हृन्मानसं मनः	(अमर. १।४।३१)
,,	आसन्यं प्राणमूचुः	(बृह. उप. १।३।७)
,,	दक्षिणं दोर्निशाचरः	(रघ. १५।३३)
,,	भुजबाहू प्रवेष्टो दोः	(अमर. २।६।८०)
,,	दोषं तस्य तथाविधस्य भजतः	(नैषधीयचरिते)
३०६	हा पितः क्वासि हे सुभ्रुः	(भट्टि. ६।११)
३०७	भेवयां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान्	(यादवकोशः)
३५२	परमे व्योमन्	(ऋ. १।६२।७)
३६१	हविर्जक्षिति निःशङ्को मखेषु मघवानसौ	(भट्टि. १८।१९)
४१२	अग्ने तव	(ऋ. १।१०५।१३)
,,	देवास्मान् पाहि	
,,	अग्ने नय	(ऋ. १।१८९।१)
,,	अग्न इन्द्र वरुण	(ऋ. ५।४६।२)
,,	सर्वदा रक्ष देव नः	
,,	इमं मे गंगे यमुने	(ऋ. १०।७५।५)
४१३	हरे दयालो नः पाहि ?	
,,	अग्ने तेजस्विन्	(तैत्तिरीयसंहिता ३।३।१।१)
४८८	अथो त इन्द्रः केवलीर्विशः	(ऋ. १०।१७३।६)
,,	मामकी तनू	(पै. सं. १।६।८)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४९३	यया तु ऋतवः पूताः स्यात्पूतक्रतुरेव सा	
४९४	हरविष्णू वृषाकपि	(अमर. ३।३।१३०)
"	वृषाकपायी श्रीर्गोर्यो:	(अमर. ३।३।१५६)
४९६	त्रेण्या (च) शलल्या	(पार. गृह्यसू. १।१५।४)
५००	अमृते जारजः कुण्डो (मृते-भर्तरि गोलकः)	(अमर. २।६।३६)
५१६	दित्यवाट् च मे दित्यौही च मे	(वा. सं. १८।२६)
६१७	आ धेनवो धुनयन्तामशिश्वी	(ऋ. ३।५५।१६)
५३८	विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्	(कुमार. २।५५)
५४५	बुभुक्षितं न प्रतिभाति किञ्चित् ?	
५८३	प्रभुर्बुभूषुर्भुवनत्रयस्य	(शिशु. १।४९)
६४२	मूलेनावाहयेद् देवीं श्रवणेन विसर्जयेत्[1]	
६५७	क्लीवाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम्	(अमर. १।३।५)
७०९	घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः[2]	
७१२	उपारताः पश्चिमरात्रगोचरात्	(किरात. ४।१०)
७२४	अवतप्तेन कुलस्थितं त एतत् ?	
७४३	किंराजा यो न रक्षति ?	

---

१. श्लोकोऽयं निर्णयसिन्धौ (निर्णयसागरसंस्करणम्, १९०१, पृ १३४) सरस्वतीस्थापनसूचनादिप्रकरणेऽधोलिखितरूपेण दृश्यते।
"निर्णयामृते देवीपुराणे—
मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनम्।
उत्तरासु बलिं दद्याच्छ्रवणेन विसर्जयेत्॥
संग्रहे—
आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम्।
मूलेनावाहयेद् देवीं श्रवणेन विसर्जयेत्॥" इति।

२. श्लोकोऽयं सुभाषितरत्नभाण्डागारे पूर्णत्वेन प्राप्यते। परं न हि तत्र कस्यापि ग्रन्थस्य नामनिर्देशः। स यथा—
"हठादाकृष्टानां कतिपयपदानां रचयिता
जनः स्पर्धालुश्चेदहह कविना वश्यवचसा।
भवेदद्य श्वो वा किमिह बहुना पापिनि कलौ
घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः॥"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७४६	पोटा स्त्रीपुंसलक्षणा	(अमर. २।६।१५)
,,	गृष्टिः सकृत् प्रसूता	(अमरवाक्यम्)
७४६	धेनुः स्यान्नवप्रसूतिका	(अमर. २।६।७१)
,,	वशा वन्ध्या गोवशा	(अमर. २।६।६६)
,,	वेहद् गर्भघातिनी (=वेहद् गर्भोपघातिनी)	(अमर. २।६।६६)
,,	बष्कयण्यतरुणवत्सा	(अमरवाक्यम्)
७६३	खाडिति कृत्वा निरष्ठीवत्	(महाभाष्ये, काशिकायां १।४।६२)
८२५	इक्षुच्छाया निषादिन्यः	(रघु. ४।२०)
८३६	शरदः कृतार्था[1]	(किरात. ४।६)
८५६	विनसा हतबान्धवा	(भट्टि. ५।८)
८७५	गन्धो गन्धक आमोदे	(विश्वकोशः)
६२७	द्यावा चिदस्मै पृथिवी	(ऋ. २।१२।१३)
,,	दिवस्पृथिव्योररति	
६६३	जनार्दनस्त्वात्मचतुर्थ एव	(काशिका. ६।३।६)
१०६२	आश्चर्यं यदि स भुञ्जीत ?	
,,	आचर्यं कर्म शोभनम् ?	
११६८	पाप्मना भ्रातृव्येण	(तैत्तिरीयसं. २।२।१।२)
११६०	स नैषधस्यार्थपतेः	(रघु. १८।१)
११६३	कौरव्याः पशवः	(वेणी. १।२५)
,,	तस्यामेव रघोः पाण्ड्याः	(रघु. ४।४६)
,,	रघूणामन्वयं वक्ष्ये	(रघु. १।६)
,,	निरुध्यमाना यदुभिः कथञ्चित्	(शिशु. ३।२६)
११६४	कम्बोजाः समरे	(रघु. ४।६६)
१२२६	आग्नेयो वै ब्राह्मणो (तस्मात्) देवतया	(तै. सं. ५।६।४।१३)
१२२६	अपोनपाते अपांनपातेऽनुब्रूहि	(निरु. दैवतकाण्डम्)
१२४१	आग्निवारुणीमनड्वाहीमालभेत	(काठकसं. १३।६)
१३०७	शादो जम्बालघासयोः	(अमर. ३।३।६०)
१३२३	यथा हि जातं हिमवत्सु कान्थकम्	(काशिका. ४।२।१०३)

१. किरातार्जुनीये (४।६)—"शरदः कृतार्थता" इति पाठः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१३८१	शार्वरस्य तमसो निषिद्धये	(कुमार. ८।५८)
१३८१	अनुदितौषसरागः	(किरात. ९।८)
१५२७	पूपोऽपूपः पिष्टकः स्यात्	(अमर. २।९।४८)
१५४०	यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम्	(अमर. २।९।८५)
१६४१	धेनुष्या बन्धके स्थिता	(अमर. २।९।७२)
१६७२	एकाकिनोऽपि परितः पौरुषेयवृता इव	(शिशु. २।४)
१८१३	समांसमीना सा यैव प्रतिवर्षं प्रसूयते	(अमर. २।९।७२)
१९६१	कुह स्थः, कुह जग्मथुः	(ऋ. ८।७३।४)
२००८	दोहीयसी धेनुः ?	
२०४४	कुतूः कृत्तिः स्नेहपात्रं ह्रस्वा वा कुतुपः पुमान्	(अमर. २।९।३३)
२०५३	चञ्चा तृणसमः पुमान् ?	
२०७८	द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा	(अमर. २।६।११७)
२०८०	निकृष्टप्रतिकृष्टार्व···	(अमर. ३।१।५४)
२१०३	सन्देशवाग् वाचिकं स्यात्	(अमर. १।६।१७)
२१२७	बहुत्रा जीवितो मनः	(ऋ. १०।१६४।२)
२१४७	अन्योन्येषां पुष्करैरामृशन्तः	(शिशु. ५।३०)
,,	यां यां प्रियः प्रैक्षत कातराक्षीं सा सा	(शिशु. ३।१६)
,,	अन्योन्यसंसक्तमहस्त्रियामम्	
,,	परस्पराक्षिसादृश्यम्	(रघुः १।४०)
२२७२	बाहुप्रतिष्टम्भविवृद्धमन्युः	(रघु २।३२)
२२९०	कल्कनं दम्भः शाठ्यं च ?	
२२९१	उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्	(यादवकोशः)
२३२६	उदयति विततोर्ध्वरश्मिरज्जौ	(शिशु. ४।२०)
२३३९	अवज्ञावहेलनमसूक्षणम्	(अमर. १।७।२३)
२३४३	नृशंसो घातुकः क्रूरः	(अमर. ३।१।४७)
,,	बृंहितं करिगर्जितम्	(अमर. २।८।१०७)
२३४६	नास्रसत् करिणां ग्रैवम्	(रघु. ४।४८)
,,	नभन्तामन्यके समे	(ऋ. ८।३९।१)
,,	मा भूवन्नन्यके सर्वे	(निरुक्तम्)
२३५२	कमलवनोद्घाटनं कुर्वते ये	(सूर्य. २)
,,	प्रविघाटयिता समुपतन् हरिदश्वः कमलाकरानिव	(किरात. २।४६)
२३५३	विज्ञापना भर्तृषु सिद्धिमेति	(कुमार. ७।९३)
,,	रजो विश्रामयन् राज्ञाम्	(रघु. ।४८५)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२३५३	धुर्यान् विश्रामयेति सः	(रघु. १।५४)
”	प्रणयिनो निशमय्य बधूकथाः[1]	(शिशु. ६।१९)
”	निशामय तदुत्पत्तिं विस्तराद् गदतो मम	(दुर्गा. १।२)
”	पर्यवसितं नियमयन् ?	
२४३५	विचक्षणः प्रथयन्	(ऋ. ४।५३।२)
”	स्फायन्निर्मोकसन्धिः	(अनर्घ. १।५६)
२४३९	नमोवाकं प्रशास्महे	(उत्तर. १।१)
२४६२	ससीतयो राघवयोरधीयन्	(भट्टि. ३।१८)
२४६३	तनौ ममुस्तत्र न कैटभद्विषः	(शिशु. १।२३)
”	उदरं परिमाति मुष्टिना	(नैषधीय. २।३५)
२४६६	न विश्वसेदविश्वस्तम्[2]	(म. भार. ५।३८।९)
२४९५	तं रोदसी पिपृतम्	(ऋ. ३।२६।९)
२५०३	जिघर्म्यग्निं हविषा घृतेन	(ऋ. २।१०।४)
”	अयं स्रुवोऽभिजिहर्ति होमान्	(आप. श्रौ. ४।७।२)
२५०४	देवाञ्जिगाति सुम्नयुः	(ऋ. ३।२७।१)
२५१२	ततो वावृत्यमाना सा रामशालां न्यविक्षत्	(भट्टि. ४।२८)
”	द्युतद्यामानि युतः पत्यमानः	(ऋ. ६।४९।४)
२५१३	संसृज्यते सरसिजैररुणांशुभिन्नैः	(रघु. ५।६९)
”	विराध्यन्तं क्षमेत कः	(शिशु. २।२०)
२५१८	नाग्निस्तृप्यति काष्ठानाम्	(म. भार. ५।४०।६)
”	पितृनताप्सीत्	(भट्टि. १।२)
२५३३	न तद्यशः शस्त्रभृतां क्षिणोति	(रघु. २।४०)
२५३६	शिशुं न विप्रा मतिभी रिहन्ति	(ऋ. १०।१२३।१)
२५३७	परिणूतगुणोदया ?	
२५४२	त्वष्टा रूपाणि पिंशतु	(ऋ. १०।१८४।१)
२५७२	स एवायं नागः सहति कलभेभ्यः परिभवम्	(काव्येषु द्रष्टव्यम्)
२५७४	रामो राज्यमचीकरत्[3]	(वा. रा. युद्ध. १२८।६)
२५९६	विस्मापयन् विस्मितमात्मवृत्तौ, मनुष्यवाचा	(रघु. २।३३)
२६०७	प्रार्थयन्ति शयनोत्थितं प्रियाः	(रघु. १९।२९।)
२६७७	दूरत्यवनते विवस्वति ?	

१. शिशुपालवधे (६।१९)—“बधूर्बहिः” इति लेखः।
२. महाभारते (५।३८।९)—“न विश्वसेदविश्वस्ते” इति लेखः।
३. रामायणे (१२८।६)-“रामो राज्यमकारयत्” इति लेखः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२६८७	नाथसे किमु पतिं न भूभृताम्	(किरात. १३।५९)
२६९०	संशय्य कर्णादिषु तिष्ठते यः	(किरात. ३।१४)
२६९२	स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती	(रघु. ४।६)
२६९५	आजघ्ने विषमविलोचनस्य वक्षः	(किरात. १७।६३)
”	आहध्वं मा रघूत्तमम्	(भट्टि. ७।१०१)
२७०१	रक्षांसीति पुरापि संश्रृणुमहे	(अनर्घ. ६।२५)
”	हितान्न यः संश्रृणुते स किंप्रभुः	(किरात. १।५)
२७१०	विगणय्य नयन्ति पौरुषम्	(किरात. २।३५)
२७३७	बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्	(रघु. १५।१)
”	वृद्धो जनो दुःखशतानि भुङ्क्ते ?	
२७४३	इत्थं नृपः पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य	(भट्टि. १।२३)
२७५५	दमयन्ती कमनीयतामदम्	(नैषधीय. २।१८)
”	धापयेते शिशुमेकं समीची	(ऋ. १।९६।५)
२७७५	सुप्तोऽहं किल विललाप	(काशिका ३।२।११५)
”	बहु जगद पुरस्तात्तस्य मत्ता किलाहम्	(शिशु. ११।३९)
२८२८	पुरीमवस्कन्द लुनीहि नन्दनम् ···	(शिशु. १।५१)
२८४८	अनियम्यस्य नायुक्तिः ?	
”	त्वया नियम्या ननु दिव्यचक्षुषा	(रघु. ३।४५)
२८४९	आत्मनाम गुरोर्नाम··· (स्मृतिवचनम्) ?	
२८५३	तेन सङ्गतमार्येण रामाजयं कुरु द्रुतम्	(भट्टि. ६।५३)
”	मृगैरजयं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध	(रघु. १८।७)
२८६५	उच्छ्रायसौन्दर्यगुणा मृषोद्याः	(शिशु. ४।१०)
२९२९	गिरिशमुपचचार प्रत्यहं सा सुकेशी	(कुमार. १।६०)
२९३१	प्रेक्ष्य स्थितां सहचरीम्	(रघु. ९।५७)
२९३२	यूथं तदग्रगवितकृष्णसारम्	(रघु. ९।५५)
२९४०	ज्योत्स्नाकरम्भमुदरंभरयश्चकोराः	(अनर्घ. २।४४)
२९६१	अल्पारम्भः क्षेमकरः ?	
२९८८	स बभूवोपजीविनाम्	(रघु. १।१६)
”	अनुयायिवर्गः	(रघु. २।४)
”	पतत्यधो धाम विसारि	(शिशु. १।२)
”	न वञ्चनीयाः प्रभवोऽनुजीविभिः	(किरात. १।४)
३०१८	मृदुतया दुतया	(शिशु. ६।५९)
३०३७	लोधद्रुमं सानुमतः प्रफुल्लम्	(रघु. २।२९)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३०५७	धावितमिभराजधिया ?	
३०९५	तं तस्थिवांसं नगरोपकण्ठे	(रघु. ५।६१)
३०९७	निषेदुषीमासनबन्धधीरः	(रघु. २।६)
”	अध्यूषुषस्तामभवज्जनस्य	(शिशु. ३।५९)
३०९८	उपेयुषः स्वामपि मूर्तिमग्र्याम्	(रघु. ६।७३)
”	धृतजयधृतेरनाशुषः	(किरात. १२।२)
३१०१	मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति	(शिशु. २।४५)
३११८	जगत्प्रभोरप्रभविष्णु वैष्णवम्	(शिशु. १।५४)
३२२४	पतनान्ताः समुच्छ्रयाः (वा. रा. अयो. १०५।१६; म. भार. १४।४४।१८)	
३२४७	व्यात्युक्षीमभिसरणग्लहामदीव्यन्	(शिशु. ८।३२)
३२५३	सैन्धवघनमानय ?	
३३७७	उरोविदारं प्रतिचस्करे नखैः	(शिशु. १।४७)

(४)

एतेषूदाहरणेषु कानिचिदुदाहरणानि (सैष दाशरथी रामः; यथा हि जातं हिमवत्सु कान्थकम्; जनार्दनस्त्वात्मचतुर्थ एव; सुप्तोऽहं किल विललाप; पतनान्ताः समुच्छ्रयाः) काशिकायां सिद्धान्तकौमुद्यां च समानरूपेण दृश्यन्ते। अत इमानि प्रायः सिद्धान्तकौमुद्यां काशिकात एव सङ्गृहीतानि। वैदिकोदाहरणानि तु सिद्धान्तकौमुद्यां प्रायः काशिकातो महाभाष्याच्च सङ्गृहीतानि। एतदतिरिक्तं कानिचित् पद्यबद्धोदाहरणानि महाभाष्ये तदुत्तरवर्तिषु च ग्रन्थेषु समानरूपेण वर्तन्ते। एतानि चास्माभिः काशिकोदाहरणप्रसङ्गे पूर्वमेव निर्दिष्टानि सन्ति। परं सिद्धान्तकौमुद्या अधोलिखितानि पद्यानि इतः पूर्वं प्रक्रियाकौमुद्यामेव दरीदृश्यन्ते। अतस्तानि प्रक्रियाकौमुदीकर्तुः प्रभावमस्यां बोधयन्ति। यथा—

सूत्राणि	उदाहरणानि
४०७	श्रीशस्त्वावतु मापीह····· ।
५४०	शत्रूनगमयत् स्वर्गम् ····· ।
३०८७	मुकुन्दस्यासितमिदमिदम् ····· ।

संक्षेपस्तु लौकिकोदाहरणानां विषये काशिकासिद्धान्तकौमुदीग्रन्थद्वयेऽपि परम्पराप्रभावः। काशिकावृत्तिर्यत्र गद्यमयोदाहरणानां पाठं महाभाष्यादुदाहरति तत्र प्रायः सिद्धान्तकौमुद्यपि कानिचिदुदाहरणानि प्रक्रियाकौमुदीतः प्रस्तौति। कानिचिच्च पद्यबद्धोदाहरणानि काशिकासिद्धान्तकौमुदीग्रन्थद्वयेऽपि महाभाष्यात् समानरूपेणोद्धृतानि। परं सिद्धान्तकौमुद्यां पद्यबद्धोदाहरणानां संख्या काशिकापेक्षया अधिका। भट्टोजिदीक्षितैः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रायः पाणिनिशास्त्रानुसारेण काव्यनाटकवाङ्मयस्थानां संशयास्पदानां प्रयोगाणां समर्थने प्रयत्नो विहितः। विषयेऽस्मिन् इतः पूर्वं दुर्घटवृत्तिकाराद् ऋते नान्येन केनापि ग्रन्थकृता प्रयोगसमर्थनार्थं प्रयत्नः कृतः। दुर्घटवृत्त्या च सर्वे प्रयोगा न व्युत्पादिताः। सम्पूर्णं पाणिनिशास्त्रं सिद्धान्तकौमुद्यां प्रथमतो दीक्षितैः प्रयोगसिद्धिप्रदर्शनपुरस्सरं व्याकृतम्। अत एव सिद्धान्तकौमुदी अनितरसाधारणा सर्वानपि प्रक्रियाग्रन्थानतिशेते। किं बहुना—

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः॥

(ख) ग्रन्थद्वयस्य वैदिकोदाहरणानां स्थितिः

शब्दशास्त्रविचक्षणैर्वेदविद्यानिष्णातसायणाचार्यप्रभृतिभिश्च भाष्यकारैः पाणिनिव्याकरणं वेदाङ्गत्वेन स्वीकृत्य तदध्ययनं वेदव्याख्यायां बहूपकरोतीति प्रतिपादितम्। तत्रभवता कात्यायनेन भाष्यसूत्रेषु यथा वार्त्तिकानि प्रणीतानि तथैव तेन वैदिकसूत्रेष्वपि प्रणीतानि। अतो व्याकरणनिकाये इदं जोघुष्यते यत् सवार्त्तिकमेवेदं पाणिनीयशब्दशास्त्रं भाषाया वेदस्य च ज्ञानं प्रददाति न तु केवलानि सूत्राणि वार्त्तिकानि वा। परं लौकिकानां वैदिकानां वोदाहरणानां यथा सुस्पष्टा स्थितिः काशिकायां वैयाकरणसिद्धान्तकौमुद्यां च वरीवर्त्ति न तथा महाभाष्ये। तथापि वैदिकोदाहरणदृष्ट्या काशिकासिद्धान्तकौमुद्योः कतरा ज्यायसीति विचार्यमाणे तु काशिकैव ज्यायसी, यतोऽस्यां बहूनि वैदिकोदाहरणविषयकाणि वार्त्तिकानि सङ्गृहीतानि यानि कौमुद्यां नोपलभ्यन्ते।[1]

---

१. का. वृ. ४।४।१२८:
"लुगकारेकाररेफाश्च वक्तव्याः" (वा.)। लुक्तावत्—तपश्च तपस्यश्च (तै. सं. १।४।१४।१)। नभश्च नभस्यश्च (तै. सं ४।४।११।१)। सहश्च सहस्यश्च (वा. सं १४।१७)। नपुंसकलिङ्गं छान्दसत्वात्। अकारः—इषो (तै. सं. १।४।१४।१) मासः। ऊर्जो (तै. सं. १।४।१४।१) मासः। इकारः—शुचि-(तै. सं. १।४।१४।१) र्मासः। रेफः—शुक्रो (तै. सं. १।४।१४।१) मासः।
का. वृ. ४।४।१४०:
"वसुशब्दादपि यद्वक्तव्यः" (वा.)। हस्तौ गृहीतस्य बहुर्गिर्वसव्यैः (तै. सं. १।२।१३।२)। वसुभिरित्यर्थः। अग्निरीशे वसव्यस्य (ऋ. ४।५५।८)। वसोरित्यर्थः॥
इमे द्वे अपि छन्दोविषयकवार्त्तिके सिद्धान्तकौमुद्यां नोपलभ्येते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च—सूत्रव्याख्यानपरम्परायां काशिका अष्टाध्यायीक्रममालम्बते। तत्र वैदिकोदाहरणानां कृते स्वतन्त्रं प्रकरणं न वर्तते। अतः काशिकास्थानि उदाहरणानि वैदिकानि लौकिकानि वेति प्रकरणमनुसृत्य वक्तुं न शक्यते। तत्र बहुवारमेतद् दृष्टिपथमायाति यद् यानि सूत्राणि न सन्ति नियमेन छन्दोविषयकाणि तेषां कृतेऽपि ग्रन्थकृद्भ्यां वैदिकवचनमुदाहरणत्वेनोपन्यस्तम्।[1] सिद्धान्तकौमुद्यां तु भट्टोजिदीक्षितेन छन्दोविषयकसूत्राणां विचारो वैदिकप्रक्रियायां स्वरप्रक्रियाथां च कृतः। तत्र वैदिकप्रक्रियायां मुख्यत्वेन छन्दोविषयकसूत्राणि, अन्यत्र प्रायेण लोकवेदोभयप्रयोगोपकारकाणि सूत्राणि दृश्यन्ते।[2] भट्टोजिदीक्षितेन वैदिकोदाहरणप्रदाने काशिकातः प्राचुर्येण साहाय्यं परिगृहीतम्।

ग्रन्थद्वयेऽपि संहिता-ब्राह्मणाऽऽरण्यको-पनिषद्-सूत्रा-दिग्रन्थभ्यो वैदिकवचांस्युपलभ्यन्ते।

काशिकावृत्तिस्थवैदिकवचांसि प्राधान्येन ऋग्वेदे यजुषि चोपलभ्यन्ते। ग्रन्थद्वयेऽपि कानिचिद् वचांसि अथर्ववेदात् (शौनकशाखावलम्बिनः) परिगृहीतानि। परं तेषां सङ्ख्या नास्त्यधिका।

---

१. का. वृ. २।२।१६, २।३।६५:
पुरां भेत्ता (ऐ. ब्रा. ८।१२।५, शां. श्रौ. ८।१७।१)। वज्रस्य भर्ता (तै. सं. १।४।२८।१, शां श्रौ. ८।१७।१)।
इमे द्वे अप्युदाहरणे वैदिकवाङ्मय उपलभ्येते।
अपि च का. वृ. २।३।१६:
नमो देवेभ्यः (वा. सं. २।७)। स्वाहाग्नये (वा. सं. ३८।११)। स्वधा पितृभ्यः (वा. सं. २।७)।
इत्यादीन्युदाहरणानि वेदे उपलभ्यन्ते। यद्यपि २।३।१६ सूत्रस्य सिद्धान्तकौमुदीस्थोदाहरणान्यपि संहिताग्रन्थेषु लब्धुं शक्यन्ते; परं तत्र २।३।१६ सूत्रस्य लौकिकप्रकरणे स्थापनात् तादृशः प्रश्न एव नोदेति।

२. यद्यपि सिद्धान्तकौमुद्यां लौकिकवैदिकप्रकरणयोः पृथक् पृथगुपन्यासः कृतस्तथापि तत्र लौकिकभागे कानिचित्तादृशानि सूत्राणि वार्त्तिकानि च विद्यन्ते येषामुदाहरणानि केवलं वैदिकवाङ्मय एवोपलभ्यन्ते। यथा—४।१।६२ (५१६) सूत्रे—
दित्यवाट् च मे दित्यौही च मे (वा. सं. १८।२६)।
३।२।१३७ (३११७) सूत्रे—
वीरुधः पारयिष्णवः (ऋ. १०।९७।३) ॥ एवं हि—३।२।१३८ (३११८); ३।२।१३९ (३११९); ३।२।१७० (३१५०); ३।२।१७१ (३१५१) सूत्रस्थोदाहरणानि पृथक् पृथक् स्थलेषु ऋग्वेदे समुपलभ्यन्ते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकात इदमपि दृष्टिपथमायाति यदा ऋग्वेदस्थमन्त्राणां संहितान्तरेषु शब्दमात्राविपर्ययेण पाठो भिद्यते तदा काशिका यजुर्वेदस्थमेव वचनं प्राधान्येनोदाहरति।[1] यथा—

काशिकायां वृत्तौ ६।१।१३३ सूत्रे "एष स्य वाजी क्षिपणिं तुरण्यति" इति वाजसनेयिसंहितास्थं (९।१४) वचनं वर्तते। परमिदं ऋग्वेदे (४।४०।४) "उत स्य वाजीं क्षिपणिं तुरण्यति" इति रूपेणोपलभ्यते।

काशिकायां सिद्धान्तकौमुद्यां च शुक्लयजुर्वेदसंहिताब्राह्मणापेक्षया कृष्णयजुर्वेदसंहिताब्राह्मणादिभ्य एवाधिकान्युदाहरणानि गृहीतानि। परं यत्र काशिका कृष्णयजुर्वेदादुदाहरणानि प्रस्तौति तत्र सिद्धान्तकौमुदी प्राय ऋग्वेदस्थवचनान्येवोदाहरति। यथा—

का. वृ. ७।२।६४: त्वं हि होता प्रथमो बभूथ (तै. सं. ३।१।४।४)।

सि. कौ. ३५८२: विद्मा तमुत्सं यत आ बभूथ (ऋ. १०।८४।५)।

काशिकया कृष्णयजुर्वेदस्थोदाहरणावलम्बने प्रधानं कारणं हि यत् पाणिनिना "देवसुम्नयोर्यजुषि काठके" (७।४।३८) इत्यस्मिन् सूत्रे काठकसंहिताया उल्लेखः कृतः। तथा च तेन "साढ्यै साढ्वा साढेति निगमे" (६।३।११३) इत्यस्मिन् सूत्र तादृशं शब्दस्वरूपं विन्यस्तं यत् केवलं मैत्रायणीसंहितायामेवोपलभ्यते।[2] पाणिनिना स्पष्टरूपेण "यजुष्युरः" (६।१।११७) इत्यस्मिन् सूत्रे यजुष उल्लेख कृतः। अस्योदाहरणानि यजुषि यजुःसम्बन्धिश्रौतादिग्रन्थेषु च केवलं दृश्यन्ते।[3] अनेन प्रकारेणेदं

---

१. द्र.- RAMGOPAL, "Vedic Quotations in the Kāśikā and Siddhāntakaumudī", *ABORI*, Vol. Xlviii, p. 228.

२. साढ्यै (मै. सं. १।६।३१); साढ्वा (मै. सं. ३।८।५)॥ अत्र ६।३।११३ पाणिनिसूत्रस्थं 'साढा' इति पदं पदमञ्जरीकारेण अपपाठत्वेन स्वीकृतम्; यतो हि संहितासु 'आषाढः', 'आषाढम्' इत्यादीनि पदानि संदृश्यन्ते। परं पै. सं. १०।४।१२ मन्त्रे 'साढामित्रम्' इत्यपि दृश्यते। तत्र 'साढ+अमित्रम्' अथवा 'साढा+अमित्रम्' इति सन्धिविच्छेदः कर्तुं युज्यते। तेन न कापि सूत्रे हानिः। अपि च ह्विट्नीमहोदयैः 'साढ्यै, साढ्वा' इति प्रयोगद्वयं कस्यचिदेकस्य ब्राह्मणग्रन्थस्योक्तम्। तदनुचितम्, अस्य प्रयोगद्वयस्यापि मैत्रायणीसंहितायां विद्यमानात्। द्र.- W. D. WHITNEY, "The Veda in Pāṇini", *GSAI*, Vol. 7, p. 247 (1893):
"Some that are limited to a single Brāhmaṇa, as sādhyai sādhavā."

३. द्र.- क्षितीशचन्द्रचट्टोपाध्यायः, "पाठविमर्शः", मञ्जूषा, सितम्बर १९५०, पृ. ३०।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतीयते यत् कृष्णयजुषस्तच्छाखानां च प्रचारो भारतस्य पश्चिमोत्तरभाग एव प्राधान्येन समभवत्। अत्रैव भगवान् पाणिनिस्तत्प्रणीतं व्याकरणं च जनिमागमत्। अत एव काशिका कृष्णयजुर्वेदस्थोदाहरणान्येव अनुसरति, यतस्तान्युदाहरणानि सूत्रकृतो विशेषं परिचितानि। एवं सत्यपि ऋग्वेदमन्त्रापेक्षया कृष्णयजुर्वेदस्थान्युदाहरणानि काशिकायां स्वल्पान्येव वर्तन्ते।[1]

काशिकापेक्षया सिद्धान्तकौमुद्यां पैप्पलादसंहितास्थमन्त्राणामुदाहरणानि विरलान्येव वर्तन्ते। यथा-"इन्द्राग्नी हुवे, ह्वयामि मरुतः शिवान्, ह्वयामि विश्वान् देवान",[2] इत्यादीनि काशिकायामुपलभ्यमानान्यपि बहूनि पैप्पलादवचांसि सिद्धान्तकौमुद्यां न संदृश्यन्ते।

क्वचित् काशिकायाः सिद्धान्तकौमुद्याश्च वैदिकोदाहरणानामेतादृशी स्थितिर्यत्र काशिका केवलमुदाहरणमात्रं प्रस्तौति तत्र सिद्धान्तकौमुदी तदुदाहरणसमन्वितं कञ्चिदधिकमपि मन्त्रभागमुपस्थापयति। यथा—

का. वृ. ३।४।९४:	जोषिषत् (ऋ. २।३५।१)।
सि. कौ. ३४२७:	सुपेशसस्करति जोषिषद्धि (ऋ. २।३५।१)।
का. वृ. ३।३।९६:	मतिः (ऋ. ४।१४१।१)।
सि. कौ. ३४२०:	इयं ते नव्यसी मतिः (ऋ. ४।१४१।१)।

विपरीतमपि दृश्यते। यत्र सिद्धान्तकौमुद्यामुदाहरणामात्रं वर्तते तत्र काशिकायां तदपेक्षयाधिको मन्त्रभागः। यथा—

का. वृ २।४।२८:	अहोरात्रे इदं ब्रूमः (अथ. १।१६।५)।
सि. कौ. ३३९९:	अहोरात्रे (अथ. १।१६।५)।

सिद्धान्तकौमुद्यां बहूनि वैदिकोदाहरणानि काशिकाप्रदत्तानि वर्तन्ते। परं कुत्रचित् सिद्धान्तकौमुद्यां नवीनमपि परिवर्तनं कृतम्। तद्यथा—

का. वृ. ७।२।३४:	वरूत्रीष्ट्वा देवीर्विश्वदेव्यावती (वा. सं. ११।६१)।
सि. कौ. ३५८२:	वरूत्रीभिः सुशरणो अस्तु (ऋ. ७।३४।२२)।

बहुषु स्थलेषु काशिकापेक्षया सिद्धान्तकौमुदीस्थवैदिकवचसां स्थितिः शुद्धा। यथा—

का. वृ. ७।१।४१:	वत्सं दुहन्ति कलशं चतुर्बिलम्।
सि. कौ. ३५६३:	उत्सं दुहन्ति (कलशं चतुर्बिलम्) (तै. ब्रा. ३।७।४।१६)

---

१. तुलना —RAMGOPAL, *ABORI*, Vol. Xlviii-Xlix, p. 228.

२. का .वृ ६।१।३४; पै. सं. १५।२२।१:
इन्द्राग्नी हुवे ह्वयामि मरुतः शिवान्।
ह्वयामि विश्वान् देवान् इमं होममवन्तु मे॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इदं वचनमथर्ववेदे (१८।४।३०) "कोशं दुहन्ति कलशं चतुर्बिलम्" इति रूपेण वर्तते। परं काशिकोद्धृतं वैदिकवचनं केनापि वैदिकमन्त्रेण सह न सङ्गच्छते।

क्वचित् सिद्धान्तकौमुदीस्थवैदिकोदाहरणानां स्थितिरत्यद्भुता विक्षोभकरी च। यथा हि तत्र १।२।६१ (३३८७) सूत्रे "पुनर्वसुर्नक्षत्रं पुनर्वसू वा"; १।२।६२ (३३८८) सूत्रे "विशाखा नक्षत्रं विशाखे वा" इत्युदाहरणस्वरूपम्। परमेतेषां सिद्धान्तकौमुद्युदाहृतवचसां संहिताग्रन्थेषु "पुनर्वसुर्नक्षत्रम्" (मै. सं. २।१३।२), "पुनर्वसूनक्षत्रम्" (तै. सं. ४।४।१०।१); "विशाखा नक्षत्रम्" (काठ. सं. ३९।१३); "विशाखे नक्षत्रम्" (तै. सं. ४।४।१०।२) इत्यादिरूपेणैव पृथक् पृथक् स्थलेषु विद्यमानत्वात् सिद्धान्तकौमुद्यामपि तेनैव प्रकारेण पृथक् पृथक् स्थापनं समुचितमासीत्, नान्येन विधिना। अत एव काशिकायां सूत्रद्वयेऽप्युदाहरणानां पृथक् पृथग् उपन्यासः कृतो वैकल्पिककादर्यशनाय।

बहूनां छन्दोविषयकसूत्राणामुदाहरणानि सिद्धान्तकौमुद्यां न प्रदत्तानि। यथा— १।२।३६ (३६६५); ३।४।१० (३४३७); ३।४।११ (३४३८) इत्यादीनां बहूनां सूत्राणामुदाहरणानि तत्र न विद्यन्ते।

काशिकायां लेखकप्रमादाद् मुद्रणदोषाद् वा बहून्युदाहरणानि दुष्टानि प्रतीयन्ते। यथा काशिकाया "उभे वनस्पत्यादिषु युगपत्" (६।२।१४०) इत्यत्र "तृष्णावरूत्री" इत्युदाहरणम्। परन्त्विदमुदाहरणं कुत्रापि नोपलभ्यते। मैत्रायणीसंहितायां (४।८।१) 'तृष्टावरूत्री', काठकसंहितायां (३०।१) 'त्रिष्टावरूत्री', कपिष्ठलकठसंहितायां (४६।२) 'त्वष्टावरूत्री' इत्यादीनि वचनानि समुपलभ्यन्ते। अतः काशिकायां 'तृष्णावरूत्री' इत्यस्य स्थाने मैत्रायणीसंहितानिर्दिष्टं 'तृष्टावरूत्री' इत्येव पदं समीचीनं प्रतीयते।

क्वचित् काशिकास्थवैदिकोदाहरणानां स्थितिरतीव विचित्रा परिलक्ष्यते। यदि किमपि वैदिकवचनं काशिकाप्रदत्तेन वैदिकोदाहरणेन सह किञ्चित् साम्यं धत्ते (परं न पूर्णतया साम्यम्) तदा पाठकस्तस्मिन् विषये भ्रान्तो जायते। तस्य तत्रोभयोर्वचनयोः (वेदकाशिकाप्रदत्तयोः) किं समुचितमिति निर्णेतुमशक्यम्। यथा "ग्रसितस्कभित-" (७।२।३४) इत्यत्र काशिकायां "चत्ता वर्षेण विद्युत्" इत्युदाहरणम्। इदमुदाहरणं वैदिकवाङ्मये साम्प्रतं कुत्रापि नोपलभ्यते। परमस्य साम्यं पैप्पलादसंहितास्थेन (१७।१२।१०) "च त्वा वर्षेण विद्युता" इति मन्त्रभागेन सह स्थापयितुं शक्यते।

कुत्रचित् काशिकासिद्धान्तकौमुद्योर्वैदिकवचनानि त्रुटिपूर्णानि। यथा "तप्तनप्तनथनाश्च" (७।१।४५) इत्यत्र काशिकायां 'यदिष्ठन' इत्युदाहरणम्। पदमञ्जर्यां च 'यतिष्ठन' इत्युल्लेखः। अत्र सिद्धान्तकौमुद्यां (मोतीलालबनारसीदाससंस्करणे) "विश्वेदेवासो मरुतो यति ष्ठन", अथवा (अन्येषु संस्करणेषु) "विश्वे देवासो मरुतो यति ष्ठन", इति लेखः। परन्तु ऋग्वेदे (१०।६३।६) "विश्वे देवासो मनुषो यति ष्ठन" इत्यनेन रूपेणोपलभ्यते। स एव पाठः शुद्धः। तथा च वृत्तिद्वये-(७।१।४५ सूत्रे) ऽपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'ठन्' इत्यन्तेन वैदिक-प्रयोग उदाहृतः। परं काशिकायां 'यदिष्ठन' इत्ययं प्रयोगो लोड्मध्यमपुरुषबहुवचनस्य इष्धातोः स्वीक्रियते। तथा हि काशिकायामुपन्यासः—"यदिच्छसिद्धान्तकौमुद्यां च तेति प्राप्ते" इति। अत एव काशिकायां "यदिष्ठन" इत्यत्र 'इष्' इति धातुर्गम्यते। "यति, ष्ठन" इति विभक्ते पदे स्वीकृते। अतः 'स्थन' इति पदपाठोऽपि सङ्गच्छते। भट्टोजिदीक्षितेनायं प्रयोग 'अस्' इति धातोर्लोड्मध्यमपुरुष बहुवचने कल्पितः। यथा स लिखति—"यत्सख्यका स्थेत्यर्थः। यच्छब्दाच्छान्दसो डतिः। अस्तेस्तस्य थनादेशः" इति। नव्याः टीकाकृतः "ष्ठन" इत्युदाहरणम् ऋग्वेदे (१०।६३।६) 'अस् भुवि' इत्यस्माद् धातोर्लट्लकारमध्यमपुरुषबहुवचनस्यैवेति स्वीकुर्वन्ति।[1]

ग्रन्थद्वये कानिचिदेतादृशानि वैदिकवचनानि येषु छन्दोविषयकसूत्राणां विधिर्यथार्थरूपेण न सङ्गच्छते। यथा "बहुलं छन्दस्यमाङ्योगेऽपि" (६।४।७५) इत्यत्र "मा···अवाप्सुः" इत्युदाहरणम्। अत्र लुङ्लकारे 'मा' इति प्रयुज्यमानेऽपि अडागमस्य विधिर्निर्दिष्टः; यथा—"मा वः क्षेत्रे परबीजान्यवाप्सुः" इति। इदमुदाहरणं वैदिकवाङ्मये आपस्तम्बधर्मसूत्रे (२।६।१३।६), बौधायनधर्मसूत्रे (२।२।३।३४) चोपलभ्यते। परं ग्रन्थद्वयेऽपि (आपधर्म., बौधधर्म.) 'अवाप्सुः' इत्यस्य स्थाने 'वाप्सुः' इत्येवोल्लेखः। अतः काशिकासिद्धान्तकौमुदीप्रदत्तमुक्तमुदाहरणमसाम्प्रतमेव जायते।[2]

केषाञ्चिद् वैदिकस्थलानां काशिकासिद्धान्तकौमुदीकृतं व्याख्यानमसङ्गतमस्वीकार्यं च वर्तते। यथा "आडयाजयारामुपसंख्यानम्" (७।१।३९ वा, सि. कौ. ३५६१ सूत्रस्थले) इत्यस्मिन् वार्त्तिके "प्र बाहवा सिसृतम्" इत्युदाहरणम्। अत्र काशिकायां सिद्धान्तकौमुद्यां च 'बाहवा' इति पदं 'बाहुना' इति तृतीयैकवचनस्य स्थाने स्वीक्रियते।[3] वस्तुतस्तु ऋग्वेदे (७।६२।५) 'बाहवा' इति द्वितीयाद्विवचनस्यैव रूपम्।[4]

---

१. ऋ. १०।६३।६ सायणः—
"हे विश्वे देवासः देवा यूयं यति यत्संख्या स्थन भवथ॥"
अपि च द्र.- RAMGOPAL, *ABORI*, Vol. Xlviii-Xlix, p. 229.

२. द्र.- उपरिनिर्दिष्टं रामगोपालमहोदयस्यैव शोधपत्रम्, पृ. २२९।

३. का. वृ. ७।१।३९: "प्र बाहुनेति प्राप्ते" इति।
अत्र सि. कौ. अपि द्रष्टव्या।

४. ऋ. ७।६२।५:
"प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा॥"
सायणः—"हे मित्रावरुणा मित्रावरुणौ देवौ बाहवा युवाभ्यां बाहू प्र सिसृतं प्रसारयतम्···।"
अपि च द्र.- रामगोपाल, वैदिकव्याकरण, भाग १, दिल्ली १९६५, पृ ३७९, टिप्पणी; १७४१ तथा च *ABORI*, Vol. Xviii-Xiix, p. 230.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टाध्याय्यां यदि कस्मिन्नपि छन्दोविषयकसूत्रे विकल्पविधानं वर्तते तत्र काशिकायां विकल्पनिर्देशार्थमुदाहरणद्वयं पृथक् पृथक् प्रस्तुतम्। परं बहुत्र काशिका-प्रदर्शितोदाहरणस्वरूपद्वयेऽन्यतरस्य मूलस्थानं वैदिकवाङ्मये नोपलभ्यते। यथा—

सूत्राणि	उदाहरणानि	मूलस्थलानि
१।४।६	कुलुञ्चानां पतये नमः	वा. सं. १६।२२
,,	कुलुञ्चानां पत्ये नमः	×
२।३।३	यवाग्वाग्निहोत्रं जुहोति	काठ. सं. ६।३
,,	यवागूमग्निहोत्रं जुहोति	×
६।४।६	त्वं नृणां नृपते	ऋ. २।१।१
,,	त्वं नृणां नृपते	×

अत्र सिद्धान्तकौमुद्यां (१।४।६=३३८६)-"क्षेत्रस्य पतिना वयम्" (ऋ. ४।५७।१); (२।३।३=३३६४)-"यवाग्वाग्निहोत्रं जुहोति" (काठ. सं. ६।३) इत्येकैकमुदाहरणं प्रदत्तम्। अत एवं ज्ञायते यत् सिद्धान्तकौमुदीकारः प्राय उपलब्धमेव वैदिकवचनमुदाहरणत्वेनोपस्मापयति, नान्यत्।

ग्रन्थद्वयस्य कानिचिद् वैदिकोदाहरणानि साम्प्रतमनुपलब्धमूलकानि सन्ति। यथा ७।१।१० सूत्रे काशिकायां 'नद्यैः' इत्युदाहरणं वैदिकवाङ्मये कुत्रापि नोपलभ्यते।[1] काशिकायां ३।१।३४; ३।४।७; ३।४।६४; ३।४।६७ सूत्रेषु 'मन्दिषत्' इति वैदिकमुदाहरणमनुपलब्धमूलकम्। अपि च काशिकासिद्धान्तकौमुद्योः ३।१।८५ (३४३३); ३।४।१३ (३४४०); ३।४।१४ (३४४१) इत्यादिषु सूत्रेषु प्रदत्तानि कानिचिद् वैदिकोदाहरणानि साम्प्रतं नोपलभ्यन्ते।

यथा काशिकावृत्तिश्छन्दोविषयकसूत्राणां व्याख्याने तेषां प्रत्युदाहरणप्रदर्शनार्थमपि प्रयतते न तथा सिद्धान्तकौमुदी; यतः "चतुर्थ्यर्थे बहुलं छन्दसि" (२।३।६२) इत्यत्र काशिकायां बहुलमित्यस्य कृते "कृष्णो रात्र्यै" (वा. सं. २४।३६), "हिमवतो हस्ती" (तै. सं. ५।५।११।१) इति प्रत्युदाहरणद्वयं वर्तते। परं सिद्धान्तकौमुद्यां किमपि प्रत्युदाहरणं न प्रदत्तम्। तथा च "घसिभसोर्हलि च" (६।४।१००) इत्यत्र काशिकायां स्पष्टरूपेण क्ङित्यनुवर्तनात् "अंशून् बभस्ति" (अथ. ६।४६।२) इति प्रत्युदाहरणं प्रस्तुतम्। परं सिद्धान्तकौमुद्यामस्य सूत्रस्य किमपि व्याख्यानं न कृतम्, न च विद्यते

---

१. G. T. DESHPANDE, "Pāṇini; Sūtras 7.1.9 and 10", *Prāci-Jyoti*, Vol. vi, part 1 (June 1968), p. 89.
तुलना—रामगोपाल, वैदिकव्याकरण, भाग १, भूमिका, पृ. १०।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र प्रत्युदाहरणम्। अत एव ज्ञायते यत् सिद्धान्तकौमुदीकारश्छन्दोविषयकसूत्राणां प्रत्युदाहरणविधौ नास्ति सर्वत्र काशिकावद् दत्तावधानः।

क्वचिद् वैदिकसूत्रव्याख्यानावसरे काशिकासिद्धान्तकौमुदीग्रन्थद्वयस्यापि वेदभाष्यकर्तृणां सायणाद्याचार्याणं व्याख्यानेन सह परस्परं भेदः। यतो हि काशिकायां "वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि" (५।४।४१) इत्यस्य—"प्रशंसायामित्येव, वृकज्येष्ठाभ्यां प्रशंसोपाधिकेऽर्थे वर्तमानाभ्यां **यथासंख्यं** तिल्तातिलौ प्रत्ययौ भवतश्छन्दसि विषये। रूपपोऽपवादः। वृकतिः। ज्येष्ठतातिः" इति व्याख्यानम्। अत्र 'यथासंख्यम्' इति पदेनैवं ज्ञायते यद् 'वृकात्' तातिल् न भवति, 'ज्येष्ठात्' तिल् च न भवतीति। तथा च सिद्धान्तकौमुदीकारेण इमौ तिल्तातिल्प्रत्ययौ 'स्वार्थे' एव स्वीकृतौ। तत्र 'स्वार्थे' इत्यस्य व्याख्याने लघुशब्देन्दुशेखरे नागेशो[1] वदति—"स्वार्थे इति। प्राशस्त्यविशिष्टे स्वार्थ इत्यर्थः" इति। ऋग्वेदस्य २।३४।६ मन्त्रस्य 'वृकताति' इत्यस्य व्याख्याने सायणाचार्यो 'वृक' इत्यस्मात् स्वार्थे तातिल्प्रत्ययं स्वीकृत्य लिखति-"वृक् आदाने। "वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि" (५।४।४१) इति स्वार्थिकस्तातिल्प्रत्ययः" इति। परं विचित्रमेतद् यत् काशिकायां (प्रशंसार्थे) सिद्धान्तकौमुद्यां (स्वार्थे) च 'वृक' इत्यस्मात् तिल्प्रत्ययस्यैव विधानम्, न तु तातिल्प्रत्ययस्य। काशिकासिद्धान्तकौमुदीव्याख्याप्रमाणेन 'ज्येष्ठतातिः' इत्यत्रैव 'तातिल्' इति प्रत्ययेन भाव्यम्, नान्यत्र। अत एव ज्ञायते यत् काशिकासिद्धान्तकौमुदीकृतं वैदिकसूत्राणां व्याख्यानं न सर्वजनसंमतम्।

ग्रन्थद्वयस्य बहून्युदाहरणानि तादृशानि विद्यन्ते येषां मूलस्थानं महाभाष्य एव समवलोक्यते, न तु वैदिकग्रन्थेषु। यथा सिद्धान्तकौमुद्यां ३।४।१४ (३४४१) सूत्रे 'न म्लेच्छितवै' इत्युदाहरणं वैदिकत्वेन प्रदर्शितम्। परमेतदुदाहरणं महाभाष्यपस्पशाह्निक एवोपलभ्यते, नान्यत्र। एवमेव काशिकास्थं (७।१।७७)—"अक्षी ते इन्द्र पिङ्गले कपेरिव" इति वचनं महाभाष्य एव दृश्यते। एतादृशी स्थितिर्ग्रन्थद्वये बहुत्र दृश्यते।

उपर्युक्तेन विवेचनेन ज्ञायते यद् ग्रन्थद्वयेऽपि वैदिकोदाहरणानां स्थितिः पृथक् पृथक् (क्वचित् समाना क्वचिदसमाना) भूत्वापि नास्ति यथार्थपरिज्ञानाय पाठकानां सन्तोषकरी।[2]

---

१. अत्र भ्रान्तिवशात् डॉ. रामगोपालमहोदयैः (वैदिकव्याकरण, भागः १, पृ. ४६६, टि ७९) तत्त्वबोधिनीकारस्य ज्ञानेन्द्रसरस्वतिनो नामनिर्देशः कृतः। परं सिद्धान्तकौमुद्या वैदिकप्रकरणे तत्त्वबोधिनीटीकैव नोपलभ्यते।

२. ग्रन्थद्वयस्य वैदिकोदाहरणानां सङ्कलनमत्र विस्तारभिया न क्रियते। तदन्तिमे नवमे प्रकरणे करिष्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षष्ठं प्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(क) काशिकावृत्तौ सिद्धान्तकौमुद्यां च गद्यमयवार्तिकानां स्थितिः

वार्त्तिकानां किं स्वरूपं किञ्च प्रयोजनमित्यादिनिर्वारणार्थं पाश्चात्यैर्भारतीयैश्च बहुभिर्विद्वद्भिर्महान् प्रयासः कृतः। तत्र पाश्चात्येषु डॉ. किलहॉर्नमहोदयानां भारतीयेषु च डॉ. रामसुरेशत्रिपाठिमहाभागानां कार्यं विशेषतः प्रशंसार्हं वर्तते। डॉ. किलहॉर्नमहोयैर्महाभाष्याधारेण वार्त्तिकानां स्वरूपपरिज्ञाने प्रायः पूर्वसूरिणां (डॉ. गोल्डस्टूकर-वेबर-बर्नेल-प्रभृतीनां) मतानि साकल्येनालोड्य विमृश्य च वार्त्तिकस्वरूपनिर्धारणार्थं नूतनः सिद्धान्तोऽस्मत्पुरतः स्थापितः।[1] डॉ. त्रिपाठिमहाभागैः स्वीये शोधपत्रे डॉ. किलहॉर्नविलिखितेभ्यो वार्त्तिकविषयकेभ्यः शोधपत्रेभ्यः पर्याप्तं साहाय्यं गृहीतमिति प्रतीयते।[2] एवं सत्यपि डॉ. त्रिपाठिमहोदयानां वार्त्तिकविषयकमध्ययनं स्वतन्त्रं, सूक्ष्मं, परिपक्वं च विद्यते। अस्मिन् प्रबन्धे महाभाष्यवार्त्तिकस्वरूपविषये किमपि वक्तुं नास्त्यवसरस्तथापि प्रसङ्गवशात् किञ्चिदुच्यते।

महाभाष्ये समुपलब्धेषु वार्त्तिकेषु आचार्यकात्यायनप्रणीतवार्त्तिकानां सङ्ख्या भूयसी। परं कात्यायनवार्त्तिकानां विशिष्य स्वरूपं कथं निर्धारणीयमिति विषमा समस्या। डॉ. किलहॉर्नसम्पादिते महाभाष्ये १२४५ सूत्रेषूपलभ्यन्ते कात्यायनवार्त्तिकानि। ४६८ सूत्रेषु कात्यायनवार्त्तिकविरहितेषु पतञ्जलेर्महाभाष्यमुपलभ्यते।[3] अवशिष्टेषु पाणिनिसूत्रेषु यद्यपि आचार्यपतञ्जलिना व्याख्या न कृता तथापि तेषु कतिपयानां सूत्राणामुपन्यासस्तेन प्रकरणवशेन प्रयोगव्युत्पादनहेतुना वा अन्यत्र कृतः।

---

१. F. KIELHORN, *Kātyāyana and Patañjali*, pp. 1-7 (1963).

२. डॉ. किलहॉर्नमहोदयैः स्वकीये *Kātyāyana and Patañjali* नामके प्रबन्धे डॉ. गोल्डस्टूकर-वेबर-बर्नेलप्रभृतीनां ग्रन्थेभ्यो यानि स्थलान्युद्धृतानि प्रायस्तान्येव डॉ. रामसुरेशत्रिपाठिमहोदयैः स्वकीये शोधपत्रे भाषान्तरेणोद्धृतानि। तत्कृते द्र.- "वार्त्तिक का स्वरूप", अभि. भा., वर्ष ३ (अलीगढ़, १९६१), पृ. ३-४।

३. F. KIELHORN, "Notes on the Mahābhāṣya, No. 3 : On Some Doubtful Vārttikas", *IA*, Vol. xv, p. 203 (1886):
"According to my edition of Mahābhāṣya, Kātyāyana has appended notes to 1245 rules only, and Patañjali has, independently of Kātyāyana, attached remarks of his own to 468 other rules..."

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आचार्यकात्यायनेन तृतीयभागादपि न्यूनसङ्ख्याकेषु सूत्रेषु वार्त्तिकानि विरचितानि ।[1] तत्र किं सूत्रमधिकृत्य वार्त्तिकं प्रणीतमिति ज्ञानार्थं प्रायः कात्यायनेन स्वीयवार्त्तिकेषु सूत्रगतपदानां प्रतीकात्मको भागो निर्दिष्टः । पाणिनिसूत्रगतपदानां कोऽप्यंशः प्रायेण वार्त्तिके निर्दिष्ट उपलभ्यते । भूयसा वार्त्तिकेषु क्वचित् पाणिनिसूत्राणां प्रथमं पदं, क्वचिद् मध्यमं पदं, क्वचिच्चान्तिमं पदं प्रतीकरूपेण चकास्ति ।[2] अनेन हेतुना तत्तद्वार्त्तिकं केन सूत्रेण सह संबद्धमिति ज्ञातुं शक्यते । एवमेव "इति वक्तव्यम्", "इति कर्तव्यम्" इति पूरयित्वा यदा तस्यैव वचनस्य महाभाष्ये आवृत्तिरुपलभ्यते तदा तद्वचनं कात्यायनवार्त्तिकं भवतीत्यपि डॉ. किलहॉर्नमहोदयैर्निर्णीतम् । एवंरीत्या डॉ. किलहॉर्नमहोदयैः कात्यायनविरचितवार्त्तिकानां स्वरूपपरिज्ञानाय भूरिपरिश्रमः कृतः । नैकेषु संशयग्रस्तेषु स्थलेषु वार्त्तिकानां स्वरूपनिर्धारणार्थं तैरेकं शोधपत्रं लिखितं यत्रानेकेषां वार्त्तिकानां स्वरूपस्य परिष्कृतं विवेचनं कृतम् । यथा—इदं कात्यायनविरचितं वार्त्तिकम्, इदं पतञ्जलिवचनम्; इदञ्चैतेषु वार्त्तिकेषु अस्मिन् सूत्रे प्रथमं द्वितीयं वा वार्त्तिकमित्येवंरूपेण विचारस्तत्र प्रक्रान्तः ।[3] साम्प्रतञ्च केषाञ्चिद् वार्त्तिकानां समुचितस्थानान्वेषणे श्रीसरस्वतीप्रसादचतुर्वेदिभिः[4] डॉ. रामसुरेशत्रिपाठिभिः[5] डॉ. एस. डी. लड्डूमहाभागैश्च[6] महान् प्रयासो विहितः । तस्मादयं निर्गलितोऽर्थो यद् महाभाष्यस्थवार्त्तिकानां स्वरूपविषये, स्थानविषये, कर्तृत्वविषये च विदुषां मध्ये नास्त्यैकमत्यम् ।

महाभाष्ये पतञ्जलिविरचितानि वार्त्तिकान्यपि विद्यन्ते । पतञ्जलिविरचितवार्त्तिकानां प्राधान्येनेदं स्वरूपं यत् तानि 'वक्तव्यम्' इति पदेन संयुक्तानि वर्तन्ते;

---

१. *Ibid*, p. 204:

"...Kātyāyana in his Vārttikas has treated of somewhat less than a third of Pāṇini's rules."

२. रामसुरेशत्रिपाठी, "वार्त्तिक का स्वरूप", अभि. भा., वर्ष ३, अङ्क १, पृ. १२-२१ ।

३. विस्तरेण द्र.—F. KIELHORN, *IA*, Vol. xv, pp. 203-211.

४. S. P. CHATURVEDI, "Note on a Vārttika and its Misplaced Occurence in the Mahābhāṣya", *P. V. Kane felicitation Vol. (A volume of studies in Indology)*, p. 82 (Poona, 1941).

५ रामसुरेशत्रिपाठी, अभि. भा., वर्ष ३, अङ्क १, पृ. १३-२१ ।

६. S. D. LADDU, "Authorship of a Vārttika from the Mahābhāṣya", *JUP (HS)*, No. 33. pp. 13-22 (1970):
अस्मिन् शोधपत्रे डॉ. लड्डूमहाभागैः "केलिमर उपसंख्यानम्" (३।१।९६, वा. १) इत्युपसंख्यानस्य कर्ता महाभाष्यकारपतञ्जलिरेव न तु कात्यायन इति निर्णीतम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न तेषु विद्यते व्याख्याभाष्यम्। तानि च प्रायेण तेषु सूत्रेषु वर्तन्ते यत्र नोपलभ्यन्ते कात्यायनविरचितानि वार्त्तिकानि। यथा महाभाष्ये "वाष्पोष्मभ्यामुद्वमने" (३।१।१६) इत्यत्र "फेनाच्चेति वक्तव्यम्" इति वार्त्तिकम्। तथैव "सूत्राच्च कोपधात्" (४।२।६५) इत्यत्र "संख्याप्रकृतेरिति वक्तव्यम्" इति वार्त्तिकम्। इमे द्वे अपि वार्त्तिके तत्र व्याख्याभाष्याभावात् पतञ्जलिविरचिते एव स्याताम्। महाभाष्यकारप्रणीतेषु वार्त्तिकेषु 'वक्तव्यः' अथवा 'वक्तव्यम्' इत्यंशोऽनिवार्यरूपेण दृश्यते, न तथा कात्यायनप्रणीतवार्त्तिकेषु। अयमेव कात्यायनपतञ्जलिविरचितवार्त्तिकेषु परस्परं भेदः। परं वार्त्तिकेषु 'वक्तव्यम्' इति शब्दपूरणपद्धतिः पतञ्जलिकालात्पूर्वमेव प्रक्रान्तासीदिति विदुषां मतम्।[1] एतदतिरिक्तं महाभाष्ये "अत्यल्पमिदमुच्यते" इति पदेनापि पतञ्जलिना केषाञ्चिद् वार्त्तिकानां विस्तरः कृतः; सन्ति च कानिचित्तेषु अन्येषाम्।[2]

एवं रीत्या विद्वद्भिर्महाभाष्यमधिकृत्य वार्त्तिकानां स्वरूपनिर्धारणे पुराकालादेव बहुप्रयासो विहितः। परमुत्तरकालिकेषु काशिकासिद्धान्तकौमुदीसदृशव्याकरणग्रन्थेषु वार्त्तिकानां का स्थितिरासीदित्यस्य विचारो नाद्यावधि कृतः। अतस्तदधिकृत्याधस्ताद् विचार्यते।

महाभाष्य उद्धृतानां वार्त्तिकानामुत्तरवर्तिव्याकरणग्रन्थोद्धृतवार्त्तिकैः साकं तुलनायां क्रियमाणायामेतद् दृष्टिपथमायाति यद् वार्त्तिकानां सङ्ख्योत्तरोत्तरं ह्रासमुपैति। महाभाष्यापेक्षया काशिकावृत्तौ काशिकापेक्षया च प्रक्रियाग्रन्थेषु (रूपावतार-प्रक्रियाकौमुदीसिद्धान्तकौमुद्यादिषु) वार्त्तिकानां सङ्ख्याल्पीयसी दृश्यते। अत्र मूर्धाभिषिक्तं कारणमेतदेव यदुत्तरवर्तिग्रन्थेषु प्रायः प्रयोगव्युत्पादकानि प्रक्रियाविषयकाणि यानि वार्त्तिकानि वर्तन्ते तेषामेव सङ्ग्रहः। दार्शनिकसिद्धान्तविषयकाणि अर्थविमर्शकारीणि पदकृत्यदर्शकानि यानि वार्त्तिकानि महाभाष्ये वर्तन्ते तेषां प्रक्रियादृष्ट्या अनुपयुक्तत्वाद् उत्तरवर्तिग्रन्थेषु सङ्ग्रहो न कृतः। प्रयोगसाधकत्वस्यैव सङ्ग्रहे मूलकारणत्वेन महाभाष्यानुपलब्धानामपि वार्त्तिकानां सङ्ग्रहः साधुशब्दव्युत्पादनार्थं कृत उत्तरवर्तिभिरिति दृश्यते। एतदर्थमेव तैर्नैकेषु स्थलेषु व्याकरणसम्प्रदायान्तरेभ्योऽपि वार्त्तिकानि स्वीकृतानि। यथा काशिकायां कातन्त्रचान्द्रादिव्याकरणानां प्रभावस्तथैव प्रक्रियाकौमुद्यादिग्रन्थेषु वोपदेवकृतमुग्धबोधाद्यपाणिनीयानामपि व्याकरणानां प्रभावो दृश्यते।

ग्रन्थद्वयेऽपि ग्रन्थकारैर्बहुषु स्थलेषु मूलवार्त्तिकापेक्षया पतञ्जलिकृतवार्त्तिकव्याख्यापरं भाष्यमेव सङ्गृहीतम्। अनेनैव कारणेन उत्तरवर्तिग्रन्थेषु प्रायो वार्त्तिकानि "इति

१. द्र.- रामसुरेशत्रिपाठी, "श्लोकवार्त्तिक तथा अन्य वार्त्तिक", प्राच्य प्रज्ञा, वर्ष २, अङ्क १, पृ. २० (अलीगढ़, १९६९)।

२. *Ibid*, पृ. १९।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वक्तव्यम्" अथवा "इति कर्तव्यम्" इति पदेन सन्नद्धानि वर्तन्ते। अत्र स्वातन्त्र्येण कात्यायनविरचितवार्त्तिकग्रन्थस्थानुपलब्धिरेव कारणमुत्पश्यामः। अतः पाणिनीयशास्त्रे सर्वथा वार्त्तिकस्वरूपनिर्धारणे वार्त्तिकार्थनिर्धारणे च भगवान् पतञ्जलिरेव शरणीकर्तव्यः, नान्यः पन्था अस्माकं पुरतः।

क्वचित् सिद्धान्तकौमुदी वार्त्तिकानां स्वरूपं यथानुपूर्वीकं ददाति परं काशिका पर्यायशब्दमाश्रित्य वार्त्तिकाशयं निर्दिशति। कुत्रचित् काशिका वार्त्तिकानां यथास्थितं स्वरूपं ददाति परं सिद्धान्तकौमुदी शब्दान्तरं योजयित्वा वार्त्तिकानामाशयमाविष्करोति। यथा—

(१) म. भा. २।३।२३, का. वृ. २।३।२७: निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्।[1]
सि. कौ. ६०८: निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्।
म. भा., का. वृ. ४।१।४८: गोपालिकादीनां प्रतिषेधः।
सि. कौ. ५०४: पालकान्तान्न।

(२) म. भा. १।४।४८, सि. कौ. ७९४: अभुक्त्यर्थस्य न।
का. वृ. १।४।४८: वशेरश्यर्थस्य प्रतिषेधो वक्तव्यः।
म. भा. ३।१।११२, सि. कौ. २८६१: समश्च बहुलम्।
का. वृ. ३।१।११२: संपूर्वाद्विभाषा।
म. भा. ३।३।१०७, सि. कौ. ३२८४: इषेरनिच्छार्थस्य।
का. वृ. ३।३।१०७: इषेरनिच्छार्थस्य युज्वक्तव्यः।

उपर्युक्तस्थलनिरीक्षणेनैतज्ज्ञायते यद् यत्र काशिका कात्यायनवार्त्तिकं यथास्वरूपं निर्दिशति तत्र सिद्धान्तकौमुदी वार्त्तिकाशयं शब्दान्तरयोजनया प्रकटीकरोति। यत्र च काशिका कात्यायनवार्त्तिकं यथानुपूर्वीकं न ददाति तत्र सिद्धान्तकौमुदी कात्यायनप्रणीतवार्त्तिकस्वरूपं यथाक्षरं प्रस्तौति।

महाभाष्येऽनेके शब्दाः संवादानुबन्धेन व्याख्यानुबन्धेन वा प्रयुक्ताः, येषां साधुत्वं मुनित्रयोक्तिभिः कर्तुं न शक्यते। एतेषां साधुत्वार्थं महाभाष्योत्तरवर्तिग्रन्थेषु ग्रन्थकारैर्नूतनवार्त्तिकानि प्रणीतानि। तानि भाष्योदाहृतप्रयोगसिद्धिकरत्वेन प्रमाणभूतानीति पाणिनीया मन्वते। यथा—

---

१. प्रो. सरस्वतीप्रसादचतुर्वेदिमहोदयानां मतेनेदं महाभाष्येऽनुचितस्थले उद्धृतं वर्तते; यतो हि "हेतौ" (२।३।२३) इत्यत्र केवलायास्तृतीयायाः प्रसङ्गः। परं "निमित्तकारण-" इत्यनेन वार्त्तिकेन सर्वासां विभक्तीनां दर्शनं भवति। तस्मादिदं वार्त्तिकं "षष्ठी हेतुप्रयोगे" (२।३।२६), "सर्वनाम्नस्तृतीया च" (२।३।२७) इति सूत्रद्वयादनन्तरमेव भाव्यम्। तदैवास्य प्रसङ्गः सङ्गच्छते। द्र.- *P. V. Kane felicitation Vol.*, pp. 82-83.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(१) म. भा. ७।३।५१: अथेह कथं भवितव्यम्—दोर्भ्यां चरति दौष्क इति भवितव्यम् । कथम् ? यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ।
का. वृ. ७।३।५१, सि. कौ. १२२१: दोष उपसंख्यानम् । दोर्भ्यां चरति दौष्कः ।

(२) म. भा. १।४।६०: अवीत्त्वम् । प्रेपम्, परेपम् ।
" ६।३।९७: अपर आह । ईत्त्वमनवर्णादिति वक्तव्यम् । समीपम्, अन्तरीपम् । इह मा भूत—प्रापम्, परापम् ।
का. वृ. ६।३।९७: अपर आह—"अनवर्णादिति वक्तव्यम्" । इह मा भूत्—प्रापम्, परापम् ।
सि. कौ. ९४१: अवर्णान्ताद्वा । प्रेपम् । परेपम् । प्रापम् । परापम् ।

अत्र काशिकायां महाभाष्यसंमतं 'प्रेपम्, परेपम्' इति रूपद्वयं नोपलभ्यते । सिद्धान्तकौमुदीकारस्तु अन्येन प्रकारेण वार्त्तिकं विरचय्य कार्यार्थसिद्धिं दर्शयति ।

क्वचिच्च पतञ्जलिकालपर्यन्तमप्रयुक्तानां परमुत्तरवर्तिकाले शिष्टैः स्वीकृतानां प्रयोगाणां सिद्धये काशिकावृत्त्यादिषु नवीनानि वार्त्तिकानि सङ्ग्रथितानि । परमेतादृशानां वार्त्तिकानां सङ्ख्या काशिकायामेवाधिका । उदाहरणार्थं कानिचिद् वार्त्तिकानि उद्धियन्ते—

का. वृ. ४।२।३७: गुणादिभ्यो ग्रामज्वक्तव्यः ।
" ४।२।५१: कमलादिभ्यः खण्डच् प्रत्ययो भवति ।
" " नरकरितुरङ्गाणां स्कन्धच् प्रत्ययः ।
" " पूर्वादिभ्यः काण्डः प्रत्ययो भवति ।
सि. कौ. २०३५: ऋवर्णादपि ।

अन्यच्च, क्वचिद् महाभाष्ये यत्र द्वे वार्त्तिके नैकानि वा वार्त्तिकानि पृथक् पृथग् रूपेणोपदिष्टानि तत्र काशिकादिषु नैकेषां वार्त्तिकानामेकस्मिन् वार्त्तिकेऽन्तर्भावः स्मरणसौकर्यार्थं कृतो दृश्यते । यथा—

(१) म. भा. ३।१।१७: सुदिनदुर्दिनाभ्यां च (वा. १) ।
" " नीहाराच्च (वा. २) ।
का. वृ. ३।१।१७: सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् ।
सि. कौ. २६७३: सुदिनदुर्दिननीहारेभ्यश्च ।

(२) म. भा. २।१।३६: अर्थेन नित्यसमासवचनम् (वा. ४) ।
" " सर्वलिङ्गता च (वा. ५) ।
का. वृ. २।१।३६: अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या ।
सि. कौ. ६९८: अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(३) म. भा. २।३।३६: कारकार्हाणां च कारकत्वे (वा. ३)।
" " अकारकार्हाणां चाकारकत्वे (वा. ४)।
" " तद्विपर्यासे च (वा. ५)।

सि. कौ. ६३४: अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च।

एतद्वैपरीत्येन क्वचिद् महाभाष्योद्धृतमेकमपि वार्त्तिकं काशिकादिषु द्विधा त्रिधा वा विभज्य पठितं दृश्यते। यथा महाभाष्ये "व्युष्टादिभ्योऽण्" (५।१।९७) इत्यत्र "अण्प्रकरणेऽग्निपदादिभ्य उपसंख्यानम्" इति वार्त्तिकम्। अनेन वार्त्तिकेन पतञ्जलिना 'आग्निपदम्, पैलुमूलम्, औपवस्त्रम्, प्राशित्रम्, चौडम्, श्राद्धम्' इत्यादीनि रूपाणि व्युत्पादितानि। परं काशिकायामस्मिन् प्रकरणे (५।१।९७) "अण्प्रकरणेऽग्निपदादिभ्य उपसंख्यानम्" इत्युपसंख्यानेन 'आग्निपदम्, पैलुमूलम्' इति रूपद्वयं व्युत्पाद्य; "ऋतोरण्" (५।१।१०५) इत्यत्र "तदस्य प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम्" इत्यनेन 'औपवस्त्रम्, प्राशित्रम्' इति; तथा "विशाखाषाढादण्मन्थदण्डयोः" (५।१।११०) इत्यत्र "चूडादिभ्य उपसंख्यानम्" इत्यनेन 'चौडम्, श्राद्धम्' इत्यादीनि चत्वारि रूपाणि पृथक् पृथग् विधानेन व्युत्पादितानि। अमीषां मध्ये सिद्धान्तकौमुद्यां केवलं "चूडादिभ्य उपसंख्यानम्" इत्येवोपलभ्यते। नास्ति तत्र "अग्निपदादिभ्य उपसंख्यानम्"; "उपवस्त्रादिभ्य उपसंख्यानम्" इति वार्त्तिकद्वयस्य पाठः। सिद्धान्तकौमुद्याः केषुचिद् मुद्रितसंस्करणेषु अर्धचन्द्रद्वयमुद्राङ्कितः पाठः उपलभ्यते, परं न स व्याख्यातष्टीकादिषु।

बहुत्र महाभाष्ये 'अत्यल्पमिदमुच्यते' इति वचनं पूर्वं संयोज्य, अथवा 'अपर आह' इति संबोध्य पूर्वोक्तवार्त्तिकानां स्वरूपविस्तरः कृतः। एतादृशस्थले काशिका-सिद्धान्तकौमुदीग्रन्थद्वयेऽपि कात्यायनेन, भाष्यकारेण, अन्यैर्वा वैयाकरणैः प्रणीतानां वार्त्तिकानामभिप्रायमेकत्र सङ्कलय्य एकमेव वार्त्तिकं निबद्धम्। यथा महाभाष्ये २।३।२ सूत्रे "समयानिकषाहायोगेषूपसंख्यानम् (वा. १)।...अपर आह। द्वितीयाविधानेऽभितः परितःसमयानिकषाध्यधिधिग्योगेषूपसंख्यानम्।... अपर आह। उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते" इति व्याख्यानमुपलभ्यते। अत्र काशिकायाम् "अभितःपरितःसमयानिकषाहाप्रतियोगेषु च दृश्यते" इति पाठः। सिद्धान्तकौमुद्यामपि प्रायः काशिकावदेव पाठः। अत्र महाभाष्ये 'अधि' इत्येकवारं तथा 'धिग्' इति द्विवारं दृश्यते। परं न तथा काशिकायां सिद्धान्तकौमुद्यां च वर्तते। अत्रैतत् कारणं संभाव्यते यद् "उपान्वध्याङ्वसः" (१।४।४८) इति सूत्रे 'अधी' त्यस्य विद्यमानत्वात् तथा 'धिगि'त्यस्य च श्लोकवार्त्तिके एव समावेशात् तदुत्तरवर्तिनि "अभितःपरितःसमया-" इत्यादिवार्त्तिके 'धिगि' त्यस्य महाभाष्योक्तिवत् पुनरुपन्यासो न कृतः। एतादृशान्यन्यान्युदाहरणानि काशिकायां ३।२।१७८; ३।३।५६ तथा सिद्धान्तकौमुद्यां ३१५८; ३२३१; २६६२ सूत्रेष्वपि दरीदृश्यन्ते।

महाभाष्योत्तरवर्तिग्रन्थेषु महाभाष्यस्थानां नैकेषां वार्त्तिकानामभिमतोऽर्थः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूत्रकारस्यापि कथमभिमतस्तत्प्रतिपाद्य ज्ञापकेन वचनसामर्थ्येन वा वार्त्तिकानां वैयर्थ्यं प्रदर्शितम् । यथा "आङ् मर्यादावचने" (१।४।८९) इत्यस्य "आङित्येष शब्दो मर्यादायां कर्मप्रवचनीयसंज्ञो भवति" इति सूत्रार्थः । अत्र महाभाष्ये "आङ्मर्यादाभिविध्योरिति वक्तव्यम्" इति पतञ्जलिकृतं वचनम् । आङित्येष शब्दो मर्यादाभिविध्योः कर्मप्रवचनीयसंज्ञो भवतीति तत्तात्पर्यम् । परं काशिकायां सूत्रगतेन 'वचनम्' इति पदेनैव "वचनग्रहणादभिविधिरपि गृह्यते" इति व्याख्यानं कृतम् । अनेन अभिविधेरपि बोधो भवति । एवमेव सिद्धान्तकौमुद्यां व्याख्यानम् । एवंरीत्या कात्यायनपतञ्जलिप्रणीतेष्वपि वार्त्तिकेषु ज्ञापकादियुक्तिमाश्रित्य पतञ्जलेरपि वार्त्तिकानि काशिकायां सिद्धान्तकौमुद्यां च प्रत्याख्यातानि ।

बहुत्र सूत्रव्याख्यानरूपाणां वार्त्तिकानां काशिकादिवृत्तिषु वृत्तावेवान्तर्भावः कृतः । परं वृत्तावेव वार्त्तिकान्तर्भावेण तत्तद्वार्त्तिकस्वरूपानाकलयद्भिश्छात्रैर्मूलभूतं वार्त्तिकस्वरूपं न परिलक्ष्यत इति महत् खेदकरम् । एतादृशानां बहूनां वार्त्तिकानां स्वरूपं वृत्तिषु विनष्टप्रायम् । एतदर्थं दिङ्मात्रमधस्ताद् निर्दिश्यते ।

महाभाष्ये "ङिति च' (१।१।५) इति सूत्रे "ङिति प्रतिषेधे तन्निमित्तग्रहणम्" इति प्रथमं वार्त्तिकम् । इदं महाभाष्यकारेण "ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्तव्यम् । ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति वक्तव्यम्" इति दिशा व्याख्यातम् । एतेन व्याख्यानेनेदं कात्यायनविरचितवार्त्तिकमेवेत्यत्र नास्ति संशयवेशः । काशिकायामस्य सूत्रस्यार्थ एवं प्रतिपादितः—"निमित्तसप्तम्येषा । ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः" इति । सिद्धान्तकौमुद्यां च—"गित्कित्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः" इत्यर्थः । अत्र काशिकायां—"गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते" इत्यप्यधिकं वचनम् ।[1] सिद्धान्तकौमुद्यां तु साक्षाद्वृत्तावेव तस्यान्तर्भावः कृतः । एवंरीत्या ग्रन्थद्वयेऽपि महाभाष्योद्धृतस्य वार्त्तिकस्य वृत्तावेव सन्निवेशः कृतः । अनयैव विधया महाभाष्यस्थानि कानिचिद् वार्त्तिकान्यस्मिन् ग्रन्थद्वये वृत्तिभागे एवान्तर्भूतानि दृश्यन्ते ।

काशिकायां तादृशान्यपि स्थलानि वर्तन्ते यत्र कात्यायनविरचितवार्त्तिकस्य तदुपरि पतञ्जलिकृतव्याख्यानस्य चोभयोरप्येकस्मिन्नेव वचनेऽन्तर्भावः कृतः । यथा ४।१।१५८ सूत्रे "पूर्वान्ते नलोपवचनम्" इति कात्यायनीयं वार्त्तिकम् । अत्र "यदि पूर्वान्तः क्रियते नलोपो वक्तव्यः । चार्मिकायणिः ; वार्मिकायणिः" इति पतञ्जलिकृद्भाष्यम् । परं काशिकायां "चर्मिवर्मिणो नलोपश्च" इति पाठः । एवमन्यत्राप्यवधेयम् ।

---

१. महाभाष्ये एतादृशं व्याख्यानं १।३।१०; ३।२।१३९ इत्यादिषु स्थलेषु पतञ्जलिकृद्व्याख्यानत्वेन वर्तते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकातः पूर्ववर्तिषु ग्रन्थेष्वनुपलब्धानां परं काशिकायां प्रथमत उपलब्धानां वचनानां 'इति काशिका; इति वृत्तिः' इत्यभिधानेन भट्टोजिदीक्षितैः सिद्धान्तकौमुद्यामृणनिर्देशः कृतः। परं बहुषु स्थलेषु ऋणनिर्देशं विना (काशिकादीनां नामोल्लेखं विना) काशिकातो वचनानि गृहीतानि। तथैव कुत्रचित् काशिकावचनं भाष्यविरुद्धत्वाद् भाष्यानुक्तवाद् अप्रामाणिकमित्युक्तम्। तथा हि—सिद्धान्तकौमुद्यां "यजयाचरुचप्रवचर्चश्च" (७।३।६६) इति सूत्रे "त्यजेश्च त्याज्यम्। त्यजिपूज्योश्चेति काशिका। तत्र पूजेर्ग्रहणं चिन्त्यम्, भाष्यानुक्तत्वात्। ण्यत्प्रकरणे त्यजेरुपसंख्यानमिति हि भाष्यम्" इति व्याख्यानमुपलभ्यते। 'पूजि' इति धातोर्ण्यन्तत्वेनाजन्ततया "अचो यत्" (३।१।९७) इत्यनेनैव 'पूज्यम्' इति रूपसिद्धेः; 'पूजि' इत्यस्य ग्रहणं व्यर्थमिति तदभिप्रायः। परमेतद्विस्मयावहं यत् काशिकायाः कस्मिन्नपि संस्करणेऽयं सिद्धान्तकौमुदीनिर्दिष्टः काशिकापाठो न समवलोक्यते। तथा च न्यासेऽपि "ण्यति प्रतिषेधे त्यजेरुपसंख्यानम्" इत्येव व्याख्यातम्।[1] तेन काशिकायां "ण्यति प्रतिषेधे त्यजेरुपसंख्यानम्" इत्येव मूलभूतं वार्त्तिकमासीत्। तत्सर्वथा भाष्यसंमतम्। "त्यजिपूज्योश्च" इति भट्टोजिदीक्षितैः प्रक्रियाकौमुदीकृतं[2] वार्त्तिकं संगृहीतम्, न तु काशिकावृत्तिकृतम्। परं भ्रमात् काशिकानिर्देशः कृतः।

एवमेव पुरुषोत्तमदेवेन भाषावृत्तौ ४।३।२३ सूत्रे "चिरपरुत्परारिभ्यस्त्न इति जयादित्यः। चिरत्नम्··· । अन्ताच्च डिमजिति जयादित्यः। अन्तिमम्" इत्युल्लेखः कृतः। तस्माद् भाषावृत्तिकारमते इदं वचनद्वयं (वक्तव्यद्वयं) मूलत्वेन जयादित्योक्तमेव भाव्यम्। परं मुद्रितमहाभाष्यसंस्करणेषु अस्य वार्त्तिकद्वयस्य पाठस्य सर्वत्र विद्यमानत्वाद् भाषावृत्त्युक्तं कथनमसङ्गतमेव भवति। तथा च लघुशब्देन्दुशेखरटीकाकारेण भैरवमिश्रेण "चिरपरुत्परारिभ्यस्त्नः" इति वचनं, बालमनोरमाकारेण "अन्ताच्च" इति वचनं वार्त्तिकत्वेनैव स्वीकृतम्।[3] तस्मादिदं वार्त्तिकद्वयं न जयादित्यकृतमित्यसंशयम्।

महाभाष्ये "वर्षाभ्वश्च" (६।४।८४) इत्यत्र 'वर्षाभूपुनर्भ्वश्च' इति कात्यायनविरचितं वार्तिकमुपलभ्यते। पतञ्जलिना "अत्यल्पमिदमुच्यते" इत्युक्त्वा "वर्षादृन्कार-

---

१. न्यासः ७।३।६६: "ण्यति प्रतिषेध इत्यादि। ण्यति प्रतिषेधेऽस्मिन् क्रियमाणे 'त्यज हानौ' इत्यस्योपसंख्यानं कर्तव्यम्। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। तत्रेदं प्रतिपादनम्—चकारोऽनुक्तसमुच्चयार्थः, तेन त्यजेरपि प्रतिषेधो भवतीति।"

२. प्र. कौ. ७।३।६६: "त्यजिपूज्योश्च। न कुत्वम्। त्याज्यम् पूज्यम्।"

३. भैरवमिश्रकृतटीकासहितो लघुशब्देन्दुशेखरः, भागः २, पृ. २६४: "त्नप्रत्ययेन 'चिरपरुत्परारिभ्यस्त्नो वक्तव्यः' इति वार्त्तिकविधेयेन।।"
बा. म. ४।३।२३: "अन्ताच्च। इदमपि वार्त्तिकम्।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनः पूर्वस्य भुव इति वक्तव्यम्" इति न्यूनतापूर्तिकरं नवीनं वार्त्तिकं विरचितम्। काशिकावृत्तावत्र "पुनर्भ्वश्चेति वक्तव्यम्" इति प्रथमं वार्त्तिकं विलिख्य "कारापूर्वस्यापीष्यते" इति इष्टिर्निर्दिष्टा। दृन्भूवर्षाभूशब्दयोः काशिकायां नोल्लेखः। रूपावतारेऽपीदं वार्त्तिकमपरिपूर्णम्। तद्यथा—"पुनर्भूशब्दस्यापि—पुनः पूर्वस्य भुवो यण् वक्तव्यः (वा.) इति अजादौ विभक्तौ यणादेशः। खलपूवत् प्रक्रिया, पुनर्भ्वौ, पुनर्भ्वः"[1] इति। प्रक्रियाकौमुदीकारस्तु महाभाष्यवचनमर्थतोऽनूद्य[2] प्रकारान्तरेणेदं वाक्यमुपस्थापयति। यथा—"दृग्भूः (दृन्भूः)। दृक्कारा (दृन्कारा)-पुनर्भ्वश्चेति वक्तव्यम्। इति वचनाद् यण्। दृग्भ्वौ। दृग्भ्वः। इत्यादि। एवं कारा भूः। पुनर्भूः" इति। अस्मिन् वार्त्तिकविषये प्रमाणान्तरेण पुनरधस्ताद् विचार्यते।

श्रीयुधिष्ठिरमीमांसकैर्लिखितं यत् सायणः स्वकीयायां धातुवृत्तौ वार्त्तिकानां कृते 'अनुस्मृतिः' इति शब्दो विद्यते।[3] तद्यथा—"अनुस्मृतौ कारशब्दस्य स्थाने करशब्दः पठ्यते" इति। परं स्वामिद्वारिकादाससम्पादितमाधवीयधातुवृत्तौ 'अनुस्मृतिः' इति पदं काशिकापरं स्वीकृतम्।[4] अत्रेदं वक्तव्यं यत् करशब्दपाठो महाभाष्ये काशिकायां च नोपलभ्यते। तस्मादनुमीयते यद् धातुवृत्तावुद्धृतोऽयम् 'अनुस्मृतिः' इति ग्रन्थो न महाभाष्यं काशिकां वा विषयीकरोति किन्तु कमप्यनुपलब्ध्यमानं व्याकरणग्रन्थमेव। सिद्धान्तकौमुद्यां तु—"दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः।... दीर्घपाठे तु कर एव कारः" इति पाठः संदृश्यते। तस्माद् ज्ञायते यद् भट्टोजिदीक्षितः पाठद्वयं वेत्ति स्म। परमिदं पाठान्तरं महाभाष्यहस्तलेखेषु वर्तते वा ग्रन्थान्तरात् सङ्गृहीतमिति विषये कौमुदीकारो मौनमेव भजते।

क्वचिद् वार्त्तिकानां परिज्ञाने पाठकानामपि भ्रान्तिः। काशिकायां "निसमुपविभ्यो ह्वः" (१।३।३०) इत्यत्र "उपसर्गादस्यत्यूह्योर्वा वचनम्" इति वार्त्तिकमुपलभ्यते। अनेन 'निरस्यति, निरस्यते ; समूहति, समूहते' इत्यादिप्रयोगाणां सिद्धिर्भ-

---

१. द्र.- रूपा., भागः १, पृ. ५६।

२. प्र. कौ. प्रसादः ६।४।८३, भागः १, पृ. १७२:
"अत्यल्पमिदमुच्यते। वर्षाभ्वश्चेति। वर्षादृक्कारपुनःपूर्वस्य भुव इति वक्तव्यम् इति महाभाष्यकारवचनमर्थतोनूद्य तद्वचनबलादत्र यण् भवतीत्याह। दृक्कारेत्यादि। इति वचनादिति वचनं दृग्भूशब्दस्य यण् न स्यात् काशिकादावदृष्टत्वादिति शङ्का न कार्या साक्षाद् भाष्ये उक्तत्वादिति प्रामाणिकत्वदर्शनार्थम्।"

३. द्र.- सं व्या. शा. इति., भागः १, प्रथमसंस्करणम्, टिप्पणी ४., पृ. २१०।

४. द्र.- मा. धा., प्रथमे परिशिष्टेऽनुस्मृतिशब्दः, पृ. ६२९। स्पष्टये तत्र पृ. ४२ अपि द्र.।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वति। परं डॉ. रामसुरेशत्रिपाठिनहोदया[20] अस्य वार्त्तिकस्य महाभाष्ये पाठोऽनुपलब्धरिति वदन्ति। अत इदं काशिकाकृद् वचनमिति तैः स्वीक्रियते। वस्तुतस्तु महाभाष्ये १।३।२९ सूत्रे काशिकोक्तं वार्त्तिकमुपलभ्यते। तस्मात् डॉ. त्रिपाठिमहाभागानां मतं चिन्त्यमेवाभाति।

काशिकावृत्तिसिद्धान्तकौमुद्योरुपन्यस्तो गणसूत्राणां पाठोऽपि वार्त्तिकानां स्वरूपनिर्धारणविषये विषमां समस्यामुपस्थापयति। श्रीधरशास्त्रिपाठक-सिद्धेश्वर-शास्त्रिचित्रावविद्वद्द्वयसङ्गृहीते "पाणिनीयसूत्रपाठस्य तत्परिशिष्टग्रन्थानां च शब्द-कोशः"[21] इत्यस्मिन् ग्रन्थे ७१५ पृष्ठतः ७१८ पृष्ठपर्यन्तं विद्यते खलु अन्तर्गणसूत्राणां सङ्कलनम्। अस्मिन् स्थले नैकानि पाणिनिसूत्राणि कात्यायनवार्त्तिकानि च अन्तर्गण-सूत्रेषु निविष्टानि। यथा-"अन्तरं बहिर्योगोपसंख्यानयोः" (१।१।३६); "क्त्वातोसुन्कसुनः" (१।१।४०); "कारस्करो वृक्षः" (६।१।१५६); "एति संज्ञायामगात्" (८।३।९९); "नक्षत्राद वा" (८।३।१००) इत्यादीनि। परं हैदरावादनगरात् प्रकाशिताया: काशिकाया नवीनसंस्करणेन[22] उपरिनिर्दिष्ट-श्रीधरशास्त्रिपाठक-सिद्धेश्वरशास्त्रिचित्राव-सम्पादितग्रन्थस्य तुलनायां क्रियमाणायां तु वार्त्तिकानां गणसूत्राणां च स्वरूपनिर्धार-णविषये वैमत्यमवलोक्यते। तत्र कोशग्रन्थे (पाणिनीयसूत्रपाठस्य तत्परिशिष्टग्रन्थानां च शब्दकोशा इत्यस्मिन् ग्रन्थे) ३।३।१०४ सूत्रे "गुहागिर्योषध्योः" इत्यन्तर्गणसूत्रत्वेन स्वीकृतम्। परमिदं काशिकाया नवीनसंस्करणे गणसूत्रत्वेन न निर्दिष्टम्।

नूतने काशिकासंस्करणे तादृशान्यपि गणसूत्राणि वर्तन्ते येषां पाठः कोशग्रन्थे नोपलभ्यते। यथा हि-

त्रिफला द्विगौ (४।१।४, ग. सू. ३८)।

भारद्वाज आत्रेये (४।१।११०, ग. सू. ७५)।

एवमेव काशिकावृत्त्या नूतने संस्करणे ४।२।६ सूत्रे कानिचिद् गणसूत्राणि (ग. सू. ८३ त आरभ्य ९१ गणसूत्रपर्यन्तम्) वर्तन्ते येषां कोशग्रन्थेऽनुपलब्धिः। वस्तुत इमानि भाष्यवार्त्तिकानीत्येव वक्तुं युक्तम्। एवं स्थितेऽप्यस्मिन् स्थले "द्विपदी ज्योतिषि" (ग. सू. ८९) इत्यस्य विषयेऽवश्यं शङ्का जायते; यतो महाभाष्येऽस्याभावः।

---

२०. द्र.- रामसुरेशत्रिपाठी, प्रा. प्र., वर्ष २, अङ्क १, पृ. २२ (१९६९)।

२१. ग्रन्थोऽयं पुण्यपत्तनस्थभाण्डारकप्राच्यविद्यासंशोधनमन्दिरात् १९३५ खिष्टाब्दे प्रकाशितः।

२२. ग्रन्थस्यास्य केवलः प्रथमो भागः (१।४ अध्याया.) १९६९ खिष्टाब्दे प्रकाशितः। अत्र प्रायः सर्वेषां वैदिकवचसां मूलस्थलनिर्देशेन सह भाष्य-सिद्धान्त-कौमुदी-रामायण-महाभारत-किरतार्जुनीय-गणसूत्रादीनां पाठस्तुलनात्मकरूपेण वृत्तिभागे एव निर्दिष्टः। परं मुद्रणदोषाद् रभसाद् च त्रुटीनां बाहुल्यं वर्तते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकायां सिद्धान्तकौमुद्यां च ३।३।१०४, ४।१।४, ४।१।६४, ८।४।३९ इत्यादिसूत्राणां विषये नैकमत्यम् । उपर्युक्ते कोशग्रन्थे काशिकाया नवीनसंस्करणे च ३।३।१०४ सूत्रे—"ऋपेः सम्प्रसारणं च; भिदा विदारणे; छिदा द्वैधीकरणे; आरा शस्त्र्याम्; धारा प्रपाते" इत्यादीनि गणसूत्राणि स्वीकृतानि । काशिकायां—"गणपठितेषु भिदादिषु निष्कृष्य प्रकृतयो गृह्यन्ते । जृष्-जरा । त्रपूष्-त्रपा" इति व्याख्यानेनैतानि स्पष्टरूपेण गणसूत्राणि । परं सिद्धान्तकौमुदीटीकाकारेण वासुदेवदीक्षितेनात्र "ऋपेः सम्प्रसारणञ्च" इति गणसूत्रत्वेन स्वीकृत्य अन्यानि वार्त्तिकत्वेन स्वीकृतानि । एतदेव मतं समीचीनं प्रतिभाति । महाभाष्येऽपि वार्त्तिकद्वारेणैतेषामर्थभेदो निर्दिष्टः । उपलभ्यते च तत्र वार्त्तिकव्याख्यानभाष्यम् ।

एतादृश्येव विप्रतिपत्तिः ४।१।४; ४।१।६४ सूत्रगणपाठविषये वर्तते । उपर्युक्ते कोशग्रन्थे काशिकाया नवीनसंस्करणे च "संभस्त्राजिनशणपिण्डेभ्यः फलात्; सदच्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात्; शूद्रा चामहत्पूर्वा जातिः; मूलान्नञः" इत्यादीनि सर्वाणि गणसूत्रत्वेन स्वीकृतानि । परञ्चैतानि सर्वाणि वचनानि तत्त्वबोधिन्यां बालमनोरमायां च वार्त्तिकत्वेनैव गृहीतानि ।[1] एवमेव काशिकायां कोशग्रन्थे चोभयत्र ८।४।३९ इत्यस्मिन् सूत्रे "आचार्यादणत्वं च" इति वचनं गणसूत्रमिति निर्दिष्टम् । परं बालमनोरमाकारमतेनेदं वार्त्तिकम् ।

उपर्युक्तविवेचनेनेदं स्पष्टीभवति यद् वार्त्तिकानां गणसूत्राणां च विषये विदुषां नास्त्यैकमत्यम् । काशिकावृत्तौ सिद्धान्तकौमुद्यां च गणपाठशब्देष्वपि वार्त्तिकानां गणसूत्राणां च सन्निवेशात्—किं वार्त्तिकम्, किं च गणसूत्रमित्यस्य परिज्ञाने भ्रान्तिर्भवति । अयं संशयः काशिकया "कारस्करो वृक्षः" (६।१।१५६) इत्यस्मिन् सूत्रे स्वयमेव प्रकटीकृतः । स यथा—"केचित् पारस्करप्रभृतिष्वेव कारस्करो वृक्ष इति पठन्ति" इति । एवमेव "एति संज्ञायामगात्" (८।३।९९), "नक्षत्राद् वा" (८।३।१००) इति काशिकामतेन सूत्रद्वयम् । परं पदमञ्जरीकारमतेनेदं गणसूत्रम् । तस्मादयं निर्गलितोऽर्थो यद् गणसूत्रविषये वार्त्तिकस्वरूपविषये च काशिकादिग्रन्थानां नास्त्यैकमत्यम् । नूतनप्रयोगसमर्थनार्थं ग्रन्थकारैः स्वेच्छया बहुत्र नूतनान्यपि वार्त्तिकानि स्वग्रन्थेषु निवेशितानीत्युक्तिरपि यथार्थैव स्यात् ।

---

१. त. बो. ४।१।४: "अत्र नव्याः 'संभस्त्र-' इत्यादिवचनद्वयं 'मूलान्नञः' इति वक्ष्यमाणं च 'पाककर्ण-' इत्यनेन प्राप्तस्य ङीषो निषेधार्थं तत्रैव सूत्रे भाष्ये पठितमपि फले विशेषाभावादिहैव ग्रन्थकारैः पठितम् । न चैतावताऽऽद्यन्तर्गणसूत्राणीति भ्रमः कार्यः । तथात्वे मानाभावात् । किं तु वार्त्तिकान्येवेमानीत्याहुः ॥"
अत्र बालमनोरमा अपि द्रष्टव्या ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(ख-१) काशिकावृत्तौ पद्यमयवार्त्तिकानि कारिकाश्च

पाणिनीयव्याकरणपरम्परायां महाभाष्ये, काशिकायां, रूपावतारे, सर्वेषु च कौमुदीग्रन्थेषु बहूनि श्लोकस्वरूपाणि सूत्रव्याख्यानपराणि वार्त्तिकानि वर्तन्ते। इमानि परम्परायां श्लोकवार्त्तिकानीत्यभिधीयन्ते। महाभाष्ये वृत्तिग्रन्थेषु च कात्यायनस्य श्लोकवार्त्तिककर्तुश्च पार्थक्येनोल्लेखात् श्लोकवार्त्तिककारः कात्यायनादन्य एवेति प्रतीयते।[1]

श्लोकवार्त्तिकानां नैकः प्रणेतेत्यपि महाभाष्यादधिगतं भवति। महाभाष्ये ८।२।५८ सूत्रे त्रीणि श्लोकवार्त्तिकानि वर्तन्ते। इमानि वार्त्तिकानि भाष्यकारेण तेषां भिन्नकर्तृकत्वं दर्शयितुं 'एष एवार्थः', 'अपर आह' इत्यादिपदैरुपक्रान्तानि। कैयटोऽपि २।४।३६ सूत्रे—"जग्धिविधि-" इत्यस्य कर्तारं व्याघ्रभूतिं मनुते।[2] केषुचित् श्लोकवार्त्तिकेषु कात्यायनवार्त्तिकोल्लेखात् तानि कात्यायनोत्तरवर्तीनि प्रतीयन्ते। परं ५।२।११६ सूत्रे कृतोल्लेखानि-"शिखादिभ्य इनिर्वाच्य इकन् यवखदादिषु" इत्यादीनि कानिचिद् वार्त्तिकानि कात्यायनात् पूर्ववर्तीनीत्यवश्यं वक्तव्यम्; यत 'इकन्' इति शब्दस्य

---

१. महाभाष्यस्थश्लोकवार्त्तिकेषु 'कात्यायन' इति नाम्नो विद्यमानत्वात् श्लोकवार्त्तिककारः कात्यायनादन्य इति निर्धार्यते। यथा ३।२।११८:
"स्मादिविधिः पुरान्तो यद्यविशेषेण किं कृतं भवति।
न स्म पुराद्यतन इति ब्रुवता कात्यायनेनेह॥"
टीकाकारा अपि कात्यायनात् श्लोकवार्त्तिककारमन्यमेव गन्वते। यथा—
न्यासः ६।३।१३७:
"इदं वार्त्तिककारमतमाश्रित्योक्तम्। तत्पुनः श्लोकवार्त्तिककारस्य सूत्रकार-मतानुसारिणो दर्शनमाश्रित्य वक्ष्यति।"
प्रदीपः ६।४।२२:
"वार्त्तिककारप्रोक्तेषु प्रयोजनेषु प्रख्यातेषु श्लोकवार्त्तिककारोक्तप्रयोजनोप-क्षेपः।"
उद्द्योतः ६।४।२२ :
"वार्त्तिककारः कात्यायनः। श्लोककवार्त्तिकारस्त्वन्य एवेति भावः।"

२. द्र- प्रदीपः २।४।३६:
"अयमप्यर्थो व्याघ्रभूतिनाप्युक्तः।"
अपि च द्र.- F. KIELHORN, "Notes on the Mahābhāṣya, No. 4: Some Suggestions Regarding the Verses (Kārikās) in the Mahābhāṣya", *IA*, Vol. xv, p. 230.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वार्त्तिके प्रयोगः कृतः । 'इकन्' इत्यस्य प्रयोगः पूर्वाचार्यैः 'ठ' इति पाणिनीप्रत्ययस्य कृते विहितः । परं सर्वाणि श्लोकवद्धानि वार्त्तिकानि श्लोकवार्त्तिकान्येवेति न भ्रमितव्यम् । येषु व्याख्याभाष्यमुपलभ्यते तान्येव श्लोकवार्त्तिकानीत्यभिधीयन्ते, न तु सर्वाणि ; यत्र च व्याख्याभाष्यं नोपलभ्यते तानि श्लोकात्मकानि वचनानि प्रायः पतञ्जलिविरचितानि स्युः । तत्रायं विवेको यद् यस्य श्लोकवार्त्तिकस्य पूर्वेण वार्त्तिकेन सह कोऽपि संबन्धो नास्ति, यस्य श्लोकवार्त्तिकस्य भाष्यान्ते संपुटीकरणं[1] न विद्यते, यच्च टीकाकारैः सङ्ग्रहश्लोकत्वेन निर्दिश्यते; तत्सर्वं महाभाष्यकारप्रणीतमित्येतत् डॉ. रामसुरेशत्रिपाठिमहाभागैः[2] सिद्धान्तितम् ।

यत्र सूत्राणां वार्त्तिकानां वा श्लोकरूपेणाभिप्रायः प्रकटीकृतस्तत्र प्रायः कैयटेन 'सङ्ग्रहश्लोक' इति शब्दस्य प्रयोगः कृतः । ते सङ्ग्रहश्लोका वह्वृशेन भाष्यकारप्रणीता भवितुमर्हन्ति । तथा हि—८।२।१०८ सूत्रे श्लोकवार्त्तिकद्वयं कैयटेन[3] सङ्ग्रहश्लोकत्वेन निर्दिष्टम् । अपि चास्मिन् श्लोकद्वये कात्यायनवार्तिकानां सङ्केतोऽपि विद्यते । स यथा—"इक् तु यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम्···" इति । अस्यां पङ्क्तौ 'विदधाति' इत्यनेन क्रियापदेन कात्यायन एव बोध्यते; यतस्तेनैव "यणादेश प्लुतपूर्वस्य च" (६।१।७७, वा.१) इत्यनेन वार्त्तिकेन प्लुतपूर्वयणादेशस्य विधानं कृतम् । अत एव ८।२।१०८ सूत्रस्थस्य श्लोकद्वयस्य कर्ता पतञ्जलिरेव ।[4] एवमेव महाभाष्ये ६।१।७७ सूत्रे श्लोकद्वयं वर्तते । तद्यथा-

"जश्त्वं न सिद्धं यणमत्र पश्य यश्चापदान्तो हलचश्च पूर्वः ।
दीर्घस्य यण् ह्रस्व इति प्रवृत्तं संबन्धवृत्त्या गुणवृद्धिबाध्यम् ॥
नित्ये च यः शाकलभाक्समासे तदर्थमेतद् भगवान् चकार ।
सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात् ॥"[5]

---

१. श्लोकवार्त्तिकव्याख्याप्रसङ्गे आचार्यपतञ्जलेरियं शैली यत् स प्रथमं वार्त्तिकव्याख्याभाष्यं स्थापयित्वा तदनन्तरं भाष्यान्ते सम्पूर्णं श्लोकं पुनरेकत्र प्रस्तौति । एषैव प्रक्रिया संपुटीकरणप्रक्रियाभिधीयते । यथा महाभाष्ये ४।१।७८ इत्यत्रोल्लिखितानां श्लोकवार्त्तिकानामुपरि संपुटीकरणाभावाद् नागेशेन तानि वचांसि भाष्यकारप्रणीतानि स्वीकृतानि । द्र.-उद्द्योतः ४।१।७८ः—
"एते श्लोका भाष्यकृत एव, न वार्त्तिककृतः, संपुटीकरणाभावात् ।"

२. रामसुरेशत्रिपाठी, "श्लोकवार्त्तिक तथा अन्य वार्त्तिक", प्रा. प्र., वर्ष २, अङ्क १, पृ. ३-४ ।

३. प्रदीपः ८।२।१०८ः
"पूर्वोक्तार्थसङ्ग्रहश्लोकद्वयम्—किं नु यणिति ।"

४-५ द्र.-रामसुरेशत्रिपाठी, प्रा. प्र., वर्ष २, अङ्क १, पृ. ४ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्मिन् स्थले 'भगवान्' इति शब्दो दृश्यते। कथं कात्यायन आत्मानमेव 'भगवान्' इति शब्देन संबोधयेत्? तस्मादिदं श्लोकद्वयमपि भाष्यकारप्रणीते स्याताम्; यत इमे अपि पूर्वोक्तार्थमेव पुष्णीतः। परं महाभाष्ये यानि स्वतन्त्रमतप्रदर्शकानि वचनानि सन्ति, येषां च पूर्वोक्तार्थसङ्ग्रहात्मकं स्वरूपं न विद्यते, तानि पतञ्जलिकृतानीति वक्तुं न शक्यते। अत एव तत्र तत्र श्लोकवार्त्तिककारमतेन सह महाभाष्यकारमतस्य न्यासकारेण[1] या तुलना कृता सा समर्थिता भवति।

महाभाष्यस्थश्लोकवार्त्तिकानां विषये डॉ. किलहॉर्नमहोदयैः[2] डॉ. रामसुरेशत्रिपाठिमहाभागैश्च[3] स्वीयशोधपत्रेषु विस्तरेण विचारः कृतः, अतस्तत्सर्वं तत एवाधिगन्तव्यम्। अधस्तात् काशिकादिषु ग्रन्थेषु यानि श्लोकवार्त्तिकानि पद्यानि वा विद्यन्ते तेषां विषये किञ्चित्संक्षेपत उच्यते।

महाभाष्यस्थवार्त्तिकतुलनया उत्तरवर्त्तिग्रन्थेषु यथा गद्यमयवार्त्तिकानां सङ्ख्योत्तरोत्तरं ह्रासमुपैति तथैव पद्यमयवार्त्तिकानामपि। परं यथा भाष्यस्थगद्यमयवार्त्तिकानां स्वरूपविपर्ययं उत्तरवर्तिवैयाकरणैः कृतो वर्तते, न तादृशः श्लोकवार्त्तिकानाम्। यदि विपर्ययः कृतस्तर्हि वृत्तभङ्गः प्रसज्येत इति कारणं तु तत्र स्पष्टमेव। एवं सत्यपि तत्र कानिचित् स्थलान्यपवादभूतानि वर्तन्ते।

केषाञ्चन श्लोकवार्त्तिकानां कर्तारो महाभाष्यस्थश्लोकवार्त्तिककर्तृभ्योऽन्ये एव भवितुमर्हन्ति। महाभाष्योल्लिखितवार्त्तिकेषु पूर्वाचार्यस्वीकृतपारिभाषिकशब्दनिर्देशेनेदमनुमीयते यत्कात्यायनोत्तरवर्तिकालेऽपि कानिचिद् वार्त्तिकानि पूर्वाचार्यपरिभाषामाश्रित्य प्रणीतान्यासन्। यथा ५।२।३९ सूत्रेऽधोलिखितं श्लोकवार्त्तिकं विद्यते —

डावतावर्थवेशेष्यान्निर्देशः पृथगुच्यते।
मात्राद्यतिघाताय भावः सिद्धश्च डावतोः॥

अस्मिन् वार्त्तिके 'डावतु' इति प्रत्ययः पूर्वाचार्यैः कृतः। अस्य कृते अष्टाध्याय्यां 'वतुप्' इति प्रत्ययः।[4] अत इदं वार्त्तिकं डावतुप्रत्ययविधायकसूत्रमेव लक्ष्यीकृत्य प्रणी-

---

१. न्यासः ८।२।१०८:
"एवं तावत् श्लोकवार्त्तिककारस्याभिमतं दर्शितम्, इदानीं भाष्यकारस्य मतं दर्शयितुमाह भाष्यकारस्त्वाहेति।"

२. F. KIELHORN, *IA*, Vol. xv, pp. 228-233.

३ रामसुरेशत्रिपाठी, प्रा. प्र., वर्ष २, अङ्क १, पृ. १-२२।

४. द्र.- युधिष्ठिरमीमांसकः, सं. व्या. शा. इति., भागः १, प्रथमसंस्करणम्, पृ. २२८।
रामसुरेशत्रिपाठी, प्रा. प्र., वर्ष २, अङ्क १, पृ. ६-७। अत्रेदमपि विवेचनीयं यत् डॉ. त्रिपाठिमहोदयमतेन महाभाष्ये ४।२।६० सूत्रे—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तमभविष्यत् । एवमेव महाभाष्ये ३।२।५७ सूत्रे-"इष्णुच इकारादित्वमुदात्तत्वात्" इत्यस्मिन् वार्त्तिके 'इष्णुच्' इति प्रत्ययः पूर्वाचार्यैः स्वीकृतः । अस्य स्थाने अष्टाध्याय्यां 'खिष्णुच्' इति प्रत्ययस्य विधानम् ।[1] परमते पूर्वाचार्यव्याकरणानां पारिभाषिकशब्दाः कालान्तरेऽपि प्रचलिता आसन् । अतः काशिकायां कानिचित् श्लोकवार्त्तिकानि पूर्वाचार्येभ्यो गृहीतानीति न्यासपदमञ्जरीकारावपि कथयतः । यथा काशिकायां ६।१।१४४ सूत्रे—

लुम्पेदवश्यमः कृत्ये तुङ्कामममनसोरपि ।
ससो वा हिततर्योर्मांसस्य पचि युड्घञोः ॥

इति कारिका वर्तते । अस्यां कारिकायां 'युट्' इति 'ल्युटः' पूर्वाचार्याणां संज्ञा ।[2] वस्तुत इयं कारिका महाभाष्योत्तरवर्तिनी । महाभाष्यस्थं गद्यवचनमेव काशिकया स्मरणसौकर्यार्थं श्लोकवद्धं कृतमिति प्रतीयते । अपि च काशिकायां ८।२।१ सूत्रस्य वृत्तौ-

शुष्किका शुष्कजङ्घा च क्षामिवानौजढत्तथा ।
मतोर्वत्वं झलां जश्त्वं गुडलिण्माननिदर्शनम् ॥

इति पद्यं विद्यते । महाभाष्य इदं नोपलभ्यते । भट्टोजिदीक्षितेनेदं वैयाघ्रपदीयं वार्त्तिकमिति स्वीक्रियते ।[3] युधिष्ठिरमीमांसकमहोदयमतेनाप्यिदं वैयाघ्रपदीयव्याकरणस्य वार्त्तिकमस्ति ।[3] परमस्य पाणिनिसूत्रेण सह सङ्गतत्वात् प्राचीनवैयाकरणैरिदं ८।२।१ सूत्रोपरि वर्तते इति वदन्ति । अथवा वैयाघ्रपद्यनामधारिणौ द्वावाचार्यौ स्वीकरणीयौ । अनयोरन्यतरो व्याकरणशास्त्रस्य प्रवक्ता आसीद् अन्यश्च वार्त्तिकानां प्रणेतेति ।[4]

"सर्वसादेर्द्विगोश्चलः" इत्येव कारिकांश उपलभ्यते । तथा च तेषां मतेन "अनसूर्लक्ष्यलक्षणे सर्वसादेर्द्विगोश्च लः । इकन् पदोत्तरपदाच्छतशष्टेः षिकन् पथः" इति पूर्णा कारिका तु काशिकादिषूपलभ्यते । कैयटेनापि प्रदीपे पूर्णत्वेन व्याख्याता । परं युधिष्ठिरमीमांसकमहोदयमतेन-"सर्वसादेर्द्विगोश्च लः" इत्यशंस्तु महाभाष्यस्य केषुचित् हस्तलेखेष्वेवोपलभ्यते । न सर्वेषु हस्तलेखेषु पूर्णकारिकाया अभावः । मुद्रितमहाभाष्यसंस्करणेषु पाठस्य विद्यमानात्, प्रदीपे पूर्णतया व्याख्यानाच्चेयं कारिका महाभाष्यमूलगामिनीति प्रतीयते । नैकधा महाभाष्यपाठस्य भ्रष्टत्वात् कदाचित् केषुचिद् हस्लेतखेषु अस्या कारिकाया पूर्णत्वेन अभावोऽभविष्यदिति मदीयं मतम् ।

१. द्र.-का. वृ. (न्यासपदमञ्जरीसहिता), भागः ४, पृ. ६२०, टिप्पणम् १; तथा चात्र प्रमाणपुष्टये न्यासपदमञ्जर्यौ द्रष्टव्ये ।
२. श. कौ. १।१।५९: "अत एव शुष्किका ··· इति वैयाघ्रपदीये वार्त्तिके··· ।" तुलना- प्रौ. म. (चुरादौ), भागः २, पृ. ४५३ ।
३-४. सं. व्या. शा. इति., भागः १, पृ. २२३ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथा महाभाष्यस्य टीकाकारः कैयटः श्लोकवार्त्तिकानां व्याख्याने तत्र तत्र (यथा ८।२।१०८ सूत्रे) सङ्ग्रहश्लोकशब्दस्य प्रयोगं करोति तथैव काशिकायाष्टीकाकारौ जिनेन्द्रबुद्धिहरदत्तमिश्रावपि श्लोकवार्त्तिकव्याख्यानात् पूर्वं सङ्ग्रहश्लोकशब्दस्योपन्यासं कुरुतः । डॉ. त्रिपाठिमहाभागमतेन एते सङ्ग्रहश्लोका महाभाष्यकारप्रणीता भवितुमर्हन्ति ।[1] परमिदं विस्मयावहं यत् काशिकायां ६।१।६८ सूत्रे—

संयोगान्तस्य लोपो हि नलोपादिर्न सिध्यति ।
रात्तु तेनैव लोपः स्याद्धलस्तस्माद् विधीयते ॥

इति श्लोकवार्त्तिकमुपलभ्यते । अस्य महाभाष्ये गद्यत्वेन पाठः । इदं न्यासपदमञ्जर्योः सङ्ग्रहश्लोकत्वेन व्याख्यातम् ।[2] एतेन ज्ञायते यद् व्याकरणक्षेत्रे पुरा बह्वः सङ्ग्रहश्लोका लोकविश्रुता आसन् येषामधुना स्वतन्त्रग्रन्थत्वेनानुपलब्धिः । यथा महाभाष्यकारेण केषाञ्चित् सङ्ग्रहश्लोकानां रचना कृता, एवमेव कदाचित् काशिकाकाराभ्यामपि केचित् सङ्ग्रहश्लोका विरचिता इत्यपि वचनं सोढक्षमम् ।

क्वचित् काशिकायां मतान्तरसङ्कलनार्थं कारिकापाठः प्रणीतः । यथा ७।१।९४ सूत्रे—

संबोधने तूशनसस्त्विरूपं
सान्तं तथा नान्तमथाप्यदन्तम् ।
माध्यन्दिनिर्वष्टि गुणं त्विगन्ते
नपुंसके व्याघ्रपदां वरिष्ठः ॥

इयं कारिका न्यासपदमञ्जरीकारमतेन आप्तागमात् परिगृहीता ।[3] परं कातन्त्रवृत्तिपञ्जिकाकारेण त्रिलोचनदासेनेयं व्याघ्रभूतिनाम्ना निर्दिष्टा ।[4] काशिकायामप्यस्याः स्थापनात् पूर्वं 'तथा चोक्तम्' इति वचनेनोपन्यासः । तस्मात् काशिकाकर्तृभ्यामन्य एवास्याः प्रणेता, अन्यथा 'उक्तम्' इति वचनमसङ्गतं स्यात् ।

अन्यत्रापि महाभाष्याभिप्रायः श्लोकेन सङ्गृहीतो दृश्यते । यथा ३।१।८७ सूत्रे—

---

१. रामसुरेशत्रिपाठी, प्रा. प्र., वर्ष २, अङ्क १, पृ. ३-४ ।

२. न्यासः ६।१।६८: "संयोगान्तस्य लोपे हीत्यादि संग्रहश्लोकस्योपन्यासः ॥" तुलनार्थं प म. अपि द्रष्टव्या ।

३. न्यासः ७।१।९४: "तथा चोक्तमित्यादिनाऽनन्तरोक्तमर्थमागमवचनेन दृढयति ।"

४. सं व्या. शा. इति., भागः १, २२३ पृष्ठेऽधोलिखितं वचनं कातन्त्रचतुष्टयग्रन्थनामनिर्देशपूर्वकं निर्दिष्टम्—
तथा च व्याघ्रभूतिः—संबोधने तूशनसस्त्विरुपं सान्तं तथा नान्तमथाप्यदन्तमिति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया ।
मासासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया ॥

पचतेर्भावः कर्मस्थः, पचधातुः कर्मस्थभावक इत्यर्थः । तद्यथा देवदत्त ओदनं पचति । भिद्धातोः क्रिया च कर्मस्था । भिद्धातुः कर्मस्थक्रिय इत्यर्थः । तद्यथा—देवदत्तः काष्ठं भिनत्ति । 'मासमास्ते देवदत्तः' इत्यत्र भावः कर्तृस्थः । आस्धातुः कर्तृस्थभावक इत्यर्थः । गमेः—गम्धातोश्च क्रिया कर्तृस्था भवति । गम्धातुः कर्तृस्थक्रिय इत्यर्थः । तद्यथा—देवदत्तो ग्रामं गच्छति ।

अत्र "कर्मवत् कर्मणा तुल्यक्रियः" (३।१।८७) इत्यनेन कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवद् भवति लकार्येषु न कर्तृस्थभावकानां न वा कर्तृस्थक्रियाणामित्येवं सिद्धान्तसमर्थिका कारिका काशिकायामुपलभ्यते । अस्या भाष्ये पाठो न प्राप्यते । इयं कारिका पूर्वग्रन्थेभ्यो गृहीता न वेति न शक्यते नैश्चित्येन वक्तुम् ।

क्वचित् काशिकायां महाभाष्यस्थानां केषाञ्चित् श्लोकवार्त्तिकानां पादपूरणमपि कृतम् । तथा हि—"भूवादयो धातवः" (१।३।१) इत्यत्र 'भूवादयः' इत्यस्मिन् पदे यदि संहितया पाठस्तर्हि 'भ्वादयः' इति यणादेशेन भवितव्यम् । अथ असंहितया पाठस्तर्हि 'भू आदयः' इति भाव्यम् । न कदाचिद् 'भूवादयः' इति । कुतोऽयं वकारः ? इत्यस्य समाधाने महाभाष्ये—

भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते ।

इति पाठः । अतो 'भूवादयः' इत्यत्रायं वकारो महाभाष्यकारमतेन श्लोकवार्त्तिककारमतेन वा मङ्गलार्थः प्रयुक्तो वेदितव्यः । परमस्य श्लोकवार्त्तिकस्य पादपूरणं "भूवादयो धातवः" (१।३।१) इत्यस्य व्याख्यान्तरमाश्रित्य काशिकाकृद्भ्यां प्रदत्तम् । तथा हि 'भूवादयः' इत्यत्र आदिशब्देन सह समासो भू आदिर्येषां ते भूवादय इति । किं तर्हि ? वदधातोरौणादिक इञ् कर्तृसाधनः, वादिरिति । भू+अम्+वादि+जस्= भुवं वदन्तीति भूवादयो भूवाचका इत्यर्थः । भू च क्रियासामान्यवाची, क्रियावाचका इति यावत् । क्रियावाचका भू आदयः शब्दा धातुसंज्ञका भवन्ति । अथवा 'भूवादयः' इत्यत्र "वा गतिगन्धनयोः" इत्यनेन सह आदिशब्दस्य समासो भवति, वा आदिर्येषां ते वादयः । आदिः—प्रकार इत्यर्थः, भ्वर्थाः—भूतुल्याः शब्दाः, वादयः—वा गतिगन्धनयोरेवंप्रकाराश्च शब्दा धातुशब्देन स्मृता वेदितव्याः । ते धातुसंज्ञका भवन्ति । अतः श्लोकवार्त्तिकस्याधोनिर्दिष्टा द्वितीया पङ्क्तिः काशिकाकर्तृभ्यामेव प्रणीतेत्यनुमीयते ।

भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः ॥इति ।

एवमेव काशिकायाः ४।२।१०४ सूत्रस्थायाः कारिकाया उत्तरार्धं महाभाष्ये नोपलभ्यते ।

श्लोकवार्त्तिकेभ्योऽन्येऽपि श्लोकाः काशिकायां सङ्गृहीताः । तानि प्रायः स्मृतिरूपाणि वचनानि, न तु वार्त्तिकानि । तत्र तत्र श्लोकावतरणात्पूर्वं 'तेषु चेय

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्मृतिः' इति वचनस्य कृत उपन्यास अमुमेवार्थं द्रढयति। यथा ५।३।११६ सूत्रस्य वृत्तौ—

'तेषु चेयं स्मृतिः,
आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी।
कौष्ठकिर्जालमानिश्च ब्राह्मगुप्तोऽथ जानकिः॥ इति।

इयं कारिका न्यासपदमञ्जरीमतेन आप्तप्रणीतः श्लोक।[1]

एवमेव काशिकायाष्टीकाकारैरपि एतादृशश्लोकव्याख्यानात् पूर्वं 'स्मृतिः' इति शब्दस्य प्रयोगः कृतः। यथा काशिकायां २।४।८ सूत्रे—

क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः।
शतं वा प्रसृतौ येषां केचिदानकुलादपि॥

इति श्लोकः। अमुं श्लोकमुद्दिश्य न्यासे पदमञ्जर्यां च 'स्मृतिः' इति शब्दः प्रयुक्तः।[2] श्लोकोऽयं महाभाष्ये गद्यरूपेण समवलोक्यते। परं तत्रापि 'केचिद्' इति पदेनैव क्षुद्रजन्तुविषये मतान्तराणां सङ्कलनं विहितम्।

अन्यत्रापि काशिकायां ८।४।६ सूत्रेऽधोलिखिता कारिका वर्तते—

फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः।
ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः॥

इयं कारिका न्यासकारमतेन शास्त्रान्तरात् परिगृहीता[3]। चान्द्रवृत्तावप्यस्याः कारिकायाः पाठः ६।४।१०५ सूत्रे पूर्वापरविपर्ययेण कृतो दृश्यते। डॉ० किलहार्न-महोदयमतेनेयं[4] कारिका चरकग्रन्थादुद्धृता। परं चरकसंहितायां[5] काशिकासदृशः पाठो नास्ति। तत्र पाठान्तरमात्रमेव विद्यते। काशिकोक्तायाः कारिकायास्तृतीय-श्चरणोऽमरकोशस्य ओषधिवर्गेऽपि समुपलभ्यते।

---

१. न्यासः ५।३।११६: "त्रिगर्तषष्ठाः स्मर्यन्ते ज्ञायन्तेऽनयेति स्मृतिः। सा पुनः—आहुस्त्रिगर्तषाठानिति। अयमेवाप्तप्रणीतश्लोकः॥" प. म. अपि द्रष्टव्या।

२. न्यास २।४।८: "क्षुद्रजन्तुशब्दस्याभिधेयं प्रति स्मृतीरुपन्यस्यति—क्षुद्रजन्तुरनस्थिः स्यादिति॥" अत्र प. म. अपि द्रष्टव्या।

३. न्यासः ८।४।६: "तथा चोक्तं शास्त्रान्तरे—फली वनस्पतिः··· ।"

४. F. KIELHORN, "Quotations in the Mahābhāṣya and the Kāśikā-Vṛtti", *IA*, Vol. xiv, p. 327, footnote.

५. चरकसंहिता-सूत्रस्थाने १।१७३, पृ. ७—
फलैर्वनस्पतिः पुष्पैर्वानस्पत्यः फलैरपि।
ओषध्यः फलपाकान्ताः प्रतानैर्वीरुधः स्मृताः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्वचित् काशिकायां स्मृतिसौकर्यार्थं महाभाष्यस्थगद्यमयवार्तिकानि श्लोकनिबद्धानि कृतानि । यथा महाभाष्ये ६।४।१६१ सूत्रे—"पृथुमृदुकृशभृशदृढपरिवृढानामिति वक्तव्यम्" इति भाष्यकारप्रणीतं वार्त्तिकम् । तत्र काशिकायाम्—

पृथुं मृदुं भृशं चैत्र कृशं च दृढमेव च ।
परिपूर्वं वृढं चैत्र षडेतान् रविधौ स्मरेत् ॥

इति श्लोकपाठः ।[1]

काशिकायां क्वचिद् गणशब्दानां श्लोकरूपेण परिगणनं कृतम् । यथा ४।१।१४६ सूत्रे—

यमुन्दश्च सुयामा च वार्ष्यायणिः फिञः स्मृतः ।
सौवीरेषु च कुत्सायां द्वौ योगौ शब्दवित् स्मरेत् ॥

इति श्लोकेन शब्दानां परिगणनम् । भट्टोजिदीक्षितेनास्मिन् विषये लिखितम्—"अत्र वृत्तिकाराः । यमुन्दश्च सुयामा च वार्ष्यायणिः फिञः स्मृता इति पर्यजीगणत् ।..... इदं परिगणनं भाष्यविरुद्धम्"[2] इति । एतादृशः श्लोकः काशिकायां ४।१।१४८ सूत्रेऽपि दृश्यते । यथा हि—

भागपूर्वपदो वित्तिर्द्वितीयस्तार्णबिन्दवः ।
तृतीयश्चाकशापेयो गोत्रात् ठग्बहुलं ततः ॥ इति ।

भट्टोजिदीक्षितेनायमपि श्लोको वृत्तिकारक्वचनत्वेन स्वीकृतः ।[3] इमौ काशिकोद्धृतौ द्वावपि श्लोकौ (४।१।१४६, ४।१।१४८)=२।४।८०, २।४।८१ एतत्सूत्रस्थचान्द्रवृत्तौ गद्यत्वेन दृश्येते ।

एतत्सदृश एव ४।१।१७३ सूत्रे काशिकायां श्लोक उपलभ्यते—

उदुम्बरास्तिलखला मद्रकारा युगन्धराः ।
भुलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञकाः ॥[4] इति ।

एतादृशान्यन्यान्यपि शब्दपरिगणनस्वरूपाणि श्लोकनिबद्धानि वचनानि काशिकायां ४।३।१०४ सूत्रस्य वृत्तौ दृश्यन्ते । परं विस्तारभयान्नात्र सङ्गृह्यन्ते ।

काशिकायां ५।४।७५ सूत्रोद्धृते—"कृष्णोदक्···उत्तरे यदि" इति श्लोक-

---

१. एतादृशोऽन्यः श्लोकः काशिकायां ३।१।१३४ सूत्रे वर्तते ।

२. श. कौ. ४।१।१५१.
काशिकागतकारिकेयं मुग्धबोधटीकाकारेण रामतर्कबागीशेन ४२४ सूत्रे 'महावृत्तिः' इति ग्रन्थनामनिर्देशेनोद्धृता ।

३. श. कौ. ४।१।१५०: "अत्र वृत्तिकाराः । भागपूर्वपदो वित्तिः···बहुलं तत इति त्रीनेव पर्यजीगणत् ।"

४. श. कौ. ४।१।१७३ "उदुम्बरास्तिलखलाः ··साल्वावयवसंज्ञकाः । इति वृत्तिः ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वार्त्तिके चान्द्रव्याकरणस्य प्रभावः परिलक्ष्यते ।[1]

उपरिनिर्दिष्टविवेचनेन ज्ञायते यदस्यां वृत्तौ ग्रन्थकाराभ्यां बहूनि महाभाष्यगत-गद्यमयवार्त्तिकानि श्लोकनिबद्धानि कृतानि । अपि च बहूनां स्मृतिपराणां कोशपराणां लोकविश्रुतानां श्लोकानां वृत्तिभागे समावेशः कृतः । एवमेवात्र बहूनां पूर्वाचार्याणामपि शब्दशास्त्रसहकारीणि श्लोकवार्त्तिकानि संमावेशितानि । एवंरीत्या बहूनां श्लोकानां सङ्ग्रहः काशिकायामुपलब्धो भवति ।

(ख-२) सिद्धान्तकौमुद्यां पद्यमयवार्त्तिकानि कारिकाश्च

सिद्धान्तकौमुद्यां महाभाष्याद् बहूनि श्लोकवार्त्तिकानि सङ्गृहीतानि । परं ग्रन्थकारेण तानि श्लोकवार्त्तिकानि न निर्दिष्टानि यानि केवलं काशिकावृत्तावेव वर्तन्ते महाभाष्ये च नोपलभ्यन्ते । अयं ग्रन्थकारो नवीनपरम्परानुगामी सन्नपि प्राधान्येन महाभाष्यमेव प्रमाणीकरोति । अत एव बहुत्र सिद्धान्तकौमुद्यां तादृशान्येव वचनानि दृश्यन्ते यानि काशिकया सह वैमत्यं प्रदर्शयन्ति महाभाष्यं च शरणीकुर्वन्ति ।[2] अस्मात् कारणादेव भट्टोजिदीक्षितेन काशिकाधिष्ठितः श्लोकवार्त्तिकपाठः स्वीये ग्रन्थे नैवोद्धृतः ।

सिद्धान्तकौमुद्यां ग्रन्थकारेण श्लोकवार्त्तिकानामिव बहूनां श्लोकानामपि सङ्ग्रहः कृतः । तत्त्वबोधिनी-लघुशब्देन्दुशेखर-बालमनोरमाप्रभृतिभिष्टीकाभिरेतत्सुस्पष्टं क्रियते यद् ग्रन्थकारः स्वसिद्धान्तपुष्टये प्राचीनाचार्यनिर्मितानां व्याकरणसंबन्धिनां लोक-प्रचलितानां श्लोकानां पाठं सङ्गृह्णाति । तेषु केषाञ्चित् श्लोकानामुत्पत्तिस्थलमद्य कुत्रापि नोपलभ्यते । तथा हि—(सि. कौ. १२)—

खयां[3] यमाः खय ≍ क ≍ पौ विसर्गः शर एव च ।
एते श्वासानुप्रदाना अघोषाश्च विवृण्वते ॥

---

१. द्र.- S. K. BELVALKAR, *Systems of Sanskrit Grammar*, foot-note 1, p. 38.
अत्र सुस्पष्टये चान्द्रव्याकरणस्य ४।४।७२, ४।४।७३, ४।४।१०४ सूत्राणां तुलना काशिकोद्धृतया कारिकया सह कर्तव्या ।

२. सि. कौ. २८३४: "भिदेलिमाः सरलाः, भेत्तव्याः । कर्मणि प्रत्ययः । वृत्ति-कारस्तु 'कर्मकर्तरि चायमिष्यते' इत्याह । तद्भाष्यविरुद्धम् ।"
सि. कौ. २९८३: "अच्वौ किम्—आढ्यीकुर्वन्त्यनेन । इह प्रतिषेधसामर्थ्या-ल्ल्युडपि नेति काशिका । भाष्यमते तु ल्युट् स्यादेव ।"

३. त. बो., संज्ञाप्रकरणे, ८।२।१: "खयां यमा इति । बालबोधनाय बाह्यप्रयत्नाः कैश्चित् सुगमोपायेनोपनिबद्धाः ।
बा. मनो., संज्ञाप्रकरणे, ८।२।१: "कस्य को बाह्यप्रयत्न इत्याकाङ्क्षायां तद्व्यवस्थां श्लोकद्वयेन सङ्गृह्णाति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कण्ठमन्ये तु घोषाः स्युः संवृत्ता नादभागिनः ।
अयुग्मा वर्णयमगा यणश्चाल्पासवः स्मृताः ॥

(४४३) गवाक्शब्दस्य[1] रूपाणि क्लीवेऽर्चागतिभेदतः ।
असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम् ॥
स्वम्सुप्सु नव षट् भादौ षट्के स्युस्त्रीणि जश्शसोः ।
चत्वारि शेषे दशके रूपाणीति विभावय ॥

(२१४७) दलद्वये[2] टावभावः क्लीवे चाद्ड्विरहः स्वमोः ।
समासे सोरलुक्चेति सिद्धं बाहुलकात् त्रयम् ॥

(२२४६) स्मरन्ति[3] हि—

श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥

अयं ग्रन्थकारः प्रक्रियास्मरणाय सुस्पष्टये च रूपभेदं श्लोकमुखेन प्रस्तौति । क्वचित्स सूत्रार्थं श्लोकेन प्रकटीकरोति क्वचिच्च प्रकरणार्थं श्लोकेन सङ्गृह्णाति । तथा हि—

(७१) द्वित्वं[4] लस्यैव कस्यैव नोभयोरुभयोरपि ।
तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम् ॥

(१३३) अछौ[5] अच्छा अशाविति चतुष्टयम् ।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥

---

१. लघु. शेखरः, हलन्तनपुंसके, भागः १, पृ. ५०५—
"जायन्ते नव सौ तथापि च नव, भ्यांभिस्भ्यसां संगमे
षट्संख्यानि, नवैव सुप्यथ, जसि त्रीण्येव, तद्वच्छसि ।
चत्वार्यन्यवचस्सु कस्य विबुधाः शब्दस्य रूपाणि त-
ज्जानन्तु प्रतिभास्ति चेन्निगदितुं षाण्मासिकोऽत्रावधिः ॥
इति प्राचीनस्य शुष्कप्रक्रियातार्किकस्य प्रश्ने तदनुसारेणैवश्लोकद्वयेनोत्तरमाह—
गवाक्शब्दस्येति ।"
तुलनार्थं बा. म.-त. बो. द्रष्टव्ये ।

२. बा. म., द्विरुक्तप्रकरणे; ८।२।१२ : "अथात्र बहुलग्रहणानुवृत्तेः प्रयोजनकथन-परप्राचीनश्लोकमाह—दलद्वय इति ।

३. बा. म., भ्वादौ, ७।२।१० : "स्मरन्ति हीति । प्राचीनाचार्या निबध्नन्तीत्यर्थः ।"

४. यद्यप्यस्मिन् विषये टीकाकारैः किमपि नोक्तम् । परमुक्तार्थमेव श्लोकेन संगृहीमिति प्रतीयते ।

५. बा. म. ८।३।३१: "तदिदं रूपचतुष्टयमुक्तक्रमं श्लोकेन संगृह्णाति ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(३२०) गुणनाभावौत्वनुड्भिः[१] परत्वात् पुंसि बाध्यते ।
क्लीबे नुमा च स्त्रीशब्दस्येयङित्यवधार्यताम् ॥
ओकारस्यौकारे[२] च नित्यं स्यादम्शसोस्तु विभाषया ।
इयादेशोऽचि नान्यत्र स्त्रियाः पुंस्युपसर्जने ॥

(३७२) प्रियाष्ट्नो[३] राजवत्सर्व हाहावच्चापरं हलि ॥

(४४३) ऊह्यमेषां[४] द्विर्वचनानुनासिकविकल्पनात् ।
रूपाण्यश्वाक्षिभूतानि (५२७) भवन्तीति मनीषिभिः ॥

(९३९) सुपां[५] सुपा तिङा नाम्ना धातुनाथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥

(१०९३) गोत्रे[६] स्वैकोनसंख्यानां प्रत्ययानां परम्परा ।
यद्वा स्वद्यूनसंख्येभ्योऽनिष्टोत्पत्तिः प्रसज्यते ॥
अपत्यं पितुरेव स्यात्ततः प्राचामपीति च ।
मतभेदेन तद्धान्यै सूत्रमेतत्तथोत्तरम् ॥

(२२९६) अयमत्र[७] संग्रह :—
अजन्तोऽकारवान्वा यस्तास्यनिट् थलि वेडवयम् ।
ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड्भवेत् ॥

(२३१८) संज्ञायाः[८] कार्यकालत्वात् ·····सिद्धये ।

---

१ बा. म. ६।४।८०: "अथ जस्, टा, ङे., ङसि, ङ.स्, आम्, ङि. —इत्येतेषु अतिस्त्रीशब्दस्य इयङ्. नेत्येतत् श्लोकेन संगृह्णाति —गुणनाभावेत्यादिना ।"

२. बा. म. ६।४।८०: "अथ पुंसि पूर्वश्लोकसिद्धर्थमेवार्थं बालबोधाय लघुतरोपायेन संगृह्णाति—ओस्यौकारे चेत्यादिना ।"

३. त बो. ७।१।२१: "उक्तार्थं संगृह्णाति—प्रियाष्ट्नो राजवदिति ।"

४. कारिकेयमुक्तार्थमेव संगृह्णाति अत एव ग्रन्थकारप्रणीता स्वीकरणीया ।

५ बा. म. (सर्वसमासशेषप्रकरणे): "समासविभाजकोपाधिगणनावश्यकी चेत्तत्राह—सुपां सुपेति ।"

६. बा. म. ४।१।९३: "तदेतत् सर्वं श्लोकेन संगृह्णाति—गोत्रे स्वैकोनेति ।"

७. बा. म. ७।२।६३: "अयमत्रेति । 'कृसृभृ—' इति 'अचस्तास्व—' इति उपदेशेऽत्वतः इति "ऋतो भारद्वाजस्य" इति च सूत्रचतुष्टयस्य विषयाणां संग्रहो वक्ष्यत इत्यर्थः ।"

८. बा. म. ७।३।३३: "अथ पञ्चभिः श्लोकैः सन्वद्भावसूत्रं "दीर्घो लघोः" इति सूत्रं च विशदयति संज्ञाया इत्यादिना ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(२७६१) इट्[1] दीर्घश्चिण्णदिट् लत्वढत्वे द्वित्वत्रिकं तथा ।
इत्यष्टानां विकेल्पेन चतुर्भिरधिकं शतम् ॥
(२७६५) गौणे[2] कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ।
वृद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया ।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लाक्षणो मताः ॥ इत्यादयः ।

ग्रन्थेऽस्मिन् सार्धमेकं पद्यं दैवव्याकरणग्रन्थात् संगृहीतम् । तदधस्ताद् निरूप्यते । यथा—

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नमुशेष्विदं क्रमात् ॥[3]

अस्य श्लोकस्य चतुर्थपादो दैवग्रन्थे भिन्नरूपेणोपलभ्यते । तथा हि—

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दत्येवं लाभे वेदयते णिचि ॥[4] इति ।

सिद्धान्तकौमुद्यां णिजन्तस्य विद्धातोर्वेदयते इति प्रयोगः श्लोकभागे नोपदिष्टः । तस्य स्थाने सिद्धान्तकौमुदीकारेण दिवादि-अदादि-रुधादि-तुदादि-गणविकरणानामेव निर्देशः कृतः ।

एवमेवाधस्तनः श्लोकार्धोऽपि दैवव्याकरणग्रन्थात् संगृहीतः—

अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमते क्षमा ॥[5] इति ।

सिद्धान्तकौमुद्यां चुरादौ "धूञ् कम्पने" इति धातावुतद्धृतः धूनोति चम्पकवनानि धुनोत्यशोकं·····चन्दनमञ्जरीश्च" इति श्लोकः कविरहस्ये[6] उपलभ्यते यस्य भट्टोजिदीक्षितेनापि नामनिर्देशः कृतः ।

सिद्धान्तकौमदीटीकाकारेण वासुदेवदीक्षितेन बालमनोरमायामधस्तन्यौ द्वे कारिके हरिप्रोक्ते इति कथितम् ।

(सि. कौ. २२३२) संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥

---

१. बा. म. ७।३।३३: "उक्तप्रक्रियां श्लोकेन संगृह्णाति—इड् दीर्घ इत्यादिना ।"
२. बा. म. ७।१।६९: "···तां व्यवस्थां सार्धश्लोकेन दर्शयति गौणे कर्मणीत्यादिना ।"
३. सि. कौ., सू. २५७१, चुरादौ 'विद् चेतनाख्यानविवासेषु' इति धातौ ।
४. दैवम्, श्लोक; १११ ।
५. दैवम्, श्लोक; १४६ ।
६. कविरहस्यम्, श्लोक ८ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परं साम्प्रतमिमे द्वे अपि कारिके भर्तृहरिप्रणीते वाक्यपदीये नोपलभ्येते। अत इमे द्वे अपि कारिके परम्पराप्राप्त एव। सिद्धान्तकौमुद्यां कारिकाद्वयात् पूर्वं ग्रन्थकारेण 'तदुक्तम्'[१], 'उक्तं च'[२] इति निर्दिष्टम्। इदं कारिकाद्वयं रूपावतारेऽपि[३] समानरूपेण वर्तते। अतोऽवश्यमेव सिद्धान्तकौमुद्यां परम्पराप्रभावः।

यद्यप्युपरिवर्णिते द्वे अपि कारिके वाक्यपदीयेऽनुपलब्धे तथापि अधोलिखितायाः कारिकायाः पाठो वाक्यपदीये साम्प्रतमुपलब्ध एव।

(सि. कौ. २७०१) धातोरर्थान्तरे वृत्तेर्वार्त्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥[४]

इयं कारिका मुग्धबोधटीकाकारेण रामतर्कवागीशेन भागुरिप्रोक्ता[५]—इति स्वीकृतम्। भागुरिवृत्तं सर्वथान्धकारमयम्। अतोऽत्र भागुरिभर्तृहर्योः कोऽधमर्णरित्यस्य विवेचनं कर्तुं न शक्यते।

सिद्धान्तकौमुदीकारः प्रक्रियापरिज्ञानाय महाभाष्ये काशिकायां चानुपलब्धान् श्लोकान् संगृह्णाति। एतादृशानां श्लोकानां प्रायः पाठो रूपावतारे, प्रक्रियाकौमुद्यां, प्रक्रियाप्रसादे चोपलभ्यते। अस्मादेतत्सुस्पष्टं भवति यत् सिद्धान्तकौमुदीश्लोकेषु रूपावतारादीनां प्रभावः। तथा हि—

(सि. कौ. ४५२) वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा निशा दिशा।[६]

(२४८१) गुणोवृद्धिर्गुणोवृद्धिः प्रतिषेधो विकल्पनम्।
पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नव॥[७]

(३०८) स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा।
याता मातेति सप्तैते स्वस्रादय उदाहृताः॥[८]

१-२. बा. म. ८।४।१८: "तदुक्तमिति। हरिणेति शेषः।...उक्तं चेति हरिणेति शेषः।"

३. रूपा., भागः १, संहितावतारप्रकरणे, पृ. ६; भागः २, पृ. १०।

४. वा. प. ३।८८.

५. रामतर्कवागीशप्रणीतमुग्धबोधटीका, सू. २८२।

६ द्र.—रूपा., भागः १, पृ. १३१।
तुलना—प्र. कौ., भागः १, पृ. ३१७।
लघु. शेखरः, अव्ययप्रकरणे—"इदं भाष्ये न दृश्यते"।

७. द्र.—रूपा., भागः २, पृ. १६५।
तुलना—प्रसादटीका (प्र. कौ.), भागः २, पृ. २०३

८. द्र —रूपा., भागः १, पृ. ६५।
तुलना—प्र कौ., भागः १, पृ. १९३।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकायां ६।३।१०९ सूत्रेऽधस्तनी कारिका विद्यते—

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

अस्या महाभाष्ये पाठोऽनुपलब्धः । चान्द्रवृत्तौ ५।२।१२७ सूत्रे दुर्गाचार्यकृतनिरुक्त-भाष्ये[1] चास्या उपलब्धिः । परं प्रक्रियाकौमुद्यामत्र (६।३।१०९ सूत्रे) समानविषया अन्यैव कारिकोदाहृता । तथा हि—

भवेद् वर्णागमाद् हंसः सिंहो वर्णविपर्ययात् ।
गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम् ॥ इति ।

इयमेव कारिका सिद्धान्तकौमुद्यामवलोक्यते । अत्र तत्त्ववोधिनीकारेण[2] 'प्राचाम्' इति पदेन इयं कारिका प्रक्रियाकौमुदीतो गृहीतेति सुस्पष्टं कृतम् । यस्मिन् स्थले सिद्धान्तकौमुदीकारेण तत्त्ववोधिनीकारेण च 'प्राचाम्' इति पदस्य प्रयोगो विहितस्तत्र 'प्राचाम्' इति पदेन प्रक्रियाकौमुदीकार एवाभिप्रेतः ।

काशिकावृत्तिवत् सिद्धान्तकौमुद्या वहवः श्लोकाः पूर्वग्रन्थेभ्य एव संगृहीताः । परं वहव्यः कारिका भट्टोजिदीक्षितकृताः । इमाः कारिकाः प्रकरणार्थसंक्षेपाय, प्रक्रिया-परिज्ञानाय, सूत्रार्थपरिज्ञानाय च भट्टोजिदीक्षितेन स्वयमेव रचिताः स्युः ।

(ग) काशिकावृत्तौ सिद्धान्तकौमुद्यामिष्टीनां स्वरूपम्

इतः पूर्वं मया सूत्र-वार्त्तिक-वक्तव्यादीनां व्याकरणशास्त्रे का स्थितिरित्यस्य चर्चा कृता । परं न ज्ञायते तत्र इष्टीनां स्थितिः । अतोऽधस्ताद् ग्रन्थद्वयस्य महाभाष्य-सहकारेण इष्टिस्वरूपं विचार्यते ।

पदमञ्जर्यां हरदत्तमिश्रेण—इष्ट्युपसंख्यानवक्तव्यादीनि सूत्रस्योपलक्षणत्वेन स्वीकृतानि । एवं हि यत्कार्यं सूत्रैर्न साध्यते तत्सर्वम् इष्ट्युपसंख्यानवक्तव्यादिभिः सिद्धं भवतीति तेषामभिप्रायः ।[3]

महाभाष्ये येषु वार्तिकेषु (पुनरावृत्तियुक्तं) व्याख्याभाष्यं समुपलभ्यते तानि

---

१. द्र.—निरुक्तम्, दुर्गाचार्यभाष्यसहितम् (सम्पा. शिवदत्तशर्मा, वेङ्कटेश्वर प्रेस, बम्बई, संवत् १९६९), पृ. ६ ।

२. त. बो. ६।३।१०९: "हंसंसिंहशब्दयोरपि प्राचां (रामचन्द्रमहोदयानां) कारिकायामुदाहृतत्वात् तथापि तत्कारिकायां यथाशब्दाध्यारेण दृष्टान्त-प्रदर्शनार्थं तयोरुपन्यासः कृतो न तु प्रकृतसूत्रोदाहरणत्वेन ।

३. प. म. (का. वृ., भागः १, पृ. ५) :—
"सूत्रेणासंगृहीतं लक्ष्यं येन संगृह्यते तदुपलक्षणमिष्ट्युपसंख्यानग्रहणम् । तेन वक्तव्यादीनामपि ग्रहणम् ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वार्त्तिकानि कात्यायनकृतानि। परं येषु स्थलेषु केवलं वक्तव्यपदसमन्वितं व्याख्याभाष्यमेवोपलभ्यते तानि पतञ्जलिप्रणीतानि वक्तव्यानि। अयमेव कात्यायनपतञ्जलिप्रणीतवार्त्तिकयोर्भेदोपस्थापको नियमः। परन्तु यानि सूत्रवत्कार्यसाधकानि वचनानि उपरिकथिते सिद्धान्ते नान्तर्भवन्ति तानि 'इष्टि' इत्यभिधानेन शब्दशास्त्रे बोध्यन्ते।

अस्मिन् विषये कृतेऽप्येतादृशे निर्णये व्याकरणशास्त्रे वर्तन्ते बहूनि विवादग्रस्तपूर्णानि स्थलानि येषां स्वरूपावधारणं केनापि विधिना कर्तुं न शक्यते यद् इदं वार्त्तिकम् आहोस्विद् इष्टिवचनं वेति।

महाभाष्ये (१।१।५६, वा. ४) "सत्याश्रये विधिरिष्टः"; (१।१।४०, वा. ३) "इष्टः सर्वानुप्रयोगः" एतादृशानि स्थलान्युपलभ्यन्ते। एषु 'इष्ट' इति 'इष्टि' इति वा पदेन एवं ज्ञायते यद् एतादृशानि विधिवचनानि लौकिके व्यवहारे पदानां सिद्धये इष्टता-समर्थकानि वर्तन्ते अतः सामान्येन कानिचिद् न्यायसिद्धानि वचनान्यपि शब्दशास्त्रे 'इष्टि' इति पदेन प्रसिद्धिं भेजिरे[1] इत्यपि कथनम् इष्टिस्वरूपावबोधने नासङ्गतम्।

यद्यपीदं कथनं युक्तियुक्तं यत् कानिचिद् इष्टि-वचनानि पतञ्जलिकृतानि सन्ति तथापि भाष्योत्तरवर्तिभिः काशिकादिग्रन्थैरेतत् प्रतीयते यत् तेषु कानिचिद् इष्टिवचनानि पतञ्जल्युत्तरवर्तिकैरपि विरचितानि स्युः। व्याकरणशास्त्रे तेषां स्वरूपं द्विधा वर्तते। यानि विधिवाक्यानि महाभाष्ये वार्त्तिकरूपेणोपलभ्यन्ते परमुत्तरवर्तिग्रन्थकारैर्यानि इष्टिरूपेण पठितानि तानि प्रथमामवस्थां लभन्ते। यानि लौकिकप्रयोगबाहुल्यात् काशिकादिग्रन्थकारैः स्वयमेव विरचितानि सन्ति तानि द्वितीयं स्थानमाश्रयन्ति।

यथा महाभाष्ये कात्यायनप्रणीतानां वार्तिकानां पतञ्जलिप्रणीतानां वक्तव्येष्टीनां च पृथक् पृथक् स्वरूपावधारणं महत् कष्टं जनयति तथैवोत्तरवर्तिग्रन्थेषु स्थितिः; यतो महाभाष्योत्तरवर्तिवैयाकरणैर्लौकिकप्रयोगबाहुल्यात् क्वचिद् नवीनं वार्त्तिकं क्वचिद् नवीनमिष्टिवचनं विनिर्मितम्। नान्यतरः पन्थास्तैः समाश्रितः। तस्मादेव एतयोः पृथक् पृथक् स्वरूपावबोधनं क्लेशकरं वर्तते।

महाभाष्ये "राष्ट्रावारपाराद्घखञौ" (४।२।९३) इत्यस्मिन् सूत्रे "अवारपाराद्विगृहीतादपि; विपरीताच्च" इति द्वे पृथक् पृथक् कात्यायनप्रणीते वार्त्तिके स्तः, व्याख्याभाष्ययुक्तत्वात्। परं काशिकायामत्र (४।२।९३) "विगृहीतादपीष्यते।... अवारीणः। पारीणः। विपरीताच्च। पारावारीणः" इति पाठोऽस्ति। काशिकाया अस्मिन् पाठे प्रथमवाक्ये 'इष्यते' इति पदस्य विद्यमानाद् एवं सिध्यति यदिदं वाक्यं 'इष्टि'वचनमेवास्ति। पदमञ्जरीकारोऽपीदम् इष्टिरूपेणैव निर्दिशति। परमेतादृशे स्वीकृते उपर्युक्तस्थले इष्टि-स्वरूपावधारणं कर्तुं न शक्यते।

---

१. तुलनार्थं द्र.—प. म. (का. वृ., भागः ६) ८।२।२२, ८।४।६८ सूत्रे।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महाभाष्ये (मुद्रितसंस्करणे) २।१।६८ सूत्रे "पूर्वपदातिशये आतिशायिकाद् बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः" इति वाक्यं (महाभाष्यस्य मुद्रितसंस्करणेषु) वार्त्तिकस्व रूपेणोपलभ्यते। परं महाभाष्यकारः स्वयमेवेदम् इष्टिरूपेण निर्दिशति। यथा—"इष्टिरियं पठिता—पूर्वपदातिशये···।"

महाभाष्ये काशिकायां च ४।३।६० सूत्रे यत् वार्त्तिकं पठितं तत् सिद्धान्त-कौमुद्याम् इष्टिरूपेण स्वीकृतम्।

न्यासकारः ६।३।१२४ सूत्रे—"अवदत्तं विदत्तं च···" इति श्लोकम् इष्टिरूपेण स्वीकरोति। यथा—"इत्यनयेष्ट्या। ददातेर्ददादेशः···" इति।

महाभाष्ये २।२।२८ सूत्रे—"सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः" इति वाक्यं व्याख्याभाष्यविरहाद् 'वक्तव्य' इति पदेन सङ्गतत्वाच्च पतञ्जलिकृतं वार्त्तिक-मस्ति। परं सिद्धान्तकौमुद्यां बहुव्रीहिसमाससप्रकरणे (८३६ सूत्रस्याधस्तात्) "सर्वनाम्नो वृत्तिमात्रे इति भाष्यकारेष्ट्या गतार्थत्वाद्" इति पाठनिर्देशाद् उपरिकथितं वाक्य-मेकान्ततया 'इष्टि'रेव भवितुमर्हति।

सिद्धान्तकौमुद्यां ६७४ सूत्रे—"समाहारे चायमिष्यते" इति वाक्यं वर्तते। अत्र 'इष्यते' इत्यनेनेदम् इष्टिवचनमेव भवितुमर्हति। परं बालमनोरमाकार इदं वार्त्तिकत्वेन स्वीकरोति।

सिद्धान्तकौमुद्यां ९४५ सूत्रे—"त्र्युपाभ्यां चतुरोऽजिष्यते" इत्यस्य इष्टिवत् स्वरूपम्। परं बालमनोरमामिदं वार्त्तिकत्वेनैव स्वीकृतम्। एवं हि सिद्धान्तकौमुद्या २६११ सूत्रे—"अत्रेटो दीर्घो नेष्टः, दिदरिषते" इति पाठः। तत्त्वबोधिनीकारेणायं भाष्यकारस्य इष्टिवचनेन स्वीकृतः। परं बालमनोरमाकारेणायं 'वृत्तिस्थं वचनं' स्वीकृतः। तस्मादयं वृत्तिस्थं नाम काशिकास्थं वार्त्तिकमपि भवितुमर्हति।

अनेन विवेचनेनेदं निधार्यते यत् पाणिनिव्याकरणपरम्परायाम् इष्टि-स्वरूपम् एकान्ततया अवधारयितुमशक्यम्।

(घ) काशिकावृत्तौ सिद्धान्तकौमुद्यां च परिभाषाणां स्वरूपम्

"परिभाषा पुनरेकदेशस्था सर्वं शास्त्रमभिज्वलयति"[1] (यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति) इति परिभाषायाः स्वरूपं प्रकटीचकार पतञ्जलिः। ताश्च द्विधा—पाणिनिकृताः, अन्यैः कृताश्च। येषां पाणिनिसूत्राणां यथाकालं यथोद्देश्यं च सर्वस्मिन् शास्त्रेऽव्याहृतगतिनोपस्थितिर्भवति वैयाकरणैस्तानि पाणिनिपरिभाषासूत्राणि

१. द्र.—म. भा. (किलहॉर्नसंस्करणम्), भागः १ पृ. ३५९।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निगदितानि; यथा—"षष्ठी स्थानेयोगा" (१।१।४९) इति। अत एव पाणिनिपरिभाषासूत्रेभ्य ऋते पाणिन्युत्तरवर्त्तिकाले विरचितानां परिभाषाणां स्वरूपविषयेऽधस्ताद् विचार्यते।

कृतप्रयत्नेऽपि यथा महाभाष्ये वार्त्तिकवक्तव्येष्टयादीनां पृथक् पृथक् स्वरूपं न विज्ञायते तथैव तदुत्तरवर्तिग्रन्थेषु तेषां स्थितिः। भाष्योत्तरवर्तिवैयाकरणा वार्त्तिकपरिभाषादीनां प्रणयने स्वरूपप्रदाने च सर्वतोभावेन स्वतन्त्रं मार्गमवलम्बन्ते। ते वार्त्तिकादिवत् महाभाष्यस्थं परिभाषाणां स्वरूपमपि क्वचिद् अर्थतो निबध्नन्ति।

महाभाष्ये काशिकायां च "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" (३।३।१०) इति सूत्राधस्तात्—"क्रियायामुपपदे क्रियार्थायां वासरूपेण तृजादयो न भवन्ति। (ण्वुलपि तृजादिः)" इति परिभाषा विद्यते। परं सिद्धान्तकौमुद्यामत्र (३१७५) निम्नलिखितप्रकारेण सूत्रस्य वृत्तिभागे एवास्याः परिभाषाया अन्तर्भावः कृतः। यथा—"तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" ३।३।१० क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः। मान्तत्वादव्ययत्वम्। कृष्णं द्रष्टुं याति। कृष्णं दर्शको याति। अत्र वासरूपेण तृजादयो न भवन्ति। पुनर्ण्वुलुक्तेरिति।"

काशिकायां 'पक्षात्तिः" (५।२।२५) इत्यस्मिन् सूत्रे "तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणाब्जाहचौ" (५।२।२४) इत्यस्मात् सूत्राद् 'मूल'इति पदमनुवर्तते। तस्य कृते "एकयोगनिर्दिष्टानामप्येकदेशोऽनुवर्तते" इति परिभाषापाठः। परिभाषेयं महाभाष्ये "एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति" इति स्वरूपेणोपलभ्यते। सिद्धान्तकौमुद्यामत्र (१८२६) "मूलग्रहणमनुवर्तते" इति पाठः, परमस्य कृते भट्टोजिदीक्षितैर्महाभाष्यकाशिकावत् परिभाषा न स्वीकृता।

हैदराबादनगरस्थाद् उस्मानियाविश्वविद्यालयात् प्रकाशिते काशिकासंस्करणे यत्र वृत्तिभागे परिभाषा विद्यन्ते तासामग्रे प्रकोष्ठभागे तस्य मूलग्रन्थस्योल्लेखः कृतो येभ्यस्ताः परिगृहीताः। परं सन्ति तत्र बहूनि तादृशानि स्थलानि येषामग्रे ऽन्यथारूपेण ग्रन्थनिर्देशो दृश्यते। यथा काशिकायां ८।१।७१ सूत्रे—

"यत्क्रियायुक्ताः प्रादयस्ते तं प्रति गत्युपसर्गसंज्ञे भवतः।"

इति परिभाषा विद्यते। परिभाषेयं महाभाष्येऽपि तथैवोपलभ्यते। अतो महाभाष्यस्थीया इयं परिभाषा, इत्यत्र नास्ति संशयः। परं काशिकाया हैदराबादसंस्करणे इयं जैनेन्द्रपरिभाषात्वेन (=जै. प.) निर्दिष्टा। (परिभाषामिमां सिद्धान्तकौमुदीकारस्तु अर्थत उपनिबध्नाति, यथा ३९७८ सूत्रे—"यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गतिस्तत्र धातावेवोदात्तवति स्यात्, प्रत्यये न स्याद्" इति)।

एवमव महाभाष्ये "स्यङः संप्रसारणंपुत्र पत्योस्तत्पुरुषे" (६।१।१३) सूत्रे—

"अस्त्रीप्रत्ययेनानुपसर्जने। यो ह्युपसर्जनं स्त्रीप्रत्ययो भवत्येषा परिभाषा—प्रत्ययग्रहणे यस्मात् स तदादेर्ग्रहणं भवति।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति परिभाषा पाठः । काशिकायामत्र—

"न स्त्रीप्रत्यये चानुपसर्जने' इति प्रत्ययग्रहणपरिभाषया 'यस्मात् स विहितस्तदादेः इत्येष नियमो नास्ति, तेन परमकारीषगन्धीपुत्रः, परमकारीषगन्धीपतिः इत्यपि भवति ।"

इति पाठः । अस्मिन् स्थले काशिकाया हैदराबादसंस्करणे "न स्त्रीप्रत्यये चानुपसर्जने", "यस्मात् स विहितस्तदादेः" इत्यनयोः परिभाषयोरग्रे यथाक्रमं सीरदेवपरिभाषात्वेन (=सी. प.) पुरुषोत्तमदेवपरिभाषात्वेन (=पु. प.) च ग्रन्थनिर्देशः । परमनयोर्मूलं महाभाष्यमेवेति तु स्पष्टमेव ।

काशिकाया हैदराबादसंस्करणे ५।२।८७ सूत्रे—"व्यपदेशिवद्भावोऽप्रातिपदिकेन" इत्यस्याः परिभाषाया अग्रे शाकटायनपरिभाषात्वेन (=शा. प.); ८।२।२ सूत्रे च—"सिद्धे सत्यारम्भो नियमार्थः" इत्यस्या अग्रे कातन्त्रपरिभाषात्वेन (=कात. प.) निर्देशः । परमस्य कृते काशिकाटीकासु किमपि प्रमाणं नोपलभ्यते यदिमाः परिभाषाः काशिकाकाराभ्यां तत्तन्निर्दिष्टग्रन्थेभ्य एव गृहीता, न वेति ।

एवमेव काशिकाया अस्मिन् संस्करणे ७।१।५७ सूत्रे—"सर्वे विधयश्छन्दसि विकल्प्यन्ते" इति; ७।३।१९ सूत्रे च—"छन्दसि सर्वविधीनां वैकल्पितत्वाद्" इति पाठः । पाठोऽयं सिद्धान्तकौमुद्यां ३३८९ सूत्रे—"सर्वे विधयश्छन्दसि वैकल्पिकाः" इति, तथा ३५७४ सूत्रे—"छन्दसि सर्वेषां वैकल्पकत्वाद्" इति रूपेण वर्तते । अत्र काशिकाया हैदराबादसंस्करणे स्थलद्वयेऽपि पुरुषोत्तमदेवपरिभाषात्वेन (=पु. प) ग्रन्थकारनामनिर्देशः । परं टीकादिषु तादृशं किमपि प्रमाणं नोत्पश्यामः ।

[काशिकाया हैदराबादसंस्करणे पु.प.-सी.प.-शा.प.-कात. प.-जै. प.-पु. दे. प.-इत्यादिभिः सङ्केतशब्दैः कोऽर्थो गृहीत इत्यपि तत्र न ज्ञायते, एतेषां सङ्केताक्षरेषु निर्देशाभावात् इति]

सिद्धान्तकौमुद्यां ८५७ सूत्रावस्तात् "पक्षेऽजपीष्यते" इति पाठस्य इष्टिवत् स्वरूपं विद्यते । बालमनोरमाकारमतेनायं महाभाष्येऽनुपलब्धः । तस्माद् ज्ञायते यत् काश्चन इष्टयो भाष्योत्तरवर्त्तिन्योऽपि सन्ति ।

सिद्धान्तकौमुद्यां ३४७ सूत्रे (मोतीलाल-बनारसीदासप्रकाशिते संस्करणे) – "नानर्थकेऽलोन्त्यविधिरनभ्यासस्य" इत्यस्याग्रे वार्त्तिकत्वेन निर्देशः । परं बालमनोरमाकारोऽत्र परिभाषात्वेन निर्दिशति ।

उपरिनिर्दिष्टैः प्रमाणैरेतत् साध्यते यद् अस्मिन् शब्दशास्त्रे वार्त्तिकादिवत् परिभाषाणामपि स्वरूपं क्वचिदुत्तरोत्तरं स्फीतिभावं क्वचिद् ह्रासं क्वचिच्च नूतनपरिवर्तनमुपैति । नास्ति तत्र कश्चनोपायस्तासामेकान्ततया स्वरूपावधारणे ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तमं प्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूत्राणां समालोचनम्

पुमान् स्त्रिया १।२।६७ (९३३)

अत्र काशिकायां—"पुमानिति कम् ? प्राक्च प्राची च प्राक्प्राच्यौ। 'प्राक्' इत्यव्ययमलिङ्गम्" इति विवेचनं दृश्यते। प्रसादकारेणाप्येवमेव प्रतिपादितम्। अस्य प्रत्युदाहरणस्य सिद्धान्तकौमुद्यामभावः।

परं काशिकावचनव्याख्यानावसरे पदमञ्जरीकारो लिखति—"प्रागित्यव्ययमिति। प्रपूर्वादञ्चतेः क्विन्नन्तादस्तातेः "अञ्चेर्लुक्" (५।३।३०) इति लुकि "तद्धितश्चासर्वविभक्तिः" (१।१।३१) इत्यव्ययत्वम्। सत्त्वासत्त्वयोर्द्वन्द्वैकशेषौ चिन्त्यौ" इति। व्याकरणमिताक्षराकारोऽपि पदमञ्जरीकारमनुसरति।[1] एतेन प्रमाणेन काशिकागतमुक्तं व्याख्यानमसङ्गतं जायते।

त्यदादीनि सर्वैर्नित्यम् १।२।७२ (९३८)

काशिकायां वृत्तौ 'स च यश्चेति विग्रहे' "त्यदादीनां मिथो यद् यत्परं तत्तच्छिष्यते" इति वार्त्तिकेन 'यद्' इत्यस्यैव प्रातिपदिकार्थे कृते सति 'यौ' इति प्रयोगो व्युत्पाद्यते। तथैव च 'यश्च कश्च कौ' इत्यत्रापि स्वीक्रियते।

परं महाभाष्येऽत्र—"पूर्वस्य खल्वपि शेषो दृश्यते" इत्युक्तम्। तेन 'स च यश्च तौ यौ, यश्च कश्च यौ कौ' इत्यादीनामपि सिद्धिर्जायते। रूपावतारे प्रक्रियाकौमुद्यां च काशिकानुसारि एकमेव विधानम्। व्याकरणमिताक्षरायां[2] सिद्धान्तकौमुद्यां[3] चोभयत्र महाभाष्यं प्रमाणीकृत्य पूर्वपरशेषावुभावपि संगृहीतौ।

प्राप्तापन्ने च द्वितीयया २।२।४ (७१५)

काशिकायाम्—"एकदेशिनैकाधिकरणे इति निवृत्तम्। द्वितीयासमासे प्राप्ते

---

१. व्या. मि. १।२।६७: "अत्र प्रागित्यव्ययमलिङ्गमिति काशिका। अत्रापि यदि प्रथमान्तादस्तातेर्लुक् तदा सहप्रयोग एवायमनुपपन्नः। यदि सप्तम्यन्तात् तदा कथं द्वन्द्व इति चिन्त्यम्।"

२. व्या. मि. १।२।७२: "त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते। स च यश्च यौ। भगवता त्वनियम आश्रितः। स च यश्च यौ, ताविति वा।"

३. सि. कौ. ९३८: "पूर्वशेषोऽपि दृश्यते इति भाष्यम्।"
तुलना—म. भा. १।२।७२: "पूर्वशेषदर्शनाच्च (वा.)। पूर्वस्य खल्वपि शेषो दृश्यते। स च यश्च तावानय यावानयेति।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वचनमिदम् । विधानसामर्थ्यात् सोऽपि भवति । प्राप्त आपन्न इत्येतौ द्वितीयान्तेन सह समस्येते, तत्पुरुषश्च समासो भवति । प्राप्तो जीविकां प्राप्तजीविकः, जीविकाप्राप्त इति वा । आपन्नो जीविकाम् आपन्नजीविकः, जीविकापन्न इति वा" इति सूत्र-व्याख्यानम् ।

रूपावतारेऽस्य सूत्रस्य पाठोऽनुपलब्धः । प्रक्रियाकौमुदीकारेण सूत्रार्थकरणे काशिकानुगता । परमनेन काशिकाप्रदत्तव्याख्यानेन—'प्राप्ता जीविकां प्राप्तजीविका, जीविकाप्राप्ता । आपन्ना जीविकाम् आपन्नजीविका, जीविकापन्ना' इत्यादीन्युदाहरणानि न संगच्छन्ते । अत एव महाभाष्ये—"नायमनुकर्षणार्थश्चकारः । किं तर्हि । अत्वमनेन विधीयते । प्राप्तापन्ने द्वितीयान्तेन सह समस्येते, अत्वं च भवति प्राप्तापन्नयोरिति । प्राप्ता जीविकां प्राप्तजीविका । आपन्ना जीविकाम् आपन्नजीविका" इति विवेचनं कृतम् । कैयटेन "प्राप्तापन्ने च—" इत्यत्र प्रश्लिष्टमकारमाश्रित्य 'प्राप्तापन्ने अ च' इति छेदं कृत्वा एकाराकारयोरार्षसन्धिर्भवतीति प्रतिपादितम् । व्याकरणमिताक्षरायामपि 'प्राप्तापन्ने अ च' इत्यार्षसन्धिसमन्वितः पाठः स्वीकृतः । हरदत्तेनात्र—लिङ्ग-विशिष्टपरिभाषया प्राप्ताशब्दस्यापि समासे पुंवद्भावे च कृते स्त्रियां—'प्राप्ता जीविकां प्राप्तजीविका' इत्येक एव प्रयोगः प्रदर्शितः, न तु 'आपन्नजीविका' इति ।

सिद्धान्तकौमुदीकारेण 'द्वितीयया' इति पदोत्तरमकारः प्रश्लिष्यते । तेन सन्धि-समर्थने न काऽपि विप्रतिपत्तिरुदेति । 'प्राप्तापन्ने' इत्यस्य द्विवचनान्तत्वेन प्रगृह्यसंज्ञ-त्वात् प्रकृतिभावः प्राप्नोति । अतश्च सन्धिसमर्थनार्थमार्षत्वं स्वीकरणीयम् । परं "द्वितीयया अ" इत्यत्र सवर्णदीर्घे कर्तव्ये न विप्रतिपत्तिः ।

तृजकाभ्यां कर्तरि २।२।१५ (७०९)

"कर्तरिग्रहणं षष्ठीविशेषणम् । कर्तरि या षष्ठी सा तृचाऽकेन च सह न समस्यते । भवतः शायिका । भवत आसिका । भवतोऽग्रगामिका । तृच् कर्तर्येव विधीयते । तत्प्रयोगे कर्तरि षष्ठी नास्ति । तस्मात् तृज्ग्रहणमुत्तरार्थम् । कर्तरीति किम् ? इक्षु भक्षिकां मे धारयसि" इति काशिकायां व्याख्यानम् । रूपावतारे प्रक्रियाकौमुद्यां च प्रायः काशिकासंम्मतं व्याख्यानम् ।

सिद्धान्तकौमुदीकारस्तु सूत्रमन्यथैव व्याकरोति । तथा हि—"कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः । अपां स्रष्टा । वज्रस्य भर्ता । ओदनस्य पाचकः···" इति । अत्र भट्टोजिदीक्षितस्यायमभिप्रायो यदस्मिन् सूत्रे 'कर्तरि' इत्यकस्यैव विशेषणम्, न तु तृचः, अव्यभिचारात् ।[1] तथा च उपरञ्जकत्वमात्रमेवात्र विवक्षितम् ।

---

१. भट्टोजिदीक्षितस्येदं व्याख्यानं पदमञ्जरीकारसंमतम्, तेन तस्यैवात्र प्रभावः ॥ अत्र सिद्धान्तकौमुदीव्याख्यानसुस्पष्टये द्र.—प्रौ. म., भागः २, पृ. १४, सू. २।२।१५.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ननु च काशिकायां—"कर्तृग्रहणं षष्ठीविशेषणम्। कर्तरि या षष्ठी सा तृचाऽकेन च सह न समस्यते" इत्यर्थः कथं कृतः। कथं च तत्र—"तृज्ग्रहणमुत्तरार्थम्" इत्युक्तं चेत्; न हि तत् समीचीनमित्येवोत्तरं ग्राह्यम्, महाभाष्यविरुद्धत्वात्। तथा हि—महाभाष्यकारेणास्य सूत्रस्य—'पुरां भेत्ता, अपां स्रष्टा, यवानां लावकः' इत्यादीनि त्रीण्युदाहरणानि प्रदत्तानि। एतेषु च सर्वत्र कर्मणि षष्ठी। तस्माज्ज्ञायते यद् नास्त्यस्मिन् सूत्रे कर्तृग्रहणं षष्ठीविशेषणम्।[1] अपि च काशिकायां—"तृज्ग्रहणमुत्तरार्थम्" इति कल्प्यं स्यात्, तृजन्तस्योदाहरणाभावात्। तथा च "नित्यं क्रीडाजीविकयोः" (२।२।१७) इत्यत्र तृज्ग्रहणस्याननुवृत्तिः संभवेत् "कर्तरि च" (२।२।१६) इत्यत्र सम्बन्धाभावात्; न हि तृच्प्रयोगे कर्तरि षष्ठी संभवति। तस्मात् सिद्धान्तकौमुद्युक्तं व्याख्यानमेव समीचीनम्।

कर्तरि च २।२।१६ (७१०)

काशिकायां—"कर्तरि च यौ तृजकौ ताभ्यां षष्ठी न समस्यते। अपां स्रष्टा। पुरां भेत्ता। वज्रस्य भर्ता। अकः खल्वपि। ओदनस्य भोजकः। सक्तूनां पायकः" इति विवेचनं वर्तते। रूपावतारे व्याकरणमिताक्षरायां चेदमेव व्याख्यानम्। परं प्रक्रियाकौमुद्यां किञ्चित् परिवर्तनं संदृश्यते। तथा हि—"कर्त्रस्थतृजकाभ्यां षष्ठ्या न समासः"[2] इति। परं "तृजकाभ्यां कर्तरि" (२।२।१५) इति सूत्रव्याख्यानवत् सिद्धान्तकौमुद्या नेदं व्याख्यानं संमतम्। सिद्धान्तकौमुदीमतेन—"कर्तरि षष्ठ्या अकेन न समासः" इत्यर्थः। 'भवतः शायिका' इत्येकं च तत्रोदाहरणम्।

सिद्धान्तकौमुद्यामत्र २।२।१५ इत्यस्मात् 'तृच्' इति नानुवर्तते, तृच्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात्। 'अपां स्रष्टा, पुरां भेत्ता, वज्रस्य भर्ता इत्यादिप्रयोगाणां च २।२।१५ इत्यनेनैव सिद्धत्वात् तेषां पुनः प्रदर्शनमनुचितमेव। तेन भट्टोजिदीक्षितमते 'तृच्' इत्यस्य नानुवृत्तिः।

नित्यं क्रीडाजीविकयोः २।२।१७ (७११)

काशिकायां—"नेति निवृत्तम्, न तृजकौ। नित्यं समासो विधीयते। क्रीडायां जीविकायां च नित्यं षष्ठी समस्यते, तत्पुरुषश्च समासो भवति। तृच् क्रीडाजीविकयोर्नास्तीत्यक एवोदाह्रियते—उद्दालपुष्पभञ्जिका....." इति व्याख्यानम्। परमत्र तृचोऽनुवृत्तिर्निष्फला प्रतीयते, यतस्तृचः प्रयोगे कर्तरि षष्ठी न सम्भवति। अत एव—

---

१. द्र.—दयानन्दसरस्वती, अष्टाध्यायीभाष्यम्, भागः १, सू. २।२।१५.

२. इदं व्याख्यानं प्रक्रियाकौमुद्यां २।२।१६ सूत्रे वर्तते। इदमेव सिद्धान्तकौमुद्यामपरिवर्तिततरूपेण २।२।१५ सूत्रे पठितं वर्तते। अतः प्रक्रियाकौमुद्यां २।२।१६ सूत्रार्थप्रकाशने त्रुटिर्भवितुं शक्या।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"तृच्: क्रीडाजीविकयोर्नास्तीत्यक एवोदाह्रियते" इत्युक्त्वा 'तृच्' इत्यस्यानुवृत्तिर्निष्प्रयोजनेति सूचितम्, उदाहरणाभावात्। एतेनैव कारणेन सिद्धान्तकौमुदीकारोऽत्र 'तृच्' इति पदं नानुवर्तयति। परं प्रसादे विट्ठलनिर्दिष्टेन—"वामनमते तु तृच् जीविकायामस्ति रमणीयकर्ता" इति ग्रन्थेन तु 'तृच्' इत्यस्याप्यनुवृत्तिर्भवितुं शक्या।

विभाषागुणेऽस्त्रियाम् २।३।२५ (६०२)

"गुणे हेतावस्त्रीलिङ्गे विभाषा पञ्चमी भवति" इति काशिकायामभिहितम्। तेन 'जाड्याज्जाड्येन वा बद्धः। पाडित्यात् पाण्डित्येन वा मुक्तः' इत्यादीनि रूपाणि सङ्गच्छन्ते। परमनेन व्याख्यानेन—'धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः' इत्यादिष्वगुणे स्त्रियां च पञ्चमी न सिध्यति। एतच्छङ्कादूरीकरणाय पदमञ्जरीकारो हरदत्तः[1] "हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः" (४।३।८३) इत्यत्र कथयति—"समादागतमिति। समाद्धेतोरागतमित्यर्थः। तत्र "हेतौ" (२।३।२३) इति तृतीया प्राप्नोति। ज्ञापकात् सिद्धम्। यदयं पञ्चम्यन्ताद्धेतोः प्रत्ययमाह तज्ज्ञापयति—भवति हेतौ पञ्चमीति। नैतदस्ति ज्ञापकम्, यत्र 'विभाषा गुणे—" (२।३।२५) इति पञ्चमी, तदर्थमेतत्स्यात्, जाड्यादागत इति ? तस्माद् "विभाषा गुणे—" (२।३।२५) इत्यत्र विभाषेति योगविभागादगुणवचनादपि पञ्चमी भवति" इति। अत एव सिद्धान्तकौमुद्यामपि योगविभागः स्वीकृतः। तथा हि—"गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात्। जाड्यात्, जाड्येन वा बद्धः। गुणे किम्—धनेन कुलम्। अस्त्रियां किम्—बुद्ध्या मुक्तः। 'विभाषा' इति योगविभागादगुणे स्त्रियां च क्वचिद् धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः" इति। परं सिद्धान्तकौमुदीकारः प्रौढमनोरमायां "बाहुलकं प्रकृतेस्तनुदृष्टेः" इति वार्त्तिकनिर्देशस्यापि ज्ञापकत्वमाश्रित्य 'नास्ति घटोऽनुपलब्धेः' इति प्रयोगं साधयति। प्रसादकारो विट्ठलाचार्य एषां प्रयोगाणां द्विधा उपपत्तिं करोति—"इष्टसिध्यर्थं सूत्रस्य योगविभागो वा विधातव्यः, अथवा धूमादिकमुपलभ्याग्न्यादिकं जानातीति ल्यब्लोपे पञ्चमी वा स्वीकर्तव्या" इति।

काशिकायां रूपावतारे च न वर्तते योगविभागविषयिकी चर्चा। परं प्रक्रियाकौमुद्या एकस्मिन् हस्तलेखे—"योगविभागाद् धूमादग्निमान्"[2] इति पाठो वर्तते। एतेन विवेचनेन सिद्धान्तकौमुद्यामपि पूर्ववर्तिग्रन्थानामेव प्रभावो विद्यत इति कथयितुं शक्यम्।

पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् (२।३।३२ (६०३)

काशिकायामत्र "अपादाने पञ्चमी" (२।३।२८) इत्यतः पञ्चमी ग्रहणमनु-

---

१. इदं हरदत्तकृद्व्याख्यानं भाष्ये न दृश्यते। सुस्पष्टयेऽत्र शब्दरत्नटीका २।२।२५ दृष्टव्या (प्रौ. म., भागः १, पृ. ५४२)।

२. द्र.—प्र. कौ., भागः १, पृ. ४३४ (२।२।२५ सूत्रस्य टिप्पणं ८)।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्तते; तस्मात्—"पृथग् विना नाना इत्येतैर्योगे तृतीया विभक्तिर्भवति अन्यतरस्यां पञ्चमी च। पृथग् देवदत्तेन, पृथग् देवदत्तात्···" इति सूत्रार्थः। परं—'विना देवदत्तम्, विना वर्षम्, विना वातम्' इत्यादीनां कृते—"पृथग् विनानानाभिः" इति योगविभागमाश्रित्य द्वितीयायाः साधुत्वाख्यानं कृतम्। परं द्वितीयाशब्दस्य "एनपा द्वितीया" (२।३।३१) इत्यतोऽनुवृत्तिर्नाश्रिता।

सिद्धान्तकौमुदीकारस्तु—'अन्यतरस्यांग्रहणं समुच्चयार्थम्' इति स्वीकृत्य पञ्चमीद्वितीययोरनुवर्तनं विदधाति। तत्र "अपादाने पञ्चमी" (२।३।२८) इत्यतो मण्डूकप्लुत्या पञ्चमी अनुवर्तते। द्वितीया च "एनपा द्वितीया" (२।३।३१) इत्यत्र सन्निहितैव। तस्माद् भट्टोजिदीक्षितमतेन न वर्ततेऽस्मिन् सूत्रे योगविभागस्य प्रयोजनम्।[1] तस्येदं व्याख्यानं प्रक्रियाकौमुदीमनुकरोतीति विभाव्यते।

श्रीमद्दयानन्दमहाभागास्त्वत्र—'विनायोगे द्वितीया' इति व्याख्यानं सर्वथा असङ्गतमेव मन्यन्ते। तेषां मतेन यदि अनेन सूत्रेण द्वितीया विहिता स्यात् तर्हि महाभाष्यकारः पञ्चम्या विधानमिव द्वितीयाया अपि विधानं व्यकरिष्यत्; यस्माद् द्वितीयापदस्यानुवृत्तिर्नाश्रिता महाभाष्यकारेण तस्माद् द्वितीयानुवृत्तिपरं व्याख्यानं भाष्यानुक्तत्वाद् हेयम्, 'ततोऽन्यत्रापि दृश्यते' इत्यत्रैव द्वितीयायाः साधुत्वग्रहणात्। अतस्तेषां मतेन जयादित्यादीनां व्याख्यानमसङ्गतमेवास्ति।[2]

रात्राह्नाहाः पुंसि २।४।२९ (८१४)

काशिकायां—"कृतसमासान्तानां निर्देशः। रात्र अह्न अह इत्येते पुंसि भाष्यन्ते। परवल्लिङ्गतायां स्त्रीनपुंसकयोः प्राप्तयोरिदं वचनम्। द्विरात्रः। त्रिरात्रः। चतूरात्रः। पूर्वाह्णः। अपराह्णः। मध्याह्नः। द्व्यहः। त्र्यहः···" इति व्याख्यानम्।

सिद्धान्तकौमुदीकारस्तु—"एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव। अनन्तरत्वात् परवल्लिङ्गतापवादोऽप्ययं परत्वात् समाहारनपुंसकतां बाधते। अहोरात्रः। रात्रेः पूर्वभागः पूर्वरात्रः। पूर्वाह्णः। द्व्यहः। संख्यापूर्वं रात्रं क्लीबम्। द्विरात्रम्। त्रिरात्रम्। गणरात्रम्" इति विवेचनं प्रस्तौति।

काशिकायां च "अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः" (५।४।८७) इत्यस्य व्याख्याने—'अहोरात्रः, द्विरात्रः, त्रिरात्रः' इत्यादीन्युदाहरणानि। अत्र (५।४।८७) काशिकासदृशमेवोदाहरणानां स्वरूपं रूपावतारेऽपि समुपलभ्यते। परं प्रक्रियाकौमुदी-

---

१. भट्टोजिदीक्षितस्य व्याख्याने पदमञ्जरीकारस्य प्रभावः। परं काशिकाप्रतिपादितं योगविभागं हरदत्तेन—"असत्यपि मुनित्रयवचने प्रयोगबाहुल्यादेवं व्याख्यातम्" इति वचसा समर्थितम्, न तु निराकृतम्। अत्र विट्ठलोऽपि प्रसादे योगविभागं स्वीकरोति।

२ द्र.—अष्टाध्यायीभाष्यम्, भागः १, सू. २।३।२२.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारेण "एकवद्भावात् क्लीबता" इति विलिख्य 'अहोरात्रम्' इति नपुंसकलिङ्गे उदाहरणं प्रस्तुतम्।[1] तच्च भट्टोजिदीक्षितेन "रात्राह्नाहाः—" (२।४।२९) इत्यत्र अनन्तरत्वात् परवल्लिङ्गतापवादोऽप्ययं परत्वात् समाहारनपुंसकतां बाधते इति वचसा निराकृतम्।[2]

ननु अहोरात्र इति समाहारद्वन्द्वे "स नपुंसकम्" (२।४।१७) इति नपुंसकत्वप्रसङ्गः। न च नपुंसकस्याप्ययं पुंस्त्वविधिरपवादः स्यादिति वाच्यम्। "पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्" इति न्यायेन परवल्लिङ्गताया एवास्यापवादत्वाद् 'अहोरात्र' इति परवल्लिङ्गताया निराकरणे एवास्य सूत्रस्य व्यापारः।[3] अयमेव भावो भट्टोजिदीक्षितेन "अनन्तरत्वाद् परवल्लिङ्गतापवादोऽप्ययं परत्वात् समाहारनपुंसकतां बाधते" इति वचसा प्रस्फुटितः। यदि "एकवद्भावात् क्लीबता" इति प्रक्रियाकौमुदीमतं स्वीक्रियेत तर्हि तु 'द्व्यहः, त्र्यहः' इत्यादावपि क्लीबत्वं स्यात्। परं स्वयमेव प्रक्रियाकौमुदीकृता "न संख्यादेः समाहारे" (५।४।८९) इति सूत्रव्याख्यानावसरे 'द्व्यहः त्र्यहः' इत्युदाहरणानि प्रदत्तानि। अत एव "हेमन्तशिशिरावहोरात्रे च छन्दसि" (२।४।२८) इत्यस्य 'अहोरात्राविमौ पुण्यौ' इति लौकिकं प्रत्युदाहरणं संगच्छते।

काशिकायां 'द्विरात्रः, त्रिरात्रः, चतूरात्रः' इत्यादीन्युदाहरणानि रूपावतारे च 'एकरात्रः, द्विरात्रः' इत्यादीनि। परं प्रक्रियाकौमुद्यां—"संख्यादेर्रात्रिशब्दस्य क्लीबता वाच्या द्विरात्रम्" इति व्याख्यानात्, सिद्धान्तकौमुद्यामपि तथैव स्वीकृतत्वात् काशिकारूपावतारयोः—'द्विरात्रः, त्रिरात्रः' इत्यादीनि पुल्लिङ्गोदाहरणानि न प्रमाणपथमवतरन्ति। तथा हि लिङ्गानुशासनसूत्रम्—"अपथपुण्याहे नपुंसके। संख्यापूर्वा रात्रिः"[4] इति। अमरकोशेऽपि—"रात्रं प्राक्संख्ययान्वितम्[5], गणरात्रं निशा बह्व्यः"[6] इति पाठः। एवमेव—"रात्रान्ताः प्रागसंख्यकाः"[7] इति पुंस्त्वाधिकारे तत्र पठ्यते।

रात्रिशब्दस्य समूहवाचित्वे तु "राजदन्तादिषु परम्" (२।२।३१) इति राजदन्तादित्वात् परप्रयोगे लोकाश्रयत्वात् क्लीबत्वं 'शतम्, सहस्रम्' इत्यादिवत् जायते।

---

१. व्या. मि. ५।४।८७ : "द्वे रात्री समाहृते द्विरात्रः। अतिरात्रः। सर्वत्र "रात्राह्नाः पुंसि" (२।४।२९) इति पुंस्त्वम्। अहोरात्रद्विरात्रयोः क्लीबता कौमुद्यामुक्ता।"

२. द्र.—प्रौ. म. (शब्दरत्नसहिता), भागः २, सू. २।४।२९, पृ. ६०।

३. द्र.—*Ibid*, टिप्पणभागः।

४. द्र.—सि. कौ.—बालमनोरमातत्त्वबोधिनीटीकादिसहिता (मोतीलालबनारसीदाससंस्करणम्, १९६७), भागः ४, पृ. ६३२, लि. सू. १३१-१३२।

५. अमरः (लिङ्गादिसंग्रहवर्गः) ३।२५, पृ. ५९६।

६. अमरः (कालवर्गः) १।६, पृ. ३३।

७. अमरः (लिङ्गादिसंग्रहवर्गः) ३।१२, पृ. ५८७।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथोक्तम्—"लिङ्गमशिष्यं लोकाश्रयत्वात्" इति। अत एव 'एकरात्रम्, द्विरात्रम्, त्रिरात्रम्, चतूरात्रम्' इत्यादीनि क्लीवत्वेनैव स्वीकरणीयानि।[1]

अजेर्व्यघञपोः २।४।५६ (२२९२)

अत्र काशिकायां सिद्धान्तकौद्यां च "अज गतिक्षेपणयोः' इत्यस्माद्धातोरार्धधातुके परतो वीत्ययमादेशो भवति घञपौ वर्जयित्वा" इति सूत्राभिप्रायः। परं ग्रन्थद्वयेऽपि—"वलादावार्धधातुके परे विकल्पेन वीत्ययमादेशो भवति" इति व्याख्यानस्वीकरणेनैव 'वेता, अजिता, वेष्यति, अजिष्यति, प्रवेता, प्राजिता, प्रवेतुम्, प्राजितुम्' इत्यादीनि रूपाणि संगच्छन्ते। तस्माद् ग्रन्थद्वये विकल्पप्रदर्शनाय—"वलादावार्धधातुके विकल्प इष्यते" इति इष्टिर्निर्मिता।

महाभाष्ये एतादृशी इष्टिर्न दृश्यते। पदमञ्जरीकारोऽपीमां जयादित्यादिभिः स्वीकृतामिष्टिं न साधु मन्यते। यथाह स व्याख्यानावसरे—"वलादावार्धधातुके वेष्यत इति। नार्थोऽनयेष्ट्या, नापि घञपोः प्रतिषेधेन, नापि क्यप उपसंख्यानेन,[2] नापि "वा यौ" (२।४।५७) इति सूत्रेण। एतावदस्तु "वा लिटि" (२।४।५५) अजेर्वीत्येव। व्यवस्थितविभाषेयम्। तेन घञपोः क्यपि नैव भवति। वलादौ यौ च विकल्पः, अन्यत्र नित्यम्" इति। जयादित्यादिविरचितामिमामिष्टिं खण्डयन्तः श्रीमद्दयानन्दमहाभागा एवं वदन्ति - "अस्मिन् सूत्रे महाभाष्यकारेण[3] सूतवैयाकरणयोः संवादेन 'प्राजिता, प्रवेता' इति रूपद्वयेन वलादावार्धधातुके विकल्पः प्रतिपादितः, तैनेतत्साधितम्..." इति। अत इदमनुमीयते यद् महाभाष्यकारेण प्रदत्तानि सूतवैयाकरणसंवादे यान्युदाहरणानि वर्तन्ते तानि परिलक्ष्य सुस्पष्टयेऽत्र जयादित्यादिभिरेतादृशी इष्टिर्विरचिता।

वा यौ २।४।५७ (३२९२)

काशिकायां सिद्धान्तकौमुद्यां च—"यौ परे अजेर्वा वीत्ययमादेशो भवति" इति सूत्रव्याख्यानाभिप्रायः। तेन 'प्रवयणः, प्राजनः, प्रवयणम्, प्राजनम्,' इत्यादीन्युदाहरणानि जायन्ते। काशिकामतेनेदं सूत्रं पूर्वसूत्रस्यापवादभूतम्, यतो हि "अजेर्व्यघञपोः" (२।४।५६) इत्यनेन नित्ये प्राप्ते विकल्पो भवति।

प्रक्रियाकौमुद्यां व्याकरणमिताक्षरायां च काशिकासम्मतमेव व्याख्यानम्। परं भाषावृत्तिकारेणेदं सूत्रं पृथक् पृथग् द्विधा व्याख्यातम्—"अजेर्व्युटि धीभावो वा

---

१. सुस्पष्टयेऽत्र दुर्घटवृत्ति-प्रौढमनोरमे द्रष्टव्ये।
२. "घञपो प्रतिषेधे क्यप उपसंख्यानम्। समज्या" इति हरदत्तस्याभिप्रायः।
३. म. भा. २।४।५६ : "एवं हि कश्चिद् वैयाकरण आह—कोऽस्य रथस्य प्रवेतेति। सूत आह—अहमायुष्मन्नस्य रथस्य प्राजितेति।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्यात् । प्राजनो दण्डः, प्रवयणो वेत्येकः सूत्रार्थः । औणादिके यौ परेऽजेर्वादेशः स्याद् वायुरित्यपरः सूत्रार्थः" इति ।

महाभाष्यकारमतेन तु 'वायुः' इत्येव प्रयोगः साधुः । यथा हि तत्र पाठः—"न हि तर्हीदानीमिदं "वा यौ" (२।४।५७) इति वक्तव्यम् । वक्तव्यं च । किं प्रयोजनम् । नेयं विभाषा । किं तर्हि । आदेशोऽयं विधीयते । वा इत्ययमादेशो भवति अजेर्यौ परतः । वायुः"[1] इति । यदीदं सिद्धान्तिभाष्यं स्यात्तर्हि 'यु' इत्यनेनौणादिकस्यैव ग्रहणम्, न तु ल्युटः । तस्माद् 'वायुः' इति प्रयोगः साधुः । 'प्रवयणः, प्राजनः' इत्यादिप्रयोगाणां तु पूर्वसूत्रे (२।४।५५) विकल्पानुवर्तनेनैव सिद्धत्वात् पुनरस्मिन् सूत्रे विकल्पविधानकल्पना न करणीया ।[2] तथा च पूर्वसूत्रेण विकल्पविधाने स्वीकृते 'वा' इत्यस्यादेशपरकत्वमेव युक्तम्, विकल्पार्थकत्वे वाशब्दवैयर्थ्यापत्तेः ।

श्लिष आलिङ्गने ३।१।४६ (२५१४)

काशिकायामिदं सूत्रं योगविभागमकृत्वैव व्याख्यातम् । तत्र हि—"श्लिषेर्वातोरालिङ्गनक्रियावचनात्परस्य च्लेः क्स आदेशो भवति । आलिङ्गनमुपगूहनम्, परिष्वङ्गः अत्र नियमार्थमेतत् । अश्लिक्षत्कन्यां देवदत्तः । आलिङ्गन इति किम् ? समाश्लिषज्जतु काष्ठम्" इति व्याख्यानम् ।

प्रक्रियाकौमुद्यामपि काशिकासदृशं व्याख्यानम् । परं सिद्धान्तकौमुद्यां योगविभागद्वयमाश्रित्य नियमद्वयं लभ्यते ।[3] प्रथमः काशिकाभिमतो नियमः । द्वितीयश्च अनालिङ्गने श्लिषश्च्लेरङ् एव न क्सः । अतो द्वितीयेन नियमेन अनालिङ्गने "शल इगुपधादनिटः क्सः" (३।१।४५) इत्यस्यापि व्यावृत्तिर्भविष्यति इति विशेषः ।

तव्यत्तव्यानीयरः ३।१।९६ (२८३४)

अत्र 'पक्तुं योग्याः, भेत्तुं योग्याः' इत्यर्थे पचभिदधात्वोः "केलिमर उपसंख्यानम्" इत्युपसंख्यानेन केलिमर्प्रत्यये सति 'पचेलिमाः, भिदेलिमाः' इति प्रयोगौ व्युत्पाद्येते । परं काशिकायामत्र—"कर्मकर्तरि चायमिष्यते" इति वाक्येन केलि ययस्य कर्मकर्तरि विधानं कृतम् । कातन्त्रस्य (४।२।९) दुर्गसिंहवृत्तावपि

---

१. तुलना—लघु. शेखरः २।४।५७: "इदं सूत्रम्-'अजेर्यौ परतो वा इत्यादेशो वायुः' इत्येवं भाष्ये व्याख्यातम् ।

२. द्र.—अष्टाध्यायीभाष्यम्, भागः १, पृ. ३६९, सू. २।४।५७.

३. भट्टोजिदीक्षितस्य व्याख्यानं न्यासपदमञ्जरीकारसंमतम् । यतो हि टीकाद्वयेऽपि योगविभागः स्वीकृतः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशिकावदुल्लेखः। परं महाभाष्ये सिद्धान्तकौमुद्यां[1] च तादृश उल्लेखो न वर्तते। भाष्ये हि—"पचेलिमा माषाः, पक्तव्याः। भिदेलिमाः सरलाः, भेत्तव्याः" इति शुद्धे कर्मणि केलिमर्प्रत्ययस्य प्रयोगः।[2] स्वयमेव भिद्यन्ते, स्वयमेव पच्यन्ते इति कर्मकर्त्रर्थपरं विवरणं न कृतम्। तस्मात् काशिकाया महाभाष्येण सह भेदः।

गमश्च ३।२।४७ (२९६४)

"गमेर्धातोः सुप्युपपदे संज्ञायां विषये खच्प्रत्ययो भवति। सुतंगमो नाम यस्य सौतंगमिः पुत्रः" इति काशिकाकृतं व्याख्यानम्।

भट्टोजिदीक्षितेनात्र सिद्धान्तकौमुद्यामुदाहरणमात्रमेव प्रदर्शितम्। न हि वर्तते तत्र सूत्रार्थविवरणम्। परं शब्दकौस्तुभे तेन—कर्मण्युपपदे एव संज्ञायां विषये खच्प्रत्ययो निर्दिष्टः। सुप्युपपदे इत्युक्ते "द्वाभ्यां गच्छति द्विगमः" इत्यापत्तिः स्यात्।

रूपावतारे तु सुवन्तोपपदे एव कार्यं प्रतिपादितम्। अन्येषु च ग्रन्थेषु सूत्रव्याख्यानानुपलभ्यमानात् शब्दकौस्तुभकर्तुः सूत्रार्थकरणे नवीनं परिवर्तनमिति ज्ञायते।

ब्रह्मभ्रूणवृत्रेषु क्विप् ३।२।८७ (२९९८)

'ब्रह्मादिषु कर्मसूपपदेषु हन्तेर्भूते क्विप् प्रत्ययो भवति" इति सूत्रार्थः। तेन 'ब्रह्महा, भ्रूणहा, वृत्रहा' इत्यादयः प्रयोगाः सिध्यन्ति। परं काशिकायामत्र—"चतुर्विधश्चात्र नियम इष्यते, ब्रह्मादिष्वेव हन्तेर्नान्यस्मिन्नुपपदे—पुरुषं हतवानिति। ब्रह्मादिषु हन्तेरेव नान्यस्मात्स्यात्—ब्रह्माधीतवानिति। ब्रह्मादिषु हन्तेर्भूतकाले क्विबेव नान्यः प्रत्ययः, तथा भूतकाल एवं नान्यस्मिन्—ब्रह्माणं हन्ति, हनिष्यति वेति। तदेतद्वक्ष्यमाणबहुलग्रहणस्य पुरस्तादपकर्षणाल्लभ्यते" इत्यपि व्याख्यानम्।[3] न तथा महाभाष्ये। महाभाष्ये तु—"उभयतो नियमोऽयम्। ब्रह्मादिष्वेव हन्तेर्भूते क्विब्भवति।

---

१. सि. कौ. २८३४: "पचेलिमा माषाः, पक्तव्याः। भिदेलिमाः सरलाः, भेत्तव्याः। कर्मणि प्रत्ययः। वृत्तिकारस्तु 'कर्मकर्तरि चायमिष्यते' इत्याह। तद्भाष्यविरुद्धम्।"

२. अस्मिन् स्थले पदमञ्जरीलघुशब्देन्दुशेखरबालमनोरमाकारादयोऽपि द्रष्टव्याः।

३. रूपावतार एतादृशं व्याख्यानमनुपलब्धम्। प्रक्रियाकौमुद्यां तु—"ब्रह्मादिष्वेव हन्तेरेव क्विबेव भूते एवेति नियमार्थं सूत्रम्" इत्यनेन काशिकोक्तमेव व्याख्यानं नामनिर्देशं विना स्वीकृतम्। यद्यपि प्रक्रियाकौमुद्यां ३।२।८८ सूत्राद् 'बहुलम्' इत्यस्यापकर्षणं न निर्दिष्टम्, परं तदापि तत्पौत्रेण विट्ठलेन प्रसादे तु स्वीकृतमेव।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्विबेव हन्तेर्भूते ब्रह्मादिषु" इत्येवं व्याख्यानम्। अनेन प्रमाणेन—"हन्तेरेव, भूत एव" इति काशिकोक्तमधिकं नियमद्वयमुपेक्ष्यम्। न्यासकारस्तु यथाकाशिकं व्याख्याति। सिद्धान्तकौमुद्यां भाष्यकाशिकयोर्द्वयोरपि मतस्योपन्यासः कृतः। परं द्वयोर्मध्ये कतरज्ज्याय एतद्विषये सिद्धान्तकौमुद्यां विचारणा न कृता।

प्रदीप - उद्द्योत - बालमनोरमाकारादीनां काशिकामतेन सह भेदः। ते सर्वे महाभाष्यमेवात्र प्रमाणीकुर्वन्ति।

सुकर्मपापमन्त्रपुण्येषु कृञः ३।२।८९ (२९९९)

"'स्वादिषु कर्मसूपपदेषु कृञः क्विप् प्रत्ययो भवति" इति सूत्रार्थः। तेन-'सुकृत्, कर्मकृत्' इत्यादयः प्रयोगाः सिध्यन्ति। परं काशिकायामितोऽग्रे—"त्रिविधश्चात्र नियम इष्यते। धातुनियमं वर्जयित्वा कालोपपदप्रत्ययनियमः। धातोरनियतत्वादन्यस्मिन्नप्युपपदे भवति—शास्त्रकृत्, भाष्यकृत्" इति व्याख्यातम्। अत्र न्यासकारो वदति—"त्रिविधश्चात्र नियम इति। एतदपि बहुलग्रहणानुवृत्तेर्लभ्यते। कालोपपदप्रत्ययविषय इति। कालोपपदप्रत्यया विषया यस्य स तथोक्तः। स पुनः कालनियमः, उपपदनियमः, प्रत्ययनियमश्चेति। तत्र कालनियमः—स्वादिषु कृञो भूते (एव) क्विबेव भवति, नान्यः प्रत्यय इति, न भवति—कर्म कृतवान् कर्मकार इति। उपपदनियमः—स्वादिषु कृञ एव, नान्यस्माद्धातोरिति, न हि भवति क्विप्—मन्त्रमधीतवानिति, अणेव भवति मन्त्राध्याय इति। प्रत्ययनियमः—स्वादिषु कृञो भूत एव क्विप्, न वर्तमाने भविष्यति वा, तेन मन्त्रं करोति मन्त्रं करिष्यतीति वा इत्यर्थविवक्षायां मन्त्रकृदिति न भवति। शास्त्रकृत्…" इति। अतो न्यासः काशिकोक्तमेव पुष्णाति।

अत्र रूपावतारप्रक्रियाकौमुद्यौ मौनमेवावलम्बेते। परं प्रसादे ३।२।८८ सूत्राद् 'बहुलम्' इत्यनुवृत्य काशिकैव प्रमाणीकृता।

काशिकोक्तं व्याख्यानं सिद्धान्तकौमुद्यां काशिकानामनिर्देशपूर्वकं वर्तते। न तत्र किमपि काशिकया सह भेदप्रदर्शनम्।[1] परं तत्र "बहुलं छन्दसि" (३।२।८८) इत्यस्मात् काशिकासंमता 'बहुलम्' इति पदस्यानुवृत्तिर्नैव निर्दिष्टा। महाभाष्येऽस्य सूत्रस्य व्याख्यानाभावात् सिद्धान्तकौमुदीकारोऽत्र काशिकया सह स्पष्टतया किमपि वैमत्यं न प्रदर्शयतीति संभाव्यते।

---

१. एवमेव काशिकायां ३।२।९० सूत्रे—"चतुर्विधश्चात्र नियम इष्यते"; ३।२।९१ सूत्रे—"अत्रापि पूर्ववच्चतुर्विधो नियम इष्यते" इति व्याख्यानम्। सिद्धान्तकौमुद्यां (३००० सूत्रे) तु काशिकानामनिर्देशपुरस्सरं काशिकामतमाश्रित्य व्याख्यानम्। परं भाष्येऽस्यापि सूत्रद्वयस्य व्याख्यानं नोपलभ्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विदिभिदिच्छिदेः कुरच् ३।२।१६२ (३१२४)

विदादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु कुरच् प्रत्ययो भवतीति सूत्रार्थः। 'विदुरः, भिदुरम्, छिदुरम्' इत्यादीनि चोदाहरणानि। परं काशिकायामत्र-"भिदिच्छिद्योः कर्मकर्तरि प्रयोगः" इति पठितम्। न तत् सिद्धान्तकौमुद्यामुपलभ्यते, न व्याख्यातं तत्रेदं सूत्रम्। केवलमुदाहरणमात्रं कौमुद्यां दृश्यते। महाभाष्येऽप्यस्य व्याख्यानस्याभावः।

भाषावृत्तिकारमतेन तत्त्वबोधिनीकारमतेन च—"गुरुमत्सरच्छिदुरयाऽदुरया-चितमङ्गना" (शिशु. ६।८), "करीन्द्रदर्पच्छिदुरं मृगेन्द्रम्" (जाम्बवतीकाव्यम्), "संसारबन्धच्छिदुरान् द्विजातीन्" (बुद्धचरितम्) इत्यादिषु सर्वत्र शद्धे कर्तरि एव 'छिद्' इत्यस्माद्धातोः कुरच्प्रत्ययस्य विद्यमानत्वात् काशिकोक्तं—"भिदिच्छिद्योः कर्मकर्तरि प्रयोगः" इति व्याख्यानं चिन्त्यमेव।

यद्यपि सिद्धान्तकौमुद्यामेतत् सूत्रं न व्याख्यातं तथापि शब्दकौस्तुभे एवमुक्तं यत्—"न वयं कर्मकर्तरि नेति ब्रूमः, तस्यापि कर्तृतया प्रत्ययस्याप्रत्यूहत्वात्, किन्तु शुद्धेऽपि कर्तरि यथासंभवं भवत्येव" इति।[1] एतेनैव "मुग्धकान्तास्तनसङ्गभङ्गुरैः" (शिशु. १।४७) "संलक्ष्यते न च्छिदुरोऽपि हारः" (रघु. १६।२६) इत्यादयः प्रयोगाः कर्मणि प्रत्यये सति संगच्छन्ते।

काशिकामतेन कर्मकर्तर्येव कुरच्प्रत्यय इष्यते। सिद्धान्तकौमुदीकारमतेन शुद्धे कर्तरि, कर्मकर्तरि चोभयत्रायं प्रत्यय इष्यते।

दुर्घटवृत्तौ तु—"भिदेः छिदेः कर्मकर्तरि चायमिष्यते इति वृत्तावुक्तत्वात् केवले न स्यात्। उच्यते। छिदिभिदेः 'कर्तरि च' इति वामनोक्तत्वात्। 'कर्मकर्तरि च' इति चकारोऽपीति लिङ्गम्" इत्युक्तम्।

काव्यालङ्कारे तु "भिदुरादयः कर्मकर्तरि कर्तरि च" (५।२।३८) इत्यभिधानं दृश्यते। तथा च वृत्तिवाक्यगतश्चकारोऽप्येवमभिप्रायकः। परं दुर्घटवृत्तिप्रदत्तं "भिदेः छिदेः कर्मकर्तरि चायमिष्यते" इति वचनं काशिकाया उपलब्धहस्तलेखेषु नोपलभ्यते।

लेटोऽडाटौ ३।४।९४ (३४२७)

काशिकायां—"लेटोऽडाटावागमौ भवतः पर्यायेण। जोषिषत्। तारिषत्।

---

१. तुलना—भा. वृ. ३।२।१६२ सूत्रस्य टिप्पणभागे क्षितीशचन्द्रचटर्जी-महाभागानां मतम्—
"वस्तुतस्तु 'कर्तरि कृत्' (३।४।६७) कर्तृयुक्तः प्रत्ययः यथासंभवं कर्म-कर्तर्यपि भवति। तस्यापि कर्तृत्वात्।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्दिषत् । पतति विद्युत् (दिद्युत्) । उदधिं च्यावयति" इति सूत्रव्याख्यानम् । परं प्रक्रियाकौमुद्यां सिद्धान्तकौमुद्यां च—"लेटः अट् आट् इत्येतावागमौ स्तः तौ च पितौ । जोषिषत्" इत्यर्थः ।

तथा हि—केषुचन लक्ष्येषु गुण, यथा –कृणवत् (ऋ. ४।१२।१); केषुचन गुणो न दृश्यते, यथा—कृण्वैते (ऋ. ६।२५।४) । तस्मादत्र मण्डूकप्लुत्या "आडुत्तमस्य-" (३।४।९२) इत्यस्मात पिदित्यस्यानुवर्तने क्लेशो न कार्यः ।[1]

अत्र सिद्धान्तकौमुद्यां प्रक्रियाकौमुद्याः प्रभावो वक्तुं शक्यते ।

सख्यशिश्वीति भाषायाम् ४।१।६२ (५१७)

काशिकामतेन—सखी, अशिश्वी इत्येतौ शब्दौ ङीषन्तौ भाषायां निपात्येते । तत्र 'भाषायाम्' इति निर्देशात् 'सखा, शिशुः' इत्येतौ शब्दौ वेदे एव प्रयुज्येते इत्यभिप्रायः ।

न्यासकारस्तु काशिकामतमङ्गीकरोति । परं पदमञ्जरीकारः शङ्कामुद्भावयति यद्—"भाषायामित्युच्यते तत्रैतन्न सिध्यति - सखी सप्तपदी भव, आ धेनवो धुनयन्तामशिश्वीः" इति । इमां शङ्कामुद्भाव्य हरदत्तोऽग्रे समादधाति - "नैष दोषः, इतिकरणोऽत्र क्रियते । स भिन्नक्रमो भाषायामित्यस्यानन्तरं द्रष्टव्यः । स च प्रकारे वर्तते । तेन छन्दस्यपि क्वचिद् भवति । भाषाग्रहणं तु नित्यार्थम्" इति ।

रूपावतारप्रक्रियाकौमुदीभाषावृत्त्यादिषु काशिकाभिमतमेव व्याख्यानम् । न तत्र वैदिकप्रयोगसाधनार्थं कोऽपि यत्न आस्थितः । परं व्याकरणमिताक्षरायां सिद्धान्तकौमुद्या च पदमञ्जरीकार एवानुसृतः । तेन ग्रन्थद्वयेऽपि हरदत्तस्य प्रभावः प्रतीयते । परं हरदत्तस्य नामनिर्देशो ग्रन्थकाराभ्यां न कृतः ।

कुलटाया वा ४।१।१२७

काशिकायामत्र—"कुलान्यटतीति कुलटा, पररूपं निपातनाद्" इति व्याख्यानम् । महाभाष्ये सूत्रस्यानुपलब्धिः । पदमञ्जरीकारोऽपि "पररूपं निपातनाद्" इत्यस्य व्याख्यां न निबद्ध्नाति । न्यासे तु—"कुलटाया वा' कुलान्यटतीति कुलटा, नन्वकः सवर्णे दीर्घत्वे कृते कुलाटेति भवितव्यम् इत्यत आह—पररूपमिति" । अतो न्यासः काशिकोक्तमेव समर्थयति । सिद्धान्तकौमुद्यामपि तादृशं व्याख्यानं नोपलभ्यते । परं विचित्रमेतत् यत् काशिकायां पुनः "एङि पररूपम्" (६।१।९४) इत्यत्र—"शकन्ध्वादिषु पररूपं वक्तव्यम्" इत्यघस्तात् 'शकन्धुः, कुलटा' इति प्रगोगद्वयं विद्यते । तदेव च समीचीनम्, महाभाष्ये सिद्धान्तकौमुद्यामपि तथैव विद्यमानत्वात् । अतः ४।१।१२७ सूत्रस्थं काशिकोक्तं व्याख्यानमसङ्गतम् ।

---

१. सुबोधिनीकारस्तु सिद्धान्तकौमुदीमतमेव पुष्णाति । द्र.—सि. कौ. (मोतीलालबनारसीदाससंस्करणम्), पृ. ३९३ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जनपदशब्दात् क्षत्त्रियादञ् ४।१।१६८ (११८६)

काशिकावृत्तौ—"क्षत्त्रियादिति किम् ? ब्राह्मणस्य पञ्चालस्यापत्यं पाञ्चालि,: वैदेहि:" इति विवरणम्। भट्टोजिदीक्षितेनास्मिन् विषये किमपि नोक्तम्। परं पदमञ्जरीकारमतेन काशिकाकृत व्याख्यानमसङ्गतम्। स कथयति—"ब्राह्मणस्य पञ्चालस्येति। वाह्वादिप्रभृतिषु येषां दर्शनम् इत्युक्तत्वात् कथमत्र प्रसङ्ग इति चिन्त्यम्" इति। हरदत्तस्यायमभिप्रायो यद् "वाह्वादिभ्यश्च" (४।१।९६) इति सूत्रे—"वाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोऽन्यत्र तेषां प्रतिषेध:" इति वार्त्तिकोक्तत्वात् 'पाञ्चालि:, वैदेहि:' इत्यत्र प्राप्तिरेव नास्ति। अत एव काशिकोक्तं प्रत्युदाहरणमसङ्गतम्।

पितृव्यमातुलनातामहपितामहाः ४।२।३६ (१२४३)

अस्य सूत्रस्य व्याख्याने काशिकायां सिद्धान्तकौमुद्यां च 'मातु: पिता, पितु: पिता' इति विग्रहे "मातृपितृभ्यां पितरि डामहच्" इत्यनेन वार्त्तिकेन डामहच्प्रत्यये, अनुबन्धलोपे, टिलोपे, स्वादिकार्ये सति 'मातामह:, पितामह:' इति रूपद्वयं जायते। परं भाष्येऽत्र रूपसिद्धे: प्रकारान्तरमपि प्रतिपादितम्। तत्र हि प्रयोगनिष्पादने मार्ग-द्वयम्। प्रथममार्गेण[1] 'मातामह:, पितामह:' इति प्रयोगद्वयसिद्धये डामहच्प्रत्ययो निपात्यते। द्वितीयमार्गेण[2] तु यत्र छन्दसि अवग्रहो दृश्यते तत्र 'मातृ, पितृ' इत्येताभ्यां शब्दाभ्यां महच् (महन्) प्रत्ययो भवति, प्रकृतेरन्त्यस्य स्वरस्य स्थाने आनङादेशश्च निपातनाज्जायते। एतदेव च समीचीनं प्रतिभाति। व्याकरणमिताक्षरायां तु आनङादेशस्य महच्प्रत्ययस्य च विधानम्।

अत्र सिद्धान्तकौमुद्यां काशिकाया: प्रभाव:,[3] अन्यथा महाभाष्यवद् मतद्वयमपि प्रयोगसाधनार्थं कौमुदीकार उपाददीत।

सर्वत्राण्च तलोपश्च ४।३।२२ (१३९०)

एतत्सूत्रव्याख्याने काशिकायां—हेमन्ते भवमित्यार्थे हैमन्तिकम्, हैमन्तम्,

---

१. म. भा. ४।२।३६: "मातामहपितामहेति किं निपात्यते ? मातृपितृभ्यां पितरि डामहच् (वा.)। मातृपितृभ्यां पितरि डामहच्प्रत्ययो निपात्यते। मातु: पिता महामह:। पितु: पिता पितामह:।"

२. *Ibid*, "महो वा छन्दस्यानङोऽवग्रहदर्शनात् (वा.)। महो वा पुनरेषु भविष्यति छन्दस्यानङोऽवग्रहदर्शनात्। छन्दस्यानङोऽवग्रहो दृश्यते। पितामह इति।"

३. त. बो. ४।२।२६: "डामहजिति। एतच्च वृत्त्याद्यनुरोधेनोक्तम्। भाष्ये तु आनङादेशो महच्प्रत्ययश्च निपात्यते। तेनावग्रह: सिध्यतीत्युक्तम्।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हैमनम् इत्यादीनि त्रीणि रूपाणि स्वीकृतानि । न तथा सिद्धान्तकौमुद्याम् । तत्र तु केवलं 'हैमन्तम्, हैमनम्' इति प्रयोगद्वयस्यैव पाठः; अर्थात् हेमन्ते भवमिति विग्रहे "सर्वत्राण्च—" (४।३।२२) इत्यणि, तलोपे, आदिवृद्धौ, विभक्तिकार्ये हैमनम् इति । अत्र "यस्येति च" (६।४।१४८) इति अकारलोपे सति तकारलोपो विभावनीयः । अल्लोपस्य च स्थानिवद्भावाद् "अन्" (६।४।१६७) इति अनः प्रकृतिभावात् टिलोपो न ।

ननु "सर्वत्राण् तलोपश्च" इत्येव सिद्धे प्रथमचकारो व्यर्थ इति चेन्न, चकारात् पक्षे "सन्धिवेला—" (४।३।१६) इत्यनेन ऋत्वर्थेऽणः प्रवृत्तेः । तस्मिन् पक्षे हैमन्तमिति प्रयोगः । इदमेव प्रयोगद्वयं सिद्धान्तकौमुदीकारेण प्रदर्शितम्, न तु हैमन्तिकमिति । यतो हि सिद्धान्तकौमुदीकारमतेन हैमन्तिकमिति प्रयोगः छन्दसि एव स्वीक्रियते ।[1] "हेमन्ताच्च" (४।३।२१) इति ठञ्ञः छान्दसत्वात्, न तु भाषायाम् । परं काशिकायां हैमन्तिकमिति प्रयोगो भाषायामपि स्वीकृतः । तथा हि काशिकागतं व्याख्यानम्—

"ननु च छन्दसीति नानुवर्तिष्यते ? सैवाननुवृत्तिः शब्देन (सर्वत्रग्रहणेन) आख्यायते, प्रयत्नाधिक्येन पूर्वसूत्रेऽपि सम्बन्धार्थम्—हैमन्तिकमिति भाषायामपि ठञ्ञं स्मरन्ति । अथाण्चेति चकारः किमर्थः ? अण्, यथाप्राप्तं च ऋत्वणिति । कः पुनरनयोरणोर्विशेषः ? ऋत्वणि हि तकारलोपो नास्ति—हैमन्ती पङ्क्तिरिति । तदेवं त्रीणि रूपाणि भवन्ति—हैमन्तिकम्, हैमन्तम्, हैमनमिति ।"

रूपावतारे प्रक्रियाकौमुद्यां च काशिकैवानुगता वर्तते ।

खलयवमाषतिलवृषब्रह्मणश्च ५।१।७ (१६६८)

अस्मिन् सूत्रे विद्यमानश्चकारः काशिकायां सिद्धान्तकौमुद्यां च – "अनुक्तसमुच्चयार्थत्वेन" व्याख्यातः । तस्मात्—रथाय हिता इत्यस्मिन्नर्थे रथशब्दाद् यत्प्रत्यये सति 'रथ्या' इति प्रयोगो व्युत्पाद्यते । परं न तथा महाभाष्ये व्याख्यानम् । तत्र तु "शरीरावयवाद्यत् (५।१।६) इत्यवस्ताद् "यत्प्रकरणे रथाच्च" इत्यनेन वार्त्तिकेन 'रथाय हिता रथ्या' इति संसाध्यते । तेन ग्रन्थद्वयस्य महाभाष्येण सह भेदः । काशिकायाश्च सिद्धान्तकौमुद्यां प्रभावोऽभिगम्यते ।

दण्डादिभ्यो यः ५।१।६६ (१७३१)

काशिकायामत्र यप्रत्ययो विधीयते । रूपावतारे, प्रसादे, व्याकरणमिताक्षरायां

---

१. तुलना—व्या. नि. ४।३।२२: "भाषायामपि ठञ् तेन हैमन्तिकमित्यपीति काशिका । तद् भगवदनभिमतम् । भगवता हि हेमनशब्दस्य हेमन्तपर्यायस्य प्रकृत्यन्तरत्वादुभाभ्यां ऋत्वणि हैमनं हैमन्तमिति भाषायामिष्टरूपद्वयसिद्धेः सूत्रमेतत् प्रत्याख्यातम् ।" अत्र प्रौ. म. अपि द्रष्टव्या ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चापि यप्रत्ययः स्वीकृतः। परं पदमञ्जर्यां सिद्धान्तकौमुद्यां च यत्प्रत्ययस्यानेन सूत्रेण विधानम्। सुस्पष्टयेऽधस्तात् पदमञ्जरीकारकृद्व्याख्यानं प्रस्तूयते, तथा हि—

"इह 'दण्डादिभ्यः' इत्येतावत्सूत्रम्, अनन्तरश्च यत्प्रत्ययो विधीयते। तथा च वध्यशब्दव्युत्पादनाय क्यप्विधावुक्तम्—"हनो वध च तद्धितो वा" इति, यदि चात्र यद्विधीयते तत एव तदुपपद्यते तद्धितो वेति। कथम्? क्यप्याद्युदात्तत्वम्, यत्यपि तद्धिते "यतोऽनावः" इत्याद्युदात्तत्वमेव। यदि त्वत्र यो विधीयेत ततः स्वरे विशेषादनुपपन्नमेतत्स्यात्। उत्तरसूत्रे (छन्दसि च ५।१।६७) चास्य यस्यैवानुवृत्तिः स्यात्, न यतः। अथापि स्वरितत्वाद् यत एवानुवृत्तिरुच्यते? एवमपि वृत्तिकारस्यैतद्वक्तुमापद्येत—"यदनुवर्तते नानन्तरो यः" इति। ये त्विभ-वध-मेघशब्दानां यदन्तानामाद्युदात्तानां छन्दसि प्रयोगाः—"इभ्यान्न राजा वनान्यत्ति, तस्मादपि वध्यं प्रपन्नं न प्रति प्र यच्छन्ति, अपां मेध्यं यज्ञियम्" इत्याद्याः, ते दण्डादिभ्यो यविधानेऽप्युपपद्यन्ते। कथम्? "दण्डादिभ्यो यः" इत्यस्यावकाशो भाषायाम्; "छन्दसि यत्" इत्यस्य तु दण्डादिभ्योऽन्योऽवकाशः; दण्डादिभ्यश्छन्दस्युभयप्रसङ्गे परत्वाद् यद् भविष्यति। तस्मादेते प्रयोगाः "दण्डादिभ्यो यद्विधीयते" इत्यत्रार्थे प्रमाणत्वेन नोपन्यसनीयाः" इति।

एतेन प्रमाणेनात्र यत्प्रत्यय एव स्वीकर्तव्यः, लोकवेदोभयत्रोपयोगित्वात्।

तदस्य ब्रह्मचर्यम् ५।१।९४ (१७५८)

काशिकायां वृत्तौ—"महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्य उपसंख्यानम्। महानामिकम्। गौदानिकम्। आदित्यव्रतिकम्। तच्चरतीति च। महानाम्न्य ऋचः, तत्सहचरितं व्रतं तच्छब्देनोच्यते। महानाम्नीश्चरति माहानामिकः। आदित्यव्रतिकः। गौदानिकः। भस्याढे इति पुंवद्भावेन ङीपि निवृत्ते नस्तद्धिते इति टिलोपः" इति व्याख्यानं समुपलभ्यते।[1] पदमञ्जरीकारमतेनाप्यत्र-"भस्याढे तद्धिते पुंवद्भावे ङीपि निवृत्ते टिलोपः" इति व्याख्यानम्। परं सिद्धान्तकौमुदीकारो नेदमनुमनुते। तस्यायमभिप्रायो यद् महानाम्नीशब्दस्य ऋग्विशेषेषु रूढस्य नित्यस्त्रीलिङ्गत्वाद् भाषितपुंस्कत्वाभावाद् "भस्याढे" इति पुंवत्त्व न प्रवर्तते। महाभाष्ये चात्र—'महानाम्नीनां ब्रह्मचर्यं माहानाम्निकम्" इत्युदाहरणदर्शनाद् नित्यस्त्रीलिङ्ग्येवायं शब्दः। अतोऽत्र भट्टोजिदीक्षितमते काशिकापदमञ्जरीकारयोर्महाभाष्यकारेण विरोधः।

ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्व—५।२।११४ (१९२१)

अत्र काशिकायाम्—ऊर्जोऽसुगागमो निपात्यते विनिवलचौ प्रत्ययौ। ऊर्जस्वी।

---

१. रूपावतारे प्रक्रियाकौमुद्यां चेदं न वर्तते। व्याकरणमिताक्षरायां प्रसादे च काशिकासंमतमेवादाहरणस्वरूपम्। तथा च पदमञ्जरीकारो 'महानाम्नी' इति शब्दं यौगिकत्वेनापि स्वीकरोति। सुस्पष्टये प्रौ. म., त. बो द्रष्टव्या।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऊर्जस्वलः" इत्यादिकं विवरणं संदृश्यते । तदसङ्गतम् । तथा हि 'ऊर्जस्' इति असुन्नन्तं प्रातिपदिकम् । तस्माद् मत्वर्थे "ज्योत्स्ना—" (५।४।११४) इत्यनेन निपातनाद् वलचि, विभक्तिकार्ये कृते 'ऊर्जस्वलः' इति रूपं सिद्धं भवति । सिद्धान्तकौमुदीकारः—"ऊर्जोऽसुगागम इति वृत्तिस्तु चिन्त्या" इति लिखति । तत्र विनाऽप्यसुगागमं 'ऊर्जस्वलः' इति साध्यते । रूपावतारे इदमनुपलब्धम् । प्रसादे व्याकरणमिताक्षरायां च काशिकानुसारी पाठः । यद्यत्र काशिकामतेन 'ऊर्ज' इति प्रातिपदिकं स्वीक्रियेत, तदापि तत्प्रदर्शिते एव सूत्रस्वरूपे दोषः प्रसज्येत । एवं हि सिद्धान्तकौमुदीप्रमाणेन 'ऊर्जोऽसुगागम' इति अग्राह्य एवेति दिक् ।

पर्वमरुद्भ्यां तन् वक्तव्यः ५।२।११२ वा. (१९२८)

ग्रन्थद्वये एतद्वार्त्तिकविहितप्रत्ययस्वरूपे भेदः । तत्र काशिकामतेन तन्प्रत्यये सति, सिद्धान्तकौमुदीमतेन च तप्प्रत्यये सति 'पर्वतः, मरुत्तः' इत्येतौ प्रयोगौ निष्पाद्येते । पदमञ्जरीकारो लघुशब्देन्दुकारश्च तन्प्रत्ययविधानमेव समर्थयतः । परं सिद्धान्तकौमुदीकारो न तदङ्गीकरोति । स पित्त्वमनुदात्तत्वार्थमिति स्वीकरोति । तन् इति आद्युदात्तत्वार्थो नकार इति चिन्त्यमाह सः । मरुत्तशब्दस्य मध्योदात्तत्वात् (मरुत्तः) । तथा हि—"मृग्रोरुतिः" (उणा. ९४) इति उतिप्रत्ययान्तो मरुत्शब्दोऽन्तोदात्तः (मरुत्) । तनि तु नित्स्वरेण आद्युदात्तः स्यात् । अतः सिद्धान्तकौमुदीकार आद्युदात्तमनिष्टं मनुते ।

"मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे" (ऐ. ब्रा. ८।२१।१४) इति ऐतरेयब्राह्मणे तु मरुत्तशब्दः स्वरांशे उदासीनः । ऐतरेयब्राह्मणे स्वरपाठस्याविद्यमातत्वात् । एकश्रुतिरेव तत्राभिप्रेता । तत्कथमभिमतस्वरावधारणं कर्तव्यमिति प्रश्नः । अभिमतस्वरावधारणं तु "प्रादय उपसर्गाः क्रियायोगे" (१।४।५८-५९) इत्यत्र महाभाष्यप्रमाणेन कर्तुं शक्यते । महाभाष्ये उपसर्गसंज्ञाप्रसङ्गे मरुच्छब्दस्योपसंख्यानमपि क्रियते । तत्र यद्यपि अधिकारबलाद् निपातसंज्ञा प्राप्ता, तथापि सा नेष्यते । स्वीकृतायां तस्यां "निपाता आद्युदात्ताः" (फि. सू. ८०) इत्यनेन 'मरुत्' इत्यत्रापि स्वरः स्यात् । स च मरुत्तशब्देऽपि श्रूयेत । "तृतीया कर्मणि" (६।२।४८) इति पूर्वपदप्रकृतिस्वरात् । किं च निपातत्वे सति अव्ययत्वं स्यात् । अनेन भाष्यग्रन्थेन मरुत्तशब्दस्य आद्युदात्तत्वं नाभिप्रेतमिति स्पष्टमेव ।[1]

पञ्चम्यास्तसिल् ५।३।७ (१९५३)

काशिकायां—"पञ्चम्यन्तेभ्यः किंसर्वनामबहुभ्यस्तसिल् प्रत्ययो भवति । कुतः । यतः । ततः । बहुतः" इति व्याख्यानम् । भट्टोजिदीक्षितस्तु—"पञ्चम्यन्तेभ्यः

१. विस्तरेण द्र.—प्रौ. म., भागः २, पृ. २५५-२५६ ; लघु. शेखरः, भागः २, पृ. ३५५ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किमादिभ्यस्तसिल् वा स्यात्" इति प्रकारेण सूत्रं व्याचष्टे। अत्र 'वा स्याद्' इत्यस्य टीकायां वालमनोरमाकारो लिखति—"वा स्यादिति। 'समर्थानाम्'—(४।१।८२) इत्यतो वाग्रहणस्यानुवृत्तेरिति भावः" इति।

ननु "समर्थानां प्रथमाद् वा" (४।१।८२) इत्यतः 'समर्थानाम्, प्रथमात्, वा' इति पदत्रयं "प्राग्दिशो विभक्तिः" (५।३।१) इति सूत्रपर्यन्तमधिक्रियते, न च 'वा' इत्यनुवर्तनं "प्राग्दिशो विभक्तिः" (५।३।१) इत्यतोऽग्रे सम्भवति, तत्कथमत्र सिद्धान्तकौमुद्यां 'वा' इति पदमनुवर्तते। यतो हि काशिकायामपि 'प्राग्दिशो विभक्तिः" (५।३।१) इत्यस्य व्याख्याने प्रतिपादितं यद्—"अतः परं स्वार्थिकाः प्रत्ययाः, तेषु समर्थाधिकारः प्रथमग्रहणं च प्रतियोग्यपेक्षत्वान्नोपयुज्यते इति द्वयमपि निवृत्तम्। वा वचनं तु वर्तते एव, तेन विकल्पेन तसिलादयो भवन्ति—कुतः, कस्मात्। कुत्र, कस्मिन्" इति। एवमेव काशिकायां "समर्थानां प्रथमाद् वा" (४।१।८२) इत्यत्रापि कथितम्—"स्वार्थिकेषु ह्यस्योपयोगो नास्ति, विकल्पोऽपि तत्रानवस्थितः। केचिन्नित्यमेव भवन्ति" इति। अत्र च 'तत्रानवस्थितः' इत्यस्य व्याख्याने न्यासकारः कथयति—"अनियत इत्यर्थः" इति। अतो नास्ति ग्रन्थद्वये कोऽपि भेदः। यद्यपि काशिकावृत्तौ ५।३।७ इत्यत्र 'वा' इत्यस्य स्पष्टरूपेणोल्लेखो न कृतस्तथापि 'अनवस्थितः' इति शब्देन प्रयोगानुरोधेन 'वा' इति शब्दस्यानुवृत्तिः सूचिता। तेन न कोऽपि फले भेद इति दिक्।

अधुना ५।३।१७ (१९६६)

काशिकायाम्—"अधुनेति निपात्यते। इदमोऽश्भावो धुना च प्रत्ययः। अस्मिन् काले अधुना" इति व्याख्यानम्।

महाभाष्ये सूत्रमिदं द्विधा व्याख्यातम्। तद्यथा—"अधुनेति किं निपात्यते। इदमोऽश्भावो धुना च प्रत्ययः। इदमो वा लोपोऽधुना च प्रत्ययः" इति।

अत्र पदमञ्जरीकारेण प्रथमं काशिकाप्रतिपादितं सूत्रार्थं व्याख्याय तदनन्तरं भाष्यनिर्दिष्टं यद् व्याख्यानं प्रस्तुतं तत्र अधुनाप्रत्ययस्यैव निर्देशः कृतः। तथा हि—"भाष्ये त्वधुनाप्रत्यय आश्रितः, तत्रेदम अशो यस्येति लोपः, निपातनाच्च मध्योदात्तत्वम्" इति।

रूपावतारे प्रक्रियाकौमुद्यां च कस्यापि प्रत्ययस्य स्पष्टरूपेणोल्लेखो न कृतः। प्रसादटीकायां धुनाप्रत्ययस्यैव विधानम्। व्याकरणमिताक्षरायां महाभाष्यव्याख्यावद् द्विधा सूत्रार्थप्रतिपादनम्।

सिद्धान्तकौमुदीकारेण तु पदमञ्जरीकारसम्मतं व्याख्यानमेवानुगतम्। तथा हि—"इदमः सप्तम्यन्तात् कालवाचिनः स्वार्थे अधुनाप्रत्ययः स्याद्" इति। मत्कृतं सूत्रव्याख्यानमेव महाभाष्यपुरस्सरमिति भट्टोजिदीक्षितः स्वयमेव प्रौढमनोरमायां वदति। तत्र हि—"अधुनाप्रत्यय इति। निपातनान्मध्योदात्तोऽयम्। भाष्यमतं चेदम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृत्तिकारस्त्वाह—इदमोऽश्भावः, धुना च प्रत्ययः" इति । तत्त्वबोधिनीबालमनोरमाभ्यामपि सिद्धान्तकौमुदीकारस्यैव व्याख्यानं समर्थितम् ।

तथा हि—"वृत्तिकारस्त्वाह—इदमोऽश्भावः, धुना च प्रत्ययः" इति भट्टोजिदीक्षितकृतनिर्देशेन ज्ञायते यत् काशिकायां धुनाप्रत्ययस्यैव विधानमासीत्, न तु कदाचिद् अधुनाप्रत्ययस्य । तस्मादेतेन प्रमाणेन श्रीशोभितमिश्रसंपादितायां काशिकायां प्रदत्तं 'अधुना' इति प्रत्ययपूर्वकं व्याख्यानमसङ्गतं प्रतिभाति ।

यद्यपि महाभाष्ये एतत्सूत्रं द्विधा व्याख्यातम्, परं कैयटनागेशयोरत्र व्याख्यानाभावाद् 'अधुना, धुना' इति प्रत्ययद्वये कः प्रत्ययः सिद्धान्तिसम्मत इति निर्णेतुं न शक्यते ।

शाखादिभ्यो यत् ५।३।१०३ (२०५८)

काशिकायामत्र यत्प्रत्ययो विधीयते । रूपावतारे हि सूत्रस्यादर्शनम् । व्याकरणमिताक्षरायां च यप्रत्ययः, प्रसादे च यत्प्रत्ययः स्वीकृतः । सिद्धान्तकौमुद्यामस्य सूत्रस्य विवरणं नोपलभ्यते । परं बालमनोरमायामुक्तम्—"यद् इति त्वपपाठः । तैत्तिरीये मुख्यो भवति इत्यादौ मुख्यशब्दस्य आद्युदात्तत्वदर्शनात्, उगवादिसूत्रभाष्यविरुद्धत्वाच्च" इति ।

वस्तुतस्तु उगवादिसूत्रे यत्प्रत्ययलाभाय नाभिशब्दः शाखादिषु पठितव्य इति भाष्यस्याशयेन "शाखादिभ्यो यत्" इत्येव पाठो भाष्यसम्मतः । अयमेवाभिप्रायो नागेशेनापि उद्द्योते प्रकटीकृतः—"शाखादिभ्यो यः" इति पाठस्तु असाम्प्रदायक इति भावः" इति । तस्माद् बालमनोरमाकारोक्तमेव प्रत्युक्तम् ।

दाश्वान् साह्वान् मीढ्वांश्च ६।१।१२ (३६२९)

अत्र "मीढ्वान्' इति प्रयोगं व्युत्पादयितुं काशिकायामुक्तम्—मिह् सेचने इत्येतस्माद् द्वित्वम्, अनिट्त्वम्, उपधादीर्घत्वं, ढत्वं च निपातनाद्" इति ।[1]

सिद्धान्तकौमुद्यामस्य प्रक्रियाव्युत्पादकं व्याख्यानं न दृश्यते । तत्र तु—"एते क्वस्वन्ता निपात्यन्ते" इत्येव व्याख्यानम् । परं काशिकायां निपातनाद् यत् ढत्वं प्रदर्शितं तदयुक्तम् । यतो हि पदान्ततया "हो ढः" (८।२।३०) इत्यनेनैव ढत्वस्य सुवचत्वात् । अत एव लघुशब्देन्दुशेखरेऽपि निपातनात् ढत्वं नाश्रितम् ।[2]

पद्दन्नोमास्—६।१।६३ (२२८)

पाददन्तनासिकादीनां शसादौ पदादय आदेशा भवन्ति वा—इति सूत्रार्थः ।

---

१. न्यासेऽपि ८।३।१ : सूत्रे काशिकानुसारि व्युत्पादनम् ।

२. लघु. शेखरः ६।१।१२: "मिह् सेचने इत्यस्मात् क्वसावद्वित्वमनिट्त्वं च निपात्यते ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परं काशिकायामत्र आसनशब्दस्य स्थाने आसन्आदेशो व्याख्यातः, स न पदमञ्जरीकारसंमतः। सिद्धान्तकौमुदीकारोऽपि तन्न स्वीकरोति।[1] वैदिकवाङ्मये सायणादिभाष्यकारैरपि आस्यशब्दस्य स्थाने आसन्नादेशः स्वीकृतः। स यथा—

(१) ऋ १।११६।१४: आस्नो वृकस्य वर्तिकामभीके।
सायणाचार्यः—आस्नः। पद्दन्—इत्यादिना आस्यस्य आसन्नादेशः।

(२) ऋ. ४।४०।४: ग्रीवायां बद्धो अपिकक्ष आसनि।
सायणाचार्यः—ग्रीवायां गरणसाधनायां कण्ठे बद्धः अपिकक्षे कक्षाप्रदेशे आसनि आस्ये च बद्धः।

(३) बृह. उप. १।३।७: आसन्यं प्राणमूचुः।
शंकराचार्यः—आसन्यमास्ये भवमासन्यं मुखान्तर्बिलस्थं प्राणमूचुः…।

अस्मिन्नेव सूत्रे काशिकायां—"केचिदत्र छन्दसीत्यनुवर्तयन्ति। अपरे पुनर्विशेषेणेच्छन्ति। तथा हि—भाषायामपि पदादयः शब्दाः प्रयुज्यन्ते। व्यायामक्षुण्णगात्रस्य पद्भ्याम्…इत्येवमादयः। अन्यतरस्यामित्येतदनुवर्तयन्ति, तेन पादादयोऽपि प्रयुज्यन्ते" इत्यपि व्याख्यानम्। सिद्धान्तकौमुद्यां तु "शीर्षन् छन्दसि" (६।१।६०) इत्यतः 'छन्दसि' इत्यनुवर्तनं केषाञ्चिदभिप्रेतं न स्वीकृतम्। प्रत्युत सिद्धान्तकौमुद्या कैयटमतमनुसृत्य लोकेऽपि पदादिप्रयोगाणां स्थितिः स्वीकृता। तथा हि (सि. कौ. ३१७)—"पद्दन्—(६।१।६३) इत्यत्र हि 'छन्दसि' इत्यनुवर्तितं वृत्तौ, तथापि "अपो भिः" (७।४।४८) इत्यत्र "मासश्छन्दसि" इति वार्त्तिके छन्दोग्रहणसामर्थ्याल्लोकेऽपि क्वचिद् इति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यम्" इति। अपि च सिद्धान्तकौमुद्यामत्र पूर्वसूत्रात् (६।१।५९) 'अन्यतरस्याम्' इत्यपि नानुवर्तते। तस्मात् सिद्धान्तकौमुदीमतेन पादादयो न प्रयुज्यन्ते।

अमि पूर्वः ६।१।१०७ (१६४)

काशिकायाम् "अकः सवर्णे दीर्घः" (६।१।१०) इत्यतोऽक इत्यनुवृत्य—"अमि परतोऽकः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति" इति सूत्रार्थः प्रतिपादितः। एष एवार्थो रूपावतारादिषूपलभ्यते। परमनेन प्रकारेण वृक्ष+अम्, राम+अम् इत्यादिषु प्रयोगेषु अमो मकारसहितस्य पूर्वरूपैकादेशे कृते सति इष्टरूपानुपलब्धिर्भवति। अत एव सिद्धान्तकौमुदीकारोऽत्र "इको यणचि" (६।१।७७) इत्यतोऽचीत्यस्याप्यनुवर्तनं स्वीकरोति।[2] तद्यथा—"अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्याद्" इति।

---

१. सि. कौ. २२८: "यत्तु आसनशब्दस्यासन्नादेश इति काशिकायामुक्तं तत्प्रामादिकम्।"
अत्र सुस्पष्टये प्रौ. म., भागः १, पृ. ३५५-३५६ द्रष्टव्या।

२. सुस्पष्टये द्र.—बा. मनो. ६।१।१०७; प्रौ. म., भागः १, पृ. २२०।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद्यप्यत्र काशिकाव्याख्यानेनापि "तस्मादित्युत्तरस्य" (१।१।६७), "आदेः परस्य" (१।१।५४) इति सूत्रद्वयसहकारेण "एकः पूर्वपरयोः" (६।१।७५) इत्यस्य च अधिकारेण अमोऽकारस्यैव पूर्वरूपमेकादेशः सम्भवति, तथापि भट्टोजिदीक्षितमतेन अचीत्यनुवर्तमाने प्रक्रियालाघवम् ।[१] किञ्च अक इत्यस्य पञ्चमीषष्ठीपरं व्याख्यानमपि गौरवत्वाद् हेयमेवाभाति ।

तसिलादिष्वाकृत्वसुचः ६।३।३५ (८३६)

काशिकायां वृत्तौ—"कल्पब्देश्यदेशीयरः ।···तिल्तातिलौ" इति पाठः ।[२] महाभाष्यदिशा अयं पाठोऽसम्मतः । भाष्ये हि—"कल्पब्देशीयरौ ।···तिल्ध्यनौ" इत्येव पाठात् । अत एव पदमञ्जरीकारो वदति—"देश्यप्रत्ययस्य नास्ति पाठः ।···तातिलो नास्ति पाठः" इति ।

प्रक्रियाकौमुद्यां, प्रसादे, व्याकरणमिताक्षरायां च काशिकानुसारी; सिद्धान्तकौमुद्यां च महाभाष्यनुसारी पाठ उपलभ्यते । न्यासेऽपि थ्यन्प्रत्ययान्तस्यैवोदाहरणात् तिल्तातिलोः पाठो न्यासकृतोऽज्ञातः । तस्माद् महाभाष्यसम्मत एव पाठः श्रेयान् ।

उगितश्च ६।३।४५ (९८७)

"उगितश्च परस्या नद्या घादिषु अन्यतरस्यां ह्रस्वो भवति । श्रेयसितरा, श्रेयसीतरा, श्रेयस्तरा । विदुषितरा, विदुषीतरा, विद्वत्तरा । पुंवद्भावोऽप्यत्र पक्षे वक्तव्यः । प्रकर्षप्रयोगात्प्राक् स्त्रीत्वस्याविवक्षितत्वाद् वा सिद्धम्" इति काशिकागतं सूत्रव्याख्यानम् ।[३] भाषावृत्तिव्याकरणमिताक्षरादिष्वप्येतादृशमेव व्याख्यानम् । परं रूपावतारे 'श्रेयस्तरा, विद्वत्तरा' इति प्रयोगौ नोपलभ्येते । तद् ग्रन्थकारस्य मतिविभ्रम एव ।[४]

---

१. रूपावतारकारेणात्र "अर्थवद्ग्रहणे अनर्थकस्य ग्रहणं न भवति" इति परिभाषा स्वीकृता । तेनात्र अम्प्रत्याहारस्य ग्रहणं न भवतीति ज्ञायते ।

२ अत्र काशिकापाठे चान्द्रसूत्रस्य प्रभावोऽपि वक्तुं शक्यते । यथा हि तत्र सूत्रस्वरूपम्—"त्रतस्तरतमचरट्कल्पब्देश्यरूपप्पाशप्शस्थ्यनक्यङ्मानिषु" चा. व्या. ५।२।३१.

३. काशिकाप्रदत्तं व्याख्यानं चान्द्रव्याकरणसंमतम् । द्र.-चा. व्या ५।२।४४.

४. काशिकागतं—"पुंवद्भावोऽप्यत्र पक्षे वक्तव्यः" इति वचनं महाभाष्ये नोपलभ्यते (द्र.—प. म. ६।३।४५) । एवमेव काशिकाप्रदत्तवक्तव्यस्यानुपलभ्यमानाद् रूपावतारे 'विद्वत्तरा, श्रेयस्तरा' इति प्रयोगद्वयं नोपन्यस्यस्तमिति कारणं सम्भाव्यते । बा. म. ६।३।४५:—"विद्वच्छ्रेयसोः पुंवत्वं न वक्तव्यमिति वृत्तिः । परन्तु वचनमिदं भाष्येऽदृष्टत्वादुपेक्ष्यम्" इति उल्लेखः । परं साम्प्रतं काशिकादिषु बालमनोरमाप्रदर्शितमतं नोपलभ्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिद्धान्तकौमुदीकारस्तु 'श्रेयसीतरा, विदुषीतरा' इत्यादिदीर्घान्तङीब्विशिष्टानि रूपाणि निर्मूलानि[1] इति प्रतिपादयति। तन्मते "तसिलादिष्वाकृत्वसुचः" (६।३।३५) इत्यनेन पुंवद्भावाद् 'विद्वत्तरा' इत्येव भवितव्यम्, न तु 'विदुषीतरा' इति। न हि स्वयमप्रवर्तमानोऽपि ह्रस्वः पुंवत्त्वं बाधितुं शक्नोति।

विश्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ६।३।९२ (४१८)

अत्र सूत्रार्थकरणे काशिकायां 'वप्रत्यये', सिद्धान्तकौमुद्यां च 'अप्रत्यये' इति पाठः स्वीकृतः। स यथा—

काशिकायाम्—"विश्वक्, देव इत्येतयोः सर्वनाम्नश्च टेरद्रीत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्ते उत्तरपदे। विष्वगञ्चतीति विष्वद्र्यङ्…।"

सिद्धान्तकौमुद्याम्—"अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययान्ते अञ्चतौ परे।" इति।

एवं स्थितेऽपि उदाहरणप्रत्युदाहरणसिद्धौ नास्ति कोऽपि भेदः। यतो हि 'अप्रत्यये' इति शब्दो नित्यमश्रूयमाणत्वाद् अविद्यमानः प्रत्यय इति व्याख्यानेन क्विवादीनेव लक्षयति, 'वप्रत्यये' इति पाठोऽपि क्विवादिषु वकारसत्त्वात् तानेवाश्रयति। अत एव तत्त्वबोधिनीकारो वदति—"अप्रत्ययान्तेऽञ्चताविति। अविद्यमानः प्रत्ययोऽप्रत्ययः, क्विन्क्विबादिः। अञ्चतौ वप्रत्यये इति पाठे तु—वप्रत्ययान्तेऽञ्चतौ इति व्याख्येयम्" इति।[2]

अत्र रूपावतारे काशिकासंमतं व्याख्यानम्। प्रक्रियाकौमुद्यां सूत्रपाठाभावाद् व्याख्यानस्याप्यभावः। व्याकरणमिताक्षरायां तु—"अप्रत्ययेऽञ्चतौ परे" इत्येव सिद्धान्तकौमुदीसदृशं व्याख्यानं समुपलभ्यते।

छन्दस्युभयथा ६।४।५ (३५४०)

काशिकायां—"छन्दसि विषये तिसृचतस्रोर्नामि परत उभयथा दृश्यते, दीर्घश्चादीर्घश्च। तिसृणां मध्यंदिने, तिसृणां मध्यंदिने। चतसृणां मध्यंदिने, चतसृणां मध्यंदिने" इति सूत्रव्याख्यानम्।

---

१. सि. कौ. ९८७: "वृत्त्यादिषु विदुषीतरा इत्यप्युदाहृतम् तन्निर्मूलम्।"

२. तुलना—लघु. शेखरः, भागः १, पृ. ४७७, सू. ६।३।९२ : "सामर्थ्यादुपसर्जने प्रवृत्तिः। अप्रत्यय इति पाठेऽविद्यमानः प्रत्ययः क्विबादिरित्यर्थः। वप्रत्यय इति पाठेऽप्यकारस्याविवक्षितत्वात्स एवार्थः। अद्र्यादेशसध्र्यादेशावन्तोदात्तौ निपातनादिति भाष्ये।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत्र पूर्वसूत्राद् (६।४।३) 'नामि' इत्यनुवर्तते। तथा चास्मिन्नेव सूत्रे 'उभयथा' इति निर्देशाद् विकल्पोऽपि जायते। काशिकायां "न तिसृचतसृ" (६।४।४) इत्यस्मात् 'तिसृचतसृ' इत्यस्याप्यनुवृत्तिः। तेन— छन्दसि विषये तिसृचतस्रोर्नामि परत विकल्पेन दीर्घो भवतीति काशिकाभिमतम्।

परं सिद्धान्तकौमुदीकारमतेन 'तिसृचतसृ' इत्यस्यानुवर्तनं सर्वथा असङ्गतम्, अविशेषेणैव विकल्पदर्शनात्। तथा च "धाता धातॄणाम्" इति मन्त्रे तैत्तिरीयैर्ह्रस्वः पठ्यते। बह्वृचैस्तु दीर्घ इति भट्टोजिदीक्षितस्याभिप्रायः।[1] तस्मात् 'तिसृचतसृ' इत्यस्यानुवृत्तिर्न स्वीकरणीया।

नृ च ६।४।६ (२८३)

अत्र काशिकायां—"नृ इत्येतस्य नामि परे उभयथा भवति" इत्यर्थः। 'त्वं नृणां नृपते, त्वं नृणां नृपते' इत्युदाहरणम्। परमेतदग्रे काशिकायां मतान्तरमपि दृश्यते। तद्यथा—"केचिदत्र छन्दसीति नानुवर्तयन्ति। तेन भाषायामपि विकल्पो भवति" इति। अनेन ज्ञायते यत् काशिकाकालेऽप्यस्य सूत्रस्य व्याख्याने मतभेद आसीत्। परं येषां मतेन ६।४।५ इत्यस्मात् केवलं 'उभयथा' इत्यस्यैवानुवृत्तिर्वर्तते तेषां मतेन भाषायामपि विकल्पो भवति। एतदेवाधिकृत्योत्तरवर्तिरूपावतारप्रक्रियाकौमुदीव्याकरण-मिताक्षरासिद्धान्तकौमुद्यादिग्रन्थेषु ग्रन्थकाराः ६।४।५ इत्यतः 'छन्दसि' इति पदं नानुवर्तयन्ति। अनुमेवार्थं भट्टोजिदीक्षितः प्रौढमनोरमायां द्रढयति। यथा—"केचित्तु 'छन्दसि' इत्यनुवर्तयन्ति, तदयुक्तम्। पूर्वसूत्रेणैव (६।४।५) सिद्धेः "नृ च" (६।४।६) इति सूत्रस्य वैयर्थ्यापत्तेः" इति।

वस्तुतो यदि पूर्वसूत्रेण अविशेषेण सर्वेषां नामि दीर्घविकल्पविधानमङ्गीकृतं तर्हि "नृ च" (६।४।६) इत्यस्य भाषापरत्वमेवाङ्गीकर्त्तव्यमन्यथा तस्य वैयर्थ्यापत्तेः। परं पूर्वसूत्रे यदि तिसृचतसृशब्दयोरनुवृत्तिस्तर्हि नृशब्दस्य छन्दसि विकल्पविधानार्थं "नृ च" (६।४।६) इत्येतत्सूत्रं सार्थकं भवति। सिद्धान्तकौमुद्यां प्रथमं व्याख्यानं स्वीकृतम्। काशिकायां च द्वितीयम्।

ज्वरत्वरस्रिव्यविमवामुपधायाश्च[2] ६।४।२० (३६५४)

अत्र काशिकायां—"ज्वर, त्वर, स्रिवि, अव, मव इत्येतेषामङ्गानां वकारस्य उपधायाश्च स्थाने ऊडित्ययमादेशो भवति क्वौ परतोऽनुनासिके झलादौ च क्ङिति। जूः, जुरौ, जुरः।...ज्वरत्वरोरुपधा वकारात्परा, स्रिव्यवमवां पूर्वा" इति व्याख्यानम्।

---

१. द्र. प्रौ. म., भागः १, पृ. २९९।

२. श्रीशोभितमिश्रसम्पादितायां काशिकायां 'स्रिवि' इत्यस्य स्थाने 'श्रिवि' इति लेखः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रूपावतारे प्रक्रियाकौमुद्यां च सूत्रमिदं न व्याख्यातम् । भाषावृत्तौ तु—"क्वौ झलि क्ङिति" इत्यादिष्वेव वकारस्य उपधायाश्चोठ्विधानम्, न हि तत्र काशिकावद् 'अनुनासिके' इत्यस्य पूर्वसूत्रादनुवृत्तिः । व्याकरणमिताक्षरायामपि (६।४।१५ सूत्रात्) 'क्ङिति' इति नानुवर्तते ।

सिद्धान्तकौमुद्यां सर्वथा भिन्नमेव सूत्रार्थप्रतिपादनम् । यथा हि तत्—"ज्वरादीनामुपधावकारयोरूठ् स्यात् क्वौ झलादावनुनासिकादौ च प्रत्यये । अत्र क्ङिति नानुवर्तते । अवतेस्तुनि ओतुरिति दर्शनात् । अनुनासिकग्रहणं चानुवर्तते, अवतेर्मनिन्प्रत्यये तस्य टिलोपे ओम् इति दर्शनात् । ईडभावे ऊठि पिति गुणः । मामोति ··" इति ।

अत्र सिद्धान्तकौमुदीकारेण ज्वरादिषु किं स्थानमुपधात्वेन गृह्यते इत्यस्य काशिकानुसारि स्पष्टरूपेण प्रतिपादनं न कृतम् । तथा च न्यासकारमतेन काशिकायामयमभिप्रायः—"अलोऽन्त्यात्पूर्व उपधा" (१।१।६५) इत्यत्र अन्त्यात्पूर्वो वर्ण उपधासंज्ञकः, अन्त्यत्वं चापेक्षितम्, तद्यथा—श्रेयान्, श्रेयांसौ इत्यत्र सकारात् पूर्वे ये वर्णास्तेषामन्त्यो यो नकारस्तस्मात् पूर्वो वर्ण उपधा, तथा ज्वरादीनामपि यौ पूर्वौ वर्णौ तयोर्योऽन्त्यो वर्णस्तस्मात् पूर्व उपधा, सा च ज्वरादीनां संबन्धिनी, तदवयवत्वात् ततश्च तस्या अप्युपधाया ऊठा भवितव्यमिति कस्यचिद् भ्रान्तिः स्यात् । अतस्तां निराकर्तुं यस्या उपधाया ऊठा भवितव्यं तां दर्शयितुमाह—

ज्वरत्वरोरुपधा वकारात् परेत्यादि । यस्या उपधाया ऊठा भवितव्यम्, सा इह उपधाशब्देन विवक्षिता । किं पुनः कारणमस्या वृत्तिकारोपदर्शिताया उपधाया ऊठ् भवति, नान्यस्याः ? क्विझल्भ्यां क्ङिता चोपधाविशेषणात् । अत्र क्विप्प्रत्ययेन झलादिना क्ङिता चोपधा विशिष्यते—ज्वरादीनां योपधा क्वौ झलादौ च परतस्तस्या उपधाया ऊड् भवतीति । अत्र च—येन नाव्यवधानं तेन व्यवहितेऽपि इत्यादिना यत्रैकेन वर्णेन व्यवधानं वृत्तिकारेणोक्ताया उपधाया संभवति तस्या एवोड् भवति, नान्यस्याः' इति ।

काशिकायाम् 'अनुनासिके' उदाहरणं न प्रदर्शितम्, तथा च 'क्ङिति' इत्यस्यानुवृत्तिः प्रदर्शिता । सिद्धान्तकौमुदीकारमतेन 'ओतुः' इति तुन्प्रत्ययस्योदाहरणदर्शनात् 'क्ङिति' इत्यस्यानुवृत्तिर्न स्वीक्रियते ।[1]

ननु "अनुनासिकस्य क्विझलोः क्ङिति" (६।४।१५) इत्यस्मात् काशिकानुसारिणीं 'क्ङिति' इत्यनुवृत्तिं विना 'मूतः, जूतिः, तूर्तिः, स्नुतः, ऊतिः' इत्यादीनां

---

१. त. बो. ६।४।२०: "अत्र वृत्तौ झलादौ क्ङितीत्युक्तम्, क्ङितीत्येतद्रभसकृतमेवेत्याह क्ङितीति नानुवर्तते इति । अवतेस्तुनीति । "ज्वरत्वर-" इत्युपधावकारयोरूठि गुणे च कृते ओतुरिति सिध्यति, नान्यथा । तेन क्ङिति इति नानुवर्तनीयमिति भावः ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कथं सिद्धि इति चेन्न; 'क्त, क्तिन्' इत्यादिषु प्रत्ययेषु 'त, ति' इत्यवशिष्टेषु झलादिपरत्वादेव कार्यसिद्धिः, किं 'ङिति' इत्यनुवर्तनेन ।

राल्लोपः ६।४।२१ (२६५५)

अत्र काशिकायां वृत्तौ—"रेफादुत्तरयोश्छ्वोर्लोपो भवति क्वौ परतो झलादौ ङिति च परतः । मुर्छा मूः, मुरौ, मुरः । मूर्त्तः । मूर्त्तमान् । मूर्त्ति···। राल्लोपे सतुकस्य छस्याभावात् केवलो गृह्यते ।" इति सूत्रार्थप्रतिपादनम् ।

सिद्धान्तकौमुदीकारेणात्र 'अनुनासिकौ' इत्यप्यनुवर्तितम् । यथा चास्मिन् सूत्रे पूर्वसूत्रवत् (६।४।१९) 'ङिति' इति नानुवर्तते ।[1] परमनुनासिकादौ इत्यनुवर्तमानेऽपि सिद्धान्तकौमुद्यां तस्यैकमप्युदाहरणं नोपलभ्यते इति दिक् ।

एर्लिङि ६।४।६७ (२३७४)

"घुमास्थागापाजहातिसामङ्गानां लिङि परत एकारादेशो भवति । देयात ··। ङिदित्येव—दासीष्ट, धासीष्ट" इति काशिकायां सूत्रार्थः । सिद्धान्तकौमुद्यां च—"घुसंज्ञानां मास्थादीनां च एत्वं स्यादार्धधातुके किति लिङि" इत्यर्थः कृतः ।

अत्र काशिकायाम् "आर्धधातुके" (६।४।४३) इत्यधिकारबलाद् 'आर्धधातुके' इति गृह्यते । यद्यप्यार्धधातुकलिङः ङित्त्वाभावेन तदनुवृत्तिर्नावश्यकी, तथापि एकयोगनिर्दिष्टत्वात् केवलमकितोऽनुवृत्तेरसम्भवात् 'ङित्' इत्यस्याप्यनुवृत्तिः फलाभावेऽपि स्वीकृता ।[2]

सिद्धान्तकौमुद्यां च लक्ष्यसिद्ध्युपकारि 'किति' इत्येवानुवर्तितम् । एतदेव च बालमनोरमाकारादिभिः समर्थितम् ।

न भूसुधियोः ६।४।८५ (२७३)

"भू, सुधी इत्येनयोर्यणादेशो न भवति" इति काशिकायामर्थः । 'प्रतिभुवौ, प्रतिभुवः, सुधियौ, सुधियः' इत्यादीनि चोदाहरणानि । 'सुधीभिरुपास्यः=सुध्युपास्यः' इत्यत्र अनजादौ प्रत्यये परे यणः प्रसक्तिमवधार्य रूपावतारे—"भू, सुधी इत्येतयोः अजादौ सुपि प्रत्यये परतो यणादेशो न भवति" इत्यर्थः कृतः । तत्रायमभिप्रायो यदत्र

---

१. बा. म. ६।४।१: "अत्रापि ङिदतीति नानुवर्तते, पूर्वसूत्रे तदननुवृतेः ।"

२. एवमेव काशिकासिद्धान्तकौमुद्योः ६।४।६८ (२३७८), ६।४।१२० (२२६०), ६।४।१२२ (२३०१), ६।४।१२३ (२५३२), ६।४।१२४ (२३५६), ६।४।१२५ (२३५४), ७।४।२४ (२४५७) इत्यादिषु सूत्रेषु 'ङिति, किति' इत्यनुवृत्तिविषये परस्परं भेदः । अत्र सुस्पष्टये तत्वबोधिनीबालमनोरमादिग्रन्था द्रष्टव्याः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"इणो यण्" (६।४।८१) इत्यतो यणिति, "ग्रोः सुपि" (६।४।८३) इत्यतः सुपीति, "इको यणचि" (६।१।७७) इत्यतोऽचीति चानुवर्तते। परं प्रक्रियाकौमुद्यां व्याकरणमिताक्षरायां च—"एतयोरचि यण् न स्याद्" इत्येवार्थः स्वीकृतः। अस्मिन् ग्रन्थद्वये सुपीत्यस्य नानुवृत्तिः। "अनन्तरस्य विधिर्भवति प्रतिषेधो वा" इति न्यायेन "एरनेकाचः—" (६।४।८२), "ग्रोः सुपि" (६।४।८३) इति यण्द्वयस्यैव "न भूसुधियोः" (६।४।८५) इत्यनेन निषेधात्, 'सुधी+उपास्यः' इत्यत्र तु "इको यणचि" (६।१।७७) इत्यनेन यण् भवत्येवेति तेषामाशयः।

सिद्धान्तकौमुद्यां तु—"एतयोर्यण् न स्यादचि सुपि" इति व्याख्यानेन नामनिर्देशं विना रूपावतारस्यैव मतं स्वीकृतम्। परं बालमनोरमाकारोऽत्र सुपीत्यस्यानुवृत्तिं नानुमोदते।

यद्यपि सुपीत्यस्यानुवृत्त्यभावेऽपि नास्ति काचिद् हानिस्तथापि अनजादौ यणः प्रसक्त्यभावाद् अचीत्यस्य वस्तुस्थितिनिदर्शिका अनुवृत्तिरावश्यकी।

लोपो यि ६।४।११८ (२५००)

काशिकायां—"लोपो भवति जहातेर्यकारादौ ङिति सार्वधातुके परतः। जह्यात्" इति सूत्रव्याख्यानम्। रूपावतारेऽपि तथैव। परं प्रक्रियाकौमुद्यां व्याकरणमिताक्षरायां सिद्धान्तकौमुद्यां चात्र 'ङिति' इत्यस्य नानुवृत्तिः। सुस्पष्टये सिद्धान्तकौमुदीपाठः प्रस्तूयते—"जहातेरालोपः स्याद् यादौ सार्वधातुके" इति। न्यासपदमञ्जरीतत्त्वबोधिनीबालमनोरमादिषु 'ङिति' इत्यस्मिन् विषये कापि चर्चा न कृता। परं 'ङिति' इत्यस्यानुवृत्तेर्व्यावृत्तिपरं प्रयोजनं नोपलभ्यतेऽत्र, अतोऽननुवृत्तिरेव श्रेयसी।

अल्लोपोऽनः ६।४।१३४ (२३४)

काशिकावृत्तौ—"अन् इत्येवमन्तस्य भस्य अकारलोपो भवति। राज्ञः पश्य। राज्ञा। राज्ञे। तक्ष्णः पश्य। तक्ष्णा। तक्ष्णे। अनो नकारान्तस्यायं लोप इष्यते। इह न भवति—राजकीयम्" इति सूत्रार्थप्रतिपादनम्। रूपावतारे व्याकरणमिताक्षरायामपि काशिकासंमतमेव व्याख्यानम्। परन्त्वनेन व्याख्यानेन 'अनस्तक्षन् आ' इत्यत्र प्रथमो योऽनोऽकारस्तस्यापि लोपः प्रसज्येत। तेन 'नस्तक्षणा' इति रूपं स्यात्। अपि च यदि प्रक्रियाकौमुदीकारस्य—"अन्नन्तस्य भस्याङ्गस्याकारस्य लोपः स्याद्" इत्यर्थो गृह्यते तर्हि 'तक्षन् आ' इति दशायां तकारोत्तरवर्ती योऽकारस्तस्यापि लोपः स्याद्, अङ्गावयवत्वात्। एवमेव—"भस्याङ्गस्य अनोऽकारस्य लोपः" इति व्याख्यानेऽपि 'अनसा, मनसा' इत्यत्रातिव्याप्तिः।[1] अत एव सिद्धान्तकौमुदीकारः—"अङ्गावयवो सर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्याद्" इति प्रकारेण सूत्रं व्याचष्टे।

---

१. विस्तरेण द्र.— प्रौ. म., भागः १, पृ. २५६, सू. ६।४।१३४.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विभाषाङिश्योः ६।४।१३६ (२३७)

अत्र काशिकायां—"ङौ परतः शीशब्दे च अनो विभाषा अकारलोपो भवति" इत्यर्थः। यथा—'राज्ञि राजनि, साम्नि सामनि, साम्नी सामनी' इत्यादिषु रूपेषु। परं सिद्धान्तकौमुद्याम्—"अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः" इति सूत्रार्थः।

वस्तुतो ग्रन्थद्वयेऽपि नास्ति कोऽपि सूत्रार्थकरणे भेदः। परं काशिकापेक्षया सिद्धान्तकौमुद्यां बालबोधनाय सुस्पष्टोऽर्थः कृतः। काशिकायां सूत्रार्थसंक्षेपविधौ किं कारणम्, तदत्र विचार्यते। अत्र "अङ्गस्य" (६।४।१) इत्यस्य आ सप्तमाध्यायपरिसमाप्तेरधिकारः। "भस्य" (६।४।१२९) इत्यस्य आ षष्ठाध्यायस्य चतुर्थपादपरिसमाप्तेरधिकारः। "यचि भम्" (१।४।१८) इत्यनेन यदि भसंज्ञा संजायेत तदा तया सर्वनामस्थानसंज्ञाया अभावः। अतोऽत्र अङ्गस्य भस्य असर्वनामस्थानस्य चानुवृत्तेः सुस्पष्टतया नास्त्युल्लेखः काशिकायाम्। सिद्धान्तकौमुद्यां तु—"अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरः" इत्यादिपाठस्य अपरिहार्यत्वं वर्तते, यतस्तस्यां वृत्तिं विना प्रकरणज्ञानं न भवति। एवद्विना नास्त्यपरो विशेषः।

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ६।४।१४९ (४९९)

काशिकायां—"सूर्य, तिष्य, अगस्त्य, मत्स्य इत्येतेषां यकारस्य उपधाया भस्य लोपो भवति ईति परतस्तद्धिते च" इति सूत्रार्थः। रूपावतारे सूत्रमिदं न व्याख्यातम्। प्रक्रियाकौमुद्यां 'भस्य' इति नानुवर्तते, परं प्रसादटीकायामनुवृत्तेरुल्लेखः।[1] व्याकरणमिताक्षरायां काशिकासंमतं वचनम्।

सिद्धान्तकौमुदीकारस्तु—"अङ्गस्योपधाया यस्य लोपः स्यात् स चेद् यः सूर्याद्यवयः" इति सूत्रं व्याचष्टे। परं सिद्धान्तकौमुदीकारमतेऽपि "यचि भम्" (१।४।१९) इति नानुवर्तते।[2] एष एव भावः काशिकाया 'भस्य' इति पदस्य व्याख्याने न्यासकारेण द्योतितः। स यथा—"भस्येति। भसंज्ञकस्य। यो यकार उपधा तस्य लोपो भवति स चेद् यकारः सूर्यादीनां सम्बन्धी भवति—अयमत्रार्थो विवक्षितः। ते तु सूर्यादयो भत्वेन न विशिष्यन्ते। तेन यदापि तेषां भसंज्ञा न भवति तदापि

---

१. प्रसादः (प्र. कौ, भागः १, पृ. ३५१), सू. ६।४।१४९ः "आचार्यवर्यैस्तु 'भस्य' इत्यनुवर्तमानमप्युपेक्षितम्। विषयपरिगणनादत्र तस्यानुवृत्तेरनुपयोगात्। विषयपरिगणनं चात्र कर्तव्यमित्याह।"

२. त. बो. ६।४।१४९ : "अस्य भस्येत्यनुवर्तमानमपि न सम्बन्ध्यते। विषयपरिगणनेनैवातिप्रसङ्गनिवारणात्।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्योपधायकारस्य लोपो भवत्येव यद्यसौ यकारः. सूर्यादीनां सम्बन्धी भवति" इति। तस्माद् भस्येत्यस्याननुवृत्तिरेव श्रेयसी ।

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ७।१।३९ (३५६१)

अत्र काशिकायां—"न युष्मे वाजवन्धवः । अस्मे इन्द्रावृहस्पती। यूयं वयमिति प्राप्ते। यूयादेशः, वयादेशश्च छान्दसत्वान्न भवति" इति व्याख्यानम्। एतदेव व्याकरणमिताक्षरायामुपन्यस्तम् ।

परं पदमञ्जरीकारः प्रमाद एवायमिति मनुते । यतो हि सः—

"न युष्मे वाजवन्धवः (ऋ. ८।६८।१९) इत्यस्मिन् मन्त्रे ऋक्षाश्वमेधनाम्नो राज्ञो दानं स्तूयते, व्यत्ययेन द्वयोर्बहुवचनम्, वाजमित्यन्ननाम, अन्नप्रदानेन सर्वेषां वन्धवस्तेषां सम्बोधनं हे वाजबन्धवः। युष्मे युष्मासु अधीत्यस्यानेन सम्बन्धः, स च सप्तम्यर्थानुवादी । निनित्सुश्च निन्दनशीलोऽपि मर्त्यो युष्मासु अवद्यं न धारयति नावधारयति, अवद्यभावादित्यर्थः—अस्मे इन्द्रावृहस्पती (ऋ. ४।४९।४) इत्यत्रापि रयिं धत्तमिति क्रिया, दधातिश्च दानार्थः। तस्माद् युष्मासु अस्मभ्यमिति युक्तः पाठः। यूयादेश इत्याद्यपि न पठितव्यम्।" इति दिशा काशिकोक्तः पाठोऽसङ्गत इति वदति। सिद्धान्तकौमुद्यां तु पदमञ्जरीकारसंमतं वचनम्।[1] एवमेव सायणभाष्येऽपि "युष्मे-युष्मासु (ऋ. ८।६८।१९), अस्मे-अस्मभ्यम् (ऋ. ४।४९।४)" इत्यनेन पदमञ्जरीसम्मतमेव व्याख्यानमुपलभ्यते। अत एवार्थानुरोधेन सप्तमीवहुवचनस्थाने 'युष्मे', चतुर्थीवहुवचनस्थाने 'अस्मे' इत्येव वक्तुं युक्तम् ।

डॉ. रामगोपालमहाभागमतेन[2] 'अस्मे, युष्मे' इत्यादय ऋग्वेदे चतुर्थीवहुवचनबोधका सप्तमीवहुवचनबोधका वा सन्ति। कुत्रचिच्चैते षष्ठीवहुवचनार्थेऽपि प्रयुज्यन्ते ।

वा नपुंसकस्य ७।१।७९ (४४४)

काशिकायाम्—"अभ्यस्तादङ्गादुत्तरो यः शतृप्रत्ययस्तदन्तस्य नपुंसकस्य वा नुमागमो भवति। ददति, ददन्ति कुलानि···" इति व्याख्यानम्। परं प्रक्रियाकौमुद्यां सिद्धान्तकौमुद्यां च—"सर्वनामस्थाने परे" एवास्य सूत्रस्य प्रवृत्तिः स्वीकृता ।

यद्यपि काशिकायां 'सर्वनामस्थाने परे' इति नोक्तं तथापि पूर्वसूत्रेण प्राप्तस्यैव नुमो विकल्पविधानात् सर्वनामस्थाने परत एव नुमः प्राप्तेरनुक्तोऽप्ययमर्थः प्रकरणवशेन प्राप्यते। अतो "वा नपुंसकस्य" (७।१।७९) इत्यत्र—"अभ्यस्तादङ्गादुत्तरो यः शतृप्रत्ययस्तदन्तस्य क्लीवस्य नुमागमो विकल्पेन भवति सर्वनामस्थाने परे"

---

१. सि. कौ. ३५६१ : "युष्मासु अस्मभ्यमिति प्राप्ते शे।"

२. द्र.—रामगोपाल, वैदिकव्याकरण, भाग १, पृ. ३९३ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्येव काशिकाया अभिप्रायः। यत "उगिदचां सर्वनामस्थानेऽधातोः (७।१।७०), नाभ्यस्ताच्छतुः (७।१।७८), वा नपुंसकस्य" (७।१।७९) इति उत्तरोत्तरमपवादसूत्रम् अत प्रकरणानुगुणा एव व्याख्या काशिकाया अभिप्रेता। सिद्धान्तकौमुद्यां सुस्पष्टये एव 'सर्वनामस्थाने' इत्यस्योल्लेखः।

आमि सर्वनाम्नः सुट् ७।१।५२ (२१७)

काशिकायाम्—"आत् इति वर्तते। अवर्णान्तात् सर्वनाम्न उत्तरस्यामः सुडागमो भवति" इति सूत्रार्थः। 'सर्वेषाम्, विश्वेषाम्, येषाम्, तेषाम्, सर्वासाम्, यासाम्, आदित्येव—भवताम्' इत्यादीनि चोदाहरणानि।

प्रक्रियाकौमुद्यां व्याकरणमिताक्षरायां च काशिकानुसारि एव सूत्रार्थप्रतिपादनम्। परं रूपावतारे सूत्रार्थकरणे परिवर्तनं दृश्यते। तत्र हि—"अवर्णान्तात् सर्वनाम्नो विहितस्य अङ्गादुत्तरस्य आमः सुडागमो भवति" इति व्याख्यानम्।

अत्र काशिकाव्याख्याने 'दक्षिणोत्तरपूर्वाणाम्' इति प्रयोगे—अवर्णान्तात सर्वनाम्न उत्तरस्य आमः सत्त्वेन सुट्प्रसङ्गः।[1] न च "द्वन्द्वे च" (१।१।३१) इत्यनेन सर्वनामसंज्ञाया निषेधः। तत्र समुदायस्येव गृहीतत्वात्, न त्ववयवस्य। अतो 'दक्षिणोत्तरपूर्वाणाम्" इत्यत्र अवयवभूतस्य पूर्वशब्दस्य सर्वनामत्वेन सुटः प्रसङ्गः। तस्मादत्र सुटं वारयितुम्—"अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्याद्" इति विहितविशेषणयुक्त एव सूत्रार्थः सिद्धान्तकौमुद्यां प्रतिपादितः; यस्माद् दक्षिणोत्तपूर्वाणाम् विहितस्तस्य सर्वनामत्वाभावेन सुड् न भवति।

सिद्धान्तकौद्यामत्र सूत्रार्थकरणे रूपावतारस्य प्रभावः परिलक्ष्यते।

अष्टन आ विभक्तौ ७।२।८४ (३७१)

काशिकायाम्—"अष्टनो विभक्तौ परत आकारादेशो भवति" इत्यर्थो वर्तते। 'अष्टाभिः, अष्टाभ्यः, अष्टानाम्, अष्टासु' इत्यादीनि चोदाहरणानि। रूपावतरप्रक्रियाकौमुदी-व्याकरणमिताक्षरादयोऽपि काशिकाकृतमर्थं स्वीकुर्वन्ति। परं सिद्धान्तकौमुद्यां सर्वथा भिन्न एव सूत्रार्थः। तत्र ग्रन्थकारमतेन—"हलादौ विभक्तौ परे" एवास्य सूत्रस्य प्रवृत्तिः। सा च प्रवृत्तिः "रायो हलि" (७।२।८५) इत्युत्तरवर्तिसूत्रापदकृष्यते। तेन जश्शसोरनुबन्धलोपे सति अजादौ परे सूत्रमिदं न प्रवर्तते।

ननु च "हलादौ विभक्तौ परे" एवाकारान्तादेशश्चेत्तदा "अष्टाभ्य औश्" (७।१।२१) इत्यत्र—"कृताकाराद् अष्टनः परयोर्जश्शसोरौश् स्याद्" इति कथं सूत्रार्थः? तत्रेदं वचनम् "अष्टाभ्य औश्" (७।१।२१) इति वक्तव्ये कृतात्वनिर्देशो

---

१. द्र.—प्रौ. म., भागः १, पृ. २३३।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जश्शसोर्विषये आत्वं ज्ञापयति ।[1] यदि च भगवतः पाणिनेर्जश्शसोः परयोः अष्टन्शब्दस्यैव 'औश्' इत्यादेशोऽभीप्सितो भवेत् तदा तु "अष्टाभ्य औश्" (७।१।२१) इत्यस्य स्थाने 'अष्टभ्य' इत्येव पाठः सुपठो भवेत् । एतेनैवानुमीयते यदाचार्यः (७।१।२१) सूत्रे कृतादाकारादेव अष्टन्शब्दात् परयोर्जश्शसोरौशं विदधाति । तस्मात् ७।२।८४ सूत्रे "हलादौ विभक्तौ" इत्यपकृष्यमाणे न कश्चिद् दोषः सम्भवति ।

अपि च यदि ७।२।८४ सूत्रे "रायो हलि" (७।२।८५) इत्युत्तरवर्तिसूत्राद् हलीत्यस्यानुकर्षणं क्रियेत तर्हि 'अष्टानाम्' इत्यत्र (अष्टन्+नुट्=न्+आम्) नुटः पश्चादेव सन्निपातपरिभाषया अनित्यत्वादात्वं भवति, न तु प्राक् । हलीत्यस्यानुवृत्त्यभावे तु अष्टन्+आम् इति दशायां परत्वान्नित्यत्वाच्च आत्वे कृते अनान्तत्वे सति "ष्णान्ता षट्" (१।१।२४) इत्यनेन षट्संज्ञाभावात् "षट्चतुर्भ्यश्च" (७।२।५५) इत्यनेन नुड् न स्यात् । न च यथोद्देशपक्षेऽन्तरङ्गत्वात्प्रागेव कृता षट्संज्ञा "एकदेशविकृतमनन्यवत्" इति न्यायेन कृतात्वेऽपि सुलभेति वाच्यम् । अल्विधौ उक्तन्यायायोगाद् इति भावः ।[2]

जराया जरसन्यतरस्याम् ७।२।१०१ (२२७)

"जराशब्दस्य जरसादेशो भवति अन्यतरस्यामजादौ विभक्तौ परे" इति सूत्रार्थः । तेन 'एकदेशविकृतमनन्यवद्' इति परिभाषामाश्रित्य —"अतिजरसा, निर्जरसा अतिजरेण, निर्जरेण, अतिजरसः, निर्जरसः, अतिजरात्, निर्जरात्" इत्यादीनि रूपाणि तृतीयापञ्चम्येकवचने सिध्यन्ति ।

परं काशिकायाम्—"अन्ये तु अनित्यत्वादस्याः परिभाषायाः (सन्निपातपरिभाषायाः) अतिजरसं ब्राह्मणकुलं तिष्ठति अतिजरसैरित्येवं भवितव्यमिति मन्यन्ते" इत्यपि व्याख्यानं मतान्तरेणोपन्यस्तम् ।[3] एवं च तृतीयाबहुवचने जरसादेशात्प्राग् भिस.

---

१. अयं भावः काशिकायां सिद्धान्तकौमुद्यां च समानरूपेण वर्तते ।

२. द्र.—प्रौ. म., भागः १, पृ. ३५४-३५५ ।

३. अयं पक्षः काशिकासंमत एव, न तु मतान्तरमात्रम् । द्र.—का. वृ. ७।१।९ : "अकारान्तादङ्गादुत्तरस्य भिस ऐस् इत्ययमादेशो भवति । वृक्षैः । प्लक्षैः । अतिजरसैः । जरामतिक्रान्तैरिति विगृह्य समासे कृते, ह्रस्वत्वे च भिस ऐसादेशो भवति । एकदेशविकृतमनन्यवद्भवति—इति जरशब्दस्य जरसादेशः । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य इति परिभाषेयमनित्या, "कष्टाय क्रमणे" (३।१।१४) इति निर्देशात् ।।"
न्यासकारस्तु ७।२।१०१ सूत्रे काशिकानिर्दिष्टं मतान्तरं सूत्रकारमतानुसारित्वेन स्वीकरोति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थाने "अतो भिस ऐस्" (७।१।९) इति ऐसादेशे, सन्निपातपरिभाषाया अनित्यत्वेन जरसादेशे 'अतिजरसैः, निर्जरसैः' इत्यादयः प्रयोगाः सिध्यन्तीति भावः। एवमेव काशिकायां ७।२।१२ सूत्रे—"अतिजरसिन, अतिजरसादिति केचिदिच्छन्ति। यथा तु भाष्ये तथा नैतदिष्यते इति लक्ष्यते" इति विवरणम्। अर्थाद् अतिजरशब्दाद् निर्जरशब्दाद् वा तृतीयैकवचने पञ्चम्येकवचने च यथाक्रमं पूर्वमिनादेशे आदादेशे च कृते सन्निपातपरिभाषाया अनित्यत्वेनावृत्त्या जरसादेशे 'अतिजरसिन, निर्जरसिन, अतिजरसात्, निर्जरात्' इत्यादयः प्रयोगाः सिध्यन्तीति काशिकाप्रदर्शितस्य ग्रन्थस्याशयः। परमत्र अतिजर+टा, अतिजर+ङस् इति तृतीयापञ्चम्येकवचने "टाङसिङसामिनात्स्याः" (७।१।१२)इत्यनेन इन्आत्प्राप्तयोः, "जराया जरस्—" (७।२।१०१) इत्यनेन जरसादेशे च प्राप्ते, "विप्रतिषेधे परं कार्यम्" (१।४।२) इति सूत्रबलेन इनादेशमादादेशं च बाधित्वा परत्वाज्जरसादेशे—अतिजरसा, निर्जरसा, अतिजरसः, निर्जरसः इत्यादीनि रूपाणि जायन्ते। पक्षे च अतिजरेण, निर्जरेण, अतिजरात्, निर्जरात् इत्यादीनि। अयमेव पक्षः सिद्धान्तकौमुदीसम्मतः। तथा हि—"वृत्तिकृता तु पूर्वविप्रतिषेधेनेनातोः कृतयोः सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य जरसि कृते 'निर्जरसिन निर्जरसात्' इति रूपे, न तु 'निर्जरसा, निर्जरसः' इति कैश्चिद् इत्युक्तम्। तथा भिसि निर्जरसै इति रूपान्तरमुक्तम्। तदनुसारिभिश्च षष्ठ्येकवचने 'निर्जरस्य' इत्येव रूपं स्वीकृतम्। एतच्च भाष्यविरुद्धम्" इति।[1]

यः सौ ७।२।११० (४४१)

अत्र काशिकाया मुद्रितसंस्करणेषु[2]—"इदमो मकारस्य यकारादेशो भवति सौ परतः। इयम्। उत्तरसूत्रे पुंसीति वचनात् स्त्रियामयं यकारः" इति व्याख्यानम्। परं यदि मकारस्य यकारः स्यात् तदा 'इयम्' इत्यत्र अन्त्यस्य मकारस्य यकारापत्तिः। तथा हि—इदं शब्दात् स्त्रियां सौ "इदमो मः" (७।२।१०८) इत्येनेन मकारस्य

---

१. साम्प्रतं काशिकामुद्रितसंस्करणेषु अतिजरशब्दस्यैव पाठः, न तु निर्जरशब्दस्य निर्जरशब्दस्य पाठस्तु प्रक्रियाकौमुद्यां वर्तते। प्रसादे काशिकोद्धृतं मतान्तरं द्रष्टुं शक्यम्।

२. द्र.—श्रीशोभितामिश्रसम्पादिता काशिका, चौखम्बा-संस्कृत-पुस्तकालय, १९५२, पृ. ६५२; स्वामीद्वारिकादासशास्त्रि-कालिकाप्रसादशुक्लसम्पादिता काशिकावृत्तिः (न्यासपदमञ्जरीसहिता), भागः ६, तारा-पब्लिकेशन्स, वाराणसी, १९६७, पृ ७१८।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मकारः ।[1] इदम् स् इत्यत्र "दश्च" (७।२।१०९) इत्यनेन दकारस्य मकारे सति इमम् स् इति अवस्था जायते, अस्यामवस्थायां कस्य मकारस्य स्थाने "यः सौ" (७।२।११०) इत्यनेन यकारो भवितव्य इति प्रश्नः । द्वावपि च इदमो मकारौ ।

अत्रायं समाधिः । "दश्च" (७।२।१०९) इत्यनेन विभक्तौ परे दकारस्य स्थाने मकारो भवति । परं "यः सौ" (७।२।११०) इत्यनेन सौ परे एव कार्यविधानात् ज्ञायते यत् सौ परे सति "दश्च" (७।२।१०९) इति सूत्रं न प्रवर्तते, तस्य बाधो "यः सौ" (७।२।११०) इत्यनेन भवति । अपि चाग्रिमे सूत्रे (७।२।१११) पुंसीति वचनादत्र ज्ञायते यद् "यः सौ" (७।२।११०) इत्यनेन यकारः स्त्रियामेव भवति । तेन चात्र 'उत्सर्गसमानदेशा अपवादा' इति न्यायेन प्रथममकारस्यैव यकारो भवति ।

वस्तुतस्तु अस्य सूत्रस्य मुद्रितकाशिकासंस्करणेषु या वृत्तिः सा सर्वथा दोषपूर्णा । प्रमाणस्वरूपेण पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यासंशोधनमन्दिरस्थहस्तलेखेषु या वृत्तिरुपलभ्यते सा अधस्ताद् हस्तलेखद्वयाद् क्रमेणोद्धियते—

(अ) यः सौ । इदमो दकारस्य यकारादेशो भवति सौ परतः । इयं । पुनर्विधानात् स्त्रियामयं यकारः ।[2]

(आ) यः सौ । इदंदकारस्य यकारादेशो भवति । सौ परतः । इयं । उत्तरसूत्रे पुंसीति वचनात् स्त्रियामयं यकारः ।[3]

अनेन हस्तलेखद्वयनिर्दिष्टपाठप्रमाणेन ज्ञायते यद् "यः सौ" (७।२।११०) इत्यनेन इदमो दकारस्य स्थाने एव यकारदेशो भवति, न मकारस्य स्थाने ।

रूपावतार-प्रक्रियाकौमुदी-व्याकरणमिताक्षरा-सिद्धान्तकौमुद्यादिषु दकारस्यैव यकार उक्तस्तेन काशिकायां सिद्धान्तकौमुद्यां च न परस्पर कोऽपि भेदः ।

अस्तिसिचोऽपृक्ते ७।३।९६ (२२२५)

काशिकायाम्—"अस्तेरङ्गात् सिजन्ताच्च परस्यापृक्तस्य सार्वधातुकस्य ईडागमो भवति । अस्तेः—आसीत्, आसीः । सिजन्तात्—अकार्षीत् । अपृक्ते इति किम् ? अस्ति । अकार्षम् । आहिभुवोरीटि प्रतिषेध इति स्थानिवद्भावप्रतिषेधः । तेनेह न—

---

१. यद्यत्र मकारस्य मकारो न स्यात् तर्हि "त्यदादीनामः" (७।२।१०२) इत्यनेन त्यदादित्वादकारोऽन्तादेशः स्यात्, स मा भूत्, तस्माद् मकारस्य मकारः ।

२. द्र.- का. वृ. Ms. No. $\frac{7}{1868\text{-}69}$

३. द्र.- का. वृ., Ms. No. $\frac{99}{1883\text{-}84}$ (हस्तलेखोऽयमादितश्चतुर्थाध्यायपर्यन्त एव)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्थ । अभूत्" इति व्याख्यातम् । तथैव रूपावतारे[1], प्रक्रियाकौमुद्यां, व्याकरणमिताक्षरायां च स्वीकृतम् ।

परमुपर्युक्तः सूत्रार्थः सिद्धान्तकौमुद्यां न स्वीकृतः । तत्र ग्रन्थकारस्येदमभिमतम् यदि वयं प्राचां व्याख्यानमनुसरेम तर्हि अस्तेर्लुङि भूभावे 'अभूत्' इति न स्यात् । तत्र स्थानिवत्त्वेन सिचः सत्त्वात् ततः परस्य अपृक्तस्य हल ईडागमस्य दुर्वारत्वात् । तथैव 'अगात्, अस्थात्' इत्यादावपि सिचौ लुक्यपि स्थानिवत्त्वेन सिचः परत्वाद् ईडागमः स्यात् । अतः सिद्धान्तकौमुदीकारः "सिच्च अस् च" इति समाहारद्वन्द्वमाश्रयते (अस्ति+सिच्+अस्)। ननु सिचस्शब्दे सिच्शब्दस्य पूर्वखण्डस्यान्तवर्तिविभक्त्या पदत्वात् "चो कुः" (८।२।३०) इति कुत्वं प्राप्नोति । सिच्छब्दस्य सौत्रत्वाद् भत्वेन पदत्वाभावात् कुत्वं न । न चैवं सिचस्शब्दे 'अस्' इत्यनेनैव अस्तेर्लाभाद् अस्तिग्रहणं व्यर्थमिति वाच्यम् । अस्तिशब्दस्य विद्यमानार्थकत्वात् । पञ्चम्याश्च सौत्रत्वाद् लुक् । "उतो वृद्धिर्लुकि हलि" (७।३।८९) इत्यतोऽनुवृत्तस्य हलीत्यस्य षष्ठ्या विपरिणामः । तस्माद् भट्टोजिदीक्षितः—"विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तहल ईडागमः स्याद्" इति सूत्रार्थं व्याचख्यौ । तेन 'अभूत्' इत्यस्मिन् प्रयोगे "अस्तिसिचोऽपृक्ते" (७।३।९६) इति ईडागमो न भवति, विद्यमानात् सिचः परस्य हल ईड्विधानेन प्रकृते सिचो "गातिस्थाघुपाभूभ्यः" (२।४।७७) इत्यनेन लुकि सति सिचोऽविद्यमानत्वात् । "प्रत्ययलोपे प्रत्ययलक्षणम्" (१।१।६२) इति तु न प्रवर्तते; "न लुमताङ्गस्य" (१।१।६३) इत्यनेन तस्य प्रतिषेधात् ।

ननु च वार्तिक-काशिकासम्मतं 'अभूत्, आत्थ' इत्यादिषु "आहिभुवोरीट् प्रतिषेधः" इति वार्त्तिकमीड्निषेधार्थं किमर्थं न स्वीक्रियते । भाष्येऽस्य वार्त्तिकस्य प्रत्याख्यानात् । स्वीकृतेऽपि च वार्त्तिके 'अगात्' इत्यत्र ईड्प्रवृत्त्यापत्तेश्च ।

सिद्धान्तकौमुदीतः पूर्ववर्तिषु ग्रन्थेषु "अपृक्तस्य सार्वधातुकस्य" इति निर्देशः । परं सौऽपि प्रौढमनोरमाकृतवचनेन असाधुरेव । स्वीकृते तु तादृशे 'रोदिषि, ऐधिषि' इत्यादावपि अतिव्याप्तेः सार्वधातुकग्रहणव्यावृत्त्याभावाच्च । अत एव 'अपृक्तहलः' इत्येव व्याख्यानं युक्तम् ।

यद्यपि सिद्धान्तकौमुदीप्रतिपादितोऽयमर्थो लक्ष्यसिद्ध्युपकारी तथापि पाणिनिसूत्राक्षरानुगुणो न भवति । तस्मात् काशिकोक्तमेव व्याख्यानं साधु ।

---

१. रूपावतारे सूत्रमिदं स्थलद्वये पृथक् पृथग् रूपेण व्याख्यातम् । द्र.—रूपा., भागः १, पृ० ५९-१४३ यथाक्रमम्—

(१) अस्तेरङ्गात् सिजन्ताच्चोत्तरस्य अपृक्तसार्वधातुकस्य ईडागमो भवति । आसीत् ।

(२) अस्तेरङ्गात् सिजन्ताङ्गादुत्तरस्यापृक्तस्य पितः सार्वधातुकस्य ईडागमो भवति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ति च ७।४।८९ (३०३७)

काशिकायां—"तकारादौ प्रत्यये परे चरफलोरकारस्य उकारादेशो भवति" इत्यर्थः प्रतिपादितः। परं सिद्धान्तकौमुद्यां "दीर्घ इणः किति" (७।४।६९) इत्यस्मात् कितीत्यस्यापि मण्डूकप्लुत्यानुवृत्तिः स्वीकृता। परं सेट्कत्वेन निष्ठां विना तकारादि-प्रत्ययाभावात् कितीत्यस्यानुवृत्तिर्नावश्यकीति बालमनोरमाकारः।

रूपावतारेऽत्र काशिकानुसारि व्याख्यानम्। कितीत्यस्यानुवृत्तिः प्रक्रियाकौमुद्या-मेव प्रथमं स्वीकृता। तस्माद् ज्ञायते यत् सिद्धान्तकौमुद्यां प्रक्रियाकौमुद्याः प्रभावः।

एकाचो बशो भष् झषन्तस्य स्ध्वोः ८।२।३ (३२७)

"धातोरवयवो य एकाच् झषन्तः तदवयवस्य वशः स्थाने भष् आदेशो भवति झलि सकारे ध्वशब्दे च परतः पदान्ते च" इत्यर्थः काशिकायाम्।

प्रक्रियाकौमुद्याम्—"एकाचो धातोर्झषन्तस्य वशः स्थाने भष् स्यात् सकारे ध्वेशब्दे च परे। प्रातिपदिकसंज्ञस्य तु झलि पदान्ते च" इत्यर्थः। प्रक्रियाकौमुदीसदृश एव व्याकरणमिताक्षरायां सूत्रार्थः। स च प्रक्रियाकौमुद्याः प्रभावोऽपि वक्तुं शक्यते।

परं रूपावतारे सिद्धान्तकौमुद्यां चात्र भिन्नमेव व्याख्यानम्। अस्मिन् ग्रन्थद्वये नानुवर्तते 'झलि' इति पदम्। उभयत्र च समाना एव व्याख्या। यथा सिद्धान्तकौमुद्याम् —"धातोरवयवो य एकाज् झषन्तस्तदवयवस्य वशः स्थाने भष् स्यात सकारे ध्वशब्दे पदान्ते च। एकाचो धातो इति सामानाधिकरण्येनान्वये त्विह न स्याद्—गर्दभयति, ततः क्विप्, णिलोपः, गर्दप्। झलीति निवृत्तम्, स्ध्वोर्ग्रहणसामर्थ्यात्। तेनेह न—दुग्धम्, दोग्धा। व्यपदेशिद्भावेन धात्ववयवत्वाद् भष्भावः, तश्त्वचर्त्वे धुक्, धुग्" इति। रूपावतारे च—"धातोरवयवो य एकाच् झषन्तस्तदवयवस्य वशः स्थाने भषादेशो भवति सकारे ध्वे च परतः पदान्ते च" इति।

अनेन रूपावतारसिद्धान्तकौमुदीकृत्व्याख्यानेन प्रक्रियाकौमुदीव्याकरणमिताक्षरा-प्रदत्तम्—"एकाचो धातोर्झषन्तस्य" इति सामानाधिकरण्यान्वयस्वरूप व्याख्यानमपा-क्रियते। तथा च—"झलीति निवृत्तम्, स्ध्वोर्ग्रहणसामर्थ्यात्" इति सिद्धान्तकौमुदी-वचनेन काशिकादिवद् झलीत्यस्यानुवृत्तिर्भट्टोजिदीक्षितस्यानभिमता। परं न्यासकारोऽत्र झलीत्यनुवृत्तं पदं द्विधा समादधाति। प्रथमं—'झलि परतः' इत्यनेन झलीत्यनुवर्तते, तस्य सकारो विशेषणम्। किमर्थं पुनर्झलीत्यस्यानुवृत्तिः, यतस्तस्य सहकारेण पदान्त-स्यानुवृत्तिर्भविष्यति, अन्यथा झलीत्यस्य निवर्तमाने तत्सम्बद्धं पदान्तग्रहणमपि निवर्तेत, ततश्च पदान्ते न सिध्येत्। द्वितीयं च—यदि कोऽप्यत्र स्वरितत्वात् पदान्तस्यानुवृत्ति स्वीक्रियेत तदात्र झलीत्यस्यानुवृत्तिर्मन्दधियां सुखप्रतिपत्तये बोध्या। अस्मिन् न्यास-कारप्रदर्शितसमाधानद्वये पदमञ्जरीकारः प्रथमं पक्षमालम्बते। वस्तुतस्तु न्यासकार-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मतेनापि नास्त्यत्र झलीत्यस्यानुवृत्तिः समीचीना। यतो हि उपर्युक्तात् स्वकीयात् समाधानादग्रे 'ध्वशब्दे च' इति काशिकावचनस्य व्याख्यानावसरे पुनर्लिखति—"अत्र झलीत्येतन्नापेक्षते, असम्भवात्, न हि कश्चित् झल् ध्वशब्दोऽस्ति, तस्य प्रत्याहारेष्वसन्निवेशात्" इति।

अत्र भट्टोजिदीक्षितः 'झलि' इत्यस्यानुवृत्तिं तथा प्रक्रियाकौमुदीप्रदत्तं "प्रातिपदिकसंज्ञस्य तु झलि परतः पदान्ते च" इति व्याख्यानं च स्वकीये प्रौढमनोरमाग्रन्थे तिरस्कुर्वन् लिखति—"झलीति निवृत्तमिति। यत्तु प्राचोक्तम्—प्रातिपदिकस्य तु झलि परतः पदान्ते चेति, तत्प्रमादिकमेव। अधोक्, अधोग्, अजर्घा इत्याद्यसिद्धचापत्तेः। प्रातिपदिकग्रहणस्याप्रकृतत्वाच्च। तत्र झलो निमित्तत्वानुपयोगाच्च। धुग्भ्यां, धुक्षु इत्यादौ पदान्त इत्येव सिद्धेः। यदपि तत्पौत्रेण (प्रसादकृता विट्ठलेन) व्याख्यातम्—झलि परे प्रातिपदिकसंज्ञस्यैवेत्यादि, तदपि निर्मूलं निष्फलं चेत्युपेक्ष्यम्" इति।

एतेन व्याख्यानेन ज्ञायते यद् भट्टोजिदीक्षितः स्वरितत्वात् पदान्तस्येत्यस्यानुवृत्तिं स्वीकरोति, न तु झलीत्यस्य। स प्रक्रियाकौमुदीं, प्रसादटीकां, व्याकरणमिताक्षरां च पूर्णतया खण्डयति। सिद्धान्तकौमुदीकारस्य व्याख्याने रूपावतारस्य प्रभावः वक्तुं शक्यते।

दधस्तथोश्च ८।२।३८ (२५०१)

काशिकायां—दध इति दधातिः कृतद्विर्वचनो निर्दिश्यते। तस्य झलन्तस्य वशः स्थाने भष् आदेशो भवति तकारथकारयोः परतः चकारात् स्ध्वोश्च परतः। धत्तः। धत्थः। धत्से। धद्ध्वम्। वचनसामर्थ्यादातो लोपस्य स्थानिवद्भावो न भवति। अभ्यासजश्त्वस्य चासिद्धत्वम्। तथोरिति किम्? आनन्तर्यात् स्ध्वोरेव विज्ञायेत। चकारस्तयोरनुवृत्त्यर्थः" इति व्याख्यानम्।

सिद्धान्तकौमुदीकारस्त्वेवं सूत्रं व्याचष्टे—"द्विरुक्तस्य झषन्तस्य धाञ्धातोर्बशो भष् स्यात् तथयोः परयोः स्ध्वोश्च परतः। वचनसामर्थ्यादाल्लोपो न स्थानिवदिति वामनमाधवौ। वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवत्। धत्तः" इति। इदं सिद्धान्तकौमुदीकृद्व्याख्यानं रूपावतारसम्मतं वर्तते।

पूर्वसूत्रे (८।२।३७) झषन्तस्यैव बशो विधानादत्रापि झषन्तस्यैव विधानं युक्तम्। अपि च ये न्यासकारादयोऽत्र 'झलि' इत्यस्यानुवृत्तिं स्वीकुर्वन्ति, सा अनावश्यकी। यतो हि पूर्वसूत्रे 'स्ध्वोः-' इति कथनात्, अत्र च 'तथोः' इति, चकारेण 'स्ध्वोः' इत्यस्यानुवृत्तिसूचनात् झलीत्यस्य व्यावृत्याभावान्नानुवृत्तिः।

अभिनिसः स्तनः शब्दसंज्ञायाम् ८।३।८६ (३१९३)

अभि, निस् इत्येताभ्यामुत्तरस्य स्तनः सस्य मूर्धन्यादेशो भवति शब्दसंज्ञायां

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गम्यमानायां सत्यामिति सूत्रार्थः। परं काशिकायां वृत्तौ "मातृपितृभ्यामन्यतरस्याम्" (८।३।८५) इत्यस्मात् 'अन्यतरस्याम्' इत्यनुवर्तते। तस्मात् तत्र 'अभिनिष्टानः, अभिनिस्तानः' इति रूपद्वयं भवति। परं न तथा सिद्धान्तकौमुद्याम्। तत्र 'अन्यतरस्याम्' इत्यस्याननुवर्तनात्।

सूत्रमिदं महाभाष्ये, रूपावतारे, प्रक्रियाकौमुद्यां च न वर्तते। न च न्यासपदमञ्जर्योरपि 'अन्यतरस्याम्' इत्यस्य विषये किमपि विवरणमुपन्यस्तम्। व्याकरणमिताक्षरायामपि 'अन्यतरस्याम्' इति नानुवर्तितम्। लघुशब्देन्दुशेखरे, तत्त्वबोधिन्यां, बालमनोरमायां च कापि चर्चा नास्ति। तस्मादेतदनुमीयते यद् भट्टोजिदीक्षितेन अधिकृते काशिकाया हस्तलिखितमूलसंस्करणे 'अन्यतरस्याम्' इत्यस्यानुवृत्तिर्नस्यादिति।

हन्तेरत्पूर्वस्य ८।४।२२ (३५९)

"अकारपूर्वस्य हन्तिनकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति। प्रहण्यते।·· अत्पूर्वस्येति किम् ? प्रघ्नन्ति ··" इति काशिकाकृतं व्याख्यानम्। परन्तु सिद्धान्तकौमुदीकारेणेदं सूत्रं द्विधा विभज्य व्याख्यातम्। तद्यथा—

(१) "हन्तेः—" (८।४।२२) उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात्। प्रहण्यात्।

(२) "—अत्पूर्वस्य "(८।४।२२) हन्तेरत्पूर्वस्यैव नस्य णत्वम्, नान्यस्य। प्रघ्नन्ति···" इति।

तत्र सिद्धान्तकौमुदीकारमतेन हन्तेरित्यत्र "उपसर्गादसमासेऽपि" (८।४।१४) इत्यत उपसर्गादिति नानुवर्तते, योगविभागस्याश्रयणात्।

"हन्तेः—" (८।४।२२) इत्यनेन प्राप्तं णत्वं "-अत्पूर्वस्य" (८।४।२२) इति नियमान्न भवति। अयमेवाभिप्रायः काशिकायाम्—"अत्पूर्वस्येति किम् ? प्रघ्नन्ति" इति प्रत्युदाहरणमुखेन प्रदर्शितः। परं सूत्रस्य योगविभागाभावे 'वृत्रघ्नः' इत्यस्मिन् प्रयोगे णत्वं प्रवर्तेत। तदा "एकाजुत्तरपदे णः" (८।४।१२) इत्यनेन णत्वे सति 'वृत्रघ्णः' इति रूपं स्यात्।[1] तद्वारणाय सिद्धान्तकौमुदीकारो लिखति—"योगविभागसामर्थ्यात् अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा इति। न्यायं बाधित्वा "एकाजुत्तरपदे" (८।४।१२) इति णत्वमपि निवर्तते" इति। अतोऽस्मिन् सूत्रे योगविभागे सति अत्पूर्वस्यैव इति नियमेन णत्वं व्यावृत्यते इति भावः।

---

१. विस्तरेण द्र.—प्रौ. म., भागः १, पृ. ३४१-३४२; बा. म. ८।४।२२ सूत्रस्थविवरणम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टमं प्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूत्रपाठान्तरसङ्कलनम्

पाणिनेरष्टाध्याय्याः कियती सूत्रसङ्ख्या इत्यस्मिन् विषये भारतीयानां पाश्चात्यानां च विदुषां नैकमत्यम्। एतत्तु मया पूर्वमेवोक्तं यत् स्वरसिद्धान्तचन्द्रिकामते[1]-नाष्टाध्याय्याश्चतुर्दशप्रत्याहारसूत्रैः सह सर्वा सूत्रसङ्ख्या ३९९५ वर्तते। परमन्येन साक्ष्येनेयं सूत्रसङ्ख्या ३९९६ भवति।[2] डॉ. गोल्डस्टूकरमतेनाष्टाध्याय्यां[3] त्रीणि चत्वारि वा सूत्राणि पाणिन्युत्तरवर्तिकाले सूत्रपाठमध्ये प्रक्षिप्तानि वर्तन्ते। डॉ. मोनियरविलियम्समहोदया[4] अप्येतदेवाभिमन्यन्ते। डॉ. वेलवलकरमतेन[5] पञ्च सूत्राण्यष्टाध्याय्यां प्रक्षिप्तानि। डॉ. बोथलिङ्कमहोदयाः स्कूल्डमहाभागाश्च तत्र दश सूत्राणि प्रक्षिप्तत्वेन स्वीकुर्वन्ति।[6] किं बहुना; यानि सूत्राणि महाभाष्येऽनुपलब्धानि यानि च केवलं महाभाष्योत्तरवर्तिकाशिकादिग्रन्थेष्वेवोपलभ्यन्ते तानि सर्वाणि सूत्राणि पुरा अष्टाध्याय्यां मूलरूपेणासन् न वेत्यस्मिन्नपि सन्देह इति श्री स्कूल्डमहोदयानामभिप्रायः।[7]

---

१. स्व. च., श्लोक १५:—

चतुःसहस्री सूत्राणां पञ्चसूत्रविवर्जिता।
अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैः सह॥

२. न्यासः (संपा. श्रीशचन्द्रचक्रवर्ती), भागः १, प्रस्तावना, पृ. ४ :—

त्रीणि सूत्रसहस्राणि तथा नवशतानि च।
षण्णवतिञ्च सूत्राणां पाणिनिः कृतवान् स्वयम्॥

३. T. GOLDSTÜCKER, *Pāṇini*, p. 121.

४. MONIER WILLIAMS, *Indian Wisdom*, p. 163.

५. S. K. BELVALKAR, *Systems of Sanskrit Grammar*, p. 19.

६. H. SCÖLD, *Papers on Pāṇini*, pp. 23-24.

अपि च—डॉ. पलसुलेमतेनाष्टाध्याय्यां पाणिन्युत्तरवर्तिकाले पञ्चसूत्राणि (१।२।५३-५७) प्रक्षिप्तानि। नेमानि सूत्राणि पाणिनिकाले सूत्रपाठे आसन्निति तेषामभिप्रायः (द्र.—G.B. PALSULE, "An Interpolated Passage in the Aṣṭādhyāyī", *ABORI*, VOL. xxx, pp. 135-144.)

परमिमानि सूत्राण्यधिकृत्य महाभाष्यादिग्रन्थेषु सूत्रस्वरूपविषये नास्ति कोऽपि भेदः। तस्मात्तान्यस्मिन् प्रकरणे मया न सङ्कलितानि।

७. H. SCÖLD, *Papers on Pāṇini*, pp, 22-23.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परमेतेन स्कूल्डमहोदयवचनेन प्रौ. के. कृष्णमाधवशर्माणः[1] स्वीयं वैमत्यं प्रदर्शयन्ति । तेषां मतेन तु डॉ. किलहॉर्ननिर्दिष्टान्येव कानिचित् सूत्राणि प्रक्षिप्तत्वेन स्वीकर्तुं योग्यानि । परं यानि सूत्राणि महाभाष्ये नोपलभ्यन्ते तान्यपि सर्वाणि प्रक्षिप्तानीति तु स्वरूप-व्याक्रियैव पराक्रिया । अष्टाध्याय्याः सूत्रपाठस्तु ऋग्वेदवत् सर्वथा शुद्ध एवेति तेषां मतम् ।[2] डॉ. किलहॉर्नमहोदयैर्महाभाष्यकाशिकावृत्तिस्थसूत्रपाठस्य साम्यप्रदर्शनवेलाया-मष्टाध्याय्याः ५८ सूत्रेषु पाठभेदोऽपि प्रदर्शितः ।[3] परं सिद्धान्तकौमुद्यादिषु स्वीकृतो यः सूत्रपाठः स तुलनार्थं न गृहीतः किलहॉर्नमहोदयैः; अतः सिद्धान्तकौमुदीकारेण स्वीकृतः सूत्रपाठो महाभाष्यस्थसूत्रपाठेन कियान् भिनत्तीत्यपि विचारणीयं भवति । डॉ. किलहॉर्न-महोदयैः स्वकीये शोधपत्रे ५।१।६६; ५।३।१०३; ६।३।६२; ६।३।१०५; ७।१।४३ सूत्राणां महाभाष्येऽविद्यमानत्वात् स्वरूपं चर्चार्थं नादृतम्; यतो हि महाभाष्ये यानि पाणि-निसूत्राणि समुपलब्धानि तेषामेव काशिकया सह पाठभेदचर्चा प्राधान्येन तैः कृता । परमुपरिनिर्दिष्टानि सूत्राण्यस्मिन् प्रकरणेऽस्माभिर्निवेशितानि, यतस्तत्र काशिकासिद्धा-

---

१. K. M. K. SARMA, "The Text of the Aṣṭādhyāyī," *JUPHS*, VOL. xiii, Part 1, pp. 52-65 (Lucknow, July-1940.)

२. *Ibid*, p. 65 :

"The text of the Aṣṭādhyāyī has been preserved without any corruption just as that of the Ṛgveda where too variant readings has crept in."

३. F. KIELHORN, "Notes on the Mahābhāṣya : The Text of Paṇini's Sūtras, as Given in the Kāśikā-vṛtti, Compared with the Text Known to Kātyāyana and Patañjali", *AI*, VOL, xvi, p. 184 :

"The text of the Aṣṭādhyāyī, which is given in the Kāśikā-vṛtti, differs in the case of 58 rules (.....) from the text which was known to Kātyāyana and Patañjali."

अस्मिन् शोधपत्रे डॉ. किलहॉर्नमहोदयैस्तेषामपि सूत्राणां सङ्कलनं कृतं यानि महाभाष्येऽयोगविभागपूर्वकाणि काशिकायां च योगविभागसहितानि विद्यन्ते । परं तेभ्य ऋते द्वे अन्ये अपि सूत्रे प्रक्षिप्ते स्याताम् । डॉ. पॉलथिमेमहोदयम-तेन (*Pāṇini and the Veda*, pp. 53-54) "यजुष्युरः" ६।१।११७, "आपोजुषा-णोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे" ६।१।११८ इति सूत्रद्वयं पाणिनिकालेऽयोग-विभागपूर्वकमासीत् । अत्र योगविभागस्तु पाणिन्युत्तरवर्तिकाले समजायत । एवमेव माधवकृष्णशर्ममहोदयमतेन "प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च" १।४।१०६ इति सूत्रं कात्यायनपतञ्जलिकालेऽविदितमासीत् । अतः शर्ममहोदयैः स्वकीये शोधपत्रे (पृ. ५५-५७) डॉ. किलहॉर्नप्रदर्शितेन सूत्रस्वरूपभेदविषय-कशोधपत्रेण सह ६।१।११७-११८, १।४।१०६ सूत्राणामपि गणनायां समावेशः कृतः (तत्र सर्वेषां सूत्राणां पाठान्तरं न विद्यते) ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्तकौमुदीसूत्रपाठस्वरूपे परस्परं भेदः प्रवर्तते । यद्यपि ६।१।११५; ७।३।७७; ८।४।२८ सूत्राणां काशिकावृत्तिशैलीप्रतिपादनावसरे पाठभेदः प्रस्तुतस्तथापि प्रकरणवशात्तान्यप्यत्र सङ्कलितानि । एवमेव काशिकासिद्धान्तकौमुदीग्रन्थद्वयेऽपि ४।१।८१; ५।१।१२१ ७।३।३१ सूत्राणां स्वरूपं भिन्नमवलोक्यते, अत एतेषामत्र सङ्कलनम् । डॉ. किलहॉर्न-महोदयसम्पादिते महाभाष्ये १।४।८१; १।४।८२ सूत्रे स्वीकृते । अतः किलहॉर्नमहोदयैः स्वकीये शोधपत्रे सूत्रस्वरूपभेदप्रदर्शनावसरे अनयोर्द्वयोरपि सूत्रयोः पाठो न संगृहीतः । परमिदं निःसन्दिग्धतया न शक्यते वक्तुं यत् पतञ्जलिरिदं वचनद्वयं (१।४।८१-८२) सूत्रत्वेन स्वीकरोति इति । पतञ्जलिरिमे सूत्रे न स्वातन्त्र्येण व्याख्याति । किं तु तेन सूत्रान्तरव्याख्यानावसरेऽनयोः संग्रहः कृतः । अतोऽस्मिन् प्रकरणेऽनयोरपि सूत्रयोः सङ्कलनम् । डॉ. किलहॉर्नमहोदयैः ८।३।९९-१०० सूत्रद्वयविषयेऽपि किमपि नोक्तम् । परमिदं सूत्रद्वयं न्यासे पदमञ्जर्यां च गणसूत्रत्वेनैव निर्दिष्टम् । किं बहुना; इदं सूत्र-द्वयमधिकृत्य प्रकाशितेषु काशिकासिद्धान्तकौमुदीसंस्करणेष्वपि भेदो दृश्यते । काशिकाया-श्चौक्षम्बासंस्करणे सिद्धान्तकौमुद्याः सर्वेषु मुद्रितसंस्करणेषु चेद द्वयमपि सूत्रत्वेन प्रकाशितं वर्तते । पर काशिकायास्तारापल्लिकेशन्ससंस्करणे (न्यासपदमञ्जरीसहिते) ८।३।९८ सूत्रस्य वृत्तिभागे एवानयोरुपन्यासः । तस्मादिदं सूत्रद्वयमत्र संगृहीतम् ।

अस्मिन् सङ्कलने मया डॉ. किलहॉर्नमहोदयानां शोधपत्रान्तर्गतानि सप्तदश-सूत्राणि परित्यक्तानि; यत एषु सूत्रेषु योगविभागशब्दभेदान्यद् न किमपि विचारार्हं वर्तते । तस्मात् डॉ. किलहॉर्नमहोदयानां शोधपत्रात् केवलानि ३८ सूत्राण्येव संगृही-तानि वर्तन्ते ।

रॉबर्ट् विर्वेमहोदयैरपि[1] अष्टाध्याय्याः सूत्रपाठप्रक्षेपमधिकृत्यैकं शोधपत्र प्रस्तुतम् । अत्र तैः सप्त सूत्राणि पाणिन्युत्तरवर्तिकालेऽष्टाध्याय्याः सूत्रपाठे प्रक्षिप्तानि वर्तन्त इति स्वीयं मतं प्रकटीकृतम् ।

डॉ. रामशङ्करभट्टाचार्यैर्यत् सूत्रपाठान्तरसङ्कलनं कृतं तस्य सर्वा सूत्रसङ्ख्या १८५ भवति ।[2] यद्यपि डॉ. भट्टाचार्यैरिदं सङ्कलनं बहूनां ग्रन्थानां प्रमाणन प्रस्तुतं तथापि तैः कानिचिदवश्यान्तर्भाव्याणि सूत्राणि न सङ्कलितानि । तानि हि— १।४।८१-८२; ४।१।१६६-१६७; ४।२।८; ४।३।१३२-१३३; ५।१।३६; ६।१।६२; ६।१।१००; ६।१।१३६; ६।१।१५०; ६।१।१५६; ६।३।६; ६।३।१०५; ८।१।७३; ८।३।९९-१००।

श्रीनारायणमिश्रसम्पादित—हिन्दीटीकासहितकाशिकावृत्तिसंस्करणस्य प्रस्ता-

---

१. R. BIRWE, "Interpolationen in Pāṇini's Aṣṭādhyāyī", *Dr. Kifel comm. VOL.*, pp. 27-52 (1955).

२. रामशङ्करभट्टाचार्यः, पाणिनीय व्याकरण का अनुशीलन, परिच्छेदः ३३, पृ. ३७७-३९६।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वनायाँ भाष्यकाशिकासिद्धान्तकौमुदीप्रमाणेन अष्टाध्याय्याः ५२ सूत्राणां पाठान्तरं सङ्कलितम्।[1] परं तत्रापि कानिचित् सूत्राणि न संगृहीतानि। तथा हि—४।२।८; ४।२।२१; ४।४।१७; ५।१।३६; ५।२।१०१; ५।३।१०३; ६।४।५६; ६।४।१००; ७।१।४३; ७।३।३१; ७।३।३५।

प्रदीपे कैयटेन, पदमञ्जर्यां हरदत्तमिश्रेण, सिद्धान्तकौमुद्यां प्रौढमनोरमायां च भट्टोजिदीक्षितेन, उद्द्योते लघुशब्देन्दुशेखरे च नागेशभट्टेन, तत्त्वबोधिन्यां ज्ञानेन्द्रसरस्वतिना, बालमनोरमायां च वासुदेवदीक्षितेन महाभाष्यप्रामाण्यमाश्रित्य केषाञ्चित् शब्दानां सूत्राणां वा प्रक्षिप्तत्वं प्रतिपादितम्। तथापि भाषावृत्तौ पुरुषोत्तमदेवेन, रूपावतारे धर्मकीर्तिना, प्रक्रियाकौमुद्यां रामचन्द्रेण, प्रक्रियाप्रसादे विट्ठलेन, व्याकरणमिताक्षरायां च अन्नंभट्टेन काशिकानुसारि सूत्रस्वरूपमेवानुसृतम्। सन्ति च तादृशान्यपि काशिकायां सूत्राणि येषां महाभाष्ये आवश्यकोऽपि पाठ उचितस्थलेष्वनुपलब्धः। अत एव महाभाष्य-काशिका-सिद्धान्तकौमुदीप्रदत्तसूत्रपाठे कियान् भेदः, कियन्ति वार्त्तिकानि तत्र सूत्रपाठमध्ये प्रक्षिप्तानि वर्तन्त इत्येतत्सर्वमस्मिन् प्रकरणेऽवस्ताद् यथाक्रमं यथाप्रमाणं च प्रस्तूयते।

का. वृ., सू.—		समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः ॥१।३।२९॥
,,	वा.—	दृशेश्चेति वक्तव्यम् ॥
म. भा., सू.—		समो गम्यृच्छिभ्याम्। १।३।२९ ॥
,,	वा.—	समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम् ॥वा. १॥
,,	वा.—	अर्तिश्रुदृशिभ्यश्च ॥वा. २॥
सि. कौ., सू.—		समो गम्यृच्छिभ्याम् ॥२६९९॥
,,	वा.—	विदिप्रच्छिस्वरतीनामुपसंख्यानम् ॥
,,	वा.—	अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम् ॥
पदमञ्जरी	—	समो गम्यृच्छिभ्याम् इत्येतावत्सूत्रम्। प्रच्छादयस्तु वार्त्तिकदृष्टाः सूत्ररूपेण पठिताः।
कैयटः	—	समो गम्यृच्छिभ्यामित्येतावत्सूत्रमिति वार्त्तिकमारब्धम्।
का. वृ., सू.	—	छन्दसि परेऽपि ॥१।४।८१॥
,, ,,	—	व्यवहिताश्च ॥१।४।८२॥
म भा, वा.	—	छन्दसि परव्यवहितवचनं च ॥१।४।८०, वा. २॥ छन्दसि परेऽपि व्यवहिताश्च (१।४।८१; ८२) इति वक्तव्यम् ॥

१. का. वृ.—हिन्दीटीकासहिता (संपा. नारायणमिश्रः), भागः १, प्रस्तावना, पृ. ४४-५८ (१९६९)।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सि. कौ., सू. — छन्दसि परेऽपि ॥३३९१॥
" " — व्यवहिताश्च ॥३३९२॥
सुबोधिनी — अस्मिंश्च पक्षे "छन्दसि परेऽपि" "व्यवहिताश्च" इति सूत्रद्वयं च कर्तव्यम् ।

का. वृ., सू — कृत्याः प्राङ्ण्वुलः ॥३।१।९५॥
म. भा., सू. — कृत्याः ॥३।१।९५॥
" वा. — कृत्यसंज्ञायां प्राङ्ण्वुल्वचनम् ॥वा. १ ॥
सि. कौ., सू. — कृत्याः ॥२८३१॥
" वृत्तिः — अधिकरोऽयंण्वुलः प्राक् ।
पदमञ्जरी — सत्यम् "कृत्याः" इत्येतावदेव पठितं सूत्रकारेण । वृत्तिकारस्तु भाष्ये पूर्वपक्षरूपेण पठितं सूत्रे प्रचिक्षेप । विचित्रा हि वृत्तेः कृतिर्वृत्तिकारेण ।
कैयटः — कृत्या इत्येतावत्सूत्रमित्याह कृत्यसंज्ञायामिति ।

का. वृ., सू. — प्रत्यपिभ्यां ग्रहेश्छन्दसि ॥३।१।११८॥
म. भा., सू. — प्रत्यपिभ्यां ग्रहेः ॥३।१।११८॥
" वा. — प्रत्यपिभ्यां ग्रहेश्छन्दसि ॥वा १ ॥
सि. कौ., सू. — प्रत्यपिभ्यां ग्रहेः ॥२८६९॥
" वा. — छन्दसीति वक्तव्यम् ॥
तत्त्वबोधिनी — वक्तव्यमिति । वृत्तिकृता तु सूत्रे प्रक्षिप्तम् ।

का. वृ, सू. — आसुयुवपिरपिलपित्रपिचमश्च ॥३।१।१२६॥
म. भा., वा. — लपिदभिभ्यां च ॥३।१।१२४, वा. ३ ॥
सि. कौ., सू. — आसुयुवपिरपित्रपिचमश्च ॥२८८७॥
" वा. — ण्यत्प्रकरणे लपिदभिभ्यां चेति वक्तव्यम् ॥
तत्त्वबोधिनी — जयादित्यस्तु "आसुयुवपिरपि—" इति सूत्रे लपिं प्रक्षिप्य रपिलपिचमीति पठित्वाऽनुक्तसमुच्चयार्थेन चकारेण दभेः सङ्ग्रह इत्युक्तवान् तत्र वैषम्येण व्याख्यानं निर्बीजं भाष्यविरोधश्च स्पष्ट एव ।

का. वृ., सू. — अध्यायन्यायोद्यावसंहाराधारावायाश्च ॥३।३।१२२॥
म. भा., वा. — घञ्विधाववहाराधारावायानामुपसंख्यानम् ॥३।३।१२१, वा. १ ॥
सि. कौ., सू. — अध्यायन्यायोद्यावसंहाराश्च ॥३३०१॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

„ वा. — अवहाराधारावायानामुपसंख्यानम् ॥

पदमञ्जरी — "घञ्विधाववहाराधारावायानामुपसंख्यानम्" वार्त्तिकम्। वृत्तिकारस्तु आधारवायशब्दौ सूत्रे प्रक्षिप्य चकारेणावहारशब्दं साधयति स्म। विचित्रा हि वृत्तेः कृतिर्वृत्तिकारेण।

कैयटः — अध्यायसूत्र आधारवायशब्दौ वार्त्तिके दर्शनादभियुक्तैः प्रक्षिप्तौ।

का. वृ., सू. — टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम् ॥४।१।१५॥

„ वा. — नञ्स्नञीकक्तरुणतलुनानामुपसंख्यानम् ॥

म. भा., सू. — टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ॥४।१।१५॥

पतञ्जलिः वा. — नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानाम् ॥

सि. कौ., सू. — टिड्ढाणञ्·····कञ्क्वरपः ॥४७०॥

„ वा. — नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् ॥

पदमञ्जरी — भाष्ये तु "कञ्क्वरपः" इत्येतावत्सूत्रम्, ख्युनः पाठोऽनार्ष इति तस्याप्युपसंख्यानमेव कृतम्।

कैयटः — सूत्रे ख्युनः पाठोऽनार्षः।

का. वृ, सू. — दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् ॥४।१।८१॥

म. भा. — (भाष्ये इदं सूत्रं २।२।३ इति सूत्रस्य व्याख्याने काशिकासम्मतमेवोपलभ्यते)।

सि. कौ., सू. — दैवयज्ञि····· काण्डेविद्धिभ्योऽन्तरस्याम् ॥१२०१॥

पदमञ्जरी — काण्डेविद्धिभ्य इत्यन्ये पठन्ति।

का. वृ., सू. — वृद्धस्य च पूजायाम् ॥४।१।१६६॥

म. भा., वा. — वृद्धस्य च पूजायाम् ॥४।१।१६३, वा. ३॥

सि. कौ., वा. — वृद्धस्य च पूजायामिति वाच्यम् ॥१०९२॥

तत्त्वबोधिनी — वार्त्तिकमिदम्। तथा "यूनश्च" इत्यग्रिममपि।

कैयटः — सूत्रेषु तु पूजायामिति वार्त्तिकदर्शनात् प्रक्षिप्तम्।

का. वृ. सू. — यूनश्च कुत्सायाम् ॥४।१।१६७॥

म. भा., वा. — जीवद्भर्त्र्यं च कुत्सितम् ॥४।२।१६२, वा. २॥

सि. कौ., वा. — यूनश्च कुत्सायां गोत्रसंज्ञेति वाच्यम् ॥१०९२॥

कैयटः — यूनश्च कुत्सायामिति सूत्रमनार्षमिति वचनम्।

का. वृ., सू. — लाक्षारोचनाशकलकर्दमाट्ठक् ॥४।२।२॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

म. भा., सू. — लाक्षारोचनाट्ठक् ॥४।२।२॥
„ वा. — ठक्प्रकरणे शकलकर्दमाभ्यामुपसंख्यानम् ॥ वा. १ ॥
सि. कौ., सू. — लाक्षारोचनाट्क् ॥१२०३॥
„ वा. — शकलकर्दमाभ्यामुपसंख्यानम् ।
पदमञ्जरी — शकलकर्दमयोर्वार्त्तिके दर्शनात् सूत्रे प्रक्षेपः ।

का. वृ., सू. — कलेर्ढक् ॥४।२।८॥
म. भा., वा. — दृष्टं साम कलेर्ढक् ॥४।२।७, वा. १ ॥
सि. कौ., सू. — कलेर्ढक् ॥१२०९॥
लघु. शेखरः — कलेर्ढगिति वार्त्तिकम् ।

का. वृ, सू. — सास्मिन् पौर्णमासीति संज्ञायाम् ॥४।२।२१॥
म. भा., सू. — सास्मिन् पौर्णमासीति ॥४।२।२१॥
„ वा. — सास्मिन्ग्रहणे पौर्णमासीत्यत्र संज्ञाग्रहणम् ॥ वा. १ ॥
सि. कौ. सू. — सास्मिन् पौर्णमासीति ॥१२२३॥
„ वृत्तिः — इतिशब्दात् "संज्ञायाम्" इति लभ्यते ।
कैयटः — संज्ञाग्रहणं सूत्रेऽनार्षमिति वार्त्तिकमारब्धम् ।

का. वृ., सू. — ग्रामजनबन्धुसहायेभ्यस्तल् ॥४।२।४३॥
„ वा. — गजाच्चेति वक्तव्यम् ॥
म. भा. सू. — ग्रामजनबन्धुभ्यस्तल् ॥४।२।४३॥
„ वा. — गजसहाभ्यां चेति वक्तव्यम् ॥ वा. १ ॥
सि. कौ., सू. — ग्रामजनबन्धुभ्यस्तल् ॥१२५१॥
„ वा. — गजसहाभ्यां चेति वक्तव्यम् ॥
तत्त्वबोधिनी — वृत्तिकृता तु वार्त्तिकस्थसहायशब्दोऽपि सूत्रे प्रक्षिप्तः ।

का. वृ, सू. — कौपिञ्जलहास्तिपदादण् ॥४।३।१३२॥
म. भा., वा. — कौपिञ्जलहास्तिपदादण् ॥४।३।१३१, वा. १ ॥
सि. कौ., सू. — कौपिञ्जलहास्तिपदादण् ॥१५१२॥
कैयटः — अपाणिनीयः सूत्रेषु पाठः ।
बालमनोरमा — अस्मिन् वार्त्तिके कौपिञ्जलेति निर्देशात् अत इञ बाधित्वा अणित्यर्थः ।

का. वृ., सू. — आथर्वणिकस्येकलोपश्च ॥४।३।१३३॥
म. भा., वा. — आथर्वणिकस्येकलोपश्च ॥४।३।१३१, वा. २ ॥
सि. कौ, सू — आथर्वणिकस्येकलोपश्च ॥१५१३॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदमञ्जरी — पूर्वसूत्रं (४।३।१३२) इदञ्च (४।३।१३३) वार्त्तिके दर्शनात् सूत्रेषु प्रक्षिप्तम् ।
बालमनोरमा — आथर्वणिकस्येकलोपश्च । इदं सूत्रमिति कैयटः । वार्त्तिकमित्यन्ये ।

का. वृ., सू. — विभाषा विवधवीवधात् ॥४।४।१७॥
म. भा., सू. — विभाषा विवधात् ॥४।४।१७॥
„ वा. — वीवधाच्चेति वक्तव्यम् ॥ वा. १ ॥
सि. कौ., सू — विभाषा विवधात् ॥१५६७॥
„ वृत्तिः — एकदेशविकृतस्यानन्यत्वाद्वीवधादपि ष्ठन् ।
पदमञ्जरी — वीवधशब्दो वार्त्तिके दर्शनात् सूत्रे प्रक्षिप्तः ।

का. वृ., सू. — वेशोयशआदेर्भगाद्यल् ॥४।४।१३१॥
„ „ — ख च ॥४।४।१३२॥
म. भा. — (महाभाष्ये नास्तीदं सूत्रद्वयम्)।
सि. कौ. (वेङ्कटेश्वरसंस्करणम्) — वेशोयशआदेर्भगाद्वयल्खौ ॥
सि. कौ (निर्णयसागरसंस्करणम्) — वेशोयशआदेर्भगाद्यल्खौ ॥३४७७॥
„ „ — ख च ॥३४७८॥
सि. कौ. (मोतीलालबनारसीदासः) — वेशोयशआदेर्भगाद्यल् ॥३४७७॥
„ „ — ख च ॥३४७८॥
पदमञ्जरी — केचित्पुनरेकमेव योगमधीयते ।
(अत्र पदमञ्जरीवचनप्रमाणेन सिद्धान्तकौमुद्या निर्णयसागर-संस्करणे सूत्रपाठोऽशुद्धः) ।

का. वृ., सू. — द्वित्रिपूर्वपदादण् च ॥५।१।३६॥
म. भा., वा. — द्वित्रिपूर्वादण् च ॥५।१।३५, वा. २ ॥
सि. कौ., सू. — द्वित्रिपूर्वादण् च ॥१७०१॥
पदमञ्जरी — वार्त्तिके दर्शनात् सूत्रेष्वेतत् प्रक्षिप्तम् ।
कैयटः — द्वित्रिपूर्वादण्चेति सूत्रेष्वनार्षः पाठ इति वार्त्तिकमारब्धम् ।

का. वृ., सू. — दण्डादिभ्यो यः ॥५।१।६६॥
म. भा. — (इदं सूत्रं नास्ति)।
सि. कौ. (वेङ्कटेश्वरसंस्करणम्) — दण्डादिभ्यः ॥
सि. कौ. (निर्णयसागरसंस्करणम्) — दण्डादिभ्यो यत् ॥१७३१॥
सि. कौ. (मोतीलालबनारसीदासः) — दण्डादिभ्यः ॥१७३१॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदमञ्जरी — इह "दण्डादिभ्यः" इत्येतावदेव सूत्रम् । अनन्तरश्च यत्प्रत्ययो विधीयते ।

बालमनोरमा — दण्डादिभ्यः । यदित्यनुवर्तते तदाह यत्स्यादिति "दण्डादिभ्यो यः" इति त्वपपाठः ।

का. वृ., सू. — न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटबुधकतरसलसेभ्यः ॥५।१।१२१॥

म. भा., सू. — न नञ्····· बुधकतरसलसेभ्यः ॥५।१।१२१॥

सि. कौ., सू. — न नञ्····· युधकतरसलसेभ्यः ॥१७८३॥

का. वृ., सू. — प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ॥५।२।१०१॥

म. भा, सू. — प्रज्ञाश्रद्धार्चाभ्यो णः ॥५।२।१०१॥

" वा. — वृत्तेश्च ॥वा. १॥

सि कौ., सू. — प्रज्ञाश्रद्धार्चाभ्यो णः ॥१९०८॥

" वा. — वृत्तेश्च ॥

पदमञ्जरी — सूत्रे वृत्तिशब्दो वार्त्तिके दर्शनात् प्रक्षिप्तः ।

का. वृ., सू. — एतदोऽश् ॥५।३।५॥

म. भा, सू. — एतदोऽन् ॥५।३।५॥

सि. कौ., सू — एतदोऽन् ॥१९५१॥

पदमञ्जरी — भाष्ये तु "एतदोऽन्" इति नकारान्त आदेश इति स्थितम् । स चानेकालत्वात् सर्वादेशः, ततः स्थानिवद्भावात् प्रातिपदिकत्वे सति नलोप.—अतः, अत्र ।

कैयटः — इह केचिदशं पठन्ति केचिदनम् ।

उद्द्योतः — केचिदिति—वृत्तिकृतः । अत्र द्वितीयपाठ एव सूत्रकृत्कृतः, भाष्यसम्मतेः ।

का. वृ., सू. — शाखादिभ्यो यत् ॥५।३।१०३॥

म. भा. — (इदं नोपलभ्यते) ।

सि. कौ., सू. — (वेङ्कटेश्वरसंस्करणम्) — शाखादिभ्यो यः ।

सि. कौ. — (निर्णयसागरसंस्करणम्)—शाखादिभ्यो यत् ॥२०५८॥

सि. कौ. — (मोतीलालबनारसीदासः)—शाखादिभ्यो यः ॥२०५८॥

बालमनोरमा — "शाखादिभ्यो यः" । 'यत्' इति त्वपपाठः । तैत्तिरीये "मुख्यो भवति" इत्यादौ मख्यशब्दस्य आद्युदात्तत्वदर्शनात्, उगव दि-सूत्रभाष्यविरुद्धत्वाच्च ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

का. वृ., सू. — अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्वि: ॥५।४।५०॥
म. भा., सू. — कृभ्वस्तियोगे सम्पद्यकर्तरि च्वि: ॥५।४।५०॥
" वा. — च्विविधावभूततद्भावग्रणम् ॥वा. १॥
सि. कौ., सू. — कृभ्वस्तियोगे सम्पद्यकर्तरि च्वि: ॥२११७॥
" वा. — अभूततद्भाव इति वक्तव्यम् ॥
पदमञ्जरी — वार्त्तिककारेण च्विविधावभूततद्भावग्रहणं कर्तव्यमित्युक्तम्, तदवश्यं कर्तव्यमिति मन्यमान: सूत्र एव प्रक्षिप्य व्याचष्टे ।
कैयट: — अभूततद्भावग्रहणं वार्त्तिके दृष्ट्वान्यै: सूत्रे प्रक्षिप्तम् ।

का. वृ., सू. — अचि शीर्ष: ॥६।१।६२॥
म. भा., वा. — अचि शीर्ष: ॥६।१।६१, वा. ३॥
सि. कौ., वा. — अचि शीर्ष इति वाच्यम् ॥१६६७॥
कैयट: — अचि शीर्ष इति वार्त्तिकं दृष्ट्वा सूत्रेषु कैश्चित्प्रक्षिप्तम् ।

का. वृ., सू. — नित्यमाम्रेडिते डाचि ॥६।१।१००॥
म भा, वा. — नित्यमाम्रेडिते डाचि ॥६।१।९९, वा. १॥
सि. कौ, वा. — नित्यमाम्रेडिते डाचीति वक्तव्यम् । २१२८॥
पदमञ्जरी — वार्त्तिकेमेवेदम् । वृत्तिकृता सूत्ररूपेण पठितम् ।
कैयट: — वार्त्तिकदर्शनात् सूत्रे कैश्चित् प्रक्षिप्तम् ।

का. वृ., सू. — प्रकृत्यान्त: पादमव्यपरे ॥६।१।११५॥
" वृत्तिभागे — केचिदिदं सूत्रं नान्त: पादमव्यपर इति पठन्ति ।
म. भा., सू. — नान्त: पादमव्यपरे ॥६।१।११५॥
सि. कौ., सू. — प्रकृत्यान्त: पादमव्यपरे ॥३५१८॥

का. वृ, सू. — इन्द्रे च नित्यम् ॥६।१।१२४॥
म. भा., सू. — इन्द्रे च ॥६।१।१२४॥
सि. कौ., सू. — इन्द्रे च ॥८९॥
पदमञ्जरी — इन्द्रे च ॥
तत्त्वबोधिनी — इन्द्रे च आरम्भसामर्थ्यान्नित्यमिदम् ।

का. वृ., सू. — प्लुतप्रगृह्या अचि ॥६।१।१२५॥
म. भा., सू. — प्लुतप्रगृह्या अचि नित्यम् ॥६।१।१२५॥
सि. कौ., सू. — प्लुतप्रगृह्या अचि नित्यम् ॥९०॥
पदमञ्जरी — प्लुतप्रगृह्या अचि नित्यम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कैयटः — "इन्द्रे च" इति ये सूत्रं पठन्ति, "प्लुतप्रगृह्या अचि नित्यम्" इति तु द्वितीयं तन्मतेनैष प्रश्नः ।

का. वृ., सू. — अडभ्यासव्यवायेऽपि ॥६।१।१३६॥
म. भा., वा. — अडव्यवाय उपसंख्यानम् ॥६।१।१३५, वा. ५ ॥
" " — अभ्यासव्यवाये च ॥६।१।१३३, वा. ६ ॥
सि. कौ., वा — अडभ्यासव्यवायेऽपि (सुट्कात्पूर्वः) इति वक्तव्यम् ॥२५३९॥
कैयटः — अडभ्यासव्यवायेऽपीति सूत्रस्यापाठे वार्त्तिकप्रवृत्तिः ।

का. वृ., सू. — सम्पर्युपेभ्यः करोतौ भूषणे ॥६।१।१३७॥
म. भा., व्याख्या— संपरिभ्यां नैषा पञ्चमी । का तर्हि ? तृतीया । संपरिभ्यामुपसृष्टस्येति ॥६।१।१३५॥
सि. कौ., सू. — संपरिभ्यां करोतौ भूषणे ॥२५५०॥
तत्त्वबोधिनी — संपर्युपेभ्य इति वृत्तिस्थपाठं विहाय भाष्यवार्त्तिकानुसारेणाह— संपरिभ्यामिति ।

का. वृ., सू. — विष्किरः शकुनिर्विकिरो वा ॥६।१।१५०॥
म भा., सू — विष्किरः शकुनौ वा ॥६।१।१५०॥
" वा. — विष्किरः शकुनौ विकिरो वा ॥ वा. १ ॥
सि. कौ., सू. — विष्किरः शकुनौ वा ॥१०६५॥
पदमञ्जरी — यथा तु भाष्यं तथा "विष्किरः शकुनौ वा" इत्येतावत् सूत्रम् ।

का. वृ., सू. — कारस्करो वृक्षः ॥६।१।१५६॥
" वृत्तिः — केचित् पारस्करप्रभृतिष्वेव कारस्करो वृक्ष इति पठन्ति ।
म. भा., व्याख्या— अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः । पारस्करो देशः । कारस्करो वृक्षः । रथस्पा नदी ।·····६।१।१५७॥
सि. कौ, सू. — कारस्करो वृक्षः ॥१०७०॥
" वृत्तिः — केंचित्तु कस्कादिष्विदं पठन्ति न सूत्रेषु ।

का. वृ., सू. — आत्मनश्च पूरणे ॥६।३।६॥
म. भा., वा. — आत्मनश्च पूरणे ॥६।३।५, वा १ ॥
सि. कौ., सू. — आत्मनश्च ॥९६३॥
" वा. — पूरण इति वक्तव्यम् ॥
पदमञ्जरी — वार्त्तिकमेवेदं सूत्ररूपेण पठितम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

का. वृ., सू. — स्वाङ्गाच्चेतोऽमानिनि ॥६।३।४०॥
म. भा., सू. — स्वाङ्गाच्चेतः ॥६।३।४०॥
" वा. — स्वाङ्गाच्चेतोऽमानिनि ॥ वा. १ ॥
सि. कौ., सू. — स्वाङ्गाच्चेतः ॥८४१॥
" वा. — अमानिनीति वाच्यम् ॥
पदमञ्जरी — अमानिनीति वार्त्तिके दर्शनात् सूत्रे प्रक्षिप्तम् ।
कैयटः — स्वाङ्गाच्चेत इत्येतावत्सूत्रमिति मत्वा वार्त्तिकारम्भः ।

का. वृ, सू. — प्रकृत्याशिष्यगोवत्सहलेषु ॥६।३।८३॥
म. भा., सू. — प्रकृत्याशिषि ॥६।३।८३ ॥
" वा. — प्रकृत्याशिष्यगवादिषु ॥ वा. १॥
सि. कौ., सू. — प्रकृत्याशिषि ॥८५०॥
" वा. — अगोवत्सहलेष्विति वाच्यम् ॥
पदमञ्जरी — प्रकृत्याशिषि इत्येतावत्सूत्रम्, परिशिष्टं भाष्यवार्त्तिकदर्शनात् सूत्ररूपेण पठितम् ।

का. वृ., सू. — विष्वग्देवयोश्च टेरद्र्यञ्चतौ व प्रत्यये ॥६।३।९२॥
म. भा. — (नास्तीदं सूत्रम्) ।
सि. कौ., सू. — विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ॥४१८॥
तत्त्वबोधिनी — "अञ्चतौ व प्रत्यये" इति पाठे तु "व प्रत्ययान्तेऽञ्चतौ" इति व्याख्येयम् ।

का. वृ, सू. — ईषदर्थे च ॥६।३।१०५॥
म. भा. — (अनुपलब्धमिदं सूत्रम्) ।
सि. कौ., सू. — ईषदर्थे ॥१०३१॥

(काशिकायामस्मिन् सूत्रे चकारग्रहणं "का पथ्यक्षयोः" ६।३।१०४ इत्यस्मात् 'का' इत्यनुवृत्तिसिद्धये प्रतीयते । परं सिद्धान्तकौमुदीकारमतेन इदं सूत्रं चकाररहितमेव । तत्र तु (सिद्धान्तकौमुद्यां) कदाचित् "चानुकृष्टं नोत्तरत्र" इत्यनुगतं सम्भाव्यते; यतो हि यद्यत्र ६।३।१०५ सूत्रे चकारबलेन पूर्वसूत्रात् 'का' इत्यस्यानुवृत्तिः स्वीक्रियेत तदा तु "विभाषा पुरुषे" ६।३।१०६ इत्यत्र 'का' इत्यनुवृत्तौ काठिन्यं जायेत । तेन काशिकायां ६।३।१०५ सूत्रे चकारग्रहणं न कर्तव्यम् ।)

का. वृ., सू. — ल्यपि लघुपूर्वात् ॥६।४।५६॥
म. भा., सू. — ल्यपि लघुपूर्वस्य ॥६।४।५६॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सि. कौ., सू. — ल्यपि लघुपूर्वात् ॥३३३६॥
पदमञ्जरी — ल्यपि लघुपूर्वात् । अत्र केचिदाचार्येण "ल्यपि लघुपूर्वस्य" इति षष्ठ्यन्तमध्यापिताः; अन्ये पञ्चम्यन्तम् ।

का. वृ., सू. — घसिभसोर्हलि च ॥६।४।१००॥
म. भा., सू. — घसिभसोर्हलि ॥६।४।१००॥
" वा. — हल्ग्रहणमनर्थकमन्यत्रापि दर्शनात् ॥ वा. १ ॥
सि. कौ., सू. — घसिर्भसोर्हलि च ॥३५५०॥
पदमञ्जरी — सूत्रे चकारस्य पाठोऽनार्षः । तथा च वार्त्तिकम्–"हल्ग्रहणमपरिभाष्यम् अन्यत्रापि दर्शनात्" ।
कैयटः — अन्यत्रापीति वचनाद् वार्त्तिककारश्चकारं न पपाठेति लक्ष्यते ।

का. वृ., सू. — अद्ड् डतरादिभ्यः पञ्चभ्यः ॥७।१।२५॥
म. भा., सू. — अद् डतरादिभ्यः पञ्चभ्यः ॥७।१।२५॥
सि. कौ., सू. — अद्डुतरादिभ्यः पञ्चभ्यः ॥३१५॥
न्यासः — द्विडकारोऽयं निर्देशः—तत्रैको डतरसम्बन्धी, द्वितीयस्त्वादेशसम्बन्धी ।

का. वृ., सू. — यजध्यैनमिति च ॥७।१।४३॥
म. भा. — (अनुपलब्धमिदं सूत्रम्) ।
सि. कौ., सू. — यजध्वैनमिति च ॥३५६५॥
" वृत्तिः — वकारस्य यकारो निपात्यते इति वृत्तिकारोक्तिः प्रामादिकी ।
पदमञ्जरी — यजध्वैनमिति च ॥ वकारस्य च यकार इति । वह्वृचास्तु वकारमेवाधीयते, तत्र मलोपमात्रं निपात्यते ।
सुबोधिनी — वृत्तिकारस्तु यजध्यैनमिति पाठं ज्ञात्वा वकारस्य यकारश्च निपात्यत इत्याह । तद्दूषयति वकारस्येत्यादि । प्रामादिकीति । लक्ष्ये वकारपाठस्य निर्विवादत्वात् । वेदभाष्येऽपि प्रकृतसूत्रय मलोपमात्रपरतोक्तेश्चेति भावः ।

का. वृ., सू. — यथातथयथापुरयोः पर्यायेण ॥७।३।३१॥
म. भा., सू. — यथातथयथापुरयोः पर्यायेण ॥७।३।३१॥
सि. कौ. (मोतीलालबनारसीदासः)—यथातथायथापुरयोः पर्यायेण ॥
सि. कौ. (निर्णयसागरसंस्करणम्)—यथातथयथापुरयोः पर्यायेण ॥१७८६॥
सि. कौ. (वेङ्कटेश्वरसंस्करणम्)—यथातथायथापुरयोः पर्यायेण ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

का. वृ., सू. — ष्ठिवुक्लम्याचमां शिति ॥७।३।७५॥
म. भा., सू. — ष्ठिवुक्लमुचमां शिति ॥७।३।७५॥
" वा. — दीर्घत्वमाङि चमः ॥ वा. १ ॥
सि. कौ., सू. — ष्ठिवुक्लमुचमां शिति ॥२३२०॥
" वा. — आङि चम इति वक्तव्यम् ॥
तत्त्वबोधिनी — "ष्ठिवुक्लमुआचमाम्" इति वृत्तिकारोक्तपाठोऽयुक्त इति भावः ।

का. वृ., सू. — इषुगमियमां छः ॥७।३।७७॥
,, वृत्तिभागे — य इषमुदितं नाधीयते तेऽच्चीत्यनुवर्तयन्ति ।
म. भा., सू. — इषगमियमां छः ॥७।३।७७॥
सि. कौ., सू. — इषुगमियमां छः ॥२४००॥
कैयटः — इषुगमीति पाठोऽनार्षः ।

का. वृ., सू. — पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ॥८।१।६७॥
म. भा., सू. — पूजनात्पूजितमनुदात्तम् ॥८।१।६७॥
" वा. — पूजितस्याऽनुदात्तत्वे काष्ठादिग्रहणम् ॥ वा. १ ॥
सि. कौ., सू. — पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ॥३९७४॥
पदमञ्जरी — पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः ॥ "काष्ठादिभ्यः" इति वार्त्तिके दृष्टं सूत्रावयवत्वेन पठित्वात्तदनुरोधेन पूजनादित्येकवचनं बहुवचनस्थान इति व्याचष्टे ।
कैयटः — काष्ठादिभ्य इति सूत्रे वार्त्तिकदर्शनात् कैश्चित्प्रक्षिप्तम् ।

का. वृ., सू. — नामन्त्रिते समानाधिकरणे सामान्यवचनम् ॥८।१।७३॥
म. भा., सू. — नामन्त्रिते समानाधिकरणे ॥८।१।७३॥
सि. कौ., सू. — नामन्त्रिते समानाधिकरणे सामान्यवचनम् ॥४१३॥
कैयटः — "नामन्त्रिते समानाधिकरणे" इति सूत्रं पठितं, ततः "सामान्यवचनं विभाषितं विशेषवचने" इति द्वितीयम् ।

का. वृ., सू. — विभाषितं विशेषवचने बहुवचनम् ॥८।१।७४॥
म, भा., सू. — सामान्यवचनं विभाषितं विशेषवचने ॥८।१।७४॥
सि. कौ., सू. — (सामान्यवचनं) विभाषितं विशेषवचने ॥३६५५॥
" वृत्तिः — अत्र भाष्यकृता बहुवचनमिति पूरितम् । सामान्यवचनमिति च पूर्वसूत्रे योजितम् ।
कैयटः — बहुवचनग्रहणमपाणिनीयमिति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

का. वृ., सू.	—	एति संज्ञायामगात् ॥८।३।९९॥
,, ,,	—	नक्षत्राद् वा ॥८।३।१००॥
म. भा.	—	(इदं सूत्रद्वयमनुपलब्धम्)।
सि. कौ., सू.	—	एति संज्ञायामगात् ॥१०२३॥
,, ,,		नक्षत्राद् वा ॥१०२४॥
तत्त्वबोधिनी	—	एति संज्ञायामिति। सुषमाद्यन्तर्गणसूत्रमेतत्। एवं 'नक्षत्राद् वा' इत्यपि।
पदमञ्जरी	—	एति संज्ञायामगादिति गणसूत्रम्।
न्यासः	—	एति संज्ञायामित्यादि। एतद् ग्रहणकवाक्यम्।
का. वृ., सू.	—	सदिस्वञ्ज्योः परस्य लिटि ॥८।३।११६॥
म. भा., सू.	—	सदेः परस्य लिटि ॥८।३।११८॥
,, वा.	—	सदो लिटि प्रतिषेधे स्वञ्जेरुपसंख्यानम् ॥ वा. १ ॥
सि. कौ., सू.	—	सदेः परस्य लिटि ॥२३६१॥
,, वृत्तिः	—	ष्वञ्ज परिष्वङ्गे।···"सदेः परस्य लिटि" इति सूत्रे 'स्वञ्जेरुपसंख्यानम्।' अतोऽभ्यासात्परस्य षत्वं न। परिषस्वजे, परिषस्वज्जे।
पदमञ्जरी	—	स्वञ्जिग्रहणं च वार्त्तिके दर्शनात् सूत्रे प्रक्षिप्तम्। यथा—सदो लिटि प्रतिषेधे स्वञ्जेरुपसंख्यानम्।
का. वृ. सू.	—	उपसर्गाद् बहुलम् ॥८।४।२८॥
म. भा., सू.	—	उपसर्गादनोत्परः ॥८।४।२८॥
,, वा.	—	भाविन्यप्योति नेष्यते ॥ वा. १ ॥
		भाविन्यप्योकारे णत्वं नेष्यते। एवं तर्हि 'उपसर्गाद् बहुलम्' इति वक्तव्यम् ॥
सि. कौ., सू.	—	उपसर्गादनोत्परः (८।४।२८) इति सूत्रम्। तद्भङ्क्त्वा भाष्यकार आह—उपसर्गाद् बहुलम् ॥८५९॥
पदमञ्जरी	—	उपसर्गादनोत्पर इति पाठान्तरम्, उपसर्गात्परस्य नसो नकारस्य णत्वं भवति, ओतः परस्य ओकारे वा न भवतीत्यर्थः। उभयथाप्यतिव्याप्त्यव्याप्तिसम्भवाद् व्याख्यात एव पाठो वृत्तिकारेणाश्रितः।

यद्यप्युपरिदर्शितेषु सूत्रेषु सिद्धान्तकौमुद्याः सूत्रस्वरूपं काशिकापेक्षया महाभाष्यसमीपवर्ति तथापि बहुत्र सूत्रस्वरूपविषये महाभाष्यपाठेन सह भेदो दृश्यते। सिद्धान्तकौमुदीकारः ३।१।९५, ४।२।२१, ४।४।१७ सूत्रेषु भाष्यगतानां वार्त्तिकानां पाठं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृथक्त्वेन न निर्दिश्य तं वृत्तावेवान्तर्भावयति । महाभाष्ये ६।१।१३६ सूत्रे पृथक् पृथग् द्वे वार्त्तिके वर्तेते । परं सिद्धान्तकौमुदीकारस्ते द्वे अपि एकवार्त्तिकत्वेन निर्दिशति । ६।४।१००, ७।१।२५, ८।१।६७ सूत्रस्वरूपविषये सिद्धान्तकौमुद्यां काशिकायाः स्पष्टरूपेण प्रभावः । एवमेव सिद्धान्तकौमुद्या मुद्रितसंस्करणेष्वपि ४।४।१३१-१३२, ५।१।६६, ५।३।१०३, ७।३।३१ परस्परं सूत्रस्वरूपभेद उपलभ्यते । महाभाष्ये ६।३।६ सूत्रे यद् वार्त्तिकं वर्तते तस्यार्धं सिद्धान्तकौमुदीकारः सूत्ररूपेण पठति, अर्धं च वार्त्तिकरूपेण । ६।३।८३ सूत्रे "प्रकृत्याशिष्यगवादिषु" इति भाष्यस्थवार्त्तिकस्वरूपं विहाय भट्टोजिदीक्षितः "अगोवत्सहलेष्विति वाच्यम्" इति वार्त्तिकं प्रस्तौति यत् काशिकायाः "प्रकृत्याशिष्यगोवत्सहलेषु" (६।२।८३) इत्यस्मिन् सूत्रे द्रष्टुं शक्यते, तस्मात् सिद्धान्तकौमुद्यामस्मिन् वार्त्तिकस्वरूपे काशिकास्थसूत्रस्वरूपस्य प्रभावो वक्तुं शक्यते । अतो महाभाष्यस्थसूत्रवार्त्तिकस्वरूपप्रमाणेन कस्यापि ग्रन्थस्य सूत्रपाठो नास्ति सर्वथा शुद्धः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नवमं प्रकरणम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्रन्थद्वयस्य वैदिकोदाहरणानां सङ्कलनम्

अस्मिन् प्रकरणे काशिकासिद्धान्तकौमुद्युदाहृतानां वैदिकवचसामकारादिक्रमेण सङ्ग्रहः कृतः। तदर्थमादितश्चतुर्थाध्यायपर्यन्तं काशिकाया हैदरावादविश्वविद्यालय-प्रकाशितसंस्करणमनुसृतम्,[1] अतोऽग्रे श्रीशोभितमिश्रमहोदयसम्पादितायाश्चौखम्बा-संस्कृतपुस्तकालयप्रकाशितसंस्करणमनुसृतम्।[2] सिद्धान्तकौमुद्याश्च मोतीलालबनारसी-दाससंस्करणमनुसृतम्।[3] अस्मिन् सङ्ग्रहे यद् वैदिकवचनं येन रूपेण काशिकासिद्धान्त-कौमुद्योरुपलभ्यते तेनैव रूपेण अर्धचन्द्रद्वयाङ्किते प्रकोष्ठे यथोपलब्धवैदिकवचसां तुलनार्थमुल्लेखः कृतः। यानि वचनानि साम्प्रतं वैदिकवाङ्मयेऽनुपलभ्यमानानि, परं काशिकासिद्धान्तकौमुद्योर्वैदिकत्वेनाभिमतानि, तानि रेखयाङ्कितानि। सन्ति चात्र बहूनि वचांसि यानि भट्टोजिदीक्षितेन वैदिकप्रक्रियायामेव समुद्धृतानि, परं (वैदिकवा-ङ्मयेऽनुपलभ्यमानत्वात्) तेषां वैदिकत्वं लौकिकत्वं वेति संशय उदेति।[4] अतस्तादृशानां संशयास्पदानां वचनानामग्रे प्रश्नाङ्कितं चिह्नं (?) कृतम्। यद् वचनं संहितादिषु किञ्चिद्विपर्ययेणोपलभ्यते तस्योल्लेखः (ग्रन्थनिर्देशः) टिप्पणभाग एव कृतः। या सूत्र-सङ्ख्या प्रकोष्ठभागे वर्तते सा सिद्धान्तकौमुदीसूत्रक्रमाङ्कं सङ्केतयति या च प्रकोष्ठ-भागविरहिता सा काशिकामनुसरति। यत्र सङ्ख्यामध्येऽर्धविरामचिह्नं (;) तत्र तद् वैदिकवचनं काशिकायां सिद्धान्तकौमुद्यां च भिन्नेषु सूत्रस्थलेषूपलभ्यते। तद् यथा—

पञ्चदशिनोऽर्धमासाः (तै. सं. ७।५।२०।१)	५।२।३७; (३४९१)
धुरि दक्षिणायाः (ऋ. १।६४।९)	७।१।३९; (३४३३)

यत्र च सङ्ख्यामध्येऽर्धविरामचिह्नं नास्ति तादृशं सङ्ख्याद्वयान्वितं वचनं ग्रन्थद्वयेऽपि तस्मिन्नेव सूत्रे वर्तत इत्यभ्युपगन्तव्यम्। तद् यथा—

उरुणस्कृधि (ऋ. ८।७५।११)	६।४।१०२ (३५५१); ८।३।५० (३६३५); ८।४।२७ (३६४९)
दक्षिणतः शये (तै. सं. ६।२।५।५)	७।१।४१ (३५६३)

---

१. ग्रन्थोऽयम् उस्मानियाविश्वविद्यालयेन १९६९ खिष्टाब्दे प्रकाशितः।
२. १९५२ खिष्टाब्दे प्रकाशितं तृतीयं संस्करणम्।
३. १९६७ खिष्टाब्दे प्रकाशितं चतुर्थं संस्करणम्।
४. लघु. शेखरः ८।२।१०: "यद्यपीह प्लुतप्रकरणे बहूनि सूत्राणि लोकवेदसाधा-रणानि, तथापि तस्य वैकल्पिकत्वेन लोके तदाऽदराभावाद् वेदे च तदादराद् वैदिक्यामेव लिखितानीति ध्येयम्।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इमान्युदाहरणानि काशिकायां ६।४।१०२, ८।३।५०, ८।४।२७, ७।१।४१ सूत्रेषूपलभ्यन्ते, तान्येव सिद्धान्तकौमुद्यां यथाक्रमं ३५५१, ३६३५, ३६४६, ३५६३ सूत्रसङ्ख्याक्त्वेन प्रदर्शितानि । परं ग्रन्थद्वयस्य सूत्रसङ्ख्यामध्येऽर्धविरामचिह्नं नास्ति, तस्मात् ग्रन्थद्वयेऽपि तानि समानसूत्रेष्वेव वर्तन्त इति विभावनीयम् । अयमेव मार्गः सर्वत्रानुगन्तव्यः ।

उदाहरणानि	सूत्रसङ्ख्याः
अंशून् बभस्ति (अथ. ६।४६।२)	६।४।१००
अकार्षं हि (?)	८।२।६३ (३६१२)
अकार्षं हि ३ (?)	८।२।६३ (३६१२)
अकार्षीः कटम् (?)	८।२।६३ (३६१२)
अक्रम् कर्म कर्मकृतः (वा. सं. ३।४७)	२।४।८०
अक्रन्नुषासः (ऋ. १।६२।२)	(३४०२)
अक्षण्वता लाङ्गलेन—	७।१।७६; ८।२।१६
अक्षण्वन्तः कर्णवन्तः सखायः (ऋ. १०।७१।७)	८।२।१६ (३६०१); (३७२२)
अक्षन्[1] पितरोऽमीदन्त पितरः (वा. सं. १६।३६)	१।१।५८; २।४।८०; ६।४।६८; ८।३।६०
अक्षन्नमीमदन्त हि (ऋ. १।८२।२)	(३४०२)
अक्षितमसि मा मेक्षेष्ठाः (तै. सं. १।६।५।१)	६।४।६०; ८।२।४६
अक्षी[2] ते इन्द्र पिङ्गले कपेरिव (महाभाष्यम्)—	७।१।७७
अक्षीभ्यां ते नासिकाभ्याम् (ऋ. १०।१६३।१	७।१।७७ (३५७६)
अक्षैर्मा दीव्यः (ऋ. १०।३४।१३)	फि. २।३५—सि. कौ.
अगन्म[3] तमसः पारम्	८।२।६५; ८।३।५३
अगन्व—	८।२।६५
अगम ३: पूर्वा ३ न् ग्रामा ३ न् (?)	८।२।१०५ (३६२४)
अगम ३ म् पूर्वा ३ न् ग्रामा ३ न् (?)	८।२।१०५ (३६२४)
अग्न आ याहि वीतये (ऋ. ६।१६।१०)	१।२।३६; (३४२०)
अग्न ३ इ इन्द्रः (?)	(३६२७)
अग्न इन्द्र वरुण मित्र देवाः (ऋ. ५।४६।२)	(४१२; ३६५३; ३६५४)

---

१. काशिकाया बहुषु संस्करणेषु "अक्षन्नमीमदन्त पितरः" इति लेखः ।

२. अस्य मूलस्थानं न प्राप्यते । द्र.—L RENOU, "Etudes Pāṇineennes", *JA*, p. 434 (Paris, 1953).

३. वा. सं. (१२।७३)—"अगन्म तमसस्पारम्" इत्युपलभ्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्न ३ इ पत्नी वः (?)	(३६२६)
अग्न ३ याशा (?)	८।२।१०८ (३६२७)
अग्न ३ यिन्द्रम् (?)	८।२।१०८ (३६२७)।
अग्नये गोमयानि प्रेष्य—	२।३।६१; ८।२।९१; (३६१०)
अग्नये छागं हविर्वपां मेदो जुहुधि[1]	२।३।६१
अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य[1]	२।३।६१ (६२१)
अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रूहि[1]	२।३।६१ (६२१)
अग्नयेऽनुब्रू ३ हि[2]—	८।२।९१ (३६१०)
अग्नये स्वाहा (वा. सं. १०।५)	(५८३)
अग्ना[3] ३ इ पत्नीवा ३: (तै. सं. १।४।२७।१)	८।२।१०७
अग्ना ३ इ वरुणो (?)	(३६२७)
अग्निः (ऋ. १।१।२)	(३७०८)
अग्निः पवित्रं स मा पुनातु (आपश्रौ. १२।१९।६)	३।२।१८६ (३१६७)
अग्निः प्रथमो वसुभिर्नो अव्यात् (तै. सं. २।१।११।२)	६।१।११६
अग्निः प्रविद्वान् (अथ. ५।२६।१)	८।३।४९ (३६३४)
अग्निं चिक्यानः (तै. सं. ५।३।९।२)	३।२।१०६
अग्निं वै देवा विभाजं नाशक्नुवन् (मै. सं. १।६।४)	३।४।१२
(अग्निचयनमेव) अग्निचित्या (श. ब्रा. ६।६।१।१)	३।१।१३२
अग्निचिद्भाया ३ त् (?)	८।२।१०१ (३६२०)
अग्निभूत ३ इ (?)	८।२।१०० (३६१९; ३६२६)
अग्निमद्य[4] होतारमवृणीतायं यजमानः (वा. सं. २८।४५)	३।४।६ (३४२३)

---

१. का. श्रौ. (६।६।१९-२२, २४)—"स्वाहाकृतिभ्यः प्रेष्येति ॥१९॥ हुत्वा वपामभिधारयति पृषदाज्यं, ध्रुवां प्रथममाज्यभागौ चेत् ॥ २० ॥ अत्राज्यभागौ कुर्वन् ॥ २१ ॥ वशाया चरिष्यन्नुपस्तीर्य हिरण्यमवधाय वपामवद्यन्नाहेन्द्राग्निभ्यां छागस्य वपायै मेदसोऽनुब्रूहीति ॥ २२ ॥ आश्राव्याहेन्द्राग्निभ्यां छागस्य वपां मेदः प्रेष्येति ॥ २४ ॥"

२. मै. सं. (१।४।११)—"अग्नये समिध्यमानानुब्रूहि", श. ब्रा. (२।२।३।२१) "अग्नयेऽनुब्रूहि" इति दृश्यते।

३. वा. सं. (८।१०)—"अग्ना३इ पत्नीवन्" इति वर्तते।

४. शां. श्रौ. (५।२०।५)—"अग्निमद्य होतारमवृणीतामिमौ यजमानौ" इति दृश्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्निमा[1] ३ वह	८।२।९१ (३६१०)
अग्निमीळे (ऋ. १।१।१)	(३६६०; ३९३५)
अग्निमीळे पुरोहितम् (ऋ. १।१।१)	१।२।३६; (८)
अग्निरिव भायेात् (?)	८।२।१०१ (३६२०)
अग्निरीशे वसव्यस्य (ऋ. ४।५५।८)	४।४।१४०; ५।४।२५
अग्निरुज्ज्वलिति[2]	७।२।३४
अग्निर्ज्योतिर्निचाय्य[3]—	६।१।३५ (३५११)
अग्निर्देवेभिः (ऋ. ३।३।६)	(३५५८)
अग्निर्मणिवको भायात् (?)	८।२।१०१ (३६२०)
अग्निर्मूर्धा दिवः ककुत् (ऋ. ८।४४।१६)	१।२।३४ (३६६३)
अग्निर्हि अग्ने उदजयत्—	८।१।३५
अग्निर्हिमवतस्परि[4]—	८।३।५१
अग्निवायू—	६।३।२६
अग्निश्च हव्यवाहनः (अथ. ७।२०।१)	३।१।६६ (३४१२)
अग्निष्टद्विश्वम् (ऋ. १०।२।४)	८।३।१०९ (३६४०)
अग्निष्टेऽग्रम्[5]	८।३।१०४
अग्निष्टे विश्वमानय—	८।३।१०१
अग्निष्टोम आलभ्य (मै. सं. ३।९।५)	७।१।६५
अग्निष्ट्वम् नामासीत्—	८।३।१०१
अग्निष्ट्वा (वर्धयामसि) (मै. सं. १।२।१७)	८।३।१०१
अग्निस्तत् (तै. सं. ३।२।५।४)	८।३।१०२
अग्निस्तेऽग्रम् (माश्रौ. २।३।२।१३; तै. सं. ३।५।६।२)	८।३।१०४
अग्नीदग्नीन् विहर बर्हिस्तृणीहि[6]	८।२।९२
अग्नीन् विहर (तै. सं. ६।३।१।२)	८।१।१०४
अग्नीवरुणौ (श. ब्रा. ४।४।५।१७)	६।३।२७

१. तै. ब्रा. (३।५।३।२)—"अग्निमावह" इति प्राप्यते ।
२. तै. सं. (५।४।१।३)—"अग्निश्चितो ज्वलति" इति दृश्यते ।
३. वा. स. (११।१)—"अग्नेर्ज्योतिर्निचाय्य" इति वर्तते ।
४. अथ. (४।९।९; ५।४।२; १९।३९।१)—"हिमवतस्परि" इत्येव दृश्यते; न तु काशिकावदानुपूर्वी ।
५. तै. सं. (३।५।६।२)—"अग्निष्टेग्रम्" इत्युपलभ्यते ।
६. तै. सं. (६।३।१।२)—"अग्नीदग्नीन् विहर बर्हिस्तृणाहि" इति पाठः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्नीषोमीयम् (तै. सं. १।८।१।१)	४।२।३२
अग्नीषोमौ (वा. सं. २।१५)	६।३।२७
अग्नीषोम्यम्—	४।२।३२
अग्ने गृहपते (वा. सं. ३।३९)	८।१।७३
अग्ने तव (ऋ. १।१०५।१३)	(४१२)
अग्ने तेजस्विन् (तै. सं. ३।३।११।१)	५।२।१२२; (३६५४)
अग्ने त्रातः ऋतस्कविः (ऋ. ८।६०।५)	(३६३४; ३६५४)
अग्ने नय (ऋ. १।१८९।१)	(४१२)
अग्ने रक्षा णः (ऋ. ७।१५।१३)	८।४।२७ (३६४९)
अग्ने राथो नृतमस्य प्रभूतौ (ऋ. ३।१९।३)	(३७८४)
अग्रियः (ऋ. १।१६।७)	(३४६३)
अग्रियम् (ऋ. १।१३।१०)	४।४।११७
अग्रीयः—	(३४६३)
अग्रीयम् (मै. सं. २।७।१३)	४।४।११७
अग्रेगाः (तै. सं. १।३।६।१)	(३४१३)
अग्रेगा[1] उन्नेतृणाम्	३।२।६७; ६।४।४१
अग्रेयावा (मै. सं. ४।१४।९)	३।२।७५
अग्र्यः (पै. सं. ६।१।८)	(३४६३)
अग्र्यम् (ऋखि. १।३।७)	४।४।११७
अघायुः (अथ. १९।४९।९)	(३४१९)
अघ्न्ये देवि सरस्वति—	(३६५४)
अघ्न्ये[2] देवि सरस्वति इडे काव्ये विहव्ये	८।१।७३
अङ्ग कूज ३ इदानीं ज्ञास्यसि जाल्म (?)	८।२।९६ (३६१५)
अङ्ग देवदत्त मिथ्या वदसि (?)	८।२।९६ (३६१५)
अङ्ग पच (?)	८।२।९६ (३६१५)
अङ्गाधीष्व (ओदनं) भक्तं तव दास्यामि (?)	८।२।९६ (३६१५)
अङ्गिरस्वदङ्गिरः (ऋ. १।३१।१७)	(३३८९)

---

१. अत्र काशिकाया हैदराबादसंस्करणे तै. सं. उल्लेखः। परं तै. सं. (१।३।६।१) —"अग्रेगा नेतृणाम्" इति पाठः।

२. काशिकायामत्र भाष्यानुसारी पाठः। भाष्ये—"अघ्न्ये देवि सरस्वति इडे काव्ये विहव्ये एतानि ह्यघ्ने नामानि" इति दृश्यते। तुलनार्थं वा. सं. ८।४३; तै. सं ७।१।६।८; पदमञ्जरी ८।१।७३ दृष्टव्या।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अच्छा ते—	६।३।१३६
अच्छा रवं प्रथमा जानती (ऋ. ३।३१।६)	(३७१६)
अजक्षीरेण जुहोति (तै. सं. ५।४।३।२)	६।३।६३
अजामेकां[1] जिन्वति	(३६७२)
अजा ह्यग्नेरजनिष्ट गर्भम् (तै. सं. ४।२।१०।४)	८।१।३५
अज्ञत वा अस्य दन्ताः (ऐ. ब्रा. ७।१४)	२।४।८० (३४०२)
अञ्जित्वाग्ने सनिसंसनिवांसम् (मा. श्रौ. १।३।४।२)	७।२।६६ (३५८३)
अञ्जिसक्थमालभेत—	६।२।१६६ (३६३३)
अण्डसूः—	३।२।६१
अतसं न शुष्कम् (ऋ. ४।४।४)	(३६६४)
अत्रा गौः—	६।३।१३३
अत्रा ते भद्रा (ऋ. १।१६३।५)	(३५३५)
अथो अरिष्टतातये (ऋ. १४।६०।८-१०)	(३४८६)
अथो त इन्द्रः केवलीर्विशः (ऋ. १०।१७३।६)	(४८८)
अथोऽमरत्—	३।१।५६
अदघात्योषधीषु (ऋ. ५।८३।१)	(३५३४)
अदरत्—	(३४०६)
अदरदर्थान्—	३।१।५६
अदुहत[2] (श. ब्रा. १।५।२।२०)	७।१।८
अदृश्रन्नस्य केतवः (अथ. १३।२।१८)	७।१।८
अदृश्रमस्य (ऋ. १।५०।३)	(३५५७)
अदृश्रमस्य केतवः (ऋ. १।५०।३)	७।१।८
अद्य[3] श्वो विजनिष्यमाणाः पतिभिः सह शयान्तें—	७।२।३; ८
अद्यामावास्येत्याह ३ (?)	८।२।६४ (३६१३)
अद्या ममार (ऋ. १०।५५।५)	३।४।६ (३४२३)
अधः स्विदासीत् (ऋ. १०।१२६।५)	८।२।१०२ (३६२१)
अधा शतक्रतवः—	७।३।१०६

१. अथ. (८।६।१३)—"प्रजामेका जिन्वत्यूर्जमेका राष्ट्रमेका रक्षति देवयूनाम्" इत्युपलभ्यते। अत्र मै. सं. (२।१३।१०) 'राष्ट्रम्' इत्यस्य कृते 'क्षत्रम्' इति वर्तते।

२. न्यासानुसारीदं वचनम्।

३. वासि. धर्म. (१२।२४)—"अपि नः श्वो विजनिष्यमाणाः पतिभिः सह शयीरन् इति स्त्रीणामिन्द्रदत्तो वर इति"।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अधा शतक्रत्वो यूयम् (ऋ. १०।९७।२)	(३५८६)
अधा स वीरैर्दशभिर्वियूया (ऋ. ७।१०४।१५)	(३४३३)
अधा स्वश्वाः (ऋ. ७।५६।१)	(३८५३)
अधिपतिवती जुहोति—	८।२।१५
अधोऽग्रे—	६।१।१२०
अधोऽग्रे रुद्रे—	(३५२३)
अध्यस्यां मामकी तनू इति (पै. सं. १।६।८)	१।१।१९
अध्वर्यन्तः (वा. सं. १७।५६)	७।४।३९
अध्वर्युः वा मधुपाणिम् (ऋ. १०।४१।३)	(३५९२)
अध्वर्युभिः पञ्चभिः (ऋ. ३।७।७)	(३६८३)
अध्वर्यो अद्रिभिः सुतम् (ऋ. ९।५१।१)	६।१।११५
अनड्वान् दाधार (अथ. ४।११।१)	६।१।७
अनर्वाणं वृषभं मद्रजिह्वम् (ऋ. १।१९०।१)	६।४।१।२७
अनुत्तमा ते मघवन् (ऋ. १।१६५।९)	८।२।६१
अनुप्रहरेद् यूपा ३ इ (?)	८।२।९७
अनुभ्राता सगर्भ्यः (वा. सं. ४।२०; ६।९)	४।४।११४ (३४६०)
अनुपग्जुजोषत (ऋ. ४।४।१०)	(३५८६)
अनुष्ठ्यो च्यावयतात् (ऐ. ब्रा. २।६)	७।१।३९
अनुसखा सयूथ्यः (वा. सं. ४।२०; ६।९)	४।४।११४ (३४६०); ६।३।८४
अनृक्षरा ऋजवः सन्तु पन्थाः (ऋ. १०।८५।२३)	७।१।३९
अनृतं[1] हि मत्तो वदति	८।१।३५
अन्तरिक्षसत् (ऋ. ४।४०।५)	३।२।६१
अन्तरिक्षाद् दिवमारुहम् (अथ. ४।१४।३)	३।१।५९
अन्तरेवोष्माणं वारयध्वात् (ऐ. ब्रा. २।६)	७।१।४२ (३५६४)
अन्तितो न दूरात् (ऋ. २।२७।१३)	६।४।१४९
अन्नादाय (वा. सं. ३।५, ६३; २०।३)	(३४३३)
अन्वग्निरुषसामग्रमख्यत् (वा. सं. ११।१७)	६।१।११५
अन्वा पनीफणत् (ऋ ४।४०।४)	(३५९६)

---

१. काठ. सं. (१४।५), मै. सं. (१।११।५)—"अनृतं हि मत्तः" इत्येवोपलभ्यते। कदाचिद् वाक्यान्ते काशिकायां 'वदति' इति पदं प्रक्षिप्तं भवेत्। तुलना—V. P. Limaye, *CCSM*, p. 186.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वेतवा उ (ऋ. १।२४।८) (३७८५)
अन्वेतवै (ऋ. १।२४।८) ३।४।१४; ६।२।५१
अपकर्तोः[1] (३४४३)
अपत्यं परिपन्थिनम् (ऋ. १।४२।३) (३४९७)
अपरिह्वृताः सनुयाम वाजम् (ऋ. १।१००।१९) ७।२।३२ (३५८०)
अपलुपं नाशक्नुवन्[2] ३।४।१२ (३४३९)
अपशवो वा अन्ये गोअश्वेभ्यः (तै. सं. ५।२।९।४) ६।१।२२२
अपां त्वा एमन्— ६।१।९४
अपां त्वा ओद्मन्— ६।१।९४
अपां त्वेमन् (वा. सं. १३।५३) ६।१।९४; (३५१६)
अपां त्वोद्मन् (वा. सं. १३।५३) ६।१।९४; (३५१६)
अपांनप्त्रीयः (काठ सं. १२।६) ४।२।२८ (१२३०)
अपां फेनेन (ऋ. ८।१४।१३) (३७१७)
अपां रेतांसि जिन्वति (ऋ. ८।४४।१६) ५।२।८९ (३६०८)
अपामोषधीनां रोहिष्यै (तै. सं. १।३।१०।२) ३।४।१०
अपा वृधि (ऋ. १।७।६) ६।४।१०२ (३५५१)
अपोनप्त्रियं हविः[3] ४।२।२७ (१२२९)
अपोनप्त्रीयं हविः[4] ४।२।२८ (१२३०)
अप्यत्र[5] सूतग्रामणीनाम् ७।१।५६
अप्स्वग्ने अधिष्टव (ऋ. ८।४३।९) ८।३।१०१ (३६४०)
अब्जाः गोजाः (ऋ. ४।४०।५) १।१।७०; ३।२।६७ (३४१३); ६।४।४१
अभिचष्टे अनृतेभिः (ऋ. ७।१०४।८) (३७३०)
अभिरूपक ३ अभिरूपक रिक्तं ते आभिरूप्यम् (?) ८।२।१०३ (३६२२)
अभि वृवे गृणीतः (ऋ. ३।६।१०) (३७३०)
अभिहर ३ अभिहर (?) ८।२।९२

१. काठ. सं. (३१।१५)—"अपाकर्तोः" इति दृश्यते। अतः सिद्धान्तकौमुद्याम-शुद्धः पाठः प्रतीयते।

२. मै. सं. (१।६।५)—"अपलुम्पं नाशक्नोत्" इति दृश्यते।

३. शां श्रौ. (१३।२९।१२)—"अपोनप्त्रियं चरुम्" इति प्राप्यते।

४. तै. सं. (२।३।१२।२)—"अपोनप्त्रीयं चरुम्" इति प्राप्यते।

५. काठ. सं. (२८।३)—"अपि तत्र सूतग्रामणीनाम्" इति पाठः; शां. श्रौ. (१६।१।१६)—"सूतग्रामणीनाम्" इति प्राप्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभी षु णः (ऋ. ४।३१।३)	(३६४४; ३६४९)
अभी षु णः सखीनाम् (ऋ. ४।३१।३)	६।३।१३४ (३५३६); ८।३।१०५; ८।४।२७
अभैषीर्ता पुत्रका (?)	७।३।९३
अभ्यभि हि (ऋ. ९।११०।५)	(३६५७)
अभ्यमिति[1] वरुणः—	७।२।३४
अभ्यष्टौत् (जै. ब्रा. ३।७३)	(३६४७)
अभ्यस्तौत् (अ. अ. २।२३)	(३६४७)
अभ्युत्सादयामकः (मै. सं. १।६।५)	३।१।४२ (३४०३)
अभ्यूर्णवाना प्रभूथस्यायोः (ऋ. ५।४१।१९)	फि. १।७—सि. कौ.
अभ्र आँ अपः (ऋ. ५।४८।१)	१।१।५; १।३।२; ६।१।१२६ (२५२५)
अभ्रातेव पुंसः (ऋ. १।१२४।७)	(३७१७)
अभ्रियस्येव घोषाः (ऋ. १०।६८।१)	४।४।११८
अमरत्—	(३४०६)
अमावास्यायां निशि यजेत—	६।१।६३
अमित्रमर्दय (ऋ. ८।७५।१०)	(३८५०)
अम्न[2] एव	८।२।७० (३६०४)
अम्नरेव—	८।२।७० (३६०४)
अम्ब (वा. सं. ६।३६)	७।३।१०९
अम्बे (वा. सं. २३।१८)	७।३।१०९
अम्बे अम्बाले अम्बिके[3]	६।१।११८ (२५२१)
अयं ते योनिर्ऋत्वियः (ऋ. ३।२९।१०)	५।१।१०६
अयं पन्थाः (ऋ. ४।१८।१)	(३६८७)
अयं वां कृष्णो अश्विना (ऋ. ८।८५।३)	फि. १।१२—सि. कौ.
अयं वाव हस्त आसीत् (काठ. सं. ३६।७)	८।१।६४ (३९७१)
अयं सो अग्निः (ऋ. ३।२२।१)	६।१।१२० (३५२३)

---

१. वा. सं. (२२।५)—"तमभ्यमीति वरुणः" इति दृश्यते।

२. मै. सं. (१।६।१०)—"अम्ण एव" इति पाठः।

३. काशिकासिद्धान्तकौमुदीप्रदत्तमुदाहरणस्वरूपमनुपलब्धमूलकम्। परं वा. सं. (२३।१८)—"अम्बे अम्बिकेऽम्बालिके"; तै. सं. (७।४।१९।१)—"अम्बे अम्बाल्यम्बिके"; मै. सं. (३।१२।२०)—"अम्ब्यम्बिके अम्बालिके" इत्युपलभ्यन्ते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अयं सो अध्वरः—	६।१।२० (३५२३)
अयं स्रुवोऽभिजिहर्ति होमान् (आपश्रौ. ४।७।२)	(२५०३)
अयः पात्रम्—	८।३।४६
अयज्ञो वा एषः (तै. सं. १।५।७।१)	(३७३६)
अयमग्निः सहस्रियः[1]	४।४।१३५
अयमग्ने जरिता (ऋ. १०।१४२।१)	(३६५६)
अयस्पात्रम्—	८।३।४६
अयस्मयं वर्म (पै. सं. १।३७।५)	१।४।२०
अयस्मयानि (पात्राणि)[2] (आपश्रौ. ६।११।१४)	१।४।२०
अयस्यो वसानाः[3]	५।४।२५
अरिष्टतातिः (ऋ. १०।६०।८)	४।४।१४३; ४।४।१४४ (३४६०)
अर्कमानृचुः (ऋ. १।१६।४)	(३५१२)
अर्चिभिष्टतक्षुः—	८।३।१०४ (३६४१)
अर्चिभिष्ट्वम् (वा. सं. १२।३२)	८।३।१०४ (३६४१)
अर्चिभिस्ततक्षुः—	८।३।१०४
अर्चिभिस्त्वम्—	८।३।१०४ (३६४१)
अर्धर्चः (तै. सं. ६।३।११।३)	२।४।३१ (८१६)
अर्धर्चम् (तै. सं. २।५।७।४)	२।४।३१ (८१६)
अर्पितं पितृणाम्—	६।१।२१०
अर्पितः (ऋ. ६।५८।२)	६।१।२०६
अर्पिता षष्टिर्न चलाचलासः (ऋ. १।१६४।४८)	(३६६८)
अर्लति दक्ष उत (ऋ. ८।४८।८)	७।४।६५ (३५६६)
अर्लषि (ऋ. ८।१।७)	७।४।६५
अर्लषि युध्म खजकृत्पुरन्दरः (ऋ. ८।१।७)	(३५६६)
अव एव—	८।२।७० (३६०४)
अवगाहे[4]	(३४४१)

१. वा. सं. (१५।५२), तै. सं. (४।७।१३।४)—"अयमग्निर्वीरतमो वयोधाः सहस्रियः" इति वर्तते।

२. कौ. सू. (८१।१८)—"अयस्मयानि निदधति" इति पाठः।

३. मै. सं. (२।६।८)—"अप ३ स्यो वसाना"; वा. सं. (१०।७)—"अपस्यो वसानाः" इति पाठः।

४. मै. सं. (३।६।६)—"अवगाहेत"; पै. सं. (७।१३।११)—"अवगाहन्ते" इति दृश्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवयाः (ऋ. १।१७३।१२) ८।२।६७ (३४१६); (३४१५)
अवयाजः । अवयाजौ । (३४१५)
अवरेव — ८।२।७० (३६०४)
अवलुम्पं नाशक्नोत् (मै. सं. १।६।५) ३।४।१२
अविनीतक ३ अविनीतक इदानीं ज्ञास्यसि जाल्म (?) ८।२।१०३ (३६२२)
अवियोना दुरस्युः— ७।४।३६
अवीवृधत् पुरोडाशेन (वा. सं. २८।२३, ४६) ७।४।८ (३५८७)
अव्यथिष्यै (काठ. सं. ३।७) ३।४।१० (३४३७)
अश्नन्नन्यो अभिचाकशीति (ऋ. १।१६४।२०) ८।१।६५
अश्वत्थामा— ३।२।७४
अश्वा भरत [1] वाजिनः ६।३।१३५
अश्वायन्तो मघवन् (ऋ. ७।३२।२३) ७।४।३७ (३५९०)
अश्वावतीं सोमावतीम् (ऋ. १०।९७।७) (३५३३)
अश्वावती (अथ. ३।१२।२) ६।३।१३१
अश्विना (ऋ. १।३।१–२) (३५६१)
अषाढा (तै. सं. ४।४।१०।२) ४।३।३४ (१४०८)
अष्टसु [2] प्रक्रमेषु ब्राह्मणोऽग्नीन् आदधीत ६।१।१७२
अष्टापदी (ऋ. १।१६४।४१) (३५३२)
अष्टापदी देवता सुमती— ६।३।१२६
अष्टाभिर्दशभिः (ऋ. २।१८।४) (३७१८)
अष्टा हिरण्या दक्षिणा— ६।३।१२६
अष्टौ पत्नीसंयाजा भवन्ति— ७।३।६२
अष्ट्रावी (ऋ. १०।१०२।८) ५।२।१२२
असिक्नी (अथ. १।२३।१) ४।१।३९; (४९६)
असि सत्यः (ऋ. १।८७।४) (३६७१)
असुर्यं देवेभिर्धायि विश्वम् (ऋ. ६।२०।२) (३४६९)
असुर्यं वा एतत् पात्रम् ·· (मै. सं. १।८।३) ४।४।१२३

१. इदं वचनं वा. सं. (९।६)—"अश्वा भवत वाजिनः" इति रूपेण प्राप्यते। परन्तु तै. सं. (१।७।७।२), काठ. सं. (१३।४), अथ. (१।४।४; १९।२।४) —"अश्वा भवथ वाजिनः" इति रूपेण वर्तते।

२. आपस्तम्बशुल्वसूत्रे (चतुर्थखण्डे, पृ. ६३)—"अष्टासु प्रक्रमेषु ब्राह्मणोऽग्निमादधीत" इति प्राप्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्तु श्रौ ३ षट्[1]	८।२।९१ (३६१०)
अस्थन्वन्तं यदनस्था बिभर्ति (ऋ. १।१६४।४)	७।१।७६; ८।२।१६ (३६०१)
अस्थान्युत्कृत्य जुहोति —	७।१।७६
अस्मभ्यं तद्धर्यश्च प्र यन्धि (ऋ. ३।३६।९)	६।४।१०३
अस्मारक्षः संसृजात्[2]	७।१।४४
अस्मे इन्द्राबृहस्पती (ऋ. ४।४९।४)	१।१।१३ (१०२); ७।१।३९ (३५६१)
अस्मे प्र यन्धि (ऋ. ३।३६।१०)	(३५५३)
अस्य श्लोको दिवीयते (ऋ. १।१९०।४)	(३६५९)
अहं तेभ्योऽकरं नमः[3] (वा. सं. १६।८)	३।४।६ (३४२३)
अहं द्यावापृथिवी आ ततान[4]	३।२।१०५, १०६ (३४१९)
अहं सूर्यमुभयतो ददर्श (वा. सं. ८।९)	३।२।१०५; १०६; १०७
अहन्नहिम् (ऋ. १।३२।२)	८।३।९
अहमेव पशूनामीशे (काठ. सं. २५।१)	३।४।८ (३४३१); ३।४।९६ (३७१७)
अहरहर्जायते मासिमासि (ऋ. १०।५२।३)	७।३।९७
अहरेवासीन्नरात्रिः[5]	८।१।६४ (३९७१)
अहर्वै देवानामासीत् (काठ. सं. ७।६)	१।२।३७; २।३।६२ (३४००)
अहल्यायै जारः (श. ब्रा. ३।३।४।१८)	२।४।७३
अहिः शयत उप पृक् पृथिव्याः (ऋ. १।३२।५)	८।३।५१
अहिः शयते (ऋ. १।३२।५)	८।२।९८ (३६१७)
अहिरिव भोगैः पर्येति बाहुम् (ऋ. ६।७५।१४)	
अहिर्नु ३ रज्जुर्नु (?)	

१. ऋ. (१।१३९।१)—"अस्तु श्रौषट्" इति प्लुतिरहितः पाठः। अस्य कृते प्रातिशाख्यग्रन्था द्रष्टव्याः।

२. ऐ. ब्रा (२।७)—"अस्ना रक्षः संसृजात्" इति पाठः।

३ काशिकासिद्धान्तकौमुद्योः केषुचित् संस्करणेषु "इदं तेभ्योऽकरं नमः" इति पाठः। स तु मै. सं. (२।९।२) उपलभ्यते।

४ तै. ब्रा. (१।२।१।२३)—"अनु द्यावापृथिवी आ ततान" इति पाठः।

५ मै. सं. (१।५।१२)—"अहर्वाव तर्ह्यासीन्न रात्रिः—इति दृश्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहोरात्राणि वै वरूत्रयः (श. ब्रा. ६।५।४।६)	७।२।३४
अहोरात्रे (अथ. १।१६।५)	(३३९९)
अहोरात्रे इदं ब्रूमः (अथ. १।१६।५)	२।४।२८
अह्नुतमसि हविर्धानम् (वा. सं. १।९)	७।२।३१ (३५७९)
आख्यास्यामि तु ते—	८।१।५६
आग्नावैष्णवं[1] चरुं निर्वपेत्	६।३।२८
आग्निमारुतं कर्म क्रियते—	६।३।२८; ७।३।२१
आग्निमारुतीमनड्वाहीमालभेत[2]	७।३।२१
आग्निवारुणीमनड्वाहीमालभेत (काठ. सं. १३।६)	६।३।२८; ७।३।२३ (१२४१)
आग्नेन्द्रः (गो. ब्रा. २।१।१७)	६।३।२८; ७।३।२२
आग्नेयमष्टाकपालं[3] निर्वपेत् (तै. सं. २।२।५।५)	१।१।६८; ६।३।१२६
आग्नेयो वै ब्राह्मणो देवतया—	(१२२६)
आग्नेयोऽष्टाकपालः (काठ. सं. ८।१०)	४।२।३३
आजुह्वान ईड्यो वन्द्यश्च (ऋ. १०।११०।३)	(३७०२)
आण्डा[4] शुष्णस्य भेदति (ऋ. ८।४०।११)	३।१।८५ (३४३३)
आ तनुहि यातुधानान्[5]—	६।४।१०६
आतमितोः (तै. ब्रा. १।४।४।२)	(३४४३)
आतमितोरासीत् (तै. ब्रा. १।४।४।२)	३।४।१६
आ तू न इन्द्र (ऋ. १।१०।११ इत्यादिषु)	(३५३५)
आ तू न इन्द्र वृत्रहन् (ऋ. ४।३२।१)	६।३।१३३
आ ते पितर्मरुताम् (ऋ. २।३३।१)	(३६५६)
आत्तामद्य मघ्यतो भेद उद्भृतम् (वा. सं. २१।४३)	२।४।३९
आ दध्रिकाः शवसा पञ्च कृष्टीः (ऋ. ४।३८।१०)	(३४१३)

---

१. तै. सं. (२।२।९।३)—"आग्नावैष्णवं घृते चरुं निर्वपेत्" इत्युपलभ्यते।

२. संहिताग्रन्थेषु मै. सं. (२।५।५)—"आग्निमारुतीं पृश्निमालभेत" इत्येवोपलभ्यते।

३ तै. सं. (१।८।२)—"आग्नेयमष्टाकपालं निर्वपति" इत्युपलभ्यते।

४. काशिकासिद्धान्तकौमुद्योः केषुचित् संस्करणेषु 'शुष्णस्य' स्थाने 'शुष्मस्य' इति दृश्यते।

५. पै. सं. (१९।३१।२)—"दर्शय मा यातुधानान् दर्शय यातुधान्यः" इति दृश्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आदशभिर्विवस्वतः (ऋ. ८।७२।८)	(३६८३)
आ दह स्वधामनु पुनगर्भत्वमेरिरे (ऋ. १।६।४)	(३९४६)
आदित्यान् याचिषामहे (ऋ. ८।६७।१)	(३६३१)
आदित्यान्[1] हवामहे	८।३।९
आ देवान्[2] वक्षि यक्षि च (वा. सं. १७।८)	६।३।१३५
आद्रे चर्मन्[3]	७।१।३९
आधेनवो धुनयन्तामशिश्वीः (ऋ. ३।५५।१६)	(५१७)
आनक्—	६।४।७३
आनट् (ऋ. १।७१।८)	(३५४५)
आनाय्यो दक्षिणाग्निः—	३।१।१२७
आनुष्टुभः (तै. सं. ७।४।४।१)	४।२।५५
आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् (ऋ. ३।६२।१६)	६।१।७९
आन्त्रेभ्यस्ते गुदाभ्यः (ऋ. १०।१६३।३)	फि. १।४—सि. कौ.
आप[4] वेदं सलिल सर्वमाः	७।३।९३; ८।२।७३
आपनीफणत् (ऋ. ४।४०।४)	७।४।६५
आपृच्छ्यं धरुणं वाज्यर्षति (ऋ. ९।१०७।५)	(३४०७)
आपृच्छ्य (ऋ. १।६०।२)	३।१।१२३
आपो अस्मान्मातरः (ऋ. १०।१७।१०)	६।१।११८ (३५२१)
आप्यानश्चन्द्रमाः—	६।१।२८
आ प्रा द्यावापृथिवी अन्तरिक्षम् (१।११५।१)	२।४।८० (३४०२)
आभिष्टे (ऋ. ४।१०।४)	(३६४०)
आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः (ऋ. ३।४५।१)	१।४।८२; ८।१।७० (३९७७)
आमयावी (तै. सं. ३।२।३।३)	५।२।१२२
आ मा गन्तां पितरा मतरा च (वा. सं. ९।१९)	६।३।३३ (३५२८)
आ य इन्द्रावरुणौ (ऋ. ६।६८।१)	(३८७५)

---

१ ऋ (८।६७।१)—"आदित्यान् याचिषामहे"; (१०।६५।९)—"आदित्यो आदितिं हवामहे"; (१०।६६।४)—"आदित्यो अवसे हवामहे" इत्युपलभ्यन्ते।

२. ऋ. (२।३६।४)—"आ वक्षि देवाँ इह विप्र यक्षि च" इति पाठः।

३. तै. सं. (७।५।९।३) "आद्रे चर्मन्" इति वर्तते।

४ ऋ (१०।१२९।३) "सलिलं सर्वमा इदम्" इति वर्तते। श ब्रा. (११।१।६।१)—"आपो ह वा इदमग्रे सलिल मे" इति दृश्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आयवसे रमन्ते (तै. सं. ५।२।८।३)	५।४।२५
आ याहि (ऋ. ६।१६।१०)	१।४।८४
आयुनक् (ऋ. १।१६३।२)	६।४।७३
आयुष्मानेवि अग्निभूत ३ इ (?)	८।२।१०७ (३६२६)
आयेजे (ऋ. १।११४।२ इत्यादिषु)	६।४।१२०
आर्यकृती (मै. सं. १।८।३)	४।१।३० (४८८)
आ रेवानेतु नो विशः—	६।१।३७
आ रेवानेतु माविशत्—	८।२।१५
आवः (ऋ. १।३३।१४; आ वः—ऋ. ४।३४।५)	(३५४५)
आ वः शमं वृषभं तुग्रयासु (ऋ. १।३३।१५)	(३४६१)
आ वसथः (अथ. ९।६।७)	(३८७८)
आ वह देवान् यजमानाय (वा. सं. ५।१२)	८।२।९१
आ विजनितोः संभवामेति (तै. सं. २।५।१।५)	३।४।१६
आविश्वदेवं सत्पतिम् (ऋ. ५।८२।७)	(३८४०)
आविष्ट्यो वर्धते (ऋ. १।९५।५)	४।२।१०४; (३४४९)
आवेपे[1]—	६।४।१२०
आशिरं दुहे (ऋ. ३।५३।१४)	(३५१२)
आशीर्त्त[2] ऊर्जम्	६।१।३६
आशीर्वान् (ऋ. ८।९५।७)	८।२।१५
आश्रावयोति[3] चतुरक्षरमस्तु···छन्दस्यः (मै. सं. १।४।११)	(३४८६)
आ ३ श्रा ३ वय[4]	८।२।९२
आश्विनीरुपदधानि (श. ब्रा. ८।२।१।११)	४।४।१२६ (३४७२)
आश्वीनानि शतं पतित्वा (ता. ब्रा. २१।१।९)	५।२।१९
आषड्भिर्हूयमानः (ऋ. २।१८।४)	(३६८३; ३७२५)
आ संस्थातोर्वेद्यां[5] शेरते (काठ. सं. ११।६)	३।४।१६ (३४४३)
आसनि किं लभे मधूनि—	६।१।६३

---

१. इदं नोपलभ्यते। द्र. — L. RENOU, *JA*, 1953, p. 446.

२. अथ. (२।२९।३)—"आशीर्णं ऊर्जम्" इत्युपलभ्यते।

३. वा. सं. (१९।२४)—"आश्रावयेति स्तोत्रिया" इति।

४. वा. सं. (१९।२४)—"आ श्रावय" इति वर्तते। अवग्रहविषये श्रौत-प्रातिशाख्यादिग्रन्था द्रष्टव्याः।

५. काशिकासिद्धान्तकौमुद्योः केषुचित् संस्करणेषु "आ संस्थातोः (वेद्यां) सीदन्ति" इति लेखः। स चानुपलब्धः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आ सनिष्यदत्—	७।४।६५
आसन्यं प्राणमूचुः (बृह. उप. १।३।७)	(२३७)
आ साविषदर्शसानाय (ऋ. १०।९९।७)	(३४२७)
आसिक्तऽस्नावरोहति—	६।१।६३
आसुतिं करिष्ठः (ऋ. ७।९७।७)	५।३।५९; ६।४।१५४ (३५०१)
आसुरी माया (वा. सं. ११।६९)	(३४७०)
आसुरी[1] वै दीर्घजिह्वी देवानां यज्ञवाट्	(३३४८)
आ हि रुहतम् (ऋ. ८।२२।९)	(३९४१)
आ हि ष्मा याति (४।२९।२)	(३९४१)
आहुवध्यै (ऋ. ६।६०।१३)	(३४३६)
आ होतोरप्रमत्तस्तिष्ठति (तै. ब्रा. १।४।९।५)	३।४।१६
इज्यभान[2]	(३५१५)
इडस्पदे समिध्यसे (ऋ. १०।११९।१)	८।३।५३
इडायाः पतिः—	८।३।५४
इडायाः पदम्—	८।३।५४
इडायाः पदे (ऋ. पदपाठः ३।२३।४)	(३६३९)
इडायाः पयः—	८।३।५४
इडायाः पारम्—	८।३।५४
इडायाः पुत्रः (ऋ. पदपाठः ३।२९।३)	८।३।५४ (३६३९)
इडायामः पृष्ठम्—	८।३।५४
इडायाः पोषम्—	८।३।५४
इडायास्पतिः—	८।३।५४
इडायास्पदम् (वा. सं. ४।२२)	८।३।५४
इडायास्पदे (ऋ. ३।२३।४)	(३६३९)
इडायास्पयः—	८।३।५४
इडायास्पारम्—	८।३।५४
इडायास्पुत्रः (ऋ. ३।२९।३)	८।३।५४ (३६३९)
इडायास्पृष्ठम्—	८।३।५४

---

१. ऐ. ब्रा. (२।२२)—"आसुरी वै दीर्घजिह्वी देवानां प्रातःसवनमवालेट्' इत्युपलभ्यते।

२. शा. श्रौ. (१।१६।१०)—'इज्यभानाः" इति दृश्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इडायास्पोषम् —	८।३।५४
इतरमितरमण्डमजायत —	७।१।२६
इदं तर्हि —	८।३।२०
इदं तेभ्योऽकरं नमः[1] (मै. सं. २।६।२)	(३४०६)
इदानीम् (ऋ. १।३५।७)	५।३।२०
इदावत्सरीयः[2]	५।१।६१; ५।३।२०
इदा हि व उप स्तुतिम् (ऋ. ८।२७।११)	(३४६६)
इद्वत्सरीयः[3]	५।१।६१ (३४६३)
इन्दवो वामुशन्ति हि (ऋ. १।२।४)	८।१।५६
इन्द्रं वाणीः (ऋ. १।७।१)	(३६६१)
इन्द्र आशाभ्यस्परि (ऋ. २।४१।१२)	फि. १।१८ — सि. कौ.
इन्द्र त्वास्मिन् त्सधमाद्ये (ऋ. ८।२।३)	(३५२६)
इन्द्रभूः[4] सप्तमः काश्यपानाम्	४।१।१०४
इन्द्र मरुत्व इह पाहि सोमम् (ऋ. ३।५१।७)	८।३।१ (३६२८)
इन्द्रमाहुव ऊतये (ऋ. १।१११।४)	(३५१०)
इन्द्र वाजेषु नोऽव (ऋ. १।७।४)	(३६७०)
इन्द्रवायू (ऋ. १।२।४)	६।२।१४२
इन्द्रश्च विष्णो यदस्पृधेथाम् (ऋ. ६।६६।८)	६।१।१३६ (३५१२)
इन्द्र साह्वः —	८।३।१
इन्द्राग्निभ्यां कं वृषणः (ऋ. १।१०६।३)	(३८७६)
इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य (काश्रौ. ६।६।२३)	२।३।६१
इन्द्राग्नी (ऋ. १।२१।४ इत्यादिषु)	६।२।१४२
इन्द्राग्नी आहुवध्यै (ऋ. ६।६०।१३)	३।४।६
इन्द्राग्नी हुवे (पै. सं. १५।२२।१)	६।१।३४

---

१. वा. सं. (१६।८) — "अहं तेभ्योऽकरं नमः" इति पाठः ।

२. काठ. सं (१३।१५) — "इदावत्सरीया" इत्युपलभ्यते ।

३. वा. सं. (२७।४५ — 'इद्वत्सरः', (३०।१५) — "इद्वत्सराय" इति दृश्यते ।

४. अत्र काशिकाया हैदराबादसंस्करणे वं. ब्रा. उल्लेखः । परं वंशब्राह्मणे काशिकावत् पाठो नास्ति । वं. ब्रा. (२।२२-२५) — "शवा अग्निभुवः काश्यपात् । अग्निभूः काश्यप इन्द्रभुवः काश्यपात् । इन्द्रभूः काश्यपो मित्रभुवः काश्यपात् । मित्रभूः काश्यपो विभण्डकात् काश्यपात् पितुः" इति पाठः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्रापूषणो[1]	६।२।१४२ (३८७६)
इन्द्राबृहस्पती (ऋ. ४।४९।५)	६।२।१४१; ६।३।२६
इन्द्राबृहस्पती वयम् (ऋ. ४।४९।५)	(३८७५)
इन्द्रावरुणौ (आपश्रौ. १९।२५।८)	६।२।१४१; ६।३।२६
इन्द्रासोमौ (बृदे. २।१०७; ४।८४ इत्यादिषु)	६।२।१४१; ६।३।२६
इन्द्रियावती (तै. सं. २।४।२।१)	६।३।१३१
इन्द्रियावान्मदिन्तमः (तै. सं. १।२।३।३)	(३५३३)
इन्द्रेण युजा तरुषेम वृत्रम् (ऋ. ७।४८।२)	३।१।८५ (३४३३)
इन्द्रो दधीचः (ऋ. १।८४।१३)	(३७१६)
इन्द्रो दधीचो अस्थभिः (ऋ. १।८४।१३)	६।१।१७०; ७।१।७६ (३५७५)
इन्द्रो बाहुभ्यामातरत्—	६।१।१२६
इन्द्रो[2] मा वक्षत्—	८।३।५९
इन्द्रो[3] वस्तेन नेषतु—	३।१।८५ (३४३३)
इन्धानो अग्निम् (ऋ. २।२५।१)	(३७०३)
इन्धे राजा (ऋ. ७।८।१)	(३७३०)
इभ्यान् क्षात्रियान्	८।३।९
इमं मे गङ्गे यमुने सरस्वति शुतुद्रि (ऋ. १०।७५।५)	१।२।३९–४०; ८।१।१९,७२ (४१२)
इम इन्द्राय सुन्विरे (ऋ. ७।३२।४)	३।४।११७
इमान् मे मित्रावरुणौ गृहान् जुगुपतं युवम् (मै. सं. १।५।१४)	३।१।५०
इयं ते नव्यसी मतिः (ऋ. ८।७४।७)	(३४२०)
इयं शुष्मेभिर्विसखा वारुजत् (ऋ. ६।६१।२)	(३४१३)
इयर्ति धूमम् (ऋ. १०।४५।७)	७।४।७७
इषे त्वोर्जे त्वा (वा. सं. १।१)	१।२।३६
इषो[4] मासः	४।४।१२८

---

१. ऋ. (१।१६२।२)—"इन्द्रापूष्णोः" इति वर्तते ।

२. अस्य मूलस्थानं नोपलभ्यते । द्र.—L. RENOU, *JA*, 1953, p. 448; अपि च V. P. LIMAYE. *CCSM*, p. 61.

३. अस्यापि मूलस्थानं न प्राप्यते । द्र.—V. P. LIMAYE, p. 170.

४. ऋ. (१।६५।७)—"इष्यान् राजा" इति दृश्यते ।

५. तै. सं. (१।४।१४।१)—"इषश्चोर्जश्च..." इति दृश्यते । तत्र 'मासः' इति पदं नास्ति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इष्टिः (ऋ. ४।४।७) ३।३।१६
इष्ट्वीनं देवान्— ७।१।४८ (३५७०)
ईड्यो नूतनैरुतः (ऋ. १।१।२) (३७०२)
ईदृङ् (वा. सं. १७।८१) ७।१।८३
ईश्वरोऽभिचरितोः[1] ३।४।१३
ईश्वरो विचरितोः— ३।४।१३ (३४४०)
ईश्वरो वितृदः— ३।४।१३
ईश्वरो विलिखः— ३।४।१३ (३४४०)
ईषा अक्षः (ऋ. ८।५।२९) ६।१।१२७
ईषा अक्षो हिरण्ययः (ऋ. ८।५।२९) (३५२५)
उक्थमिन्द्राय शंस्यम् (ऋ. १।१०।५; ५।३९।५) (३७०२)
उक्थशाः (ऐ. ब्रा. ३।१२; गो. ब्रा. २।३।१०) (३४१६)
उक्थशा (यजमानः) (तै. सं. ३।२।९।१) ३।२।७१ (३४१४)
उक्थशासः (ऋ. ४।२।१६; ७।१९।१) (३४१४)
उक्थशासौ— (३४१४)
उक्थ्यं शंसति[2] ५।४।२५
उक्षान्नाय वशान्नाय · आग्ना[3] ३ इ (ऋ. ८।४३।११) ८।२।१०७
उच्छिष्यः (मै. सं. ३।९।२) ३।१।१२३ (३४०७)
उत त्व पश्यन् (ऋ. १०।७१।४[1] फि. ४।७८—सि. कौ. (३४०८)
उत नो गोषणि धियम् (ऋ. ६।५३।१०) ६।३।१३३ (३५३५)
उत वा घा स्यालात् (ऋ. १।१०९।२) ७।२।३४
उत शंस्ता सुविप्रः (ऋ. १।१६२।५) (३५९४)
उत श्वेतं वसुधितिं निरके (ऋ. ७।९०।३) ४।१।३०
उता परीभ्यो मघवा विजिग्ये (ऋ. १।३२।१३) ७।२।३४ (३५८२)
उत्तानाया हृदयं यद् विकस्तम् (वा. सं. ११।३९) (३५६३)
उत्सं दुहन्ति (तै. ब्रा. ३।७।४।१६) ५।१।६७
उदक्या वृत्तयः— (३७८६)
उदञ्चनम् (ऋ. ५।४४।१३)

---

१. ऐ. आ. (१।१।१)—"ईश्वरोऽतिथिरेव चरितोः" इति लभ्यते।
२. ऋ. (१।३८।१४)—"गाय गायत्रमुक्थ्यम्" इति दृश्यते।
३. ऋ. (८।४३।११)—"आग्नये" इति प्राप्यते। प्लुतस्य कृते प्रातिशाख्यादिग्रन्था द्रष्टव्याः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उदधिं च्यावयाति[1] (तै. सं. ३।५।५।२)	३।१।३४; ३।४।७; ३।४।६४; ३।४।६७
उदुत्तमं वरुणः (ऋ. १।२४।१५)	(३६८१)
उदेतोः (काठ. सं. ८।३)	(३४४३)
उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् (वा. सं. १७।६४)	३।३।३५; ८।२।३५
उद्धृत्य[2] जुहोति	७।१।३८
उद्नो दिव्यस्य[3] नावाते—	६।१।६३
उद्वती च, उद्वा च—	५।२।१०६
उन्नीयः (श. ब्रा. ४।३।५।१६; १२।४।२।८)	३।१।१२३ (३४०७)
उपचाय्य—	३।१।१३१
उपचाय्यपृडम् (काठ. सं. ११।१)	३।१।१२३ (३४०७)
उप त्वाग्ने दिवेदिवे (ऋ. १।१।७)	(३७१७; ३७२७)
उप प्रयन्तो अध्वरम् (ऋ १।७४।१)	६।१।१२५ (३५१८)
उपयट—	(३४१७)
उपयट्त्वम्—	३।२।७३
उपयड्भिरध्वं वहन्ति—	३।२।७३
उपरिस्विदासी ३ त् (ऋ. १०।१२६।५)	८।२।१०२ (३६२१)
उपसत (तै. सं. ६।२।३।२)	६।२।३२
उपस्थेयं वृषभं[4] तुग्रियाणाम् (महाभाष्ये २।६५)	३।१।८६
उपस्थेयाम[5] शरणा बृहन्ता (ऋ. ६।४७।८)	३।४।११७
उपांशुयाजमन्तरा यजति (तै. सं. २।६।६।४)	७।३।६२
उपाध्यायं पदातिं गमयति (?)	८।२।१०४ (३६२३)
उपानही, उपानह्यौ—	६।१।१०६
उपोप मे परामृश (ऋ. १।१२६।७)	८।१।६ (३५६६)
उभयदत आलभेत—	५।४।१४२
उभयतोदतः[6] प्रतिगृह्णाति	(३५०७)

१. अस्य मूलस्थानं रनुमहोदयैर्न प्राप्तम् । द्र.—L. RENOU, *JA*, 1953, p. 448.
२. मै. उप. (६।२६)—"उद्धृत्य उदरेऽग्ने जुहोति" इति वर्तते ।
३. तै. सं. (२।४।८।२)—"उद्गो दिव्यस्य नो देहिशानोः" इति वर्तते ।
४. अस्य वैदिकवाङ्मये स्थानं न प्राप्यते । द्र.—L. RENOU, *JA*, 1953, p. 447.
५. केषुचित् काशिकासंस्करणेषु "उपस्थेयाम शरणं बृहन्तम्" इति लेखः ।
६. तै. सं. (२।६।२।२)—"उभयतोदतश्चेत्यृचमन्यूच्याऽऽज्यभागस्य जुषाणेन यजति ···तेनोभयदतो दाधार" इति दृश्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उभयावी[1]	५।२।१२२
उभा यन्तारौ—	७।१।३९
उरुणः कारः—	८।३।४९
उरुणस्कारः—	८।३।४९
उरुणस्कृधि (ऋ. ८।७५।११)	६।४।१०२ (३५५१); ८।३।५० (३६३५); ८।४।२७ (३६४९)
उरुया (मै. सं. २।७।८)	७।१।३९ (३५६१)
उरुव्यचाः (ऋ. १।१०४।९)	१।२।१
उरुष्याणः (ऋ. १०।७।१)	(३५३५)
उरो अन्तरिक्षं[2] (सजूरिति)	६।१।११७ (३५२०)
उर्विदा—	६।३।६३
उर्विया (ऋ. १।९२।९)	(३५६१)
उर्विया परिधानम्—	७।१।३९
उषासानवता (ऋ. १।१२२।२ इत्यादिषु)	६।३।३१
उषासासूर्यम्—	६।३।३१
ऊध एव—	८।२।७० (३६०४)
ऊधरेव—	८।२।७०. (३६०४)
ऊरुष्याणोऽग्नेः—	६।३।१३३
ऊर्जमेका रक्षति[3]	८।१।६५
ऊर्जो मासः[4]	४।४।१२८
ऊर्णमृदा पृथिवीं विश्वधायसम्[5]—	६।३।६३
ऊर्णायुः (जै. ब्रा. १७६–१७७)	५।२।१२३
ऊर्णासूत्रेण क्रवयो वयन्ति (वा. सं. १९।८०)	६।३।६३
ऊर्ध्व ऊ षु ण ऊतये (ऋ. १।३६।१३)	८।३।१३४; ८।३।१०५; ८।४।२७; (३६४४)

१. ऋ. (८।१।२)—"उभयाविन्"; अथ. (५।२५।९)—"उभयाविनम्" इति लेखः।

२. तै सं. (१।३।८।१); मै. सं. (१।२।१५)—"उरो अन्तरिक्ष सजूर्देवेन वातेन" इति पाठः। काशिकोद्धृतपाठस्तु अनुपलब्ध एव।

३. तै. सं. (४।३।११।१)—"ऊर्जमेका व्रतमेका रक्षति" ति।

४. तै. सं (१।४।१४।१)—"ऊर्जश्च सहश्च..." इति वर्तते। तत्र 'मासः' इति पदं नास्ति।

५. ऋ. (२।१७।५)—"अधारयत् पृथिवीं विश्वधायसम्"; अथ. (१८।३।४९)—"ऊर्णम्रदाः पृथिवी दक्षिणावत्" इति पाठः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऊर्वोरस्तु[1] मे जवः (पै. सं. २०।३६।७)	३।३।५६; (३४१६)
ऊवध्यगोहं पार्थिवं खनतात् (मै. सं. ४।१३।४)	७।१।४४
ऊवध्ये गोहम्—	७।१।४४
ऋजवः सन्तु पन्थाः (ऋ. १०।८५।२३)	(३५६१)
ऋजुबाहुः—	६।२।१६६
ऋतं देवाय कृण्वते सवित्रे (ऋ. २।३०।१)	(३७२०)
ऋतं[2] वक्ष्यामि नानृतम्—	८।२।६०
ऋतव्याः (तै. सं. ५।४।२।१)	(३४७१)
ऋतस्य योनौ सुकृतस्य (ऋ. १०।८५।२४)	(३८७६)
ऋताषाम्ह[3]—	८।२।१०६ (३६४६)
ऋतीमान्—	८।२।१५
ऋतीषाहम् (ऋ. १।६४।१५)	८।३।१०६ (३६४६)
ऋतुयाजैश्चरन्ति (गोब्रा. २।३।७; शाश्रौ. ७।८।१)	७।३।६२
ऋत्व्यम्[4]—	६।४।१७५
ऋभुक्षणम् (ऋ. १।१११।४)	(३५४१)
ऋभुक्षणामिन्द्रम् (ऋ. १।१११।४)	६।४।६
ऋभुक्षाण-(मिन्द्रम्)—	६।४।६ (३५४१)
ऋषभचर्मेऽभिषिञ्चति[5]	५।४।१०३
ऋषिमान्—	८।२।१५
एकतरं तिष्ठति—	७।१।२६
एकतरं पश्यति—	७।१।२६
एकदाम्नी—	४।१।२६
एकमूर्ध्नी (अथ. ८।६।१५)	४।१।२६
एकस्त्वष्टुरश्वस्या विशस्ता (ऋ. १।१६२।१६)	७।२।३४ (३५८२)
एकादशोपयाजाः (ऐ. ब्रा. २।१८)	७।३।६२
एको देवानुपातिष्ठत्—	८।१।६५ (३६७२)

१. काशिकासिद्धान्तकौमुद्योः केषुचित् संस्करणेषु—"ऊर्वो मे जवः" इति लेखः।

२. अथ. (४।६।७)—"सत्यं वक्ष्यामि नानृतम्" इति पाठः। 'सत्यम्' इत्यस्य स्थाने 'ऋतम्' इति काशिकाकृतं परिवर्तनम्।

३. बा. सं (१८।३८)—"ऋताषाट्" इति प्राप्यते।

४. पै. सं. (१६।२५।१४)—"ऋत्व्य नि" इति दृश्यते।

५. काठ. सं. (३७।३)—"ऋषभचर्मेऽध्यभिषिच्यते" इति; तै. ब्रा. (२।७।२।२)—"ऋषभचर्मेऽध्यभिषोञ्चति" इति दृश्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एता (ऋ. १।६९।४ इत्यादिषु) ४।१।३९ (४९६)
एता गा ब्रह्मबन्ध इत्यब्रवीत् (काठ. सं. १०।६) १।१।१६
एतास एतेऽर्चन्ति (ऋ. १।१६५।१) (३५१८)
एतेनाग्ने ब्रह्मणा (ऋ. १।३१।१८) (३६५६)
एनी (ऋ. १०।१२।३) ४।१।३९ (४९६)
एभिर्नृभिर्नृतमः (ऋ. ४।१७।११) (३७१७)
एभ्यो वा एतल्लोकेभ्यः प्रजापतिः समैरयत् (तै. सं. ५।१।२।६) ८।३।५१
एवं गौतम ब्रुवाण (श. ब्रा. ३।३।४।१८) १।२।३७
एवं विद्वानग्निहोत्रं जुहोति (तै. सं. १।६।९।१) (३६७५)
एत्रा ते (अथ. १।३।६) ६।३।१३६
एवा हि ते (ऋ. १।८।९) (३५३८)
एष[1] वै सप्तदशाक्षरश्छन्दस्यः प्रजापतिर्यज्ञो मन्त्रे विहितः— ४।४।१४०
एषस्य[2] ते मधु मां इन्द्र सोम ६।१।१३३
एषस्य भानुः (ऋ. ४।४५।१) (३५२६)
एषस्य वाजी क्षिपणिम् (ऋ. ४।४०।४) ६।१।१३३
एषा नेत्री (ऋ. ७।७६।७) (३७२०)
ऐन्द्रः प्राणोऽङ्गेऽङ्गे निदीध्यत् (वा. सं. ६।२०) ६।१।११९
ऐन्द्रः प्राणो अङ्गे अङ्गे अदीध्यत्— ६।१।११९
ऐन्द्रः प्राणो अङ्गे अङ्गे अशोचिषम्— ६।१।११९
ऐन्द्राग्नमेकादशकपालं[3] चरुं निर्वपेत् ७।३।२२
ऐन्द्रावारुणम् (काठ. सं.३४।१६) ७।३।२३
ऐ ३ तिकायन (?) ८।२।१०६ (३६२५)
ओजसीनमहः[4]— ४।४।१३० (३४७६)
ओजस्यमहः[5]— ४।४।१३० (३४७६)
ओजस्या तनूः (मै. सं. २।३।१) ४।४।१२८ (३४७४)
ओजायमानं यो अहिं जघान (ऋ. २।१२।११) ३।१।१११
ओमित्येकाक्षरम् (नारा. उप. ४) (३६०६)

१. वैदिकवाङ्मयेऽस्य स्थानं न प्राप्यते। द्र.—L. RENOU, *JA*, 1953, p. 459

२. ऋ. (९।९७।४७)—"एषस्य ते माधुमानिन्द्र सोम" इति पाठः।

३. तै. सं. (२।२।१।२)—"ऐन्द्राग्नमेकादशकपालं निर्वपेत्" इति प्राप्यते।

४. तै. सं. (४।४।१२।१)—"ओजसीना"; मै. सं. (३।१६।४)—"ओजसीने" इति दृश्यते।

५. मै. सं. (२।३।१), काठ. सं. (११।११)—"ओजस्या"; काठ. सं. (२२।१४)—"ओजस्ये" इति पाठः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ओमित्येतदक्षरमुदगीथमुपासीत् (छा. उप. १।१।१)	८।२।८७
(ओ ३ म्) अग्निमीळे पुरोहिम् (ऋ. १।१।१)	८।२।८७ (३६०६)
ओ श्रावय (मै. सं. १।४।११; ५९।२०)	८।२।९२ (३६११)
ओ श्रावय इति चतुरक्षम्···(मै. सं. १।४।११)	४।४।१४० (३४८६)
ओ ३ श्रा ३ वय—	८।२।९२ (३६११)
ओषधिपते—	६।३।१३२
ओषधिभिरपीपतत्—	६।३।१३२
ओष्ठाविव मधु (ऋ. २।३९।६)	फि. २।२९—सि.कौ.
औ३पगव (?)	८।२।१०६ (३६२५)
कटं करिष्यति हि (?)	८।२।९३ (३६१२)
कटं करोति ननु (?)	(३६१२)
कटं कुरु ३ ग्रामं गच्छ (?)	८।२।१०४ (३६२३)
कथंचिदाहुः (?)	८।२।१०१ (३६२०)
कथा ग्रामं न पृच्छसि (ऋ. १०।१४६।१)	५।३।२६ (३५००)
कथा दाशेम् (ऋ. १।७७।१)	(३५००)
कथा देवा आसन् पुराविदः—	५।३।२६
कद्रीची (ऋ. १।१६४।१७)	६।३।९२; (३५२८)
कद्रुश्च वै (तै. सं. ६।१।६।१)	(३४४९)
कद्रुश्च वै सुपर्णी च (तै. सं. ६।१।६।१)	४।१।७१
कनिक्रदज्जनुषम् (ऋ. २।४२।१)	(३५९६)
कनिक्रदत् (ऋ. २।४२।१)	७।४।६५
कनिष्ठ आह चतुर (ऋ. ४।३३।५)	फि.१।२२—सि. कौ.
कमण्डलूः—	(३४४९)
कया मती कुत एतास एतेऽर्चयन्ति (ऋ. १।१६५।१)	६।१।११५
करमाम—	३।४।९८
करवावः—	३।४।९८ (३४२८)
करवाव—	३।४।९८ (३४२८)
करवैते—	३।४।९५
करवैथे—	३।४।९५
करिक्रत् (ऋ. १।१३१।३)	७।४।६५ (३५९६)
करीकृष्यते—	(३५९५)
करीकृष्यते यज्ञकुणपः—	७।४।६४
करोषि पट ३ उ (?)	(३६२६)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्णाभ्यां चुबुकादधि (ऋ. १०।१६३।१)	फि. २।२६—सि. कौ.
कर्तवे (ऋ. ६।८६।२०)	३।४।६ (३४३६)
कर्तव्यम् (तै. सं. १।५।२।४)	(३७०८)
कर्त्वं हविः (अथ. १।४।३)	३।४।१४
कर्हि (ऋ. ६।३५।२, ३)	५।३।२१ (१६६६)
कवपथः[1]—	६।३।१०८ (३५३०)
कव्यन्तः सुमनसः—	७।४।३६
कव्यवाहनः (तै. सं. २।५।८।६)	(३४११)
कव्यवाहनः पितृणाम् (तै. सं. २।५।८।६)	३।२।६५
कव्योऽसि (मै. सं. १।२।१२)	५।४।२५
का ई मरे[2] पिशङ्गिला	६।१।१२७
काद्रवेयो मन्त्रमपश्यत् (तै. सं. १।५।४।१)	६।४।१४७
कापथः—	६।३।१०८ (३५३०)
काममर्दयीत्—	६।४।७५
काममा विजनितो सं भवामेति (तै. सं. २।५।१।५)	३।४।१६ (३४४३)
काममुपाचरध्यै[3]	३।४।६
काममूनयीत्[4]	३।१।५१; ६।४।७५
कायमेककपालं निर्वपेत् (मै. सं. ३।१५।१०)	४।२।२५
कालः पचति भूतानि (मै. उप. ६।१५)	३।३।१६७
किं नोदुदु हर्षसे (ऋ. ४।२१।६)	(३५६६)
किं नोदुदु हर्षसे दातवा उ (ऋ. ४।२१।६)	८।१।६
किकिदीविना (ऋ. १०।६७।१३	७।३।१०६
किकिदीव्या (मै. सं २।७।१३)	७।३।१०६
कीदृङ्डिन्द्रः (ऋ. १०।१०८।३)	(३५७७)
कीलालपाः (ऋ. १०।६१।१४)	३।४।७४ (३४१८)
कुण्डपाय्यः (ऋ. ८।१७।१३)	३।१।१३०
कुत्रचिदस्या सा दूरे क्व ब्राह्मणस्य चावकाः—	५।३।१३
कुपथः—	६।३।१०८ (३५३०)

१. ऋ. (५।३४।३)—"कवसखः" इति प्राप्यते।
२. वा. सं. (२३।५५)—"क ई मरे पिशङ्गिला" इति पाठः।
३. अत्र का. वृ. हैदराबादसंस्करणे तै सं. उल्लेखः। परं काशिकोद्धृतं वचनं कुत्रापि नोपलभ्यते।
४. ऋ. (१।५३।३)—"काममूनयीः" इति लभ्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमारिदा[1]—	६।३।६३
कुलुञ्चानां पतये नमः (वा. सं. १६।२२)	१।४।९
कुलुञ्चानां पत्ये नमः—	१।४।९
कुविदङ्ग आसन्[2] (ऋ. ७।९१।१)	(३९३७)
कुशिकासो अवस्यवः (ऋ. ३।४२।९)	६।१।११६ (३५१९)
कूपखाः—	३।२।६७
कूमनः—	६।३।१३३
कूमनाः[3]—	(३५३५)
कृण्वते (ऋ. २।३०।१)	(३७१९)
कृषन्निषत्फाल आशितम् (ऋ. १०।११७।७)	(३६९५)
कृष्णं वासो यजमानं परिधापयित्वा (काठ. सं ११।१०)	७।१।३८
कृष्णानां व्रीहीणाम् (तै. सं. १।८।९।१)	फि. १।११—सि.कौ.
कृष्णो नोनाव (ऋ. १।७९।२)	३।१।३५
कृष्णो नोनाव वृषभो यदीदम् (ऋ. १।७९।२)	{६।१।८; फि. १।११—सि. कौ.
कृष्णो[4] रात्र्यै (वा. सं. २४।३६)	२।३।६२
कृष्णोऽस्याखरेष्ठः (वा. सं. २।१)	६।३।२० (९७८)
केवली (पै सं. १६।२०।१)	४।१।३० (४८८)
क्रत्वे दक्षाय जीवसे (ऋ. १०।५७।४)	३।४।९
क्रमीं वृक्षस्य शाखाम्—	७।१।४०
क्व , नूनम् (ऋ. १।३८।२)	(३७२९)
क्व १ वोऽश्वाः (ऋ. ५।६१।२)	(८; ३६५८)
क्वावरं मरुतः (ऋ. १।१६८।६)	(३६५८)
क्षतृभ्यः सङ्गृहीतृभ्य. (वा. सं. १६।३६)	३।२।१३५
क्षये जागृहि प्रपश्यन्—	६।१।२०१
क्षीरं सर्पिमधूदकम् (ऋ. ९।६७।३२)	फि. २।३०—सि. कौ.
क्षीरमृध्यत आशीतः (ऋ. ८।२।९)	६।१।३६

---

१. ऋ. (८।३१।८)—"कुमारिणा"; काठ. सं. (३९।९)—"कुमारीदाः" इति दृश्यते।

२. सि. कौ. निर्दिष्टा इयमानुपूर्वी ऋग्वेदेऽनुपलब्धा।

३. मै. सं. (४।२।१३)—"सा प्रतिनुत्ता कुमना प्रतिष्ठद् ध्यायन्ती" इति दृश्यते।

४. तै. सं. (५।५।१५।१) "—ने रात्रियै" इति लेखः।

CC-0: Agamnigam Digital Preservation Foundation, Chandigarh.

क्षेत्रस्य पतिना वयम् (ऋ. ४।५७।१) (३३८९)
क्षेम्यस्य वस्यति[1]— ५।४।२५
खन्यः— ३।१।१२३ (३४०७)
खन्या[2]— ३।१।१२३
खान्यः[3]— ३।१।१२३ (३४०७)

गन्धर्वा अप्सरसो अदुह्र (मै. स. ४।२।१३) ७।१।८; ७।१।४१
गभीर आँ उग्रपुत्रे (ऋ. ८।६७।११) १।१।८; ६।१।१२६ (३५२५)
गमेम जानतो गृहान् — ३।१।८६
गम्भीरेभिः पथिभिः पूर्विणेभिः (काठ. सं. ९।६।१९) ४।४।१३३ (३४७९)
गत्यौ देशः — ५।१।६७
गर्दभेन संभरति (तै. सं. ५।१।५।५) ८।२।३५
गर्भं प्रथमं दध्र आपः (ऋ. १०।८२।५) ६।४।७६ (३५४७)
गर्भं माता सुधितम् (ऋ. १०।२७।१६) ७।४।४५
गर्भं माता सुधितं वक्षणासु (ऋ. १०।२७।१६) (३५९४)
गवां गोत्रमुदसृजो यदङ्गिरः (ऋ. २।२३।१८) ७।१।५७; ८।१।५६
गवां शता (ऋ. १।१२२।७) (२७२६)
गवां शता पृक्षयामेषु (ऋ. १।१२२।७) (३५७४)
गवामिव श्रियसे (ऋ. ५।५९।३) (३४३६)
गां मे देहि भोः (?) ८।२।९९ (३६१८)
(गात्रं) गात्रमस्यानूनं कृणुतात् (मै. सं. ४।१३।४) ७।१।४४ (३५६६)
गामस्य तदहः सभायां दिव्येयुः (मै. सं. १।६।११) २।३।६० (३३९५)
गार्मुतं[4] चरुम् (तै. सं. २।४।४।१) ४।३।१५१
गावः सोमस्य प्रथमस्य भक्षः (ऋ. ६।२८।५) (३६८१)
गिरिर्न विश्वतस्पृथुः (ऋ. ८।९८।४) (३६३४)

---

१. तै. सं. (५।२।१।७)—"तस्माद्यायावरः क्षेम्यस्येशे। तस्माद्यायावरः क्षेम्यमध्यवस्यति"; काठ. सं. (१९।१२)—"तस्माद्यायावरः क्षेमस्येशे। तस्माद्यायावरः क्षेम्यमध्यवस्यति" इति पाठः। संहिताद्वये 'क्षेम्यस्येशे', 'क्षेमस्येशे' इत्यत्र परस्परं भेदः।

२. तै सं. (७।४।१३।१)—"खन्याभ्यः" इत्युपलभ्यते।

३. लाश्रौ. (८।२।४)—"खान्यम्" इति प्राप्यते।

४. काशिकायाः केषुचित् संस्करणेषु "गार्मुतं चक्रम्" इति लेखः। स अनुपलब्धः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गिरिशः (मै. सं. २।६।२)	३।२।१५ (२९२९)
गीतिषु सामाख्या (जै. सूत्रम् २।१।३६)	(३६६३)
गीर्वान्—	८।२।१५ (३६००)
गुग्गुलूः (अथ. ४।३७।३)	४।१।७१ (३४४९)
गूर्तम्—	(३६०३)
गूर्ता अमृतस्य[1]—	८।२।६१
गृभाय जिह्वया मधु (ऋ. ८।१७।५)	३।१।८४ (३४३२)
गृभ्णामि ते (ऋ. १०।८५।३६)	(३४३२)
गृष्टिः ससूव स्थविरम् (ऋ. ४।१८।१०)	(३५९७)
गृहं गमेम (ऋ. १०।४०।११)	३।१।८६
गृहमेधीयम् (ऋ. ७।६६।१४)	४।२।३२
गृहमेध्यम् (काठ. सं. ३६।९)	४।२।३२
गृहान् जुगुप्तं युवम् (मै. सं. १।५।१४)	(३४०४)
गोजाः (ऋ. ४।४०।५)	१।१।७०; (३४१३)
गोधा कालका दार्वाघाटस्ते वनस्पतीनाम् (वा. सं. २४।३५)	३।२।६२ (३३९६)
गोपायतं नः (ऋ. ६।७४।४)	(३६५०; ३६७१)
गोभिरक्षाः (ऋ. ९।१०७।९)	७।३।९७ (३५८६); ५।२।२४
गोभ्यो गातुम् (ऋ. ८।४५।३०)	(३७२६)
गोमयः—	२।४।२१
गोमयम् (ऋ. १०।६२।२)	२।४।२१
गोमयानि प्रेष्य[2]	२।३।६१
गोषाः (ऋ. ९।२।१०)	८।३।१०६
गोषा इन्द्रो नृषा असि (ऋ. ९।२।१०)	३।२।६७ (३४१३); (३६४५)
गोष्टोमम् (तै. सं. ७।४।११।१)	(३६४२)
गोष्टोमं षोडशिनम्—	८।३।१०५
गोसनिं वाचमुदीरयन्[3]—	८।३।१०८

---

१. ऋ. (४।१९।८)—"गूर्ता वृत्रम्" इति दृश्यते।

२. शत. ब्रा. (१२।५।२।३)—"तासु गोमयानि च शुम्बलानि च चावधाय नाना त्रिष्वग्निषु प्रवृज्यात्" इति दृश्यते।

३. अथ. (३।२०।१०)—"गोसनिं वाचमुदेयम्" इति लभ्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गोसनिः (वा. सं. ८।१२)	(३८४५)
गोस्तोमं षोडशिनम्—	८।३।१०५
गोस्तोमम् —	(३६४२)
गौः पञ्चदाम्नी—	४।१।२६
गौरावस्कन्दिन् (श. ब्रा. ३।३।४।१८)	१।२।३७
गौरीं (च) (वृदे. २।८१)	६।१।१०७
गौर्यं (च) (ऋ. ४।१२।६)	६।१।१०७
ग्रभीता (अथ. १।१२।२)	८।२।३५
ग्रसितं वा एतत् सोमस्य (मै. सं. ३।७।४)	७।२।३५
ग्रहा गृह्यान्तै (तै. सं. ६।४।७।१)	(३४३०)
ग्रावग्राभ उत शंस्ता सुविप्रः (ऋ. १।१६२।५)	(३५८२)
ग्रीवायां बद्धो अपि कक्ष आसनि (ऋ. ४।४०।४)	६।१।१३३ : ६।१।१७१
ग्रैष्मी त्रिष्टुप् (काठ. सं. १६।१८)	४।१।८६
घनाघनः क्षोभणः (ऋ. १०।१०३।१)	(१५०)
घनाघनः क्षोभणश्चर्षणीनाम् (ऋ. १०।१०३।१)	६।१।१२; ८।३।३५
घस्तां[1] नूनम् (वा. सं. २१।४३)	२।४।३६ (३३६८)
घृतं दुह्रते (ऋ. १।१३४।६)	(३५५७)
घृतं मिमिक्षे (ऋ. २।३।११)	फि. १।२१—सि. कौ.
घृनपावा (अथ. १३।१।२४)	३।२।७४ (३४१८)
घृतस्य[2] यजते	२।३।६३ (३३६७)
घृतेन यजते—	२।३।६३ (३३६७)
चक्रा जरसम् (ऋ. १।१८६।६)	(३५३७)
चक्राणा वृष्णि (ऋ. ८।७।२३)	(३४१६)
चक्रीवन्ति[3] सदोहविर्धानानि भवन्ति	८।२।१२
चतसृणां[4] मध्यंदिने—	६।४।५

१ क्वचित् काशिकासिद्धान्तकौमुद्योः "घस्तान्नम्" इति लेखः।

२. तै. सं. (६।६।७।३)—"घृतस्य यजति" इत्युपलभ्यते। शं. ब्रा. (४।४।२।४)—"घृतस्य यज" इति पाठः।

३. आश्वश्रौ. (१२।६।५); काश्रौ. (२४।३।२६, २४।५।२६); आपश्रौ. (२३।१२।१३); हिश्रौ. (१८।४।२८); लाश्रौ. (१०।५।१३) —"चक्रीवन्ति सदोहविर्धानानि" इति दृश्यते। परं काशिकावद् वाक्यान्ते 'भवन्ति' इति पदं कुत्रापि नोपलभ्यते।

४. काठ. सं. (२७।१६)—"द्वयोर्वारयोः प्रातस्सवने गृह्णाति तिसृणां मध्यन्दिने चतसृणां तृतीयसवने ....." इति वर्तते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतसृणां मध्यंदिने—	६।४।५
चतुःस्तना (मै. सं. ३।१।७—चतुस्तना)	(३८९७)
चतुःस्तनां करोति पशूनां दोहाय (तै. सं. ५।१।६।४)	६।२।१६४
चतुरः कल्पयन्तः (ऋ. १०।११४।६)	(३६८२)
चतुरक्षौ पथिरक्षी (ऋ १०।१४।११)	(३४०८)
चतुष्टये ब्राह्मणानां निकेताः—	८।३।९९
चत्ता वर्षेण विद्युत्[1]	७।२।३४
चत्तौ इतश्चत्तामुतः (ऋ. १०।१५५।२)	(३५८२)
च न आ इन्द्रः—	१।१।८, ८।१।८
च नो दधीत नाद्यो गिरो मे (ऋ. २।३५।१)	४।३।१११ (३४५७)
(उशिग्दूतः) च नो हितः (ऋ. ३।११।२)	१।४।६०
चन्द्रमसि (वा. सं. ४।१८)	६।१।१५१
चरुरग्निवानिव (ऋ. ७।१०४।२)	८।२।१५
चषालं ये अश्वयूपाय तक्षति (ऋ. १।१६२।६)	७।१।३९; (३४३३)
चिकयामकः[2]	३।१।४२ (३४०३)
चिखाद[3]—	६।१।५२ (३५१३)
चिच्युषे (ऋ. ४।३०।२२)	६।१।३६ (३५१२)
चित्तं चिखाद—	६।१।५२
चित्तं चिखेद[4]—	६।१।५२
चित्पतिः (वा. सं. ४।४)	६।२।१९९
चेतन्ती सुमतीनाम् (ऋ. १।३।११)	(३७२३)
चोदयित्री सूनृतानाम् (ऋ. १।३।११)	(३७२०)
चौरꣳ चौरꣳ (?)	(३६१४)
जक्षिवान् (अथ. ४।७।३)	३।२।१०७; ७।२।६७ (३०९६)
जगतीच्छन्दः (वा. सं. २१।१८)	६।३।६३

---

१. पै. सं. (१७।१२।१०)—"च त्वा वर्षेण विद्युता" इति पाठः।

२. अस्य मूलस्थानं न प्राप्यते। द्र.—V. P. LIMAYE, *CCSM*, p 172.

३. संहितासु 'खाद' इति धातोः "चखाद" इति प्राप्यते, न तु 'खिद' इत्यस्मात् "चिखाद" इति प्रयोगः। विस्तरेण द्र.—W.D. WHITNEY, "The Veda in Pāṇini.". *Gioranale della Societa Asiatica Italiana* (*GSAI*), VOL. vii. p. 253 (Torino, Italia, 1893.)

४. अस्य मूलस्थानं न प्राप्यते। द्र.—*ibid*, p. 253.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जगत्यम् (काठ. सं. १।८)	(३४६८)
जगन्वान् (ऋ. ५।६४।१)	८।२।६५
जगुरिः पराचैः (ऋ. १०।१०८।१)	(३४३५; ३५७८)
जगृभ्मा ते दक्षिणमिन्द्र हस्तम् (ऋ. १०।४७।१)	७।२।६४ (३५८२)
जग्मिर्युवा (ऋ. ७।२०।१)	३।२।१७१ (३१५१); ३४३५
जघ्निवृँत्रम् (ऋ. ९।६१।२०)	३।२।१७१
जघ्निवृँत्रममित्रियम् (ऋ. ९।६१।२०)	(३१५१; ३४३५)
जजनत् (तै. ब्रा. २।२।३।५)	(३६७५)
जजनमिन्द्रम्[1]	६।१।१९२
(जजनमिन्द्र) माता यद्वीरं दधनन् धनिष्टा (ऋ. १०।७३।१)	७।४।७८
जजान गर्भं महिमानमिन्द्रम् (अथ. ३।१०।१२)	७।३।३५
जज्ञि वीजम् (तै. सं. ७।५।२०।१)	३।२।१७१ (३१५१)
जठरं पृणध्यै (ऋ. ६।६७।७)	(३४३६)
जतूः (मै. सं. ३।४६।६)	४।१।७१ (३४४९)
जनयिता (श. ब्रा. ३।९।४।२४)	६।४।५३
जनिमा[2] विवक्ति (ऋ. ९।९७।७)	२।४।७६; ७।४।७८
जनिष्ठा उग्रः (ऋ. १०।७३।१)	६।४।७५
जनिष्ठा उग्रः सहसे तुराय (ऋ. १०।७३।१)	(३५४६)
जनीयन्तोऽन्वग्रवः (ऋ. ७।९६।४)	७।४।३५ (३५८८)
जन्यं ताभिः[3]—	५।४।२५
जभ्रिरे (ऋ. १।७२।४)	८।२।३५
जयन्तीनां मरुतो यन्तु (ऋ. १०।१०३।८)	६।२।१७८ (३७२४)
जरसा मरते पतिः (ऋ. १०।८६।११)	(३४३३)
जरसे त्वा परिदद्युः[4]	७।२।१०१

---

१. मै. सं. (१।९।१)—"जजनदिन्द्रमिन्द्रियाय", तै. ब्रा. २।२।३।५)—"जजनदिन्द्रमिन्द्राय···" इति दृश्यते।

२. काशिकायाः संस्करणान्तरेषु "जनिमा विभक्ति" इति लेखः।

३. अथ. (१३।७।१५)—"यद्वा जन्यमवीवृधः"; तै. ब्रा. (१।२।१।१३)—"जन्यं जातवेदसम्", (१।३।१०।६)—"जन्यमन्नमद्यात्", (३।७।७।१४)—'अप जन्यं भयं नुद" इति वचन नि दृश्यन्ते।

